अनन्तनिर्देशवरं समाधिं धर्मासनस्थो मुनिश्रेष्ठ ध्यायी॥ ६१॥
दिव्यं च मान्दारवपुष्पवर्षमासीदवकीर्णा डुन्डुभयश्च नेदुः।
देवाश्च नागाश्च स्थितान्तरीक्षे कुर्वन्ति पूजां द्विपदोत्तमस्य॥ ६२॥
सर्वं च क्षेत्रं[9] प्रचचाल तत्क्षणमाश्चर्यमभ्यद्भुतमासि तच्च।
रश्मिं च एकां प्रमुमोच नायको भुवान्तरान्तामतिदर्शनीयां॥ ६३॥

1) अचिन्तिके O. अचिन्तये the rest.
2) तस्मिं Ca.
3) आसीत् A.
4) All पेती.
5) कामां लघु A. K. W. काम B.
6) MSS. प्रबुध्यति and प्रबुध्यते.
7) कोट्यः B.
8) स्मिं A. Cb.
9) सर्वे च क्षेत्राः B. Ca. K. W.

पूर्वां च गत्वा दिश सा हि रश्मिरष्टादशक्षेत्रसकल्पपूर्णाः ।
प्रभासयं[1] धाजति सर्वलोकं दर्शेति सत्त्वान च्युतोपपादं ॥ ६४ ॥
रत्नामया क्षेत्र तथात्र केचिद्वैडूर्यनिर्भास तथैव केचित् ।
दृश्यन्ति चित्रा अतिदर्शनीया रश्मिप्रभासेन[2] विनायकस्य ॥ ६५ ॥
देवा मनुष्यास्तथ नागयक्षा गन्धर्व तत्राप्सरकिंनराश्च ।
ये चाभिपुक्ताः सुगतस्य पूजया दृश्यन्ति पूजेन्ति च लोकधातुषु ॥ ६६ ॥
बुद्धाश्च दृश्यन्ति स्वयं स्वयंभुवः सुवर्णयूपा इव दर्शनीयाः ।
वैडूर्यमध्ये वं[3] सुवर्णबिम्बं पर्षाय मध्ये प्रवदन्ति धर्मम् ॥ ६७ ॥
[4]तेहि श्रावकाणां गणना न विद्यते ते चाप्रमाणाः सुगतस्य श्रावकाः ।
एकैकक्षेत्रस्मिं[5] विनायकानां रश्मिप्रभा दर्शयते हि सर्वान् ॥ ६८ ॥
वीर्येरुपेताश्च अखण्डशीला अच्छिद्रशीला मणिरत्नसादृशाः ।
दृश्यन्ति पुत्रा नरनायकानां विकुर्वन्ति ये पर्वतकन्दरेषु ॥ ६९ ॥
सर्वस्वदानानि परित्यजन्तः क्षान्तीबला ध्यानरताश्च धीराः ।
बुद्धबोधिसत्त्वा पथ गङ्गवालिकाः सर्वे ऽपि[6] दृश्यन्ति तथा हि रश्म्या ॥ ७० ॥
अनिञ्जमानाश्च अवेधमानाः[7] क्षान्तौ स्थिता ध्यानरताः समाहिताः ।
दृश्यन्ति पुत्राः सुगतस्य औरसा ध्यानेन ते प्रस्थित अग्रबोधिम् ॥ ७१ ॥
भूतं पदं शान्तमनास्रवं च प्रजानमानाश्च प्रकाशयन्ति ।
देशेन्ति धर्मं बुद्धलोकधातुषु सुगतानुभावादियमीदृशी क्रिया ॥ ७२ ॥

1) प्रकाशयं B. प्रभासयो O.
2) वे A.
3) च Cb. K. W. व A. B.
4) त B. Ca. K. W. O. ते A. Cb.
5) स्मिं K. W.
6) हि B. Cb. K. W. पि A.
7) न्त A.

दृष्ट्वा च ता पर्ष चतस्र तायनश्चन्द्रार्कदीपस्य इमं प्रभावम् ।
हर्षस्थिताः सर्वि भवित्व तत्क्षणमन्योन्य पृच्छन्ति कथं नु एतत् ॥ ७३ ॥
अचिराच्च सो नरमरुपत्तपूजितः समाधितो व्युत्थित लोकनायकः ।
वरप्रभं पुत्र तदाध्यभाषत यो बोधिसत्त्वो विदु धर्मभाणकः ॥ ७४ ॥
लोकस्य चक्षुश्च गतिश्च त्वं विदुर्वैश्यासिको धर्मधरश्च मह्यम् ।
त्वं क्षत्र साक्षी मम धर्मकोशे यथाक्ष भाषिष्यि[1] हिताय प्राणिनाम् ॥ ७५ ॥
संस्थापयित्वा बुद्धबोधिसत्त्वान्हर्षित्व संवर्णिय संस्तवित्वा ।
प्रभाषते तञ्जिनं[2] अग्रधर्मान्परिपूर्ण सो अक्षरकल्पषष्टिम् ॥ ७६ ॥
यं चैव सो भाषति लोकनाथो[3] एकासनस्थः प्रवराग्रधर्मम् ।
तं सर्वमाधारयि[4] सो जिनात्मजो वरप्रभो यो अभु धर्मभाणकः ॥ ७७ ॥
सा चो[5] जिनो भाषिय अग्रधर्मं प्रहर्षयित्वा जनतामनेकाम् ।
तस्मिंश्च दिवसे वदते स नायकः पुरतो हि लोकस्य सदेवकस्य ॥ ७८ ॥
प्रकाशिता मे इय धर्मनेत्री आचक्षितो धर्मस्वभाव[6] यादृशः ।
निर्वाणकालो मम अद्य भित्तवो रात्रीय यामस्मि[7] हु मध्यमस्मिन् ॥ ७९ ॥
भवथाप्रमत्ता अधिमुक्तिसारा अभियुज्यथा मह्य इमस्मि शासने ।
सुदुर्लभा भोन्ति जिना महर्षयः कल्पान कोटीनयुतान अत्ययात्[8] ॥ ८० ॥

1) ष्ये A. ष्यि Ca. K. W. In O. left out यथाक्ष; further it has भाषिष्यक्षं य क्षित सर्वप्रा°.
2) प्रकाशयी सो जिन O.
3) थ Ca. थः A. थो B. Cb. K. W. नायक O.
4) धार A. B. राध Ca. Cb. K. W.
5) सोच Ca. Cb. सो च A. B. W. सो चञ्जिनो K. स च O.
6) व left out in A.
7) म left out in A. स्मि हु मध्यम left out in K. W.
8) अभ्य B. K. अत्ययेे O.

संतापजाता बकुबुद्धपुत्रा दुःखेन चोग्रेण समर्पितभवन्।
श्रुत्वा न[1] घोषं द्विपदोत्तमस्य निर्वाणशब्दं अतितृप्तिप्रमेतत्॥ ८१॥
आश्वासयित्वा च नरेन्द्रराजा यो[2] प्राणकोट्यो बकुवो अचित्तियाम[3]ः।
मा भायथ[4] भिक्षव निर्वृते मयि भविष्यथ[5] बुद्ध ममात्तरेण॥ ८२॥
अग्रीगर्भ एषो विदु बोधिसत्त्वो गतिंगतो ज्ञानि[6] अनास्रवस्मि[7]न्।
स्पृशिष्यते उत्तममग्रबोधिं विमलाग्रनेत्रो ति जिनो भविष्यति[8]॥ ८३॥
तामेव रात्रिं तद यामि मध्यमे परिनिर्वृतो केतुमतये व दीपः।
शरीर[9]वैस्तारिकु[10] तस्य चाभूत्स्तूपान कोटीनयुता अनल्पका[11]॥ ८४॥
भिनू बह्वू[12] तथ पि च भिनुणीयो ये प्रस्थिता उत्तममग्रबोधिम्।
अनल्पकास्ते यथ गङ्गवालिका अभियुक्त तस्य[13] सुगतस्य शासने॥ ८५॥
यशापि भिनुस्तद धर्मभाणको वरप्रभो येन स धर्म[14] धारितः।
अशोति सो अत्तरकल्पपूर्णा तद्धि[15] शासने भाषति अग्रधर्मान्॥ ८६॥
अष्टाशतं तस्य अभूषि शिष्याः परिपाचिता ये तद तेन सर्वे[16]।

1) O. हि; the rest च for न.
2) ये Ca. Cb; the rest ता.
3) All but O. त्तियाम्.
4) All but O. था.
5) O. था, the rest ते.
6) न A. Cb. K. W. ति B. नि Ca.
7) All but et अवे ऽस्मिन्.
8) O. त्रिनुनाम भेष्यति.
9) रु B.
10) क B. O.
11) All but O. काः.
12) भिनूश्च तत्र A. K.
13) पि च in Cb. only.
14) सद्धर्म A. K.
15) स्तद्धि A. न हि B. तद् Cb. तद्धि K. O. तद्दि W.
16) O. सर्वि तेन; the others नेन for तेन.

दृष्ट्वा[1] च तेभिर्बकुबुद्धकोट्यः सत्कार[2] तेषां च कृतो महर्षिणाम्॥ ८७॥
चर्यां चरित्वा तद् अनुलोमिकीं बुद्धा अभूवन्बकुलोकधातुषु।
परस्परं ते च अनन्तरेण अन्योन्य व्याकर्षु तदाग्रबोधये॥ ८८॥
तेषां च बुद्धान परंपरेण दीपंकरः पश्चिमको अभूषि।
देवातिदेवो ऋषिसंघपूजितो विनीतवान्प्राणि[3]सहस्रकोट्यः॥ ८९॥
यशामि तस्य सुगतात्मजस्य वरप्रभस्य तद धर्म भाषतः।
शिष्यः कुसीदश्च स लोलुपात्मा लाभं च ज्ञातं[4] च गवेषमाणः॥ ९०॥
यशोऽर्थिकश्चाप्यतिमात्र आसीत्कुलाकुलं च प्रतिपन्नमासीत्[5]।
उद्देशस्वाध्यायु तथास्य सर्वो न तिष्ठते भाषितु तस्मि[6] काले॥ ९१॥
नामं च तस्य इममेवमासीद्यशकामनाम्ना दिशतासु विश्रुतः।
स चापि तेनो[7] कुशलेन कर्मणा कल्पाष[8] भूतेनभिसंस्कृतेन॥ ९२॥
आराधयी[9] बुद्धसहस्रकोट्यः पूजां च तेषां विपुलामकार्षीत्।
चीर्णा च चर्या वर अनुलोमिको दृष्टश्च[10] बुद्धो[11] अपु शाक्यसिंहः॥ ९३॥
अयं च सो पश्चिमको भविष्यति अनुत्तरां लप्स्यति चाग्रबोधिम्।
मैत्रेयगोत्रो भगवान्भविष्यति विनेष्यति प्राणसहस्रकोट्यः॥ ९४॥

1) All दृष्ट्वा.
2) O. र्.
3) O. प्राण, preferable.
4) O. ज्ञात्रं.
5) O. °चीर्णमासि.
6) तस्मिं A. K. W.
7) तेनो A. तेन B. Ca. O. तेना Cb. K. W
8) कर्माय B.
9) धयी O.
10) किं A. की B. Ca. Cb. कां K. W. का O.
11) ष्टं च B. ष्टाश्च A. W. ष्टो च O.
12) O. ते, the others तौ.

कौसीद्यप्राप्तस्तद् यो बभूव पारंनिर्वृतस्य सुगतस्य शासने।
त्वमेव सो तादृशको बभूव अर्कं च आसीत्तद् धर्मभाणकः॥ ९५॥
इमेन[1] कं कारणकेतुनाद्य दृष्ट्वा निमित्तं इदमेवद्रूपम्।
ज्ञानस्य तस्य प्रथितं निमित्तं प्रथमं मया तत्र वदामि दृष्टम्[2]॥ ९६॥
धुवं जिनेन्द्रो ऽपि समत्तचक्षुः शाक्याधिराजः परमार्थदर्शी।
तमेव यं[3] इच्छति भाषणाय पर्यायमग्रं[4] तद् यं मया श्रुतम्॥ ९७॥
तेदेव[5] परिपूर्णनिमित्तमद्य उपायकौशल्य विनायकानाम्।
संस्थापनं कुर्वति शाक्यसिंहो भाषिष्यते धर्मस्वभावमुद्राम्॥ ९८॥
प्रयता सुचित्ता भवथा कृताञ्जली भाषिष्यते[6] लोकहितानुकम्पी।
वर्षिष्यते धर्ममनत्तवर्षं तर्पिष्यते ये स्थित बोधिकेतोः॥ ९९॥
येषां च संदेहगतीह काचिद्ये संशया[7] या विचिकित्स काचित्।
व्यपनेष्यते ता विदुरात्मज्ञानां ये बोधिसत्त्वा इह बोधिप्रस्थिताः[8]॥ १००॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये निदानपरिवर्तो नाम प्रथमः॥[9]

1) तर्हि A. left out in K. W.
2) दृष्टन् K. W.
3) O. च.
4) पर्षार्या A.
5) मे A. Cb. K. दे B. Ca. W.
6) ष्यति O.
7) All but O. संशयाका.
8) Thus O.; the rest तां.
9) B. adds इति.
10) इति in A. K. W. आर्य in B. Cb. The title in O. is सद्धर्मपुण्डरीके वरप्रवरमहारत्नवैतुल्यसूत्रे.

II.

अथ खलु भगवान्स्मृतिमान्संप्रज्ञानस्ततः[1] समाधेर्व्युत्थितो व्युत्थायायुष्मन्तं शारिपुत्रमामन्त्रयते स्म[2]। गम्भीरं शारिपुत्र दुर्दृशं दुरनुबोधं बुद्धज्ञानं तथागतैरर्हद्भिः सम्यक्संबुद्धैः प्रतिबुद्धं दुर्विज्ञेयं सर्वश्रावकप्रत्येकबुद्धैः। तत्कस्य हेतोः। बहुबुद्धकोटीनयुतशतसहस्रपर्युपासिताविनो हि[3] शारिपुत्र तथागता अर्हन्तः सम्यक्संबुद्धा बहुबुद्धकोटीनयुतशतसहस्रचीर्णचरिताविनो[4] ऽनुत्तरायां सम्यक्संबोधौ दूरानुगताः कृतवीर्या आश्चर्याद्भुतधर्मसमन्वागता दुर्विज्ञेयधर्मसमन्वागता दुर्विज्ञेयधर्मानुज्ञाताविनः[5]॥

दुर्विज्ञेयं शारिपुत्र संधाभाष्यं तथागतानामर्हतां सम्यक्संबुद्धानाम्। तत्कस्य हेतोः। स्वप्रत्ययान्धर्मान्प्रकाशयन्ति विविधोपायकौशल्यज्ञानदर्शनहेतुकारणनिर्देशनारुतवाक्यनिरुक्तिप्रज्ञप्तिभिस्तैस्तैरुपायकौशल्यैस्तस्मिंस्तस्मिँल्लगनान्सत्त्वान्प्रमोचयितुम्[6]। महोपायकौशल्यज्ञानदर्शनपरमपारमिताप्राप्ताः[7] शारिपुत्र तथागता अर्हन्तः सम्यक्संबुद्धाः। अमङ्गप्रतिकृतज्ञानदर्शनबलवैशारद्यावेणिकेन्द्रियबलबोध्यङ्गध्यानविमोक्षसमाधिसमापत्त्यद्भुतधर्मसमन्वागता विविधधर्मसंप्रकाशकाः[8]। महाश्चर्याद्भुतप्राप्ताः शारिपुत्र तथागता[9]

1) संप्रजानस्ततः A. B. Ca. Cb. O. K. संप्रज्ञातवान् ततः W.
2) यामास A. K. W. O.
3) नि A. Ca. Cb. W.
4) All but B. O. ति.
5) नु left out in B. Ca. Cb.
6) निर्देशन left out in B. Ca. Cb.
7) वि Cb. K.
8) K. W. add ज्ञान before कौशल्य.
9) समाधि left out in K. O.
10) शयका B.
11) Cb. adds ते.

अर्हन्तः सम्यक्संबुद्धाः। अलं शारिपुत्र एतावदेव भाषितं भवतु परमाश्चर्यप्राप्ताः शारिपुत्र तथागता अर्हन्तः सम्यक्संबुद्धाः। तथागत एव शारिपुत्र तथागतस्य धर्मं देशयेय्यान्धर्मांस्तथागतो[1] जानाति। सर्वधर्मानपि शारिपुत्र तथागत एव देशयति। सर्वधर्मानपि तथागत एव[2] जानाति। ये च ते धर्मा यथा च ते धर्मा यादृशाश्च ते धर्मा यल्लक्षणाश्च ते धर्मा यत्स्वभावाश्च ते धर्माः। ये च यथा च यादृशाश्च यल्लक्षणाश्च यत्स्वभावाश्च ते धर्मा इति। तेषु धर्मेषु तथागत एव प्रत्यक्षो ऽपरोक्षः[3]॥

अथ खलु भगवानेतमेवार्थं भूयस्या मात्रया संदर्शयमानस्तस्यां वेलायामिमा गाथा अभाषत॥

अप्रमेया[4] महावीरा लोके समेरुमानुषे।
न शक्यं सर्वशो ज्ञातुं सर्वसत्त्वैर्विनायकाः॥ १॥
बला विमोक्षाश्च ये[5] तेषां वैशारद्याश्च यादृशाः।
यादृशा बुद्धधर्माश्च न शक्यं ज्ञातुं[6] केनचित्॥ २॥
[7]पूर्वं निषेविता चर्या बुद्धकोटीन[8] अन्तिके।
गम्भीरा[9] चैव सूक्ष्मा च दुर्विज्ञेया सुदुर्दृशा॥ ३॥
तस्यां चीर्णाय चर्यायां कल्पकोट्यो अचिन्तिया।
फलं मे बोधिमण्डस्मिन्[10] दृष्टं यादृशकं किं तत्॥ ४॥

1) O. त एव जानीते.
2) एवं K. W.
3) From तेषु till °रोक्षः in O. K. W. only.
4) य Ca.
5) ये left out in A.
6) ज्ञातुं A.
7) पूर्वं O. K. पूर्व B. Ca. Cb.
8) म° Cb. K. W. सा° O., preferable.
9) रं A.
10) All but O. ण्डेऽस्मि.

अर्हं च तत्प्रजानामि ये चान्ये लोकनायकाः।
यथा यद्यादृशं चापि लक्षणं चास्य यादृशम्॥ ५॥
न तद्दर्शयितुं शक्यं व्याकारो ऽस्य न विद्यते।
नाप्यसौ तादृशः कश्चित्सत्त्वो[1] लोके ऽस्मिं[2] विद्यते॥ ६॥
यस्य[3] तं देशयेद्धर्मं देशितं[4] चापि जानियात्।
अन्यत्र बोधिसत्त्वेभ्यो अधिमुक्तीय[5] ये स्थिताः॥ ७॥
ये चापि ते लोकविदुष्य श्रावकाः कृताधिकाराः सुगतानुवर्णिताः।
क्षीणास्रवा अन्तिमदेहधारिणो न तेष विषयो ऽस्ति जिनान ज्ञाने॥ ८॥
सचेव सर्वा इय लोकधातु[6] पूर्णा[7] भवेच्छारिसुतोपमानाम्।
एकोभवित्वानुविचिन्तयेयुः सुगतस्य ज्ञानं न किं[8] शक्य ज्ञानितुम्॥ ९॥
सचे क्व चंसादृशकेकि पण्डितैः पूर्णा भवेयुर्दश पिद्दिशायो[9]।
ये चापि मह्यं इमि श्रावका ऽन्ये तेषां पि पूर्णा भवि एवमेव॥ १०॥
एकोभवित्वान च ते ऽस्य सर्वे विचिन्तयेयुः सुगतस्य ज्ञानम्।
न शक्त[10] सर्वे सकृता पि ज्ञातुं यच्चाप्रमेयं मम बुद्धज्ञानम्॥ ११॥

1) सर्वो A. B. Ca. W. सर्वे Cb. सत्त्वो K.
2) स्मिं A. K. W. स्मि B. ऽस्मि Cb. Probably to r. लोकस्मि.
3) All but K. W. यस्य.
4) वा B. Ca.
5) मुक्तौ कि in all but O.
6) धातुं O., the rest धातुषु.
7) पूर्णो B. पूर्णा O.
8) तु A. ते O.
9) दिशश्चसेषाः K. W.
10) All but O. शक्य.

प्रत्येकबुद्धान अनास्रवाणां तीक्ष्णेन्द्रियाणात्तिमदेकधारिणाम्।
दिशो दश[1] सर्व भवेयु पूर्णा यथा नडानां वनवेणुनां वा ॥ १२ ॥
एकीभवित्वान विचित्तयेयुर्ममाग्रधर्माण प्रदेशमात्रम्।
कल्पान कोटीनयुताननन्तान तस्य भूतं परिजानि अर्थम् ॥ १३ ॥
नवयानसंप्रस्थित बोधिसत्त्वाः कृताधिकारा बहुबुद्धकोटिषु।
सुविनिश्चितार्था बहुधर्मभाणकास्तेषां पि पूर्णा दृशिमा दिशो भवेत् ॥ १४ ॥
नडान वेणून च नित्यकालम् अच्छिद्रपूर्णो भवि सर्वलोकः।
एकीभवित्वान विचित्तयेयुर्यो धर्म साक्षात्सुगतेन दृष्टः ॥ १५ ॥
अनुचित्तपित्वा बहुकल्पकोट्यो गङ्गा यथा वालिका अप्रमेयाः।
अनन्यचित्ताः[2] सुखमाय प्रज्ञया तेषां पि चास्मिन्विषयो न विद्यते[3] ॥ १६ ॥
अविवर्तिका ये भवि बोधिसत्त्वा[4] अनल्पका यथरिव गङ्गवालिकाः[5]।
अनन्यचित्ताश्च विचित्तयेयुस्तेषां पि चास्मिन्विषयो[6] न विद्यते ॥ १७ ॥
गम्भीरधर्मा सुखमा पि बुद्धा अतर्किकाः सर्वि अनास्रवाश्च।
अहं च जानामि कु[7] यादृशा कि ते ये वा जिना लोकि दशदिशासु ॥ १८ ॥
यं शारिपुत्र सुगतः प्रभाषते अधिमुक्तिसंपन्न भवाहि[8] तत्र।
अनन्यथावादि जिनो महर्षी चिरेण पि[9] भाषति उत्तमार्थम् ॥ १९ ॥

1) MSS. दशः.
2) त्ताः K. W. त्ता A. B. Ca. Cb.
3) चात्र A. B. Ca. Cb. W. O. चास्मिं K.
4) This quarter is left out in B.
5) काः K. W. का A. B. Ca. Cb.
6) चास्मिं A. K.
7) कु A. कि K. W.
8) नु भवाहि O., the others °त्र गवेमि (a misread भवेहि).
9) All but O. पी.

आमन्त्रयामि इमि[1] सर्वश्रावकान्प्रत्येकबोधाय च ये ऽभिप्रस्थिताः।
संस्थापिता[2] ये मम[3] निर्वृतोय[4] संमोक्षिता दुःखपरंपरातः[5] ॥ २० ॥
उपायकौशल्य ममेतदद्यं भाषामि धर्मं बहु येन लोके।
तत्रिं तत्रिं लग्न प्रमोचयामि त्रीणी[6] च यानान्युपदर्शयामि ॥ २१ ॥

अथ खलु ये तत्र पर्षत्संनिपाते[7] महाश्रावका आज्ञातकौण्डिन्यप्रमुखा अर्हन्तः क्षीणास्रवा द्वादशवशीभूतशतानि ये चान्ये श्रावकपानिका भिक्षुभिक्षुण्युपासकोपासिका ये च प्रत्येकबुद्धयानसंप्रस्थिताः तेषां सर्वेषामेतदभवत्। को नु हेतुः किं कारणं यद्भगवानधिमात्रमुपायकौशल्यं तथागतानां संवर्णयति। गम्भीरश्चायं मया[8] धर्मो ऽभिसंबुद्ध[9] इति संवर्णयति। दुर्विज्ञेयश्च सर्वश्रावकप्रत्येकबुद्धैरिति संवर्णयति। यथा[10] तावद्भगवता एकैव विमुक्तिराख्याता वयमपि बुद्धधर्माणां लाभिनो निर्वाणप्राप्ताः। अस्य च[11] वयं भगवतो भाषितस्यार्थं न जानीमः ॥

अथ खल्वायुष्माञ्शारिपुत्रस्तासां चतसृणां पर्षदां विचिकित्साकथंकथां विदित्वा चेतसैव चेतःपरिवितर्कमाज्ञायात्मना च धर्मसंशयप्राप्तस्तस्यां[12] वेलायां[13] भगवन्तमेतदवो-

1) इमि A. O. इम B. Cb. K. W. इमु Ca.
2) संप्रस्थिता A.
3) मयि Ca. K. मय O.
4) All but O. निर्वृतौ हि.
5) परांपरांतः A. परंपरातः B. Cb. परंपरात् K. परंपरांतः W. परंपराय O.
6) त्रीणि Cb. त्रयश्च O.
7) तत्र पर्षदि ये ते A. °पाते Cb. K. W. तस्यां परिषदि ये ते O.
8) In A. only, मे in O.; cp. p. 34, l. 4.
9) अभि left out in K. W.
10) यदा B. Ca. Cb. K. W. यथा A. यदिदानीं O.
11) Left out in K. W. O. has अतो वयमस्य.
12) ज्ञाय ता आ A.
13) ला in all MSS.

चत्। को भगवन्हेतुः कः प्रत्ययो यद्भगवानधिमात्रं पुनः पुनस्तथागतानामुपायकौशल्य-ज्ञानदर्शनधर्मदेशनां संवर्णयति। गम्भीरश्च मे धर्मो ऽभिसंबुद्ध इति। दुर्विज्ञेयं च संधाभाष्यमिति पुनः पुनः संवर्णयति। न च मे भगवतो ऽत्तिकादेवंरूपो धर्मपर्यायः श्रुतपूर्वः। इमाश्च भगवंश्चतस्रः पर्षदो विचिकित्साकथंकथाप्राप्तास्तत्साधु भगवान्निर्दिशतु यत्संधाय तथागतो गम्भीरस्य तथागतधर्मस्य पुनः पुनः संवर्णनां करोति॥

अथ खल्वायुष्माञ्शारिपुत्रस्तस्यां वेलायामिमा गाथा अभाषत॥

चिरस्याद्य नरादित्य ईदृशीं कुरुते कथाम्।
बला विमोक्षा ध्यानाश्च अप्रमेया मि स्पर्शिताः॥ २२॥
बोधिमण्डं च कीर्तेसि पृच्छकस्ते न विद्यते।
संधाभाष्यं च कीर्तेसि न च त्वां कश्चि पृच्छति॥ २३॥
अपृच्छितो व्याकरसि चर्यां वर्णेसि चात्मनः।
ज्ञानाधिगमं कीर्तेसि गम्भीरं च प्रभाषसे॥ २४॥
अद्येमे संशयप्राप्ता वशीभूता अनास्रवाः।
निर्वाणं प्रस्थिता ये च किमेतद्भाषते जिनः॥ २५॥

1) दर्शन in Cb. दर्शनं in O.; omitted in the rest.
2) इमां A. B. Ca. Cb. इमाश्च K. W.
3) यत्सन्धा A. Ca. K. W. यत्संधाय B. O. यत्संध्याभाष Cb.
4) O. दित्यो.
5) कश्चित् B. Cb. K. W.
6) र O. A. B. K. W. रे Cb.
7) All but O. चर्या.
8) मं A. K. W. म B. Cb. मा Ca.
9) All अद्य मे.
10) म K. W. क्ष O. The *m* and *hi* to avoid hiatus.

प्रत्येकबोधिं प्रार्थेत्ति भिक्षुण्यो भिक्षवस्तथा।
देवा नागाश्च यक्षाश्च गन्धर्वाश्च महोरगाः॥ २६॥
समालपन्तो ह्यन्योन्यं प्रेक्षन्ते द्विपदोत्तमम्।
कथंकथी विचिकित्सा व्याकुरुष्व महामुने॥ २७॥
यावन्तः श्रावकाः सन्ति सुगतस्येह सर्वशः।
अरुमत्र पारमीप्राप्तो निर्दिष्टः परमर्षिणा॥ २८॥
ममापि संशयो ह्यत्र स्वके स्थाने नरोत्तम।
किं निष्ठा मम निर्वाणे अथ चर्या मि दर्शिता॥ २९॥
प्रमुञ्च घोषं वरदुन्दुभिस्वरो उदाहरस्व यथ एष धर्मः।
इमे स्थिता पुत्र जिनस्य औरसा व्यवलोकयन्तश्च कृताञ्जली जिनम्॥ ३०॥
देवाश्च नागाश्च सयक्षरांक्षसाः कोटीसहस्रा यथ गङ्गवालिकाः।
ये चापि प्रार्थेन्ति समग्रबोधिं सहस्रशीतिः परिपूर्ण ये स्थिताः॥ ३१॥
राजान ये मार्क्षपति चक्रवर्तिनो ये आगताः क्षेत्रसहस्रकोटिभिः।
कृताञ्जली सर्वि सगौरवाः स्थिताः कथं नु चर्या परिपूरयेम॥ ३२॥

1) धिं A. K.
2) All but O. प्रार्थेति.
3) O. प्रेक्षन्ति, the rest प्रेक्ष्यन्ते.
4) था B. Cb. K. W.
5) च for वि A. K. W.
6) ति O. तां Cb. ता the rest.
7) All but O. मिता.
8) ताः A. B. Ca. Cb. ता K. W. O.
9) रा A. K. W. राः B. रो Cb. र O.
10) एक A. K. W.
11) क्षी W.
12) इति added in A. K. W. येत् B.

एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। अलं शारिपुत्र। किमनेनार्थेन भाषितेन। तत्कस्य हेतोः। उत्त्रसिष्यति[1] शारिपुत्रायं सदेवको लोको ऽस्मिन्नर्थे व्याक्रियमाणे॥

द्वितीयकमप्यायुष्माञ्शारिपुत्रो[2] भगवन्तमध्येषते स्म। भाषतां भगवान्भाषतां[3] सुगतः[4] एतमेवार्थम्। तत्कस्य हेतोः। सन्ति भगवंस्तस्यां पर्षदि बहूनि प्राणिशतानि[5] बहूनि प्राणिसहस्राणि बहूनि प्राणिशतसहस्राणि बहूनि प्राणिकोटीनियुतशतसहस्राणि[6] पूर्वबुद्धदर्शावीनि[7] प्रज्ञावन्ति[8] यानि[9] भगवतो भाषितं श्रद्धास्यन्ति प्रतीषिष्यन्त्युद्ग्रहीष्यन्ति॥

अथ खल्वायुष्माञ्शारिपुत्रो भगवन्तमनया गाथयाध्यभाषत[11]॥

विस्पष्टु भाषस्व जिनान उत्तमो[12] सन्तीह पर्षाय सहस्र प्राणिनाम्।
आद्धाः[13] प्रसन्नाः सुगते सगौरवा ज्ञास्यन्ति ये धर्ममुदाहृतं ते॥ ३३॥

अथ खलु भगवान्द्वितीयकमप्यायुष्मन्तं[14] शारिपुत्रमेतदवोचत्। अलं शारिपुत्रानेनार्थेन प्रकाशितेनोत्त्रसिष्यति शारिपुत्रायं सदेवको[1] लोको ऽस्मिन्नर्थे व्याक्रियमाणो[2] ऽभिमानप्राप्ताश्च भिक्षवो महाप्रपातं प्रपतिष्यन्ति॥

अथ खलु भगवांस्तस्यां वेलायामिमां गाथामभाषत॥

अलं हि धर्मेणिह भाषितेन सूक्ष्मं इदं ज्ञानमतर्किकं च।
अभिमानप्राप्ता[3] बकु सन्ति बाला निर्दिष्टधर्मस्मि[4] क्षिपे[5] अज्ञानकाः[6]॥ ३४॥

त्रितीयकमप्यायुष्माञ्शारिपुत्रो[7] भगवन्तमध्येषते[8] स्म। भाषतां[9] भगवान्भाषतां[9] सुगत एतमेवार्थम्[10]। मादृशानां[11] भगवन्निह पर्षदि बहूनि प्राणिशतानि संविद्यन्ते ऽन्यानि च भगवन्बहूनि प्राणिशतानि[12] बहूनि प्राणिसहस्राणि बहूनि प्राणिशतसहस्राणि बहूनि प्राणिकोटीनियुतशतसहस्राणि[13] यानि भगवता पूर्वभवेषु परिपाचितानि तानि भगवतो भाषितं श्रद्धास्यन्ति प्रतीषिष्यन्त्युद्ग्रहीष्यन्ति[14]। तेषां तद्भविष्यति दीर्घरात्रमर्थाय हिताय सुखायेति॥

1) उत्त्रंस्यति A. K. W. संत्रासमापत्स्यतीह O.
2) द्वि for द्वै B. Ca. द्विरप्य O.
3) षंतु B. षतु O.
4) All गतैन or गतैत. — एव om. in O.
5) O. प्राण.
6) नि in all but Cb. O.
7) वंति B. विनः A. K. W. O. वोनि Cb.
8) वत्तः A. K. W.
9) ये च A. K. W.
10) प्रतीषिष्यन्ति left out in B. पत्तीषिष्य° O.
11) व्य A. K. प्य B. घ Cb. न्य W. या भा° O.
12) नरेन्द्रराजा K. W. जिनेन्द्रराजा O.
13) MSS. श्रद्धा and श्रद्धाः.
14) द्वि for द्वै B. द्विरप्य O.

1) को in Cb. O. only.
2) ऽभि B. Ca. Cb. ऽधि A. K. W. O.
3) ऽभि B. Ca. Cb. K. W. ऽधि A.
4) र्मे A. Cb. K. W.
5) स्मिं A. K. W.
6) पेत् Ca. पत्य O.
7) तृतो B. K.
8) A. K. W. add भा.
9) तु B. K. K. O.
10) All गतै. एव om. in O.
11) मत्सद् O. यादृ B. Cb. K.
12) प्राण O. throughout.
13) All but Cb. नियत, which is om. in O.
14) पत्तीयि O.

अथ खल्वायुष्माञ्शारिपुत्रस्तस्यां वेलायामिमा गाथा अभाषत ॥

भाषस्व धर्मं द्विपदानमुत्तमं[1] अहं त्वमध्येषमि ज्येष्ठपुत्रः।
सत्तोह प्राणीन[2] सहस्रकोट्यो ये श्रद्दधास्यन्ति ते[3] धर्म भाषितं ॥ ३५ ॥
ये च त्वया पूर्वभवेषु नित्यं परिपाचिता सत्र सुदीर्घरात्रम्।
कृताञ्जलो ते पि स्थितात्र सर्वे ये श्रद्दधास्यन्ति तवैत धर्मम्[4] ॥ ३६ ॥
अस्मादृशा द्वादशिमे[5] शताश्च ये चापि ते[6] प्रस्थित अग्रबोधये।
तान्पश्यमानः सुगतः प्रभाषतां[7] तेषां च हर्षं परमं जनेतु ॥ ३७ ॥

अथ खलु भगवांस्त्रैतीयकमप्यायुष्मतः शारिपुत्रस्याध्येषणां[8] विदित्वायुष्मन्तं शारिपुत्रमेतदवोचत्। यदिदानीं त्वं शारिपुत्र यावत्त्रैतीयकमपि तथागतमध्येषसे। एवमध्येषमाणं त्वां शारिपुत्र[9] किं वक्ष्यामि। तेन हि शारिपुत्र शृणु साधु च सुष्ठु च मनसिकुरु ॥ भाषिष्ये ऽहं ते ॥

समनन्तरभाषिता चेयं भगवता वाग्अथ खलु ततः पर्षद् आभियोगिकानां[10] भिक्षूणां भिक्षुणीनामुपासकानामुपासिकानां पञ्चमात्राणि सहस्राण्युत्थायासनेभ्यो भगवतः पादौ शिरसाभिवन्दित्वा ततः पर्षदो ऽपक्रामन्ति[11] स्म। यथापीदमभिमानाकुशलमूलेनाप्राप्ते प्रा-

1) मं A.
2) भोः प्राणा° O.
3) सु A. B. ते O. Cb. षु K. W.
4) ते धर्ममेतत् Cb. O.
5) येश्चताश्च A. ते ये शाताश्च B. मे शाताश्च Cb. K. ये च ताश्च W. मे सहस्रा O.
6) मे A. स K.
7) तु B. K. O. W.
8) त्रिरप्य O.
9) All but O. णं.
10) धि A. अधि O.
11) A. B. W. add सं.
12) धि A. W. O. पि B.
13) मानिका अकु O. मानकु the rest.

प्तसंज्ञिनो ऽनधिगते ऽधिगतसंज्ञिनः। ते[1] आत्मानं सत्रणं[2] ज्ञात्वा ततः पर्षदो ऽपक्रान्ताः। भगवांश्च तूष्णीभावेनाधिवासयति स्म[3] ॥

अथ खलु भगवानायुष्मन्तं शारिपुत्रमामन्त्रयते स्म[4]। निष्पलावा[5] मे शारिपुत्र पर्षदपगतफल्गुः अद्धासारे[6] प्रतिष्ठिता। साधु शारिपुत्रैतेषामाभियोगिकानामतो ऽपक्रमणम्[7]। तेन हि शारिपुत्र भाषिष्य एतमर्थम्। साधु भगवन्नित्यायुष्माञ्शारिपुत्रो भगवतः प्रत्यश्रौषीत् ॥

भगवानेतदवोचत्। कदाचित्कर्हिचिद्[8] शारिपुत्र तथागत एवंरूपां धर्मदेशनां कथयति। तद्यथापि नाम शारिपुत्रोडुम्बरपुष्पं कदाचित्कर्हिचित्[9] संदृश्यते एवमेव शारिपुत्र तथागतो ऽपि कदाचित्कर्हिचिद्[10] एवंरूपां धर्मदेशनां कथयति। अद्धा[11] ते मे शारिपुत्र भूतवाग्यकृमस्मि तथावाग्यकृमस्म्यनन्यथावाग्यकृमस्मि। दुर्बोध्यं शारिपुत्र तथागतस्य संधाभाष्यम्। तत्कस्य हेतोः। नानानिरुक्तिनिर्देशाभिलापनिर्देशनैर्मया शारिपुत्र विविधैरुपायकौशल्यशतसहस्रैर्धर्मः संप्रकाशितः। अतर्को ऽतर्कावचरस्तथागतविज्ञेयः शारिपुत्र सद्धर्मः। तत्कस्य हेतोः। एककृत्येन शारिपुत्रैककारणोयेन तथागतो ऽर्हन्सम्यक्सं-

1) तत Cb. ते O.
2) संवर्णा O. सब्रह्माणं Ca. Cb. A. सब्रह्मणं K. सब्रह्मणां in W., left out in B.
3) तूष्णीं K.
4) यामास A. K. W. यति स्म O.
5) निष्पुंगलावा मे A. निष्पलाये B. निष्पुद्गलावा मे Cb. K. निष्पुंगलाक मे W. निष्पलापा O. Cp. Pāli *palāpa*.
6) नु added in A. For °मारे one would expect °मारा.
7) धि A. O.
8) कर्ह B. Cb. कथं O.
9) पान् A. K.
10) कथं O.
11) थ A. O.
12) मँ A. K. W.

बुद्धो लोक उत्पद्यते महाकृत्येन महाकरुणीयेन । कतमच्च शारिपुत्र तथागतस्यैककृत्यमेककरुणीयं महाकृत्यं महाकरुणीयं[1] येन कृत्येन तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उत्पद्यते[2]। यदिदं तथागतज्ञानदर्शनसमादापनकेतुनिमित्तं सत्त्वानां तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उत्पद्यते । तथागतज्ञानदर्शनसंदर्शनकेतुनिमित्तं[3] सत्त्वानां तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उत्पद्यते । तथागतज्ञानदर्शनावतारणकेतुनिमित्तं सत्त्वानां तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उत्पद्यते । तथागतज्ञानप्रतिबोधनकेतुनिमित्तं[4] सत्त्वानां तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उत्पद्यते । तथागतज्ञानदर्शनमार्गावतारणकेतुनिमित्तं सत्त्वानां तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उत्पद्यते । इदं तच्छारिपुत्र तथागतस्यैककृत्यमेककरणीयं महाकृत्यं महाकरुणीयमेकप्रयोजनं लोके प्रादुर्भावाय । इति हि शारिपुत्र[5] यत्तथागतस्यैककृत्यमेककरुणीयं महाकृत्यं महाकरुणीयं[6] तत्तथागतः करोति । तत्कस्य हेतोः । तथागतज्ञानदर्शनसमादापक एवाहं शारिपुत्र तथागतज्ञानदर्शनसंदर्शक एवाहं शारिपुत्र तथागतज्ञानदर्शनावतारक एवाहं शारिपुत्र तथागतज्ञानदर्शनप्रतिबोधक एवाहं शारिपुत्र तथागतज्ञानदर्शनमार्गावतारक एवाहं शारिपुत्र[7] । एकमेवाहं शारिपुत्र यानमारभ्य सत्त्वानां धर्मं देशयामि यदिदं बुद्धयानं । न किंचिच्छारिपुत्र द्वितीयं वा तृतीयं वा यानं संविद्यते । सर्वत्रैषा शारिपुत्र धर्मता दशदिग्लोके[8] । तत्कस्य हेतोः । येऽपि ते शारिपुत्रातीते ऽध्वन्यभूवन्दशसु दिक्ष्वप्रमेयेष्वसंख्येयेषु[9] लोकधातुषु तथागता ग्रर्हन्तः सम्यक्सं-

1) Left out in A.

2) उत्पाद्यते K. उत्पादि W.

3) संदर्शन left out in B. K. W.

4) A. adds वि.

5) त्रायं B. यं for यत् the others.

6) तं for तत् in all but B., where it is left out.

7) From here till मार्गावतारक left out in A. Cb.

8) दिशि A. B. दशसु दिसु O.

9) येष्वसंख्येयेषु B. Ca. Cb. यास्वसंख्येयासु A. K. W. which seems preferable, धातु being usually of fem. g. in S. P.

बुद्धा बक्रुज्ञनक्षिताय बक्रुज्ञनसुखाय लोकानुकम्पायै मरुतो ज्ञनकायस्यार्थाय क्षिताय सुखाय देवानां च मनुष्याणां च । ये नानाभिनिर्क्रारनिर्देशविविधकेतुकारणनिदर्शनारम्बणनिरुक्त्युपायकौशल्यैर्नानाधिमुक्तानां[1] सत्त्वानां नानाधात्वाशयानामाशयं विदित्वा धर्मं देशितवन्तः । ते ऽपि सर्वे शारिपुत्र बुद्धा भगवन्त एकमेव यानमारभ्य सत्त्वानां धर्मं देशितवन्तो यदिदं बुद्धयानं सर्वज्ञतापर्यवसानं यदिदं तथागतज्ञानदर्शनसमादापनमेव सत्त्वानां तथागतज्ञानदर्शनसंदर्शनमेव[2] तथागतज्ञानदर्शनावतारणमेव तथागतज्ञानदर्शनप्रतिबोधनमेव तथागतज्ञानदर्शनमार्गावतारणमेव सत्त्वानां धर्मं देशितवन्तः । यैरपि शारिपुत्र सत्त्वैस्तेषामतीतानां तथागतानामर्हतां सम्यक्संबुद्धानामन्तिकात्सद्धर्मः श्रुतस्ते ऽपि सर्वे ऽनुत्तरायाः सम्यक्संबोधेर्लाभिनो ऽभूवन् ॥

ये ऽपि ते शारिपुत्रानागते ऽध्वनि भविष्यन्ति दशसु दिक्ष्वप्रमेयेष्वसंख्येयेषु[3] लोकधातुषु तथागता ग्रर्हन्तः सम्यक्संबुद्धा बक्रुज्ञनक्षिताय बक्रुज्ञनसुखाय लोकानुकम्पायै मरुतो ज्ञनकायस्यार्थाय क्षिताय सुखाय देवानां च मनुष्याणां च । ये च नानाभिनिर्क्रारनिर्देशविविधकेतुकारणनिदर्शनारम्बणनिरुक्त्युपायकौशल्यैर्नानाधिमुक्तानां सत्त्वानां नानाधात्वाशयानामाशयं विदित्वा धर्मं देशयिष्यन्ति । ते ऽपि सर्वे शारिपुत्र बुद्धा भगवन्त एकमेव यानमारभ्य सत्त्वानां धर्मं देशयिष्यन्ति यदिदं बुद्धयानं सर्वज्ञतापर्यवसानं यदिदं तथागतज्ञानदर्शनसमादापनमेव सत्त्वानां तथागतज्ञानदर्शनसंदर्शनमेव तथागतज्ञानदर्शनावतारणमेव तथागतज्ञानदर्शनप्रतिबोधनमेव तथागतज्ञानदर्शनमार्गावतारणमेव सत्त्वानां धर्मं देशयिष्यन्ति । ये ऽपि ते शारिपुत्र सत्त्वास्तेषामनागतानां तथागतानामर्हतां सम्यक्संबुद्धानामन्तिकात्तं धर्मं श्रोष्यन्ति ते ऽपि सर्वे ऽनुत्तरायाः सम्यक्संबोधेर्लाभिनो भविष्यन्ति ॥

1) A reads ग्रवतारण for ग्रारम्बण.

2) संदर्शन in K. W. only.

3) यास्वसंख्येयासु A. See above.

ये ऽपि ते शारिपुत्रैतर्हि प्रत्युत्पन्ने ऽधनि दशसु दिक्ष्वप्रमेयेष्वसंख्येयेषु[1] लोकधातुषु तथागता अर्हन्तः सम्यक्संबुद्धास्तिष्ठन्ति धियन्ते यापयन्ति धर्मं च देशयन्ति बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो ज्ञनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च। ये नानाभिनिर्हारनिर्देशविविधहेतुकारणनिदर्शनारम्बणानिरुक्त्युपायकौशल्यैर्नानाधिमुक्तानां सत्त्वानां नानाधात्वाशयानामाशयं विदित्वा धर्मं देशयन्ति। ते ऽपि सर्वे शारिपुत्र बुद्धा भगवन्त एकमेव यानमारभ्य सत्त्वानां धर्मं देशयन्ति यदिदं बुद्धयानं सर्वज्ञतापर्यवसानं यदिदं तथागतज्ञानदर्शनसमादापनमेव सत्त्वानां तथागतज्ञानदर्शनसंदर्शनमेव तथागतज्ञानदर्शनावतारणमेव तथागतज्ञानदर्शनप्रतिबोधनमेव तथागतज्ञानदर्शनमार्गावतारणमेव सत्त्वानां धर्मं देशयन्ति। ये ऽपि ते शारिपुत्र सत्त्वास्तेषां प्रत्युत्पन्नानां तथागतानामर्हतां सम्यक्संबुद्धानामन्तिकात्तं धर्मं शृण्वन्ति[2] ते ऽपि[3] सर्वे ऽनुत्तरायाः सम्यक्संबोधेर्लाभिनो भविष्यन्ति॥

अहमपि[4] शारिपुत्रैतर्हि तथागतो ऽर्हन्सम्यक्संबुद्धो बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो ज्ञनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च नानाभिनिर्हारनिर्देशविविधहेतुकारणनिदर्शनारम्बणानिरुक्त्युपायकौशल्यैर्नानाधिमुक्तानां सत्त्वानां नानाधात्वाशयानामाशयं विदित्वा धर्मं देशयामि। अहमपि शारिपुत्रैकमेव यानमारभ्य सत्त्वानां धर्मं देशयामि यदिदं बुद्धयानं सर्वज्ञतापर्यवसानं यदिदं तथागतज्ञानदर्शनसमादापनमेव सत्त्वानां[6] तथागतज्ञानदर्शनसंदर्शनमेव तथागतज्ञानदर्शनावतारणमेव तथागतज्ञानदर्शनप्रतिबोधनमेव तथागतज्ञानदर्शनमार्गावतारणमेव सत्त्वानां धर्मं देशया-

1) यास्वसंख्येयासु A.
2) शृणोत्ति K.
3) A. adds शारिपुत्र.
4) ये पि ते A.
5) निर्देशना A. B.
6) In A. only.

मि। ये ऽपि ते शारिपुत्र सत्त्वा एतर्हि ममेमं[1] धर्मं शृण्वन्ति ते ऽपि सर्वे ऽनुत्तरायाः सम्यक्संबोधेर्लाभिनो भविष्यन्ति। तदनेनापि शारिपुत्र पर्यायेणैवं[2] वेदितव्यं यथा नास्ति द्वितीयस्य यानस्य क्वचिद्दशसु दिक्षु लोके प्रज्ञप्तिः कुतः पुनस्तृतीयस्य॥

अपि तु खलु पुनः शारिपुत्र यदा तथागता अर्हन्तः सम्यक्संबुद्धाः कल्पकषाये[3] वोत्पद्यन्ते सत्त्वकषाये वा क्लेशकषाये वा दृष्टिकषाये वायुष्कषाये वोत्पद्यन्ते। एवंरूपेषु शारिपुत्र कल्पसंक्षोभकषायेषु बहुसत्त्वेषु[4] लुब्धेष्वल्पकुशलमूलेषु तदा शारिपुत्र तथागता अर्हन्तः सम्यक्संबुद्धा उपायकौशल्येन तद्येवैकं बुद्धयानं त्रियाननिर्देशेन निर्दिशन्ति। तत्र शारिपुत्र ये श्रावका अर्हन्तः प्रत्येकबुद्धा वेमां क्रियां तथागतस्य बुद्धयानसमादपनां[5] न शृण्वन्ति नावतरन्ति नावबुध्यन्ते न ते शारिपुत्र तथागतस्य श्रावका वेदितव्या नाप्यर्हन्तो नापि प्रत्येकबुद्धा वेदितव्याः॥

अपि तु खलु पुनः शारिपुत्र यः कश्चिद्भिक्षुर्वा भिक्षुणी वार्हन्तं प्रतिज्ञानीयादनुत्तरायां सम्यक्संबोधौ प्रणिधानमपरिगृह्योच्छिन्नो[7] ऽस्मि बुद्धयानादिति वेदेतावन्मे समुच्छ्रयस्य पश्चिमकं परिनिर्वाणं वेदेदाभिमानिकं तं शारिपुत्र प्रज्ञानीयाः[8]। तत्कस्य हेतोः। अस्थानमेतच्छारिपुत्रानवकाशो यद्भिक्षुरर्हन्क्षीणास्रवः संमुखीभूते तथागत इमं धर्मं श्रुत्वा न श्रद्दध्यात्स्थापयित्वा परिनिर्वृतस्य तथागतस्य। तत्कस्य हेतोः। न हि ते शारिपुत्र

1) All but O. इदं.
2) ने इदं Ca.
3) षेषु A. पञ्चसु कषायेषु लोकेषु O.
4) A. B. add मूलेषु, but the true reading will be बहुमलेषु; sic O.
5) नं A. K. न W. नां Ca. Cb. O.
6) मे प्राप्तं ज्ञानीयात् O.
7) उच्छिन्नो निश्छन्दो A. निच्छंदो B. उच्छिन्नो K. W. निस्तीर्णा स्म इति वाचं भाषेया प्रक्रन्दिका स्मेति O. Probably to r. निष्क्रन्दो ऽस्मि बुद्धयान (Loc. c.) इति.
8) द्य A. B. Ca. K. W. याः Cb. संज्ञानेयासि O.

श्रावकास्तस्मिन्काले तस्मिन्समये परिनिर्वृते तथागत एतेषामेवंरूपाणां सूत्रान्तानां धारका वा देशका वा भविष्यन्ति । अन्येषु पुनः शारिपुत्र तथागतेष्वर्हत्सु सम्यक्संबुद्धेषु निःसंशया भविष्यन्ति । इमेषु बुद्धधर्मेषु श्रद्दधाधं मे शारिपुत्र पत्तीयतावकल्पयत । न हि शारिपुत्र तथागतानां मृषावादः[1] संविद्यते । एकमेवेदं शारिपुत्र यानं यदिदं बुद्धयानम् ॥

अथ खलु भगवानेतमेवार्थं भूयस्या मात्रया संदर्शयमानस्तस्यां वेलायामिमा गाथा अभाषत ॥

अथाभिमानप्राप्ता[2] ये भिक्षुभिक्षुण्युपासकाः ।
उपासिकाश्च अश्राद्धाः सकृन्नाः पञ्चनूनकाः ॥ ३८ ॥
संपश्यन्त इमं दोषं छिद्रशिक्षासमन्विताः ।
त्रयाणांश्च परिरक्षन्तः प्रक्रान्ता बालबुद्धयः ॥ ३९ ॥
षष्टत्कषष्टु ताञ्ज्ञात्वा[7] लोकनाथो ऽस्मि धंसि तान्[8] ।
तत्तेषां कुशलं नास्ति शृणुयुर्धर्मं ये इमम् ॥ ४० ॥
शुद्धा[9] च निष्पलावा[10] च सुस्थिता परिषन्मम[11] ।
फल्गु व्यपगता सर्वा सारा[12] चेयं प्रतिष्ठिता ॥ ४१ ॥

1) दृनां K. दृना W.
2) निम Cb. निद् O.
3) अथ added conjecturally.
4) धि B. O.
5) A. adds थ or था.
6) शीला O.
7) कां ज्ञात्वा A. तां ज्ञात्वा B. तां ज्ञाना K. W.
8) स्मि धंसि तां A. स्मि शंसयि B. मुद्गात्रवीत् K. W. धंसन्ति जिनभाषितम् O.
9) अ A. Ca. K. W. शु B. Cb. O.
10) लापा O.
11) पर्ष संघो मि सुस्थितम् O. संप्रस्थिता पर्षन्मम the others.
12) All सारे.

शृणोहि मे शारिसुता[1] यथैष संबुद्ध धर्मः पुरुषोत्तमेहि ।
यथा च बुद्धा कथयन्ति नायका उपायकौशल्यशतैरनेकैः ॥ ४२ ॥
यथाशयं ज्ञानिय ते चरिं च नानाधिमुक्तानिह प्राणिकोटिनाम् ।
चित्राणि कर्माणि विदित्व तेषां पुराकृतं यत्कुशलं च तेहि ॥ ४३ ॥
नानानिरुक्तीहि च कारणेहि संप्रापयामि इम तेष[2] प्राणिनाम् ।
केतूहि दृष्टान्तशतेहि चाहं तथा तथा तोषयि सर्वसत्त्वान् ॥ ४४ ॥
सूत्राणि[3] भाषामि तथैव गाथा[4] इतिवृत्तकं ज्ञातकमद्भुतं च ।
निदान ग्रीपम्यशतैश्च चित्रैर्गेयं च भाषामि तथोपदेशान् ॥ ४५ ॥
ये भोन्ति हीनाभिरता अविद्वसू अचीर्णचर्या बकुबुद्धकोटिषु[5] ।
संसारलग्नाश्च सुदुःखिताश्च निर्वाण तेषामुपदर्शयामि ॥ ४६ ॥
उपायमेतं कुरुते स्वयंभूर्बोद्धस्य[6] ज्ञानस्य प्रबोधनार्थम् ।
न चापि तेषां प्रवदे कदाचिद्युष्मे[7] पि बुद्धा इह लोके भेष्यथ[8] ॥ ४७ ॥
किंकारणं कालमवेक्ष्य[9] तायी त्रयाणं च दृष्ट्वा न तु पश्य[10] भाषते ।
सोऽयं त्रयो अद्य कथंचि लब्धो वदामि येनेह च भूतनिश्चयम् ॥ ४८ ॥

1) पुत्र A. पुत्रा B. Ca.
2) इमे तेषु A. इम तेष B. Cb. इमुदृष K. इमुदृष W. इति तेष O.
3) Sic O. सूत्रांश्च Cb. सूत्रान्त the others.
4) गाथां A. था: K. W.
5) कल्प B. K.
6) बौध A. K. W. बोद् B. बौद्ध Cb. O.
7) युष्मा A. Ca. Cb.
8) Sic O; बुद्धोह भविष्यथेति the rest.
9) मुपेक्ष्य Cb.
10) पश्यद्धा K.

नवाङ्गमेतन्मम शासनं च प्रकाशितं सत्त्वबलाबलेन ।
उपाय एषो वरदस्य ज्ञाने प्रवेशनार्थाय निदर्शितो मे ॥ ४९ ॥
भवन्ति मे चेह सदा विशुद्धा व्यक्ता[1] शुची मूरत बुद्धपुत्राः ।
कृताधिकारा बकुबुद्धकोटिषु वैपुल्यसूत्राणि वदामि तेषाम् ॥ ५० ॥
तथा हि ते आशयसंपदाय[2] विशुद्धरूपाय समन्विता[3] भूत् ।
वदामि तान्बुद्ध भविष्यथेति अनागते ऽध्वानि हितानुकम्पकाः ॥ ५१ ॥
श्रुत्वा च प्रीतिस्फुट होन्ति सर्वे बुद्धा भविष्याम जगत्प्रधानाः ।
पुनश्च हं ज्ञानिय तेष चर्यां वैपुल्यसूत्राणि प्रकाशयामि ॥ ५२ ॥
इमे च ते श्रावक नायकस्य येहि श्रुतं शासनमेतमग्र्यम् ।
एकापि गाथा श्रुत धारिता वा सर्वेषु[5] बोधाय[5] न संशयो ऽस्ति ॥ ५३ ॥
एकं हि यानं द्वितियं[6] न विद्यते तृतियं[7] [8] हि नैवास्ति कदाचि लोके ।
अन्यत्रुपाया पुरुषोत्तमानां यद्याननानालुपदर्शयन्ति[9] ॥ ५४ ॥
बौद्धस्य ज्ञानस्य[10] प्रकाशनार्थं लोके सुमत्पश्यति लोकनाथः ।
एकं हि कार्यं द्वितियं[11] न विद्यते न हीनयानेन नयन्ति बुद्धाः ॥ ५५ ॥

1) From व्यक्ता till the end of the first half of the next verse, left out in A.
2) श्रुद्धवीरा K. W.
3) ब्रूपाकरुणा K. W.
4) ते B.
5) Sic O. सर्वेषु A. B. Ca. सर्वे पि K. W. All बोधाय.
6) ती A. B. K. ति Cb.
7) MSS. तृतीयं.
8) All but O. यः.
9) लु A. K. W. नु Cb. न्वु O.
10) यानस्य O, better.
11) ती A. B. K. W. O. ति Cb.

प्रतिष्ठितो यत्र स्वयं स्वयंभूर्यच्चैव बुद्धं यथ यादृशं च ।
बलाश्च ये ध्यानविमोक्ष इन्द्रियास्तत्रैव[1] सत्त्वा पि प्रतिष्ठपेति[2] ॥ ५६ ॥
मात्सर्यदोषो हि भवेत मह्यं स्पृशित्व बोधिं विरजां विशिष्टाम् ।
यदि हीनयानस्मि प्रतिष्ठपेयमेकं पि सत्त्वं न ममेतु[3] साधु ॥ ५७ ॥
मात्सर्य मह्यं न कहिंचि विद्यते[4] ईर्ष्या न मे नापि च क्रुन्दरागः ।
उच्छिन्नपापा मम सर्वधर्मास्तेनास्मि बुद्धो जगतानुबोधात्[5] ॥ ५८ ॥
यथा ह्यहं चित्रितु लक्षणेहि प्रभासयन्तो इमु सर्वलोकम् ।
पुरस्कृतः प्राणिशतैरनेकैर्देशेमिमां धर्मस्वभावमुद्राम् ॥ ५९ ॥
एवं च चिन्तेम्यङ्ग शारिपुत्र[6] कथं नु एवं भवि सर्वसत्त्वाः ।
द्वात्रिंशतीलक्षणरूपधारिणः स्वयंप्रभा लोकविदू स्वयंभूः[7] ॥ ६० ॥
यथा च पश्यामि यथा च चिन्तये यथा च संकल्प ममासि[8] पूर्वम् ।
परिपूर्णमेतत्प्रणिधान मह्यं बुद्धा च बोधिं च[9] प्रकाशयामि ॥ ६१ ॥
सचेदहं शारिसुता[10] वदेयं सत्त्वान बोधाय जनेय क्रुन्दम् ।
अज्ञानकाः सर्व भमेयुरत्र न ज्ञातु गृह्णीयु सुभाषितं मे ॥ ६२ ॥

1) तत्रापि B.
2) पेमि O. यन्ति the others.
3) समेतु A. मयेति B. समैति Ca. समेति Cb. ममतु K. ममेष O.
4) द्वि Cb.
5) °न्न सर्वे मम पापधर्मा° O., preferable.
6) त्रा K. W.
7) भू A. K. W. यद्यदहं O. for लोकविदू.
8) पि for मि in all but O.
9) बुद्धा विमानोधि B. the second च in K. W. only. Have we to r. बुद्धान बो°? or बुद्धाय बो°?
10) पुत्रा K. W.

तांश्चैव कुं ज्ञानिय एवद्रूपान्न चीर्णचर्याः पुरिमासु ज्ञातिषु ।
अध्योषिता[1]ः कामगुणेषु सक्ता[2]स्तृष्णाय संमूर्च्छित मोहचित्ताः ॥ ६३ ॥
ते कामकेतोः प्रपतन्ति दुर्गातं षट्सू गतीषू परिखिद्यमानाः ।
कटसी[3] च वर्धेन्ति[4] पुनः पुनस्ते दुःखेन संपीडित अल्पपुण्याः[5] ॥ ६४ ॥
विलग्न दृष्टीगहनेषु नित्यमस्तीति नास्तीति तथास्ति नास्ति ।
द्वाषष्टिदृष्टीकृत निश्रयिता[6] असत्तभावं परिगृह्य ते स्थिताः ॥ ६५ ॥
दुःशोधका मानि च दम्भिनश्च वङ्का शठा अल्पश्रुताश्च बालाः ।
ते नैव शृण्वन्ति सुबुद्धघोषं कदाचि पि ज्ञातिसहस्रकोटिषु[7] ॥ ६६ ॥
नेषामहं शारिसुता उपायं वदामि दुःखस्य करोथ अन्तम् ।
दुःखेन संपीडित दृष्ट्व सत्त्वान्निर्वाण तत्राप्युपदर्शयामि ॥ ६७ ॥
एवं च भाषाम्यहु नित्यनिर्वृता आदि प्रशान्ता इमि सर्वधर्माः ।
चर्या च यो[8] पूरयि बुद्धपुत्रो अनागते ऽध्यानि जिनो भविष्यति ॥ ६८ ॥
उपायकौशल्य ममैवरूपं यत्त्रीणि यानान्युपदर्शयामि ।
एकं[9] तु यानं हि[9] नयं[10]श्च एक एका चियं देशन नायकानाम् ॥ ६९ ॥

1) बुद्धोसिता O., अध्येषिताः the others.
2) सत्त्वा° O., शक्ता° the rest.
3) कटसी च O., कटंसि the rest.
4) गतिश्च विध्येन्ति K. W.
5) कां A. तां B. Ca. Cb. W. ते O.
6) गतमाश्रयित्वा O..
7) नो ज्ञा° O., पिज्ञा° the others.
8) All सो.
9) हि तु A. K. W. तु हि B. Cb.
10) नयश्च A. Cb. K. W.

व्यपनेहि काङ्क्षां तथ संशयं च येषां च केषां चिद् काङ्क्ष विद्यते ।
अनन्यथावादिन लोकनायका एकं इदं यान द्वितीय[1] नास्ति ॥ ७० ॥
ये चाप्यभूवन्पुरिमास्तथागताः परिनिर्वृता बुद्धसहस्रनेके ।
अतीतमध्वानमसंख्यकल्पे[2] तेषां[3] प्रमाणं न कदाचि विद्यते ॥ ७१ ॥
सर्वेहि तेहि[4] पुरुषोत्तमेहि[4] प्रकाशिता धर्म बहू विशुद्धाः ।
दृष्टान्तकैः कारणहेतुभिश्च उपायकौशल्यशतैरनेकैः ॥ ७२ ॥
सर्वे च ते दर्शयि एकयानमेकं च यानं अवतारयन्ति ।
एकस्मिं[5] याने परिपाचयन्ति अचिन्तिया प्राणिसहस्रकोट्यः ॥ ७३ ॥
अन्ये[6] उपाया विविधा जिनानां येही प्रकाशेन्ति ममाग्रधर्मम् ।
ज्ञात्वाधिमुक्तिं तथ आशयं च तथागतो लोकि सदेवकस्मिन्[7] ॥ ७४ ॥
ये चापि सत्त्वास्तहि तेष संमुखं शृण्वन्ति धर्मं अथ वा अुताविनः ।
दानं च दत्तं चरितं च[8] शीलं क्षान्त्या च संपादित सर्वचर्याः ॥ ७५ ॥
वीर्यं च[10] ध्याने च[10] कृताधिकाराः प्रज्ञाय वा चित्तित एति धर्माः ।
विविधानि पुण्यानि कृतानि येहि[11] ते सर्वि बोधाय[12] अभूषि लाभिनः ॥ ७६ ॥

1) यु Ca.
2) ल्पैः Cb.
3) ये Ca.
4) हि Cb. K. भिः O., the rest र्हो.
5) स्मिन् A. स्मिं K. W.
6) अन्यत्र उ Ca.
7) के स्मिं B.
8) चरिताश्च all but O.
9) ल A. लो B. ले Ca. K. W. लं O. Equally good would be चरिता च शीला, Nom. pl. n.
10) न B.
11) र्हो B.
12) All धाय.

परिनिर्वृतानां च जिनान तेषां ये शासने केचिदभूषि सत्त्वाः।
त्राता च दाता च विनीत तत्र ते सर्वि बोधीय[1] अभूषि लाभिनः॥ ७७॥
ये चापि धातून करोन्ति[2] पूजां जिनान तेषां परिनिर्वृतानाम्।
रत्नामयान्स्तूपसहस्रनेकान्सुवर्णाद्रूप्यस्य च स्फाटिकस्य॥ ७८॥
ये चाश्मगर्भस्य करोन्ति स्तूपान्कर्केतनमुक्तमयांश्च केचित्[3]।
वैडूर्यश्रेष्ठस्य तथेन्द्रनीले ते[4] सर्वि बोधीय[1] अभूषि लाभिनः॥ ७९॥
ये चापि शैलेषु करोन्ति स्तूपान्ये चन्दनानामगुरुस्य[5] केचित्।
ये देवदारुस्य करोन्ति स्तूपान्ये दारुसंघातमयांश्च केचित्॥ ८०॥
इष्टामयान्मृत्तिकसंचितान्वा[6] प्रीताश्च कुर्वन्ति जिनान स्तूपान्।
उद्दिश्य ये पांसुकराशयो ऽपि अध्वोषु दुर्गेषु च कारयन्ति॥ ८१॥
सिकतामयान्वा पुन कूट[7] कृत्वा ये केचिदुद्दिश्य जिनान स्तूपान्।
कुमारकाः क्रोडिषु तत्र तत्र ते सर्वि बोधीय[8] अभूषि लाभिनः॥ ८१॥
रत्नामयान्बिम्ब तथैव केचिद्द्वात्रिंशतीलक्षणरूपधारिणः।
उद्दिश्य कारापित येकि चापि ते सर्वि बोधीय[8] अभूषि लाभिनः॥ ८३॥
ये सप्तरत्नामय तत्र केचिद्ये ताम्रिका[9] वा तथ कांसिका वा।
कारापयीषू सुगतान बिम्बा[10] ते सर्वि बोधीय[8] अभूषि लाभिनः॥ ८४॥

1) All धाय.
2) Here and in the sequel करिन्सु O.
3) नं O. ना the rest.
4) All but O. तथेन्द्रनीलेस्ते.
5) मद्रकस्य A. मरुकस्य B. मगरुस्य Cb. मगुरुस्य K. मतुगुरुस्य W. अगुरुस्य O.
6) मया Mss.
7) स्तूपं A. स्तूप K. W.
8) धाय Mss.
9) ता A. का B. Cb. K. W.
10) बिंबान् Cb. निम्बा Ca. B. बंबं A. K. W.

सांसस्य लोहस्य च मृत्तिकाय वा कारापयीषू[1] सुगतान विग्रहान्।
ये पुस्तकर्मामय दर्शनीयांस्ते सर्वि बोधीय[2] अभूषि लाभिनः॥ ८५॥
ये चित्रभित्तीषु करोन्ति विग्रहान्परिपूर्णगात्राञ्शतपुण्यलक्षणान्।
लिखेत्स्वयं चापि लिखापयेद्वा ते सर्वि बोधीय[2] अभूषि लाभिनः॥ ८६॥
ये चापि केचित्तत्र शिक्षमाणाः क्रोडारतिं चापि विनोदयन्तः।
नखेन काष्ठेन कृतासि[3] विग्रहांस्ते सर्वि बोधीय[2] अभूषि लाभिनः॥ ८७॥
भित्तीषु पुरुषा च कुमारका वा सर्वे च ते कारुणिका अभूवन्।
सर्वे ऽपि ते तारयि[4] प्राणिकोट्यः समादपेत्ता[5] बकुबोधिसत्त्वान्॥ ८८॥
धातूषु ये चापि तथागतानां स्तूपेषु वा मृत्तिकविग्रहेषु वा।
आलेख्य[6] भित्तीष्वपि पांसुस्तूपे पुष्पा च गन्धा च प्रदत्त आसीत्॥ ८९॥
वाद्यां[7] च वादापित येकि[8] तत्र भेर्यो ऽथ शङ्खाः पटहाः सुघोषकाः।
निर्नादिता दुन्दुभयश्च येकि पूजाविधानाय वराग्रबोधिनाम्॥ ९०॥
वीणाश्च[9] ताडा पणवाश्च[10] येकि[11] मृदङ्गवंशा[12] प्रणदा[13] मनोज्ञाः।
एकोत्सवा[14] वा सुकुमारका[15] वा ते सर्वि बोधीय अभूषि लाभिनः॥ ९१॥

1) यिन्सु O. The lengthening of the last syllable not necessary.
2) धाय Mss.
3) One would expect अकासि or अकासु; O. has च आलिखिन्सु.
4) All but O. सर्वे ऽपि चोत्ता; सर्वे च ते ता O.
5) यिन्सु O. यत्ता or पत्ता the others.
6) आलेख O.
7) वाद्यापि K. W. वाद्यं च O.
8) येभि O. यैव the rest.
9) व A. B. Ca. Cb. च K. W.
10) श्च A. K. W.
11) ह्री B.
12) शङ्ख B. Cb.
13) तुणावा O.
14) एकोत्सवा A. K. W. एकोत्तडा B. Cb. एकावचारा O.
15) कुसु A. Cb.

वादापिता कच्छरियो[1] ऽपि येऽहि ञ्जलमण्डका[2][3] वाप्यथ मण्डका वा।
सुगतान उद्दिश्य थ पूजनार्थं गोतं सुगोतं[4] मधुरं मनोज्ञम्॥ §२॥
सर्वे च ते बुद्ध अभूषि लोके कृत्वान तां बक्कुविधधातुपूजाम्।
किमल्पकं पि[5] सुगतान धातुषु एकं पि वादापिय वाद्यभाण्डम्॥ §३॥
पुष्पेण चैकेन पि पूजयित्वा आलेख्य भित्तौ सुगतान बिम्बम्।
विक्षिप्तचित्ता पि च पूजयित्वा अनुपूर्व ह्रदयन्ति च[6] बुद्धकोट्यः॥ §४॥
पैशाञ्जलि तत्र कृतो ऽपि[7] स्तूपे परिपूर्ण एका तलशक्तिका वा।
उन्नामितं शीर्षमभून्मुहूर्तमवनामितं कायु तथैकवारम्॥ §५॥
नमो ऽस्तु बुद्धाय[8] कृतैकवारं येऽहो तदा धातुधरेषु तेषु।
विक्षिप्तचित्तैरपि एकवारं ते सर्वि प्राप्ता इममग्रबोधिम्॥ §६॥
सुगतान तेषां तद तस्मि[9] काले[10] परिनिर्वृतानामथ तिष्ठतां वा।
ये धर्मनामापि श्रुणेन्सु सत्त्वास्ते सर्वि बोधीय[11] अभूषि लाभिनः॥ §७॥
अनागता पि[12] बक्कुबुद्धकोट्यो अचिन्तिया येषु प्रमाणु नास्ति।
ते पी जिना उत्तमलोकनाथाः प्रकाशयिष्यन्ति उपायमेतम्॥ §८॥

1) च्चर्तरिकाश्च O.
2) मंदका A. मद्दुका B. मत्तका K. मत्तका W. मण्डुका O.
3) मउका A. मद्दुका B. सुत्त K. सत्र W. Probably to r. मद्दुका.
4) च A. B. K. W. सु Cb.
5) All but O. पी. अल्पात्पकापि O.
6) ते A. B. Ca. Cb. च K. W. दृष्टा बक्कु O.
7) धि A. मि K. पि B. W. कृतासि O.
8) बोधाय K. W.
9) तस्मिं A. B. Ca. K. W. तस्मि Cb.
10) Thus O; the others लोके.
11) All बोधाय.
12) All पी.

उपायकौशल्यमनन्तु तेषां भविष्यति[1] लोकविनायकानाम्।
येना विनेष्यन्तिह प्राणकोट्यो बौद्धस्मि ज्ञानस्मि अनास्रवस्मिन्[2]॥ §९॥
एको ऽपि सत्त्वो न कदाचि तेषां श्रुत्वान धर्मं न भवेय बुद्धः।
प्रणिधानमेतद्धि तथागतानां चरित्व बोधाय चरापयेयम्॥ १००॥
धर्ममुखा कोटिसहस्रनेके[3] प्रकाशयिष्यन्ति अनागते ऽध्वे[4]।
उपदर्शयन्तो इममेकयानं वदन्ति धर्मं हि तथागतत्वे॥ १०१॥
स्थितिका हि एषा सद धर्मनेत्री प्रकृतिश्च धर्माण सदा प्रभास्वरा।
विदित्व बुद्धा द्विपदानमुत्तमा प्रकाशयिष्यन्ति ममेकयानम्॥ १०२॥
धर्मस्थितिं धर्मनियामतां च नित्यस्थितां लोकि इमामकम्प्याम्।
बुद्धाश्च बोधिं पृथिवीय मण्डे प्रकाशयिष्यन्ति उपायकौशलम्[5]॥ १०३॥
दशसू दिशासू नरदेवपूजितास्तिष्ठन्ति बुद्धा यथ गङ्गवालिकाः।
सुखापनार्थं इह सर्वप्राणिनां ते चापि भाषन्तिममग्रबोधिम्[6]॥ १०४॥
उपायकौशल्य प्रकाशयन्ति विविधानि यानान्युपदर्शयन्ति[7]।
एकं च यानं परिदीपयन्ति बुद्धा इमामुत्तमशान्तभूमिम्॥ १०५॥
चरितं च ते ज्ञानिय सर्वदेहिनां यथाशयं यच्च पुरा निषेवितम्[8]।
वीर्यं च स्थामं च विदित्व तेषां ज्ञात्वाधिमुक्तिं च प्रकाशयन्ति॥ १०६॥

1) ष्यते O. ष्यतो the rest.
2) बोधेस्मिं ज्ञानेस्मि अनाश्रवेस्मिन् A. बुद्धस्मि ज्ञानेस्मि B. बोद्धस्मि Cb. बौद्धस्मि K. बोधेस्मि W. बौद्धस्मि यानस्मि O.
3) Thus Mss.
4) ध्वे A. K. W. O. ध्वनि B. Cb.
5) All कौशल्यम्, in O, however, कौशल्य प्रकाशयन्ति.
6) प्रयानं B. Cb. K. O.
7) यन्ति Cb. याति O. यन्तः the rest.
8) ह्रपाणिसेवितं A.

दृष्टान्तकेतून्बहु दर्शयन्ति बहुकारणाज्ज्ञानबलेन नायकाः ।
नानाधिमुक्तांश्च विदित्व सत्त्वान्नानाभिनिर्हारुपदर्शयन्ति ॥ १०७ ॥
अहं पि चैतर्हि जिनेन्द्रनायको उत्पन्न सत्त्वान सुखापनार्थम् ।
संदर्शयामि इम बुद्धबोधिं नानाभिनिर्हारसहस्रकोटिभिः ॥ १०८ ॥
देशेमि धर्मं च बहुप्रकारं अधिमुक्तिमध्याशय ज्ञात्व प्राणिनाम् ।
संकर्षयामि विविधैरुपायैः प्रत्यात्मिकं ज्ञानबलं ममैतत् ॥ १०९ ॥
अहं पि पश्यामि दरिद्रसत्त्वान्प्रज्ञाय पुण्येहि च विप्रहीणान् ।
प्रस्कन्द संसारि निरुद्ध दुर्गे मग्नाः पुनः दुःखपरंपरासु ॥ ११० ॥
तृष्णाविलग्नांश्चमरोव वाले कामैरिहान्धीकृतसर्वकालम् ।
न बुद्धमेषन्ति महानुभावं न धर्म मार्गन्ति दुखान्तगामिनम् ॥ १११ ॥
गतीषु षट्सु परिरुद्धचित्ताः कुदृष्टिदृष्टेषु स्थिता अकम्प्याः ।
दुःखेन दुःखानुप्रधावमानाः कारुण्य मह्यं बलवत्तु तेषु ॥ ११२ ॥
सो ऽहं विदित्वा तहि बोधिमण्डे सप्ताह त्रीणि परिपूर्ण संस्थितः ।
अर्थं हि चित्तेममेवरूपं उल्लोकयन्पादपमेव तत्र ॥ ११३ ॥

1) र् उप A. K. W. र् प्र O.
2) को A. काः B. को K. W. राजा for नायको O.
3) All मी.
4) One would expect प्रस्कन्न.
5) मार्गे Cb. The three nominatives in this verse ungrammatical.
6) दुः A. W.
7) नाम् B.
8) All °भू followed by परिभ्रुह, °परिभ्रुह, but पलिभ्रुह O. Our reading conjectural. Cp. Pāli *palibuddha*.
9) म्प्यान् W.
10) दुःखेन दुःखातु प्रधावमानः O. दुःखानुदुःखं प्रतिवेधमानः the others. दुःखानु° is for दुःखमनु°.
11) All but O. षाम्.
12) अर्थे A. K. W. कथं B. अर्थं Cb. O.
13) विचित्तेमि कथं करोमि O. 14) आलोक B.

प्रेक्षामि तं चानिमिषं हुमेन्द्रं तस्यैव क्षेष्टे अनुचङ्क्रमामि ।
आश्चर्यज्ञानं च इदं विशिष्टं सत्त्वाश्च मोहान्ध अविद्वसू इमे ॥ ११४ ॥
ब्रह्मा च मां याचति तस्मि काले शक्रश्च चत्वारि च लोकपालाः ।
महेश्वरो ईश्वर एव चापि मरुद्गणानां च सकुत्रकोट्यः ॥ ११५ ॥
कृताञ्जली सर्वि स्थिताः सगौरवा अर्थं च चित्तेमि कथं करोमि ।
अहं च बोधोय वदामि वर्णान् इमे च दुःखैरभिभूत सत्त्वाः ॥ ११६ ॥
ते मह्य धर्मं क्षिपि बाल भाषितं क्षिपित्व गच्छेयुरपायभूमिम् ।
श्रेयो मम नैव कदाचि भाषितुं अथैव मे निर्वृतिरस्तु शास्ता ॥ ११७ ॥
पुरिमांश्च बुद्धान्समनुस्मरन्तो उपायकौशल्य यथा च तेषाम् ।
यंनून हं पि इम बुद्धबोधिं त्रिधा विभाष्येहु प्रकाशयेयम् ॥ ११८ ॥
एवं च मे चित्तितु एष धर्मो ये चान्ये बुद्धा दशसुद्दिशासु ।
दर्शिन्सु ते मह्य तदात्मभावं साधुं ति घोषं समुदीरयन्ति ॥ ११९ ॥
साधू मुने लोकविनायकाग्र अनुत्तरं ज्ञानमिहाधिगम्य ।
उपायकौशल्य विचित्तयन्तो अनुशिक्षसे लोकविनायकानाम् ॥ १२० ॥

1) इमां A. K. W. इमं B. इदं Ca. मिमं Cb.
2) अविद्वलाश्च O.
3) All but O. मगा.
4) रामि Ca. O.
5) त्यु Cb.
6) All पो.
7) त B. Cb.
8) एव K.
9) र्म A.
10) र्शे B. Ca. र्श Cb. K. W. र्शि O.
11) Rather साधू.
12) ग्रा A. O. ग्र B. Ca. ग्रं Cb. ग्रे K. ग्रां W.

वयं पि बुद्धाय[1] परं[2] तदा पदं तृधा च कृत्वान[3] प्रकाशयामः।
क्लेशाधिमुक्ता हि अविद्दमू नरा भविष्यथा बुद्ध न श्रद्दधेयुः॥ १२१॥
ततो वयं कारुणसंग्रहेण उपायकौशल्य निषेवमाणाः।
फलाभिलाषं परिकीर्तयन्तः समादपेमो बुद्धबोधिसत्त्वान्॥ १२२॥
अहं चुदृग्रस्तद श्रासि श्रुत्वा घोषं मनोज्ञं पुरुषर्षभाणाम्।
उदग्रचित्तो भणि तेष तायिनां न मोक्षवादी प्रवरा मरुषी॥ १२३॥
अहं पि एवं समुदाचरिष्ये यथा वदन्ति[5] विदु लोकनायकाः।
अहं पि संक्लेशमि इमस्मि दारुणे उत्पन्न सत्त्वान कषायमध्ये[6]॥ १२४॥
ततो[7] ऽहं शारिसुता विदित्वा वाराणसीं प्रस्थितु तस्मि काले।
तहि पञ्चकानां प्रवदामि भिक्षुणां धर्मं उपायेन प्रशान्तभूमिम्॥ १२५॥
ततः प्रवृत्तं मम धर्मचक्रं निर्वाणशब्दश्च[8] अभूषि लोके।
अहंत्तशब्दस्तथ धर्मशब्दः[10] संघस्य[11] शब्दश्च अभूषि तत्र॥ १२६॥
भाषामि वर्षाणि अनल्पकानिं निर्वाणभूमिं[12] चुपदर्शयामि।
संसारदुः खस्य च एष अन्तो एवं वदामि[13] अहं नित्यकालम्॥ १२७॥

1) बुद्धाय O., बुद्धा हि the others; बुद्धाय for बद्धाग.
2) हि यनं B. हि वरं B. K. हि परं Ca. W. विहरं Cb. उत्तमं पदं O.
3) तृविधं कारित्वान O. तृधा च कृत्वा हि the rest.
4) चप्युदृग्रं A. मुदृग्र B. चूदृग्र Ca. चोदृग्र Cb. K. W. क्षुदृग्र O.
5) All but O. न्ति.
6) कशत्र O. Cp. Pāli *kasaṭa*.
7) प्य A. K. W.
8) ब्दंच A. O. च्च K. W.
9) शब्दं तथ A. O.
10) शब्दं A. O.
11) श्च K. W.
12) मिमु B. O.
13) वदेमि O., a form also used in Pāli. Other Mss. वदामो

यस्मिंश्च काले अहं शारिपुत्र पश्यामि पुत्रान्द्विपदोत्तमानाम्।
ये प्रस्थिता उत्तममग्रबोधिं कोटीसहस्राणि अनल्पकानि[1]॥ १२८॥
उपसंक्रमित्वा च ममैव अन्तिके कृताञ्जलीः सर्वि स्थिताः सगौरवाः।
येऽहो श्रुतो धर्म जिनान आसीत्[2] उपायकौशल्य बुद्धप्रकारम्॥ १२९॥
ततो मम[3] एतदभूषि तत्क्षणं समयो मम[4] भाषितुमग्रधर्मम्।
यस्याहमर्थं इह लोकि जातः प्रकाशयामि[5] तमिहाग्रबोधिम्॥ १३०॥
दुःश्रद्धं एतु भविष्यते ऽद्य निमित्तसंज्ञीनिह बालबुद्धिनाम्।
अधिमानप्राप्तान[6] अविद्दमूनां इमे तु श्रोष्यन्ति हि बोधिसत्त्वाः॥ १३१॥
विशारदश्चाहु तदा प्रहृष्टः संलीयनां सर्वं[7] विवर्जयित्वा।
भाषामि मध्ये सुगतात्मजानां तांश्चैव बोधाय समादपेमि॥ १३२॥
संदृश्य चैतादृशबुद्धपुत्रांस्तवापि काङ्क्षा व्यपनीत भेष्यति।
ये चा शता द्वादृशिमे अनास्रवा बुद्धा भविष्यन्तिमि लोकि सर्वे॥ १३३॥
यथैव तेषां पुरिमाण[8] तायिनाम् अनागतानां च जिनान धर्मता।
ममापि एषैव विकल्पवर्जिता तथैव हं देशयि अद्य तुभ्यम्॥ १३४॥
कदाचि कहिंचि[9] कथंचि लोके उत्पाद भोति पुरुषर्षभाणाम्।
उत्पद्य चा लोकि अनन्तचक्षुषः कदाचिदेतादृशु धर्म देशयुः[10]॥ १३५॥

1) अनन्त A. K. W. O. अनल्प B. Cb.
2) आशों A. आशी B. Cb. आसांत K. आसोत् W. आसि O.
3) All but O. मया.
4) ममा A. K. W. मया B. मम O.
5) All but O. मो.
6) मामवि A. मान् ग्र B. Cb. मान ग्र Ca. O. मा ग्र K, मो वि W.
7) नं सर्वि B. Ca.
8) All परि.
9) काहिंचि A. किंचिच्च B. कंचिच्च Ca. काश्चिच्च Cb. कहिंचिच्च K. कोंहिं-चिच्च W. The metre in A., K., W. faultive.
10) देशकः A. K. W. °युः B. Ca. °सुः Cb. पिथु! O (a misread पियु).

सुदुर्लभो ईदृशु अग्रधर्मः कल्पान कोटीनयुतैरपि स्यात्।
सुदुर्लभा ईदृशकाश्च सत्त्वाः श्रुत्वान[1] ये अद्दधि अग्रधर्मम्॥ १३६॥
औडुम्बरं पुष्प यथैव दुर्लभं कदाचि कहिंचि[2] कथंचि दृश्यते।
मनोज्ञरूपं च ज्ञनस्य तद्भवेदाश्चर्य[3] लोकस्य सदेवकस्य॥ १३७॥
अतश्च आश्चर्यतरं वदामि श्रुत्वान[4] यो धर्ममिमं सुभाषितम्।
अनुमोदि एकं पि भणेय[5] वाचं कृत सर्वबुद्धान भवेय पूजा[6]॥ १३८॥
व्यपनेहि काङ्क्षामिह संशयं च आरोचयामि[7] अहु धर्मराजा।
समादपेमि[7] अहमग्रबोधौ न श्रावकाः केचिदिहास्ति मह्यम्॥ १३९॥
तव शारिपुत्रैतु रहस्यु भोतु ये चापिमे श्रावक मह्य सर्वे।
ये बोधिसत्त्वाश्च इमे प्रधाना रहस्यमेतन्मम धारयन्तु॥ १४०॥
किंकारणं पञ्चकषायकाले लुब्धाश्च दुष्टाश्च भवन्ति सत्त्वाः।
कामैरिहान्धीकृत बालबुद्धयो न तेष बोधाय कदाचि चित्तम्॥ १४१॥
श्रुत्वा च यानं मम एतदेकं प्रकाशितं तेन जिनेन[10] आसीत्[11]।
अनागते ऽध्वनि धमेयु सत्त्वाः सूत्रं लिपित्वा नरकं व्रजेयुः॥ १४२॥

1) च A. K. W. न B. Cb.
2) कहिंचिच्च A. K. W. किंचिच्च B. Ca. O. कश्चिच्च Cb. The same remark as above.
3) र्यु Ca.
4) च सो A. च यो B. K. W. न यो Cb.
5) च्य A. र्य K. W. पि B. Cb. वाच भाषि O.
6) भवेत पूजा O. भवेयु पूजाम् the rest.
7) All but O. मो.
8) अहु अग्र A. K. W. अहु बुद्ध B. अहमग्र Ca. अहमग्र Cb.
9) त्र K. W.
10) तेहि जिनेहि A. K. W. तने हि जिनेहि B. तेभि जिनेहि Ca. तेन जिनेन Cb. O.
11) आसि O.

लज्जी शुची ये च भवेयु सत्त्वाः संप्रस्थिता उत्तममग्रबोधिम्।
विशारदो भूत्व वदेमि तेषामेकस्य यानस्य अनन्तवर्णान्[1]॥ १४३॥
एतादृशी देशन नायकानामुपायकौशल्यमिदं वरिष्ठम्।
बह्वनि संधावचनेहि चोक्तं दुर्बोध्यमेतं हि अशिक्षितेहि॥ १४४॥
तस्माद्धि संधावचनं विज्ञानिया बुद्धान लोकाचरियाण तायिनाम्। 5
ज्ञत्वित्व काङ्क्षां विजहित्व संशयं भविष्यथा बुद्ध ज्ञनेत्र हर्षम्[2]॥ १४५॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याय उपायकौशल्यपरिवर्तो नाम द्वितीयः॥[3]

1) र्णा A. K. W. र्णान् B. र्णा Cb.
2) Mss. add इति.
3) इति in A. K. W. आर्य in B. श्री is added in A. instead of आर्य. The same in similar cases hereafter. O has सद्धर्मपुण्डरीके धर्मपर्यायस्य उपायकौशल्यपरिवर्तो नाम द्वितीयः.

III.

अथ खल्वायुष्माञ्शारिपुत्रस्तस्यां वेलायां तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातो येन भगवांस्तेनाञ्जलिं प्रणाम्य[1] भगवतो ऽभिमुखो[2] भगवन्तमेव[2] व्यवलोकयमानो भगवन्तमेतदवोचत्। आश्चर्याद्भुतप्राप्तो ऽस्मि भगवन्नौद्दित्यप्राप्त इदमेवंरूपं भगवतो ऽन्तिकाद्धोषं श्रुत्वा। तत्कस्य हेतोः। अश्रुत्वैव तावदहं भगवन्निदमेवंरूपं[3] भगवतो ऽन्तिकाद्धर्मं तदन्यान्बोधिसत्त्वान्दृष्ट्वा बोधिसत्त्वानां चानागते ऽध्वनि बुद्धनाम श्रुत्वातीव शोचाम्यतीव संतप्ये भ्रष्टो ऽस्म्येवंरूपात्तथागतज्ञान[गोचरा]ज्ञान[4]दर्शनात्। यदा चाहं भगवन्नभीक्ष्णं गच्छामि पर्वतगिरिकन्दराणि वनषण्डान्यारामवृक्षमूलान्येकाग्रतानि दिवाविहाराय तदाप्यहं भगवन्यद्रूपस्त्वेनानेनैव विहारेण विहरामि। तुल्यनामधर्मधातुप्रवेशे[5] वयं भगवता क्षीनेन यानेन निर्यातिताः। एवं च मे भगवंस्तस्मिन्समये भवत्यस्माकमेवैषो ऽपराधो नैव भगवतो ऽपराधः। तत्कस्य हेतोः। सचेद्भगवानस्माभिः प्रतीक्षितः स्यात्सामुत्कर्षिकीं धर्मदेशनां कथयमानो यदिदमनुत्तरां सम्यक्संबोधिमारभ्य तेष्वेव वयं भगवन्धर्मेषु[6] निर्याताः स्याम। यत्पुनर्भगवन्नस्माभिरनुपस्थितेषु बोधिसत्त्वेषु संधाभाष्यं भगवतो ऽज्ञानमनिस्तरणीयः प्रथमभाषितेव तथागतस्य धर्मदेशना श्रुत्वोद्गृहीता धारिता भाविता चिन्तिता मनसिकृता सो ऽहं भगवन्नात्मपरिभाषणयैव[7] भूयिष्ठेन रात्रि-

1) Mss. प्रणाम्य. Equally good would be प्रणमत्य and प्रणामयित्वा.

2) भगवतो ऽभिमुखो एव left out in A. K. W.

3) इदं रूपं left out in K. W.

4) The syllables in brackets wanting in O.

5) तुल्य A. Ca. Cb. K. W. तुल्यो B. तुल्ये O. Cp. Kern's version, p. 60, note 2, and st. 8.

6) K. adds अ.

7) या एव A. B. या एवं K. W. षयैव Ca. षैवया Cb. षाय एवं O.

दिवान्यतिनामयामि[1]। अद्याहं[2] भगवन्निर्वाणप्राप्तः। अद्याहं[2] भगवन्परिनिर्वृतः। अद्य मे भगवन्नर्कुलं प्राप्तं। अद्याहं भगवन्[3]भगवतः पुत्रो ज्येष्ठ औरसो मुखतो जातो धर्मजो धर्मनिर्मितो धर्मदायादो धर्मनिर्वृत्तः[4]। अपगतपरिदाहो ऽस्म्यद्य भगवन्निममेवंरूपमद्भुतधर्ममश्रुतपूर्वं भगवतो ऽन्तिकाद्घोषं श्रुत्वा[5]॥

अथ खल्वायुष्माञ्शारिपुत्रस्तस्यां वेलायां भगवन्तमाभिर्गाथाभिरध्यभाषत॥

आश्चर्यप्राप्तो ऽस्मि महाविनायक[6] औद्दित्यज्ञातो इमु घोष[7] श्रुत्वा।
कथंकथा मह्य न भूय काचित्परिपाचितो ऽहं इह[8] अग्रयाने॥ १॥
आश्चर्यभूतः सुगतान घोषः काङ्क्षां च शोकं च जहाति प्राणिनाम्।
तीर्णास्मवस्य मम यश्च शोको विगतो मि[9] सर्व श्रुणियान घोषम्॥ २॥
दिवाविहारं अनुचङ्क्रमन्तो वनषण्ड आरामथ वृक्षमूलम्[10]।[11]
गिरिकन्दरांश्चाप्युपसेवमानो अनुचिन्तयामि[12] इममेवचिन्ताम्॥ ३॥
अहो ऽस्मि परिवञ्चितु पापचित्तैस्तुल्येषु धर्मेषु अनास्रवेषु।
यन्नाम त्रैधातुकि अग्रधर्मं न देशयिष्यामि अनागते ऽध्वे॥ ४॥

1) दिवां K. दिवां परिणामयामि W. रात्रिदिवसान्य° O.

2) स्मि A. Ca. Cb. स्मिन् B. स्मिं K. W.

3) भगवन् left out in A. K. W.

4) निर्वृतः O.

5) सान्तिकाच्छ्रुत्वा O.

6) उ K. W.

7) षं B. Ca. Cb. ष K. W.

8) इमु A.

9) म A. मि B. Ca. Cb. स्मिं K. W. पि O.

10) हारं चानु A. हारमनु B. हारामनु Cb. हारं च नु Ca. हानं चनु K. हानं चानु W.

11) Thus O.; मूलान् the rest.

12) All but O. मी.

द्वात्रिंशतीलक्षणा मह्य भ्रष्टा[1] सुवर्णवर्णाच्कविता[2] च भ्रष्टा ।
बला विमोक्षाश्चिमि सर्वि रिच्चिता तुल्येषु धर्मेषु अक्रो ऽस्मि मूढः ॥ ५ ॥
अनुव्यञ्जना ये च महामुनीनामशीतिपूर्णाः प्रवरा विशिष्टाः ।
अष्टादशावेणिक ये च धर्मास्ते चापि भ्रष्टा अक्रु वञ्चितो ऽस्मि ॥ ६ ॥
दृष्ट्वा च त्वां लोकहितानुकम्पी[3] दिवाविहारं परिगम्य चैकः ।
क्व वञ्चितो ऽस्मीति विचिन्तयामि अप्रमङ्गज्ञानातु अचिन्तियातः ॥ ७ ॥
रात्रिंदिवानि[4] क्षेपयामि नाथ भूयिष्ठ सो एव विचिन्तयन्तः ।
पृच्छामि तावद्भगवन्तमेवं भ्रष्टो ऽहमस्मीत्यथ वा न वेति ॥ ८ ॥
एवं च मे चिन्तयतो जिनेन्द्र गच्छन्ति रात्रिंदिव नित्यकालम् ।
दृष्ट्वा च अन्यान्बुद्ध बोधिसत्त्वान्संवर्णितांल्लोकविनायकेन ॥ ९ ॥
श्रुत्वा च सो ऽहं इमु बुद्धधर्मं संधाय एतत्किल भाषितं ति ।
अतर्किकं सूक्ष्ममनास्रवं च ज्ञानं प्रणेति[6] जिन बोधिमण्डे ॥ १० ॥
दृष्टीविलग्नो ह्यहमासि पूर्वं परिव्राजकस्तीर्थिकसंमतश्च ।
ततो मम आशयु ज्ञात्व नाथो दृष्टीविमोक्षाय ब्रवीति निर्वृतिम् ॥ ११ ॥
विमुच्य ता दृष्टिकृतानि सर्वशः शून्यांश्च धर्मानक्रु स्पर्शयित्वा ।
ततो विज्ञानाम्यक्रु निर्वृतो ऽस्मि न चापि निर्वाणामिदं प्रबुध्यति[7] ॥ १२ ॥

1) भ्रष्ट O., भ्रष्टाः and भ्राष्टाः the others.

2) All but O. विना.

3) I. e. Skr. °कम्पिन्. O. has °कम्पका.

4) क्षि Cb. K. W.

5) वा K. W.

6) All but O. ती.

7) प्रकत्थ्यते O. Undoubtedly an older reading had प्रवुच्यति, a Sanskrtised पवुच्चति.

यदा तु बुद्धो भवते ऽप्रमत्तः पुरस्कृतो नरमरुपत्तरात्तसैः ।
द्वात्रिंशतीलक्षणरूपधारो अशेषतो निर्वृतु भोति तत्र[1] ॥ १३ ॥
व्यपनीत[2] सर्वाणि[3] मि मन्यितानि श्रुत्वा च घोषं अकृमस्य निर्वृतः ।
यदापि व्याकुर्वसि अग्रबोधौ पुरतो हि लोकस्य सदेवकस्य ॥ १४ ॥
बलवच्च आसीन्मम क्रुम्भितत्वं[4] प्रथमं गिरं श्रुत्व विनायकस्य ।
मा क्वैव मारो स भवेद्विक्लेठको अभिनिर्मिनित्वा भुवि बुद्धवेषम् ॥ १५ ॥
यदा तु केतूहि च कारणैश्च दृष्टान्तकोटीनयुतैश्च दर्शिता ।
सुपरिस्थिता सा वरबुद्धबोधिस्ततो[5] ऽस्मि निष्काङ्क्षु श्रुणित्व धर्मम् ॥ १६ ॥
यदा च मे बुद्धसहस्रकोट्यः कीर्तेष्यंती[6] तान्परिनिर्वृताञ्जिनान् ।
यथा च तैर्देशितु एष धर्म उपायकौशल्य प्रतिष्ठिकित्वा ॥ १७ ॥
अनागताश्चो[7] बुद्धबुद्ध लोके तिष्ठन्ति ये चो[7] परमार्थदर्शिनः ।
उपायकौशल्यशतैश्च धर्मं निदर्शयिस्यत्यथ देशयन्ति[8] च ॥ १८ ॥
यदा च ते आत्मन यादृशी चरी अभिनिष्क्रमित्वा प्रभूतीय[9] संस्तुता[10] ।

1) निर्वृति तत्र भोति O.

2) य A. K. W. त B. Ca. Cb.

3) नि A. सर्वे मम O.

4) क्वेत्सितत्वं A. संचितत्वं B. क्वभितत्वं Ca. O. क्वेतितत्वां Cb. क्रम्भितत्वं K. W.

5) धि A. B. Ca. K. W. धिं Cb. O. The Skr. Sandhi, of course, not original.

6) कीर्ते, O. कीर्ति the others.

7) च for चो O., rightly.

8) दर्शयंति A. B. Ca. Cb. देशयन्ति K. W.

9) अभिनिष्क्रमणात्प्रवृत्तो A. Cb. अ° प्रभूतौ B. अ° प्रभृत्तो Ca. अ° प्रभूतो K. W. Our r. = O.

10) All but O. तः.

बुद्धं[1] च ते यादशु धर्मचक्रं यथा च ते ज्वस्थित धर्मदेशना ॥ १९ ॥
ततश्च ज्ञानामि न एष मारो भूतां चरिं दर्शयि लोकनाथः।
न क्वत्र माराण गतीकृ विद्यते ममैव चित्तं विचिकित्सप्राप्तम् ॥ २० ॥
यदा तु मधुरेण गभीरेवत्स्वरेण[2] संहर्षितो बुद्धस्वरेण चारुम्।
तदा मि विधंसित[3] सर्वसंशया विचिकित्स नष्टा च स्थितो ज्स्मि[4] ज्ञाने ॥ २१ ॥
निःसंशयं भेष्यि तथागतो ज्हं पुरस्कृतो लोकि सदेवकेस्मिन्[5]।
संधाय वक्ष्ये इमु बुद्धबोधिं समादपेत्तो[6] बहुबोधिसत्त्वान् ॥ २२ ॥

एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। आरोचयामि ते शारिपुत्र प्रतिवेदयामि ते ज्स्य सदेवकस्य लोकस्य पुरतः समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः[6] पुरतो मया त्वं शारिपुत्र विंशतीनां बुद्धकोटीनयुतशतसहस्राणामन्तिके परिपाचितो ज्नुत्तरायां सम्यक्संबोधौ। मम च त्वं[9] शारिपुत्र दीर्घरात्रमनुशिक्षितो ज्भूत्। स त्वं शारिपुत्र बोधिसत्त्वसंमत्रितेन[10] बोधिसत्त्वरहस्येनेह मम प्रवचन उपपन्नः। स त्वं शारिपुत्र बोधिसत्त्वाधिष्ठानेन तत्पौर्वकं चर्याप्रणिधानं बोधिसत्त्वसंमत्रितं बोधिसत्त्वरहस्यं न समनुस्मरसि। निर्वृतो[11] ज्स्मीति मन्यसे। सो ज्हं त्वां[11] शारिपुत्र पूर्वचर्याप्रणिधानज्ञानानुबो-

1) बुद्धश्च B.
2) MSS. गम्भीर्.
3) सर्वि B.
4) स्मिं K. W.
5) कस्मिं K. कस्मि O. केस्मिन् the rest.
6) पिष्ये O.
7) left out in K. W.
8) न Ab. O. नि in other MSS.
9) सत्वं A. मम च त्वं B. Cb. स च त्वं K. W. मया च त्वं O.
10) स A. B. Ca. K. W. and it is left out in Cb. But see below.
11) ज्निर्वृतो निर्वृतो O. All but O. स्तीति.

धमनुस्मारयितुकाम इमं सद्धर्मपुण्डरीकं धर्मपर्यायं सूत्रान्तं महावैपुल्यं बोधिसत्त्वावदानं[1] सर्वबुद्धपरिग्रहं श्रावकाणां संप्रकाशयामि ॥

अपि खलु पुनः शारिपुत्र भविष्यसि त्वमनागते ज्धन्यप्रमेयैः कल्पैरचिन्त्यैरप्रमाणैर्बहूनां[2] तथागतकोटीनयुतशतसहस्राणां[3] सद्धर्मं धारयित्वा विविधां च पूजां कृत्वेमामेव बोधिसत्त्वचर्यां परिपूर्य[4] पद्मप्रभो नाम तथागतो ज्र्हन्सम्यक्संबुद्धो लोके भविष्यसि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च[5] बुद्धो भगवान्॥

तेन खलु पुनः शारिपुत्र समयेन तस्य भगवतः पद्मप्रभस्य तथागतस्य विरजं नाम बुद्धक्षेत्रं भविष्यति समं रमणीयं प्रासादिकं परमसुदर्शनीयं[6] परिशुद्धं च स्फीतं चर्द्धं च क्षेमं च सुभिक्षं च बहुजननारीगणाकीर्णं[7] च महाप्रकीर्णं च वैडूर्यमयं सुवर्णसूत्राष्टापदनिबद्धम्। तेषु चाष्टापदेषु[8] रत्नवृक्षा भविष्यन्ति सप्तानां रत्नानां पुष्पफलैः सततसमितं समर्पिताः॥

सो ज्पि शारिपुत्र पद्मप्रभस्तथागतो ज्र्हन्सम्यक्संबुद्धस्त्रीण्येव यानान्यारभ्य धर्मं देशयिष्यति। किंचापि शारिपुत्र स तथागतो न कल्पकषाय[9] उत्पत्स्यते। अपि तु प्रणिधानवशेन धर्मं देशयिष्यति॥

1) The title in O. is constantly सूत्रं महावैतुल्यं बोधिसत्त्वोत्पादं.
2) अप्रमाणैर् left out in K. W.
3) न Cb. O. The others have नि.
4) परिपूरयित्वा A. K. W. O. परिपूर्य B. Ca. Cb.
5) O. has regularly देवमनुष्याणां, agreeing with Pāli *devamanussānam*.
6) प्रदर्श A. K. W. दर्श B. O. सुदर्श Ca. परमदर्श Cb.
7) बहुजनमनुष्याकीर्णं Cb. बहुजनदेवपरिपूर्णं च O., with omission of महाप्रकीर्णं च. One MS. has बहुजनमहाप्रकीर्णं.
8) °पदीकृतं सर्वत्र चाष्टापदे O. Have we to r. तत्र चाष्टापदे?
9) B. adds काले.

महारत्नप्रतिमण्डितश्च नाम शारिपुत्र स कल्पो भविष्यति। तत्किं मन्यसे शारिपुत्र केन कारणेन स कल्पो महारत्नप्रतिमण्डित इत्युच्यते। रत्नानि[1] शारिपुत्र बुद्धक्षेत्रे बोधिसत्त्वा उच्यन्ते। ते तस्मिन्काले[2] तस्यां विरजायां लोकधातौ बहवो बोधिसत्त्वा भविष्यत्यप्रमेयासंख्येयाचिन्त्यातुल्यामाप्या गणना[3] समतिक्रान्ता[4] अन्यत्र तथागतगणनया। तेन कारणेन स कल्पो महारत्नप्रतिमण्डित इत्युच्यते॥

तेन खलु पुनः शारिपुत्र[5] समयेन बोधिसत्त्वास्तस्मिन्बुद्धक्षेत्रे यद्भूयसा[6] रत्नपद्मविक्रामिणो भविष्यन्ति। अनादिकर्मिकाश्च ते बोधिसत्त्वा भविष्यन्ति चिरचरितकुशलमूला बहुबुद्धशतसहस्रचीर्णब्रह्मचर्यास्तथागतपरिसंस्तुता बुद्धज्ञानाभियुक्ता महाभिज्ञापरिकर्मनिर्जाताः[7][8][9] सर्वधर्मनयकुशला[10] मार्दवाः स्मृतिमन्तः। भूयिष्ठेन[11] शारिपुत्रैवंरूपाणां बोधिसत्त्वानां परिपूर्णं तद्बुद्धक्षेत्रं भविष्यति॥

तस्य खलु पुनः शारिपुत्र पद्मप्रभस्य तथागतस्य द्वादशान्तरकल्पा आयुष्प्रमाणं[12] भविष्यति स्थापयित्वा कुमारभूतत्वम्। तेषां च सत्त्वानामष्टान्तरकल्पा आयुष्प्रमाणं भवि-

1) रत्नं A. B. Ca. Cb. W., left out in K. रत्नानि O.

2) B. adds तस्मिन्समये, then reads तस्मि विरजासि. O has कल्पे for काले.

3) MSS. ना.

4) वीतिवृत्ता O. Cp. Pāli *vītivatta*.

5) शारिपुत्र is put in after समयेन in A. K. W.

6) भूयसो O.

7) र्णाः A. W. र्ण Cb. र्णः K. चरित B.

8) भियुक्ता महाभिज्ञा left out in A. यान for ज्ञान O. ज्ञाना W.

9) कार्य B.

10) कुशलमूला B.

11) भूयस्त्वेन B. भूयिष्ठं O.

12) कल्पमायु A. K. W. कल्पा आयु B. Cb. कल्पनायु O.

ष्यति[1]। स च शारिपुत्र पद्मप्रभस्तथागतो द्वादशानामन्तरकल्पानामत्ययेन[2] धृतिपरिपूर्णो नाम बोधिसत्त्वं महासत्त्वं व्याकृत्यानुत्तरायां[3] सम्यक्संबोधौ परिनिर्वास्यति। अयं भिक्षवो धृतिपरिपूर्णो बोधिसत्त्वो महासत्त्वो ममातन्तरमनुत्तरां[4] सम्यक्संबोधिमभिसंभोत्स्यते। पद्मवृषभविक्रामी[5] नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यति विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। तस्यापि शारिपुत्र पद्मवृषभविक्रामिणस्तथागतस्यैवंरूपमेव बुद्धक्षेत्रं भविष्यति॥

तस्य खलु पुनः शारिपुत्र पद्मप्रभस्य तथागतस्य परिनिर्वृतस्य द्वात्रिंशद्दन्तरकल्पान्सद्धर्मः[6] स्थास्यति। ततस्तस्य तस्मिन्सद्धर्मन्तोणे द्वात्रिंशद्दन्तरकल्पान्सद्धर्मप्रतिरूपकः स्थास्यति॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

भविष्यसे शारिसुता तुव्हं पि[7] अनागते ऽध्वनि जिनस्तथागतः।
पद्मप्रभो नाम समन्तचक्षुर्विनेष्यसे प्राणिसहस्रकोट्यः॥ २३॥
बहुबुद्धकोटीषु कृत्वा सत्क्रियां[9] चर्याबलं तत्र उपार्जयित्वा।
उत्पादयित्वा च दृशो[10] बलानि स्पृशिष्यसे उत्तममग्रबोधिम्॥ २४॥

1) From स्थापयित्वा till भविष्यति left out in B. कल्पाना O.

2) दृशान्तर Cb.

3) त्वा A. Ca. Cb. K. W. त्या B.

4) MSS. ममान्तरम° and ममान्तराद्°.

5) क्रमो O. So too in the sequel.

6) A. K. W. add प्रति.

7) सुतानुकम्पी Cb. Cp. Kern's English version, p. 68 note 2.

8) चक्षुः in all MSS.

9) यां A. याम् K. W. यान् Cb. पूजां B.

10) दृशब्ब Cb.

अचिन्तिये अपरिमितस्मिं[1] कल्पे प्रभूतरत्नस्तद् कल्पु[2] भेष्यति।
विरजा[3] च नाम्ना[4] तद् लोकधातुः क्षेत्रं विशुद्धं द्विपदोत्तमस्य ॥ २५ ॥
वैडूर्यसंस्तीर्ण[5] तथैव भूमिः सुवर्णसूत्रप्रतिमण्डिता च।
रत्नामयैर्वृक्षशतैरुपेता सुदर्शनीयैः फलपुष्पमण्डितैः ॥ २६ ॥
स्मृतिमत्त तस्मिन्[6] बुद्धबोधिसत्त्वाः चर्याभिनिर्हारसुकोविदाश्च।
ये शिक्षिता बुद्धशतेषु चर्यां ते तत्र क्षेत्रे उपपद्य सन्ति ॥ २७ ॥
सो चज्ञिनः[7] पश्चिमके समुच्छ्रये कुमारभूमीमतिनामयित्वा।
ज्ञात्वित्व कामानभिनिष्क्रमित्वा स्पृशिष्यते उत्तममग्रबोधिम् ॥ २८ ॥
सप्त द्वादशा[8] अत्तरकल्प तस्य भविष्यते आयु तदा[9] जिनस्य।
मनुज्ञानमभ्यत्तरकल्प[10] अष्ट आयुष्प्रमाणं तर्हि तेष भेष्यति ॥ २९ ॥
परिनिर्वृतस्यापि जिनस्य[11] तस्य द्वात्रिंशतो[12] अत्तरकल्पपूर्णाम्।
सद्धर्म संस्थास्यति तस्मिं[13] काले हिताय लोकस्य सदेवकस्य ॥ ३० ॥

1) स्मिं A. K. W.
2) ल्प A. B.
3) ज्ञा A. B. Ca. Cb. O. ज्ञो K. W.
4) नामा O. नाम्नस्त° the others.
5) All but O. संतीर्ण.
6) तत्र A. B. K. W. O.
7) सचेज्ञिनः A. K. W. सचज्ञिनः B. सो पिज्ञिनः Ca. सो ज्ञिनः Cb. स च ज्ञिनः O.
8) शाद् B. शाभ्य O.
9) स A. K. W. त Cb. left out in B. तत्र O.
10) Thus O.; the others ज्ञानयी अत्त°.
11) तथाग Cb.
12) द्वाविश O. तो in all.
13) स्मिं A. K. W. स्मि B. O. तत्र Cb.

सद्धर्मि[1] तीणे प्रतिरूपको स्यं[2] द्वात्रिंशती अत्तरकल्प स्थास्यति।
शरीरवैस्तारिक तस्य तायिनः सुमत्कृतो नरमरुतैश्चनित्यम् ॥ ३१ ॥
एतादृशः सो भगवान्भविष्यति अक्रुष्ट त्वं शारिसुता भवस्व।
त्वमेव सो तादृशको भविष्यसि अनाभिभूतो द्विपदानमुत्तमः[3] ॥ ३२ ॥

अथ खलु ताश्चतस्रः पर्षदो भिक्षुभिक्षुण्युपासकोपासिकादेवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्या[4] आयुष्मतः शारिपुत्रस्येदं व्याकरणमनुत्तरायां सम्यक्संबोधौ भगवतो ऽन्तिकात्संमुखं श्रुत्वा तुष्टा उदग्रा आत्तमनसः[5] प्रमुदिताः प्रीतिसौमनस्यजाताः स्वकस्वकैश्चीवरैर्भगवत्तमभिच्छादयामासुः। शक्रश्च देवानामिन्द्रो ब्रह्मा च सहांपतिरन्याश्च देवपुत्रशतसहस्रकोट्यो भगवन्तं दिव्यैर्वस्त्रैरभिच्छादयामासुः। दिव्यैश्च मान्दारवैर्महा[6]मान्दारवैश्च पुष्पैरभ्यवकिरन्ति स्म। दिव्यानि च वस्त्राण्युपर्यन्तरीक्षे भ्रामयन्ति स्म। दिव्यानि च तूर्यशतसहस्राणि डुन्डुभयश्चोपर्यन्तरीक्षे प्रावादयन्ति[7] स्म। मृदुकं च पुष्पवर्षमभिप्रवर्षयित्वेवं च वाचं भाषन्ते स्म। पूर्वं भगवता वाराणस्यामृषिपतने मृगदावे धर्मचक्रं प्रवर्तितमिदं पुनर्भगवताद्यानुत्तरं द्वितीयं धर्मचक्रं प्रवर्तितम्॥

ते च देवपुत्रास्तस्यां वेलायामिमा गाथा अभाषन्त॥

धर्मचक्रं प्रवर्तेसि लोके अप्रतिपुद्गल[8]।
वाराणस्यां महावीर स्कन्धानामुदयं व्ययम् ॥ ३३ ॥

1) Thus O.; the others धर्म.
2) All but O. कस्य.
3) उ B. O.
4) ष्यशतश्च A. K. ष्यश्च शतश्च W. ष्यशतसहस्राणि O.
5) मनस्का A. K. W.
6) त्वमहा B. Cb.
7) प्रावाद्यंति A. B. Ca. Cb. प्रावादन्ति K. W. प्रावादन्तित्सु O.
8) लः A. K. W.

प्रथमं प्रवर्तितं तत्र द्वितीयमिदं नायक।
दुःश्रद्दधेय यस्तेषां[1] देशितो ऽद्य विनायकं[2] ॥ ३४ ॥
बुद्धधर्मः श्रुतो ऽस्माभिर्लोकनाथस्य संमुखम्।
न चायमीदृशो धर्मः श्रुतपूर्वः कदाचन ॥ ३५ ॥
अनुमोदाम महावीर संघभाष्यं महर्षिणाम्।
यथार्यो[4] व्याकृतो ह्येष शारिपुत्रो विशारदः ॥ ३६ ॥
वयमप्येदृशाः स्यामो बुद्धा लोके अनुत्तराः।
संघाभाष्येण[5] देशेत्तो बुद्धबोधिमनुत्तराम् ॥ ३७ ॥
यच्छुतं कृतमस्माभिरस्मिँल्लोके[6] परत्र वा।
आगतिश्च[7] गतिश्च[8] प्रार्थना भोतु बोधये ॥ ३८ ॥

अथ खल्वायुष्माञ्शारिपुत्रो भगवन्तमेतदवोचत्। निष्काङ्क्षो ऽस्मि भगवन्विगतकथंकथो भगवतो ऽन्तिकात्संमुखमिदमात्मनो व्याकरणं श्रुत्वानुत्तरायां सम्यक्संबोधौ। यानि चेमानि भगवन्द्वादश वशीभूतशतानि भगवता पूर्वं शैक्षभूमौ स्थापितान्येवमवदितान्येवमनुशिष्टान्यभूवन्। एतत्पर्यवसानो मे भिक्षवो धर्मविनयो यदिदं ज्ञातिसंग्राव्या-

1) दुःश्रद्दधेयो यदन्येषां A. दुश्रद्दयो यमन्येष्यन् B. दुःश्रद्देयो यस्तेषां Cb. दुःश्रद्दधेयं। यदन्यषां K. दुःश्रद्दधेयं यदन्येषां W. दुःश्राद्धेयमिदं धर्मं O.

2) देशितं श्रद्य शास्तृणां (r. शास्तृणा) O. Perhaps the whole to r. दुःश्रद्धेयं यदन्येषां देशिताद्य (i. e. देशितमद्य) विनायक.

3) स्माकं लो K. W.

4) यथा यो A. B. K. W. यथार्यो Ca. Cb.

5) संधाय K. W.

6) स्मिं लोके A. Ca. Cb. K. W. स्मिन्लोके B.

7) आराधित O.

8) All but O. संबुद्धः.

9) All but O. एव.

धिमरणशोकसमतिक्रमो निर्वाणसमवसरणः। इमे च भगवन्द्वे भिक्षुसहस्रे शैक्षाशैक्षाणां भगवतः श्रावकाणां सर्वेषामात्मदृष्टिविभवदृष्टिसर्वदृष्टिविवर्जितानां निर्वाणभूमिस्थिता स्म इत्यात्मान संजानतां ते भगवतो ऽन्तिकादिमंमेवंरूपमश्रुतपूर्वं धर्मं श्रुत्वा कथंकथामापन्नाः। तत्साधु भगवान्भाषतामेषां[6] भिक्षूणां कौकृत्यविनोदनार्थं यथा भगवन्नेताश्चतस्रः पर्षदो निष्काङ्क्षा निर्विचिकित्सा भवेयुः[9] ॥

एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। ननु ते मया शारिपुत्र पूर्वमेवाख्यातं यथा नानाभिनिर्हारनिर्देशविविधहेतुकारणनिदर्शनारम्बणनिरुक्त्युपायकौशल्यैर्नानाधिमुक्तानां सत्त्वानां नानाधात्वाशयानामाशयं विदित्वा तथागतो ऽर्हन्सम्यक्संबुद्धो धर्मं देशयति। इमामेवानुत्तरां सम्यक्संबोधिमारभ्य सर्वधर्मदेशनाभिर्बोधिसत्त्वयानमेव समादापयति[11]। अपि तु खलु पुनः शारिपुत्रौपम्यं ते करिष्यामि अस्यैवार्थस्य भूयस्या[12] मात्रया संदर्शनार्थम्। तत्कस्य हेतोः। उपमयैकैकत्या[13] विज्ञपुरुषा भाषितस्यार्थमाजानन्ति ॥

1) व्याधि in Cb. O. only.

2) शैक्षा left out in B. K. W.

3) विभवदृष्टि left out in K. W.

4) सत्व B.

5) All द्.

6) भाष त्वमेषां A. भाषतामेवं एषां B. भाषतामेषां Cb. भाषस्व त्वमेषः K. W.

7) Left out in K. W.

8) वान्निमांश्च A. वनिमां च K. W.

9) विकरेयुः A. K. W.

10) निर्देश A. K. W.

11) तीति B.

12) भूयसो O.; cp. Pāli *bhīyoso*.

13) All but O. एकया.

तद्यथापि नाम शारिपुत्रेह स्यात्कस्मिंश्चिदेव ग्रामे वानगरे वा निगमे वा जनपदे[1] वा[1] जनपदप्रदेशे वा राष्ट्रे वा राजधान्यां वा गृहपतिर्जीर्णो वृद्धो महल्लको ऽभ्यतीतवयोऽनुप्राप्त आढ्यो[2] महाधनो महाभोगः। महच्चास्य[2] निवेशनं भवेद्उच्छ्रितं च विस्तीर्णं च चिरकृतं च जीर्णं च द्वयोर्वा त्रयाणां वा चतुर्णां वा पञ्चानां वा प्राणिशतानां[3] मावासः। एकद्वारं च तन्निवेशनं[4] भवेत्। तृणसंछन्नच्च भवेत्। विगडितप्रासादं च भवेत्। पूतिस्तम्भमूलं च भवेत्। संशीर्णकुड्यकटलेपनं[5] च भवेत्। तच्च सकलमेव महताग्निस्कन्धेन सर्वपार्श्वेषु सर्वावत्तं[6] निवेशनं प्रदीप्तं भवेत्। तस्य च पुरुषस्य बहवः कुमारकाः स्युः पञ्च वा दश वा विंशतिर्वा स च पुरुषस्तस्मान्निवेशनाद्बहिर्निर्गतः स्यात्[7]॥

अथ खलु शारिपुत्र स पुरुषस्तं स्वकं निवेशनं महताग्निस्कन्धेन समन्तात्संप्रज्वलितं दृष्ट्वा भीतस्त्रस्त उद्विग्नचित्तो भवेदेवं चानुविचिन्तयेत्प्रतिबलो ऽहमनेन महताग्निस्कन्धेनासंस्पृष्टो ऽपरिदग्धः क्षिप्रमेव स्वस्तिनास्माद्गृहादादीप्तादुद्गूरेण निर्गन्तुं निर्धावितुम्। अपि तु[8] य इमे ममैव पुत्रा बालकाः कुमारका अस्मिन्नेव निवेशन आदीप्ते तैस्तैः क्रीडनकैः क्रीडन्ति रमन्ति[9] परिचारयन्ति[10]। इमं चागारमादीप्तं न जानन्ति न बुध्यन्ते न विदन्ति न चेतयन्ति नोद्वेगमापद्यन्ते। संतप्यमाना अप्यनेन महताग्निस्कन्धेन महता च दुःखस्कन्धेन स्पृष्टाः समाना न दुःखं मनसि कुर्वन्ति। नापि निर्गमनमनसिकारमुत्पादयन्ति॥

1) Left out in K. W.
2) महान्तं चास्य A. B. K. W. महत्तं चास्य O.
3) K. W. add क.
4) In Cb. only.
5) सन्नीर्ण A. संसीर्ण B. संकीर्ण Cb. संशीर्ण K. O. संन्नीर्ण W.
6) Left out in B. O.
7) सचेत्पु A. K. W. स च पु B. Ca. Cb.
8) B. adds खलु पुनर् O. खलु.
9) Better would be रमन्ते, the reading later on.
10) Left out in K. W.

स च शारिपुत्र पुरुषो बलवान्भवेद्बाहुबलिकः। स एवमनुविचिन्तयेद्बहुमस्मि बलवान्बाहुबलिकश्च। यन्वहं सर्वानिमान्कुमारकान्[1][2]नेकपिण्डयित्वोत्सङ्केनादायास्माद्गृहान्निर्गमयेयम्। स पुनरेवमनुविचिन्तयेत्। इदं खलु निवेशनमेकप्रवेशं संवृतद्वारमेव कुमारकाश्चपलाश्चञ्चला बालजातीयाश्च मा हैव परिभमेयुः। ते ऽनेन महताग्निस्कन्धेनानयव्यसनमापद्येरन्। यन्नूनमहमेतान्संचोदयेयमिति प्रतिसंख्याय तान्कुमारकानामन्त्रयते स्म। आगच्छत[3] भवन्तः[4] कुमारका निर्गच्छत[5]। आदीप्तमिदं गृहं महताग्निस्कन्धेन। मा हैवात्रैव सर्वे ऽनेन महताग्निस्कन्धेन धक्ष्यथानयव्यसनमापत्स्यध्वे[6]॥ अथ खलु ते कुमारका एवं तस्य हितकामस्य पुरुषस्य तद्भाषितं नावबुध्यन्ते नोद्विजन्ति नात्रसन्ति न संत्रसन्ति[7] न सत्रासमापद्यन्ते न विचिन्तयन्ति न निर्धावन्ति नापि जानन्ति[8] न विजानन्ति किमेतदादीप्तं नामेति। अन्यत्र तेन तेनैव धावन्ति विधावन्ति पुनः पुनश्च तं पितरमवलोकयन्ति। तत्कस्य हेतोः। यथापीदं बालभावत्वात्॥

अथ खलु स पुरुष एवमनुविचिन्तयेत्। आदीप्तमिदं निवेशनं महताग्निस्कन्धेन संप्रदीप्तं मा हैवाहं चेमे च कुमारका इहैवानेन महताग्निस्कन्धेनानयव्यसनमापत्स्यामहे। यन्वहमुपायकौशल्येनेमान्कुमारकानस्माद्गृहान्निष्क्रामयेयम्[10]। स च पुरुषस्तेषां कुमारकाणामाशयज्ञो भवेदधिमुक्तिं च विजानीयात्। तेषां च कुमारकाणामनेकविधान्य-

1) सर्वाणीमानि O. सर्वाणिमां the rest.
2) All कान्ये.
3) य A. O.
4) भगवन्तः कुमारकाहो। O.
5) य A. K. W. O. त Cb.
6) A. K. W. add ये खलु पुनः व्यसनमापत्स्यध्वं. O. has वाहु(r. द्गृहा)मास्यानयाद्यसनमापत्स्यथेति. The correct Skr. form is °ध्वे.
7) Left out in K. W.
8) न तुलयन्ति O.
9) नया व्यसना व्य O.
10) निष्कासयेयं O. Cp. p. 76, l. 10.

नेकानि क्रीडनकानि[1] भवेयुर्विविधानि[2] च रमणीयकानीष्टानि[3] कान्तानि प्रियाणि मनआपानि[4] तानि च दुर्लभानि भवेयुः। अथ खलु स पुरुषस्तेषां कुमारकाणामाशयं ज्ञात्वा तान्कुमारकानेतदवोचत्। यानि तानि कुमारका युष्माकं क्रीडनकानि रमणीयकान्याश्चर्याद्भुतानि येषामलाभात्संतप्यथ[5] नानावर्णानि बहुप्रकाराणि। तद्यथा गोरथकान्यजरथकानि[6][7] मृगरथकानि[7]। यानि भवतामिष्टानि कान्तानि प्रियाणि मनआपानि तानि च मया सर्वाणि बहिर्निवेशनद्वारे स्थापितानि युष्माकं क्रीडनकेतोः। आगच्छन्तु भवन्तो निर्धावत्वस्मान्निवेशनादहं वो यस्य यस्य येनार्थो येन प्रयोजनं भविष्यति तस्मै तस्मै तत्प्रदास्यामि। आगच्छन्त[8] शीघ्रं तेषां कारणं निर्धावत[9]। अथ खलु ते कुमारकास्तेषां क्रीडनकानां रमणीयकानामर्थाय[10] यावेच्चिरतानां यथासंकल्पितानामिष्टानां कान्तानां प्रियाणां मनआपानां नामधेयानि श्रुत्वा तस्मादादीनादगारात्तित्तप्रमेवारब्धवीर्या[11] बलवता जवेनान्योन्यमप्रतीक्षमाणाः कः प्रथमं कः प्रथमतरमित्यन्योन्यं संघट्टितकायास्तस्मादादीनादगारात्तित्तप्रमेव निर्धाविताः॥

1) डापन Ca. O.

2) From भवेयु till कानि left out in A. K. W. का left out in Ca. रमणीयकानि left out in A. K. W.

3) From कान्तानि till भवतामिष्टानि left out in A.

4) मनापानि B. Cb. O. K. W. मनआपानि Ca.

5) घे K. W. संतापमापद्यथ O.

6) गोन B.

7) नि left out in B. Cb.

8) च्छथ A. K. W. O. च्छत्त B. च्छत Cb.

9) थ Cb. O.

10) अर्थाय left out in K. W.

11) All but O. °लब्ध.

12) या त A. K. W. योस्त B. यां त Cb.

अथ स पुरुषः क्षेमस्वस्तिना तान्कुमारकान्निर्गतान्दृष्ट्वाभयप्राप्तानिति विदित्वा[1][2] काशे ग्रामचत्वर उपविष्टः प्रीतिप्रामोद्यजातो निरुपादानो विगतनिवरणो[3] ऽभयप्राप्तो भवेत्। अथ खलु ते कुमारका येन स पिता तेनोपसंक्रामन्नुपसंक्रम्य[4] एवं वदेयुः। देहि नस्तात तानि विविधानि क्रीडनकानि रमणीयानि[5]। तद्यथा गोरथकान्यजरथकानि मृगरथकानि। अथ खलु शारिपुत्र स पुरुषस्तेषां स्वकानां पुत्राणां वातजवसंपन्नान्गोरथकानेवानुप्रयच्छेत्सप्तरत्नमयान्सवेदिकान्सकिङ्किणीजालाभिप्रलम्बितानुच्चान्प्रगृहीतानाश्चर्याद्भुतरत्नालंकृताग्रदामकृतशोभान्पुष्पमाल्यालंकृतांस्तूलिकागोणिकास्तरणान्दूष्यपटप्रत्यास्तीर्णानुभयतो लोहितोपधानाञ्श्वेतैः प्रवाणडैः शीघ्रजवैर्गोणैर्योजितान्बहुपुरुषपरिगृहीतान्सवैद्ययत्तान्। गोरथकानेव वातबलजवसंपन्नानेकवर्णानेकविधानेकैकस्य दारकस्य दद्यात्। तत्कस्य हेतोः। तथा हि शारिपुत्र स पुरुष आढ्यश्च भवेन्महाधनश्च प्रभूतकोशकोष्ठागारश्च। स एवं पश्येत्। अलं म एषां कुमारकाणामन्यैर्यानैर्दत्तैरिति।

1) निर्गतान् left out in B. परिमुक्ता O.

2) वा B.

3) नी O.; the form constantly used in Mahāvastu, agreeing with Pāli *nīvaraṇa*.

4) उपसंक्रामन् in B. Cb. only. उपसंक्रमेयुरुपसंक्रमित्वा O.

5) O. has better यकानि; cp. above p. 74.

6) गोन B.

7) च्चात्प्र A. च्चा प्र B. K. W. च्चान्प्र Cb.

8) प्रत्याती A. K. W. वस्त्वास्तो B. प्रत्यास्ती Cb. O.

9) क्षितकृतो A. K. W.

10) योजितां A. B. योजयित्वा Cb. O. योजयितां K. W.

11) गोण Cb.

12) Left out in K. W.

13) In K. W. only.

14) मन्येद् O. B.

15) नैदत्ते A. Cb. K. W. नैदाते B. नैर्दत्तैस्त O.

तत्कस्य हेतोः। सर्व एवैते कुमारका ममैव पुत्राः सर्वे च मे प्रिया मनआपाः[1]। संविद्यन्ते च मे[2] इमान्येवंरूपाणि महायानानि समं च मयैते कुमारकाः सर्वे चित्तयितव्या न विषमम्। अहमपि बह्वकोशकोष्ठागारः सर्वसत्त्वानां[3]मप्यहमिमान्येवंरूपाणि महायानानि दद्याम्। किमङ्ग पुनः स्वकानां पुत्राणाम्। ते च दारकास्तस्मिन्समये तेषु महायानेष्वभिरुह्याश्वर्याद्भुतप्राप्ता भवेयुः। तत्किं मन्यसे शारिपुत्र मा खैव तस्य पुरुषस्य मृषावादः स्याद्येन तेषां दारकाणां पूर्वं त्रीणि यानान्युपदर्शयित्वा पश्चात्सर्वेषां[4] महायानान्येव दत्तान्युदाहरणान्येव दत्तानि॥

शारिपुत्र आह[5]। न खेतद्भगवन्न खेतत्सुगत। अनेनैव तावद्भगवन्कारणेन स पुरुषो न मृषावादी भवेद्यत्तेन पुरुषेणोपायकौशल्येन ते दारका[6][7]स्तस्मादादीप्तादगारान्निष्कासिता[8] जीवितेन चाभिच्छादिताः। तत्कस्य हेतोः। आत्मभावप्रतिलम्भेनैव भगवन्सर्वक्रीडनकानि लब्धानि भवन्ति। यद्यपि[9] तावद्भगवन्स पुरुषस्तेषां कुमारकाणामेकरथमपि न दद्यात्तथापि तावद्भगवन्स पुरुषो न[10] मृषावादी भवेत्। तत्कस्य हेतोः। तथा हि भगवंस्तेन पुरुषेण पूर्वमेवैवं[11]मनुविचिन्तितमुपायकौशल्येनाहमिमान्कुमारकांस्तस्मान्मरणा[12]द्दुःखस्कन्धात्परिमोचयिष्यामीति। अनेनापि भगवन्पर्यायेण तस्य पुरुषस्य न मृषावादो

1) मनापाः in all MSS. for मनआपाः.
2) मे in all MSS.
3) सत्त्वेभ्यो B.
4) सर्वेभ्यो B.
5) Left out in Cb.
6) Left out in K. W.
7) कुमारका B. Cb. बालदारका O.
8) निष्क्रामिता O. Cp. p. 73, l. 14.
9) All but O. यद्यदि.
10) In B. K. only. नं A.
11) एव in K. W. only.
12) MSS. कात्त.

भवेत्। कः पुनर्वादो यत्तेन पुरुषेण प्रभूतकोशकोष्ठागारमस्तीति कृत्वा पुत्रप्रियतामेव मन्यमानेन श्लाघमानेनैकवर्णान्येकयानानि दत्तानि यदुत[1] महायानानि। नास्ति भगवंस्तस्य पुरुषस्य मृषावादः॥

एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्। साधु साधु शारिपुत्र। एवमेतच्छारिपुत्र। एवमेतद्यथा वदसि। एवमेव[2] शारिपुत्र तथागतो[3] ऽर्हन्सम्यक्संबुद्धः सर्वभयविनिवृत्तः सर्वोपद्रवोपायासोपसर्गदुःखदौर्मनस्याविद्यान्धकारतमस्तिमिरपटलपर्यवनाद्धेभ्यः सर्वेण[4] सर्वं सर्वथा विप्रमुक्तः। तथागतो ज्ञानबलवैशारद्यावेणिकबुद्धधर्मसमन्वागत ऋद्धिबलेनातिबलवाँल्लोकपिता महोपायकौशल्यज्ञानपरमपारमिताप्राप्तो महाकारुणिको ऽपरिखिद्यमानसो हितैष्यनुकम्पकः। स[6] त्रैधातुके महतो[7] दुःखदौर्मनस्यस्कन्धेनादीप्तसंज्ञीर्णपटलशरणनिवेशनसदृश उत्पद्यते सत्त्वानां जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासाविद्यान्धकारतमस्तिमिरपटलपर्यवनाद्धप्रतिष्ठानां रागद्वेषमोहपरिमोचनहेतोरनुत्तरायां सम्यक्संबोधौ समादापनहेतोः। स उत्पन्नः[9] समानः पश्यति सत्त्वान्दह्यतः पच्यमानांस्तप्यमानान्परितप्यमानाञ्जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासैः परिभोगनिमित्तं च कामहेतुनिदानं चानेकविधानि दुःखानि प्रत्यनुभवन्ति। दृष्टधार्मिकं च पर्येष्टिनिदानं[10] परिग्रहनिदानं च सांपरायिकं नरकतिर्यग्योनियमलोकेष्वनेक-

1) यदिदं Cb. O.
2) एवं A. K. W. एवमेव B. Cb.
3) A. K. W. add च.
4) Left out in K. W.
5) ज्ञान left out in Cb. K. शल्येन K. ज्ञानदर्शन O.
6) सर्व A. W.
7) त left out in A. K. W.
8) तेन A. K. W. स B. सो Cb.
9) समुत्प A. K. W. स उप B. सदुत्प Cb.
10) पर्याष्ट K. W.

विधानि दुःखानि प्रत्यनुभविष्यन्ति[1]। देवमनुष्यदारिद्र्यमनिष्टसंयोगमिष्टविनाशविकानि च दुःखानि प्रत्यनुभवन्ति। तत्रैव च दुःखस्कन्धे परिवर्तमानाः क्रीडन्ति रमन्ते परिचारयन्ति नोत्त्रसन्ति न संत्रसन्ति न संत्रासमापद्यन्ते न बुध्यन्ते न चेतयन्ति[2] नोद्विजन्ति न निःसरणं[3] पर्येषन्ते तत्रैव चादीप्तागारसदृशे त्रैधातुके ऽभिरमन्ति तेन तेनैव विधावन्ति। तेन च मकृता दुःखस्कन्धेनाभ्याकृता न दुःखमनसिकारसंज्ञामुत्पादयन्ति॥

तत्र शारिपुत्र तथागत एवं पश्यति। अकं खल्वेषां सत्त्वानां पिता। मया क्षेते सत्त्वा अस्मादेवंरूपान्मकृतो दुःखस्कन्धात्परिमोचयितव्या मया चैषां सत्त्वानामप्रमेयमचिन्त्यं बुद्धज्ञानमुखं दातव्यं येनेते सत्त्वाः क्रीडिष्यन्ति रमिष्यन्ति परिचारयिष्यन्ति विक्रीडितानि च[5] करिष्यन्ति॥

तत्र शारिपुत्र तथागत एवं पश्यति। मचेदकं ज्ञानबलो ऽस्मीति कृत्वर्द्धिबलो ऽस्मीति कृत्वानुपायेनैषां सत्त्वानां तथागतज्ञानबलवैशारद्यानि संश्रावयेयं नैते सत्त्वा एभिर्धर्मैर्निर्यापयेयुः। तत्कस्य हेतोः। अध्यवसिता ह्यमी सत्त्वाः पञ्चसु कामगुणेषु त्रैधातुकं रत्यामपरिमुक्ता ज्ञातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो दृश्यन्ते पश्यन्ते तप्यन्ते परितप्यन्ते। अनिर्धावितास्त्रैधातुकादादीप्तजीर्णपटलशरणनिवेशनसदृशात्कथमेते बुद्धज्ञानं परिभोत्स्यन्ते॥

1) भवन्ति A. Ca. Cb. K. W. भविष्यन्ति B.
2) चित्तयन्ति O.
3) निश A. K. निस B. निःश Cb. W. निस्स O.
4) चेभ्यः सत्त्वेभ्य अप्र B.
5) In Cb. K. only.
6) ज्ञान left out in K. W. ज्ञानदर्शन O.
7) A. K. W. add अध्यवसिता ह्यमी सत्त्वाम्.
8) के K. W. Cb.
9) Left out in W.
10) Thus O., agreeing with p. 79, l. 9—10. The others have दीप्तशरणपटलनि°.
11) बुद्धेयुस्तत्र O.

तत्र शारिपुत्र तथागतो[1] यद्यथापि नाम स पुरुषो बाह्यबलिकः स्थापयित्वा बाह्यबलमुपायकौशल्येन तान्कुमारकांस्तस्मादादीप्तादगारान्निष्कासयेन्निष्कासयित्वा[2][3] च तेषां पश्चाद्दारुणि मक्षयानानि[4] दद्यात्[5] एवमेव शारिपुत्र तथागतो ऽप्यर्कन्सम्यक्संबुद्धः तथागतज्ञानबलवैशारद्यसमन्वागतः स्थापयित्वा तथागतज्ञानबलवैशारद्यमुपायकौशल्यज्ञानेनादीप्तजीर्णपटलशरणनिवेशनसदृशात्त्रैधातुकात्सत्त्वानां निष्कासनहेतोस्त्रीणि यानान्युपदर्शयति यदुत[7] श्रावकयानं प्रत्येकबुद्धयानं बोधिसत्त्वयानमिति। त्रिभिश्च यानैः सत्त्वाँल्लोभयत्येवं चैषां वदति। मा भवन्तो ऽस्मिन्नादीप्तागारसदृशे त्रैधातुके ऽभिरमध्वं क्रीनेषु रूपशब्दगन्धरसस्पर्शेषु। अत्र हि यूयं त्रैधातुके ऽभिरताः पञ्चकामगुणसक्तगतया तृष्णया दह्यध्व तप्यध्व परितप्यध्व[9]। निर्धावध्वमस्मात्त्रैधातुकात्त्रीणि यानान्यनुप्राप्स्यध्व यदिदं श्रावकयानं प्रत्येकबुद्धयानं बोधिसत्त्वयानमिति। अकं वो ऽत्र स्थाने प्रतिभूरकं वो दास्याम्येतानि त्रीणि यानान्यभिपुंध्वे त्रैधातुकान्निःसरणहेतोः। एवं चैताँल्लोभयामि। एतानि भोः सत्त्वा यान्यार्याणि चार्यप्रशस्तानि च महारमणीयकसमन्वागतानि चा-

1) In O. तथथा.
2) ष्कासितानि नि A. ष्कामये नि B. ष्कासये नि Cb. ष्कसितानि नि K. ष्कामितानि नि W. ष्कामयति O.
3) ष्काम्य चेतेभ्यः कुमारकेभ्य पश्चा B. ष्कामयित्वा O.
4) दारान्मक्षयानानीव B.
5) °दे A. Ca. Cb. W. त्। ए B.
6) ज्ञान left out in B. Cb. ज्ञानदर्शन O.
7) यदिदं B. Cb. O.
8) भि in A. O. only. °ध्व O.
9) In B. O. only.
10) धम् A. त B. K. W. ध्व Cb. निर्धापय O.
11) Thus O. °प्राप्नुवन्ति the others.
12) Left out in K. W.
13) ध्व Cb. O. Correct would be ध्वं.
14) Left out in A. Cb.

कृपणामेतैर्भवत्तः क्रीडिष्यथ रमिष्यथ परिचारयिष्यथ । इन्द्रियबलबोध्यङ्गध्यानविमोक्ष-समाधिसमापत्तिभिश्च मत्तौ रतिं प्रत्यनुभविष्यथ । मत्ता च सुखसौमनस्येन सगन्वागता भविष्यथ ॥

तत्र शारिपुत्र ये सत्त्वाः पण्डितजातीया भवन्ति[1] ते तथागतस्य लोकार्पितुरभिश्रद्धत्ति[2][3] । अभिश्रद्धित्वा[4] च तथागतशासने अभियुज्यन्ते[5] उद्योगमापद्यन्ते[6] । तत्र केचित्सत्त्वाः परघोषमन्वानुगमनमाकाङ्क्षमाणा आत्मपरिनिर्वाणकेतोश्चतुरार्यसत्यानुबोधाय[7][8] तथागतशासने अभियुज्यन्ते[9] । त उच्यन्ते श्रावकयानमाकाङ्क्षमाणास्त्रैधातुकान्निर्धावन्ति तद्यथापि नाम तस्मादादीप्तादगारादन्यतरे[10] दारका मृगरथमाकाङ्क्षमाणा निर्धाविताः[11] । अन्ये सत्त्वा अनाचार्यकं ज्ञानं दमशमथमाकाङ्क्षमाणा आत्मपरिनिर्वाणकेतोर्हेतुप्रत्ययानुबोधाय तथागतशासने अभियुज्यन्ते[12] । त उच्यन्ते प्रत्येकबुद्धयानमाकाङ्क्षमाणास्त्रैधातुकान्निर्धावन्ति तद्यथापि नाम तस्मादादीप्तादगारादन्यतरे[13] दारका अजरथमाकाङ्क्षमाणा निर्धाविताः[14][15] । अपरे

1) भविष्यंति B. Cb.
2) तुम् A. K. W. तुर्भाषितम् O.
3) श्रद्धास्यन्ति B. Cb. O.
4) श्रद्धाय B. too correct.
5) रूह्यंत A. युज्यन्ते K. W. left out in B. Cb. °योगमारप्स्यन्ति O.
6) उद्यो left out in Cb. पत्स्यंते B. Cb.
7) नुयामा K.
8) A. Ca. add परित्याग between आत्म and प°.
9) रूह्यंते A. ति Cb. O.
10) र K.
11) B. adds का.
12) ति Cb. O.
13) अगारादू left out in K. निष्क्रान्ता इति O.
14) K. W. add का.
15) र्धावंति A. K. W.

पुनः सत्त्वाः सर्वज्ञज्ञानं बुद्धज्ञानं[1] स्वयंभुज्ञानमनाचार्यकं[2][3] ज्ञानमाकाङ्क्षमाणा बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै मत्तो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च सर्वसत्त्वपरिनिर्वाणकेतोस्तथागतज्ञानबलवैशारद्यानुबोधाय तथागतशासने अभियुज्यन्ते । त उच्यन्ते महायानमाकाङ्क्षमाणास्त्रैधातुकान्निर्धावन्ति । तेन कारणेनोच्यन्ते बोधिसत्त्वा महासत्त्वा इति । तद्यथापि नाम तस्मादादीप्तादगारादन्यतरे दारका गोरथमाकाङ्क्षमाणा निर्धाविताः[4][5] ॥

तद्यथापि नाम शारिपुत्र स पुरुषस्तान्कुमारकांस्तस्मादादीप्तादगारान्निर्धावितान्दृष्ट्वा क्षेमस्वस्तिभ्यां[6] परिमुक्तानभयप्राप्तानिति विदित्वात्मानं च महाधनं विदित्वा[7] तेषां दारकाणामेकमेव यानमुदारमनुप्रयच्छेत्[8][9] एवमेव शारिपुत्र तथागतो ऽर्हन्सम्यक्संबुद्धो यदा पश्यत्यनेकाः सत्त्वकोटीस्त्रैधातुकात्परिमुक्ता दुःखभयभैरवोपद्रवपरिमुक्तास्तथागतशासने द्वारेण निर्धाविताः[10][11] परिमुक्ताः सर्वभयोपद्रवकान्तारेभ्यो निर्वृतिसुखप्राप्ताः । तानेताञ्शारिपुत्र[12] तस्मिन्समये तथागतो ऽर्हन्सम्यक्संबुद्धः प्रभूतो महाज्ञानबलवैशारद्यकोश इति विदित्वा सर्वे चैते ममैव पुत्रा इति ज्ञात्वा बुद्धयानेनैव तान्सत्त्वान्परिनिर्वापयति । न च कस्यचित्सत्त्वस्य प्रत्यात्मिकं परिनिर्वाणं वदति[13] । सर्वांश्च तान्सत्त्वांस्तथागतपरिनि-

1) Left out in B. Cb.
2) स्वयंभुवस्थानंमाचा A. स्वयंभुज्ञानमनाचा B. Cb. स्वयंभुवः ज्ञानंमाचा K.W.
3) कं left out in Cb.
4) Cb. adds का.
5) ता स्युः A. K. W. निष्क्रान्तामिति O.
6) त्वां W. क्षेमेण स्वस्तिना O.
7) From आत्मानं till विदित्वा left out in Cb. आत्मनश्च W.
8) तेभ्यो दारकेभ्यः एक B.
9) प्रदत्तं । ए A. W. प्रदत्ते । ए K. प्रयच्छेत् । ए B. प्रयच्छेरे Cb. प्रयच्छति O.
10) का सत्वकोटीः A. K. W. का सत्वकोटो B. °कोटोस् O. काः सत्वकोट्यास् Cb.
11) पूर्णा Cb.
12) तानेमांश्छा A. तानेनांश्छा K. W. एता शा B. तमेनाश्छा Cb.
13) वदति B. O. वदामि A. Cb. K. W.

र्वाणेन महापरिनिर्वाणेन[1] परिनिर्वापयति[2]। ये चापि ते शारिपुत्र सत्त्वास्त्रैधातुकात्परिमुक्ता भवन्ति तेषां[3] तथागतो ध्यानविमोक्षसमाधिसमापत्तीरार्याणि[4] परमसुखानि क्रीडनकानि रमणीयकान[5] ददाति सर्वाण्येतान्येकवर्णानि[6]। तत्यथापि नाम शारिपुत्र तस्य पुरुषस्य न मृषावादो भवेद्येन[7] त्रीणि यानान्युपदर्शयित्वा तेषां कुमारकाणामेकमेव महा-
5 यानं सर्वेषां[9] दत्तं[10] सप्तरत्नमयं सर्वालंकारविभूषितमेकवर्णमेवोदारयानमेव सर्वेषामग्रया-नमेव दत्तं भवेत्[11] एवमेव शारिपुत्र तथागतो ऽप्यर्हन्सम्यक्संबुद्धो न मृषावादी भवति येन पूर्वमुपायकौशल्येन त्रीणि यानान्युपदर्शयित्वा पश्चान्महायानेनैव सत्त्वान्परिनिर्वापयति। तत्कस्य हेतोः। तथागतो हि शारिपुत्र प्रभूतज्ञानबलवैशारद्यकोशकोष्ठागारसमन्वागतः
10 प्रतिबलः सर्वसत्त्वानां सर्वज्ञज्ञानसकृगतं धर्ममुपदर्शयितुम्। अनेनापि शारिपुत्र पर्यायेणैवं वेदितव्यम्। यथोपायकौशल्यज्ञानाभिनिर्हारैस्तथागत एकमेव महायानं देशयति॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

यथा[12] हि पुरुषस्य भवेदगारं जीर्णं महत्तं[13] च सुदुर्बलं[14] च।
विशीर्ण प्रासाद तथा भवेत स्तम्भाश्च मूलेषु भवेयु पूतिकाः॥ ३६॥

1) Left out in B.
2) पयामि Cb.
3) तेभ्यस्त B.
4) त्तिरा A. K. W. त्ती ग्रा B. त्तय ग्रा Cb. त्तयः ग्रा O.
5) रा A. K. W.
6) एतानि in B. only.
7) भवति। येन Cb. O.
8) तेभ्यः कुमारकाभ्यः B.
9) सर्वेभ्यो B.
10) दत्तं A. B. Ca. Cb. O. दत्यातत्तं K. दत्यात W.
11) Left out in O. B. Cb.
12) यथा K. O. तथा A. B. Ca. Cb. W.
13) All but O. महात्तं.
14) सुदुर्ल्लभं च A. B. Cb. सुदुर्बलं च K. O. सुदुर्बलश्च W.

गवाक्तकुर्म्या गडितैकदेशा[1] विशीर्ण कुड्यं कटलेपनं च।
जीर्णप्रवृद्धं धुतवेदिकं[2] च तृणच्छदं सर्वत ग्रोपतप्तम्॥ ४०॥
शतान पञ्चान ग्रनूनकानां[3] ग्रावासु सो तत्र भवेत प्राणिनाम्[4]।
बह्वनि[4] च निष्कुटसंकटानि[5] उच्चारपूर्णानि जुगुप्सितानि॥ ४१॥
गोपानसी विगडित तत्र सर्वा कुड्याश्च भित्तोश्च तथैव स्रस्ताः। 5
गृधाण कोव्यो निवसन्ति तत्र पारावतोलूक तथान्यपक्षिणः॥ ४२॥
ग्राशीविषा[6] दारुण तत्र सन्ति देशे प्रदेशेषु महाविषोग्राः।
विचित्रिका वृश्चिक मूषिकाश्च एतानि[7] ग्रावासु सुदुष्टप्राणिनाम्॥ ४३॥
देशे च देशे ग्रमनुष्य[8] भूयो उच्चारप्रस्रावविनाशितं च।
कृमिकीटखद्योतकपूतिकं च ग्रभिः शृगालैश्च[9] निनादितं[10] च॥ ४४॥ 10
भेरुण्डका दारुण तत्र सन्ति मनुष्यकुणपानि विभक्तयन्ति[11]।
तेषां च निर्यासु प्रतीक्षमाणाः श्वानाः[12] शृगालाश्च[9] वसन्त्यनेके॥ ४५॥
ते दुर्बला नित्य क्षुधाभिभूता देशेषु देशेषु विषादमानाः[13]।
कलङ्कं कोत्ताश्च निनादयन्ति सुभैरवं तद्भूमेवद्रूपम्॥ ४६॥

1) MSS. शा, but O. quite different.
2) प्रवृद्धोद्धृत O.
3) All but O. तेषाम्.
4) All but O. चा.
5) O. संकुटानि.
6) ग्रासी B. Ca. Cb. K. W. ग्राशी A. O.
7) ने K. विविधान O.
8) द्रूपो ग्रमनुज्ञा (i. e. नोज्ञा) भूमयः O. To read ग्रमनुज्ञभूम्यो?
9) All but O. °रैश्च.
10) निनादितं A. विनासितं B. Cb. निनादितं Ca. K. O. निनादिच्च W.
11) ये भक्तयन्ति O.
12) श्वानाः A. O. श्वाना B. Cb. K. W.
13) विषादमाणाः A.

मुरौद्रचित्ता पि वसन्ति यत्ता मनुष्यकुणपानि विकड्ढमानाः।
देशेषु देशेषु वसन्ति तत्र शतापदी[1] गोनसकाश्च व्याडाः॥ ४७॥
देशेषु देशेषु च निल्लिपन्ति[3] ते पोतकान्यालयनानि[4] कृत्वा।
न्यस्तानि न्यस्तानि च तानि तेषां ते यत्त भूयो परिभक्षयन्ति॥ ४८॥
यदा च ते यत्त भवन्ति तृप्ताः परमन्न खादित्व मुरौद्रचित्ताः।
परमन्नमांसैः परितृप्तगात्राः कलकं तदा तत्र करोन्ति तीव्रम्॥ ४९॥
विधस्तलेनेषु[5] वसन्ति तत्र कुम्भाण्डकां दारुणरौद्रचित्ताः।
वितस्तिमात्रास्तथ कुस्तमात्रा द्विकुस्तमात्राश्चनुचङ्क्रमन्ति[6]॥ ५०॥
ते चापि श्वानान्परिगृह्य पादैरुत्तानकान्[7] कृत्व तथैव भूमौ।
ग्रीवासु चोत्पीड्य वितंसयन्तो[8] व्यायामयन्तश्च[9] रमन्ति तत्र॥ ५१॥
नानाश्च कृष्णाश्च तथैव दुर्बला उच्चा मकृन्ताश्च[10] वसन्ति प्रेताः।
जिघत्सिता भोजन मार्गमाणा आर्तस्वरं क्रन्दिषु तत्र तत्र॥ ५२॥
सूचीमुखा गोणमुखाश्च केचित् मनुष्यमात्रास्तथ श्वानमात्राः[11]।
प्रकीर्णकेशाश्च करोन्ति शब्दमाहारतृष्णापरिदह्यमानाः॥ ५३॥

1) शतपादिका O.
2) All गोणा.
3) परि B. Ca. Cb. पनि O.
4) ना A. B. का Cb. O.; left out in K. W.
5) MSS. लयनेषु; but O. ऊर्ध्वस्थले तत्र.
6) °त्रामनु° O., the *m* being a means to avoid hiatus.
7) कां A. Cb. K. W. कं B. कानि O.
8) थभत्सयन्तो A. K. च भंसमन्त B. विभर्त्सन्त Ca. च भर्त्सन्त Cb. थ तत्सन्तो W. Our r. conjectural.
9) व्यश्चावयंतश्च A. वस्यायसंतश्च B. व्यसायंतास्च Ca. व्यसायंतश्च Cb. व्यस्वावगन्तश्च K. W. वब्यापयन्तिश्च O. Our r. conjectural.
10) All but O. मह्ना°.
11) त्। ग्रम A. K. W. त्। ग्र B. त्। म Cb. न्म Ca. O. वक्त्रा for मात्र in O.

चतुर्दिशं चात्र विलोकयन्ति गवान्त[1] उल्लोकनकेकि नित्यम्।
ते यत्तप्रेताश्च पिशाचकाश्च गृध्राश्च खाहार गवेषमाणाः॥ ५४॥
एतादृशं भैरवु[2] तद्दुकं भवेत् मकृन्तमुच्चं च सुदुर्बलं च।
विज्ञर्जरं दुर्बलमिव्वरं[3] च पुरुषस्य एकस्य परियकं भवेत्॥ ५५॥
स[4] च[5] बाह्यतः स्यात्पुरुषो गृहस्य निवेशनं तच्च भवेत्प्रदीप्तम्।
सकृत्स समन्तेन चतुर्दिशं च ज्वालासकुलैः परिदीप्यमानम्[6]॥ ५६॥
वंशाश्च दारूणि च अग्नितापिताः करोन्ति शब्दं गुरुकं सुभैरवम्।
प्रदीप्त स्तम्भाश्च तथैव भित्तयो यत्ताश्च प्रेताश्च मुचन्ति नादम्॥ ५७॥
संलूषिता[8] गृधशताश्च भूयः[9] कुम्भाण्डकाः प्लोष्टमुखा[10] भ्रमन्ति।
समन्ततो व्याडशताश्च तत्र नदन्ति क्रोशन्ति च दह्यमानाः॥ ५८॥
पिशाचकास्तत्र बहू भ्रमन्ति संतापिता अग्निन[11] मन्दपुण्याः[12]।
दन्तेकि पाटित्व ते[13] अन्यमन्यं रुधिरेण सिञ्चन्ति च दह्यमानाः॥ ५९॥
भेरुण्डका कालगताश्च तत्र खादन्ति सन्नाश्च ते अन्यमन्यम्।
उच्चार दह्यत्यमनोज्ञगन्धः प्रवायते[14] लोकि चतुर्दिशासु॥ ६०॥

1) ते Cb.
2) वु K. W. च A. B. Cb. O.
3) भिव्वरु A. K. W. दुर्बल B. Cb.
4) All but O. भैरवं. भिज्जन्ति O.
5) Left out in W.
6) Left out in B. K.
7) नां in all MSS. but O.
8) ज्वलूषिता O. (Skr. ज्वलोपिता). The others but K. तू.
9) भूतं A. भूवन् B. Cb. W. भूवम् K. भूयः O.
10) चाष्ट A. प्रोष्ट B. स्रोष्ट Cb. पाण्ड K. W. तत्र बहू O.
11) ना K. W.
12) नमल्पपुण्याः O., r. °न ग्र° with shortening of *ā* before a vowel.
13) ते A. Ca. Cb. K. W. न B.
14) प्रदायती O.

शतापदीयो प्रपलाय्यमानाः कुम्भाण्डकास्ताः[1] परिभक्षयन्ति ।
प्रदीप्तकेशाश्च भ्रमन्ति[2] प्रेताः क्षुधाय दाक्षेण[3] च दह्यमानाः ॥ ६१ ॥
एतादृशं भैरव तन्निवेशनं ज्वालासहस्रैर्हि विनिश्चरद्भिः[4] ।
पुरुषश्च सो तस्य गृहस्य स्वामी द्वारस्मि अस्थासि विपश्यमानः[5] ॥ ६२ ॥
शृणोति चासौ स्वके[6] अत्र पुत्रान्क्रीडापनैः क्रीडनसक्तबुद्धीन्[7] ।
रमन्ति ते क्रीडनकप्रमत्ता[8] यथापि बाला अविज्ञानमानाः ॥ ६३ ॥
श्रुत्वा च सो[9] तत्र प्रविष्टु क्षिप्रं प्रमोचनार्थाय तदात्मजानाम् ।
मा मह्य बाला इमि सर्वदारका दह्येषु नश्येषु च क्षिप्रमेव ॥ ६४ ॥
स भाषते तेषमगारदोषान्दुःखं इदं भोः कुलपुत्र दारुणम् ।
विविधाश्च सत्त्वेक्ष अयं च अग्नि[10] महत्तिका[11] दुःखपरंपरात्र[12] ॥ ६५ ॥
आशीविषा यत्र सुरौद्रचित्ताः कुम्भाण्डप्रेता बकवो वसन्ति ।
भेरुण्डका श्वानशृगालसंघा गृध्राश्च आहार गवेषमाणाः ॥ ६६ ॥
एतादृशात्र[13] बकवो वसन्ति विनापि चाग्नेः[14] परमं सुभैरवम् ।
दुःखं इदं केवलमेवरूपं समन्ततश्चाग्निरयं प्रदीप्तः ॥ ६७ ॥

1) MSS. तान्य.
2) भवन्ति A. K. W. भ्रमन्ति B. Cb. O.
3) दाक्षेन A. K. W. दाक्षेन B. Cb.
4) श्चरंति A. °स्राणि °श्चरन्ति O.
5) ना A. B. W. नाः Cb. K. नः O.
6) MSS. स्वकमत्र, the *e* short before vowel. The r. in O. quite different.
7) श A. र B. Cb. स K. W.
8) MSS. तान् and त्तान्. O. different.
9) सो B. स O. The others सौ.
10) अग्नि A. K. W. अग्नी B. Cb. अग्निर् Ca. O.
11) All but O. महा°.
12) रातु Cb.
13) All but O. र.
14) शास्मिं A. K. W. शास्तत्र B. शातत्र Cb. शात्र O.
15) All but O. चाग्न्या.

ते चोद्यमानास्तथ बालबुद्धयः कुमारकाः क्रीडनेषु प्रमत्ताः ।
न चिन्तयन्ते पितरं भणन्तं न चापि तेषां मनसीकरोन्ति ॥ ६८ ॥
पुरुषश्च सो तत्र तदा विचिन्तयेत्सुदुःखितो ऽस्मिं[1] इह पुत्रचित्तया ।
किं मह्य पुत्रेहि अपुत्रकस्य मा नाम दह्येयुरिहाग्निना इमे ॥ ६९ ॥
उपायं[2] सो चित्तयि तस्मिं[3] काले लुब्धो[4] इमे क्रीडनकेषु बालाः ।
न चात्र क्रीडा च रती[5] च काचिद्बालान हो यादृशु मूढभावः ॥ ७० ॥
स तानवोचच्छृणुथा[6] कुमारका नानाविधा यानक या[7] ममास्ति ।
मृगैरजैर्गोणवरैश्च युक्ता उच्चा महत्ता[8] समलंकृता[9] च ॥ ७१ ॥
ता[10] बाह्यतो अस्य निवेशनस्य निर्धावथा तेहि करोथ[11] कार्यम् ।
युष्माकमर्थे मय कारितानि निर्यात तैस्तुष्टमनाः समेत्य ॥ ७२ ॥
ते यान एतादृशकां[12] निशाम्य आरब्धवीर्यास्त्वरिता हि भूत्वा ।
निर्धावितास्तत्क्षणमेव सर्वे[15] आकाशि तिष्ठन्ति[17] दुःखेन[18] मुक्ताः[19] ॥ ७३ ॥

1) All but O. स्मो.
2) All but O. उपायि.
3) स्मिं A. Cb. W.
4) यथा Cb.
5) All but O. चरतीव.
6) था B. Cb. O. The rest ता.
7) यो A. W. ये B. Cb. या K.
8) All but O. क्षत्ता:.
9) युक्ता O. ताश्च the rest.
10) All ते.
11) कुरुध A. Cb. W. कुरुधं K. कुरुथ B. करोथ O.
12) MSS. कान्.
13) All but O. लब्ध.
14) °ता भवित्वा O. °तंहि भूत्वा the others.
15) र्वे Cb.
16) शा A. Cb. W. स K. सि B.
17) All but O. add च.
18) All दुः.
19) न in B. only. विप्रमु Cb. O.

पुरुषश्च सो निर्गति[1] दृष्ट्व दारकान्ग्रामस्य मध्ये स्थितु चत्वरस्मिन्[2]।
उपविश्य सिंहासनि तानुवाच अहो अहं निर्वृतु अद्य मार्षाः[3]॥ ७४॥
ये दुःखलब्धा मम[4] ते तपस्विनः पुत्राः प्रिया औरस विंश बालाः।
ते दारुणे दुर्गगृहे अभूवन्बद्धजन्तुपूर्णे च सुभैरवे च॥ ७५॥
आदीप्तके ज्वालसकङ्कपूर्णे रता च ते क्रीडरतीषु आसन्।
मया च ते मोचित अद्य सर्वे येनाहं निर्वाणु समागतो ऽद्य॥ ७६॥
सुखस्थितं तं[6] पितरं विदित्वा उपगम्य ते दारक एवमाहुः।
ददाहि नस्तात यथाभिभाषितं त्रिविधानि यानानि मनोरमाणि॥ ७७॥
सचेत्तव सत्यक तात[7] सर्वं यद्भाषितं तत्र निवेशने ते[8]।
त्रिविधानि यानानि[9] हं संप्रदास्ये ददस्व कालो ऽयमिहाद्य तेषाम्॥ ७८॥
पुरुषश्च सो कोशबली भवेत[10] सुवर्णरूप्यामणिमुक्तिकस्य[11]।
हिरण्य दासाश्च अनल्पकाः स्युरुपस्थायका[12] नेकविधानयानां[13]॥ ७९॥

1) O. त, the rest तु. निर्गतिनिर्गते, Skr. निर्गतान्.
2) O. चरे the others चरेस्मिन्.
3) मार्षा A. K. W. सर्वाः B. सत्वाः Cb. मारिषा O.
4) मय A. मम O. मयि the rest.
5) णामुषा B. Cb. निर्वृत अद्य मारिषाः O.
6) च A. K. W. तं B. left out in Cb.
7) सचैव तं सत्यं कृता च A. W. सचैवकं सत्यक तात B. सद्वे ते सत्यक तात Cb. सचेत्तव सत्य ददाहि तात O.
8) ति B. नस्मि O.
9) हं A. K. W. च B. चो Cb.
10) त् Cb. K. विदित्वा O.
11) मुक्ति Cb. O. मौक्ति K. W. मुक्त Ca. A. B.
12) उपस्थपेस्य O. उपस्थान अने the others. Our reading conjectural.
13) MSS. यानान् and यानम्.

रत्नामया गोणरथा विशिष्टाः सवेदिकाः किङ्किणिजालनद्धाः।
क्षत्रधजेभिः समलंकृताश्च मुक्तामणीजालिकछादिताश्च[1]॥ ८०॥
सुवर्णपुष्पाणि[2] कृतैश्च दामैर्देशेषु देशेषु प्रलम्बमानैः।
वस्त्रैरुदारैः परिसंवृताश्च प्रत्यास्तृता डुष्यवरैश्च शुभ्रैः॥ ८१॥
मृडुकान पटान तथैव तत्र वरतूलिकासंस्तृत[3] येकि ते रथाः।
प्रत्यास्तृताः कोटिसकङ्कमूल्यैर्वरैश्च कोच्चै[4]र्बकङ्कमलत्तणैः॥ ८२॥
श्वेताः सुपुष्टा[5] बलवन्त गोणा महाप्रमाणा अभिदर्शनीयाः।
ये योजिता रत्नरथेषु तेषु परिगृहीताः पुरुषैरनेकैः॥ ८३॥
एतादृशान्सो पुरुषो ददाति पुत्राणा सर्वाण वरान्विशिष्टान्।
ते चापि तुष्टान्तमनाश्च तेहि दिशाश्च विदिशाश्च व्रजन्ति क्रीडकाः॥ ८४॥
एवमेवं[6] हं शारिसुता महर्षे सत्वान त्राणाच्च पिता च भोमि।
पुत्राश्च ते[7] प्राणिन सर्वि मह्यं त्रैधातुके कामविलग्न बालाः॥ ८५॥
त्रैधातुकं[8] च पथ तन्निवेशनं सुभैरवं दुःखशताभिकीर्णम्।
अशेषतः[9] प्रज्वलितं समन्ताज्जातीजराव्याधिशतैरनेकैः॥ ८६॥

1) Instead of the Nominatives here and in the next following vs. the MSS. have Accusatives.
2) Sic O.; वस्त्रैः the rest. सकङ्क for कृतैश्च O.
3) All but O. संस्कृत.
4) कोटिम् A. कोट् B. कोटा Cb. कोडम् K. कोटृ W. कोच्चै O. Our r. conjectural; cp. कोच्च Divyāvadāna 553, 2; Pāli *koccha*, Skr. कूर्च.
5) Sic O.; सुपुष्या the rest.
6) एमेवाहं A. Ca. Cb. K. W. एवमेव हं B.
7) मे A. B. K. W. ते Cb.
8) वा A.
9) Sic O.; अशेषतं the rest.

अहं[1] च त्रैधातुकमुक्त शास्तो[2] एकान्तस्थायी पवने[3] वसामि ।
त्रैधातुकं च ममिदं परिग्रहो ये क्षत्र दक्षन्ति[4] ममेति पुत्राः ॥ ८७ ॥
अहं च आदीनव तत्र दर्शयो[6] विदित्व त्राणं अहमेव तेषाम् ।
न चैव मे ते अणि सर्वि बाला यथापि कामेषु विलग्नबुद्धयः ॥ ८८ ॥
उपायकौशल्यमहं प्रयोजयी यानानि त्रीणि प्रवदामि तेषाम् ।
ज्ञात्वा च त्रैधातुकि नेकदोषान्निर्धावनार्थाय[8] वदाम्युपायम् ॥ ८९ ॥
मां चैव ये निश्रित भोन्ति पुत्राः षडभिज्ञत्रैविद्यमहानुभावाः ।
प्रत्येकबुद्धाश्च भवन्ति ये ऽत्र अविवर्तिका ये चिह्न[10] बोधिसत्त्वाः ॥ ९० ॥
समान पुत्राण ङ्क तेष तत्क्षणमिमेन दृष्टान्तवरेण पण्डित ।
वदामि एकं इमु[13] बुद्धयानं परिगृह्णथा सर्वि जिना भविष्यथ ॥ ९१ ॥
तच्चा[14] वरिष्ठं सुमनोरमं च विशिष्टरूपं चिह्न[15] सर्वलोके ।
बुद्धान ज्ञानं द्विपदोत्तमानामुदारूपं तथ वन्दनीयम् ॥ ९२ ॥

1) From त्रै° till वसामि left out in K.
2) तो A. W. O. तः B. तौ Cb.
3) All but O. °ह् वने. Cp. Mahāvastu II, 372, and Pāli *pavana*.
4) मे A. B. Ca. Cb. मै K. W.
5) वु A. K. W.
6) यों A. Cb. यि B. यी B. Ca. दर्शी K. W.
7) नै K. W. निर्धापनार्थाय O.
8) सिद्धावनास्थाय Cb. or निर्धावनार्थाय, see Kern's version, p. 88, note. The rest निर्वापना°.
9) All but O. अवैव°.
10) ये विह्न A. ये चिह्न B. ये हि च Cb. यो चिह्न K. या चिह्न W.
11) नाङ्क A. K. W. णाङ्क Ca. णाह्न B. नह्न Cb. O.
12) तौ A. K. W. ता B. Cb. कोलित O.
13) वर् B. K. W.
14) तं च A. तथा B. तं चो Cb. तं चा K. W. तं चैव इष्टं O.
15) विह्न in all MSS. cp. verse 90 above.

बलानि ध्यानानि तथा विमोक्षाः समाधिनां कोटिशता चनेका[1] ।
अयं रथो ईदृशको वरिष्ठो रमन्ति येन[2] सद् बुद्धपुत्राः ॥ ९३ ॥
क्रीडन्ति एतेन क्षपेन्ति[3] रात्रयो दिवसांश्च पक्षानृतवो ऽथ मासान् ।
संवत्सरानन्तरकल्पमेव[4] च क्षपेन्ति[3] कल्पान सकृन्नकोट्यः ॥ ९४ ॥
रत्नामयं यानमिदं वरिष्ठं गच्छन्ति येन इह बोधिमण्डे ।
विक्रीडमाना[5] बकबोधिसत्त्वा ये च शृणोन्ति[6] सुगतस्य श्रावकाः ॥ ९५ ॥
एवं प्रजानाहि त्वमद्य तिष्य नास्तीह यानं द्वितियं[7] कहिंचित् ।
दिशो दश सर्व गवेषयित्वा स्थापेत्वुपायं[8] पुरुषोत्तमानाम् ॥ ९६ ॥
पुत्रा मम यूयमहं पिता वो मया च निष्कासित यूय दुःखात् ।
परिदह्यमाना[9] बकल्पकोट्यस्त्रैधातुकातो भयभैरवात्[10] ॥ ९७ ॥
एवं च हं तत्र[11] वदामि निर्वृतिमनिर्वृता यूय तथैव चाद्य ।
संसारदुःखादिह यूय मुक्ता बोद्धं[12] तु यानं च गवेषितव्यम् ॥ ९८ ॥

1) शतां च नैके A. K. शताश्च नेके B. Cb. शता च नैके W. सकृन्नेका O.
2) A. Ca. K. W. have येनेह.
3) Sic O.; क्षपयन्ति the others.
4) All but O. कल्प एव.
5) इह A. Cb. K. बक B. left out in W.
6) ति A. B. Cb. O. ती K. W. To r. चो or चा for च.
7) ती A. B. K. W. ति Cb.
8) स्थाप्येत्वुपायं A. स्थापित्व चायं B. स्थापेदुत्वुपायं Cb. स्थापित्तुपायं K. स्थापेत्वुपायं W. स्थाप्य उपाय° O. Cp. Pali *thapetvā*.
9) गृ A. Cb.
10) भैरवातु O.; preferable.
11) अत्र K. W.
12) बोधं A. W. बोद्धं B. Cb. बोध K. बोधाय O.

ये बोधिसत्त्वाश्च इहास्ति केचिच्छृणवत्ति सर्वे मम बुद्धनेत्रोम्[1]।
उपायकौशल्यमिदं जिनस्य येनो विनेति[2] बकुबोधिसत्त्वान् ॥ ९९ ॥
हीनेषु कामेषु जुगुप्सितेषु रता यदा भोत्तिमि यत्र[3] सत्त्वाः[4]।
दुःखं तदा भाषति लोकनायको अनन्यथावादिरिहार्यसत्यम् ॥ १०० ॥
ये चापि दुःखस्य अजानमाना मूलं न पश्यत्ति कु बालबुद्धयः।
मार्गं हि तेषामनुदर्शयामि समुदागमस्[5]तृष्णा दुखस्य[6] संभवः ॥ १०१ ॥
तृष्णानिरोधार्थ सदा अनिश्रिता निरोधसत्यं तृतियं[7] इदं मे।
अनन्यथा येन च मुच्यते नरो मार्गं हि भाविय विमुक्त भोति ॥ १०२ ॥
कुतश्च ते शारिसुता विमुक्ता अमत्तप्राहातु[8] विमुक्त भोत्ति।
न च ताव ते सर्वत[9] मुक्त भोत्ति अनिर्वृतांस्तान्वदतीह नायकः[10] ॥ १०३ ॥
किंकारणं नास्य वदामि मोक्षमप्राप्तिमामुक्तमसम्यबोधिम्।
ममैष छन्दो अभू धर्मराजा सुखापनार्थायिह लोकि जातः ॥ १०४ ॥
इय शारिपुत्र मम धर्ममुद्रा या पश्चकाले मम[12] अस्य भाषिता।
हिताय लोकस्य सदेवकस्य दिशासु विदिशासु[13] च देशयस्व ॥ १०५ ॥

1) त्रीं Cb. त्रीन् A. Ca. K. W. धर्मनेत्रोः O.
2) ये बुद्धनेत्री W. यथा विनेति O. येनो विनेत्री the rest.
3) अत्र B. Cb.
4) सर्वा Cb. रमन्ति ये तत्र बहूनि बालाः O.
5) समुदागम seems here to be used as another name for समुदय, or beginning, origin; cp. Pāli.
6) Sic B. दुःखस्य the rest.
7) इदं A. इमं B. इयं Cb. K. W. ममेदम् O.
8) अ in B. O. only; अकेभिर्वि° O.
9) त A. Cb. O. त्र K. W.
10) नायकाः O.; the others विनायकाः.
11) पश्चिमके कालि Cb. पश्चिमकालि K.
12) All but O. मयाद्य.
13) प्रकाशयस्व O. Kumārajiwa seems to read न instead of च and he translates 戶勻遂力勿 宣傳

यश्चापि ते भाषति कश्चि सत्त्वो अनुमोदयामीति[1] वदेत वाचम्।
मूर्ध्नेन चेदं प्रतिगृह्य सूत्रं अविवर्तिकं तं नरु धारयेस्त्वम्[2] ॥ १०६ ॥
दृष्टाश्च[3] तेन[4] पुरिमास्तथागताः सत्कारु तेषां च कृतो अभूषि[5]।
श्रुतश्च धर्मो अयमेवरूपो य एत सूत्रं अभिश्रद्दधेत ॥ १०७ ॥
अहं च त्वं चैव भवेत दृष्टो अयं च सर्वो मम भिक्षुसंघः।
दृष्टाश्च सर्वे इमि बोधिसत्त्वा ये श्रद्दधे भाषितमग्र मह्यम् ॥ १०८ ॥
सूत्रं इमं बालजनप्रमोक्षनमभिज्ञ ज्ञात्वा न ममैत[7] भाषितम्।
विषयो हि नैवास्तिकु श्रावकाणां प्रत्येकबुद्धान गतिर्न चात्र ॥ १०९ ॥
अधिमुक्तिसारस्तुव शारिपुत्र किं वा पुनर्मह्य इमे अन्यश्रावकाः[8]।
एते ऽपि श्रद्धाय ममैव यान्ति प्रत्यात्मिकं ज्ञानु न चैव विद्यते ॥ ११० ॥
मा चैव त्वं स्तम्भिषु मा च मानिषु मापुक्कयोगीन वदेसि एतत्[9]।
बाला हि कामेषु सदा प्रमत्ता अज्ञानका धर्मु क्षिपेषु भाषितम्[10] ॥ १११ ॥
उपायकौशल्य क्षिपित्व मह्यं या बुद्धनेत्री सद लोकि संस्थिता।
भृकुटिं करित्वान क्षिपित्व यानं विपाकु[11] तस्येह शृणोहि तीव्रम् ॥ ११२ ॥

1) सत्त्वः। अनु A. B. K. W. O. सर्वः। अनु Cb. सत्वो ऽनु Ca.
2) नर धारयाहि O.
3) Sic O.; दृष्ट्वा च the rest.
4) तेन A. Cb. K. W. O. तेनो B.
5) भविष्यति A. B. अभूवन् Cb. K. W. अभूषि O.
6) कं। अ A. K. W. कनं। अ Cb. O. बोधनं। अ B.
7) Sic O.; हि मि एव तु A. हि मि एव Cb. W. एवं K. ममैव Cb.
8) का in all MSS.
9) एव तत् A. एतं B. एव Cb. एतत् K. W. The r. in O. is °र्गायु ब्रवीहि सूत्रम्.
10) धर्म प्रतिक्षिपत्ति O.
11) क B. Cb. O.

क्षिपित्व सूत्रं इदमेवद्रूपं मयि तिष्ठमाने परिनिर्वृते वा।
भिक्षूषु वा तेषु खिलानि कृत्वा तेषां विपाकं ममिकं[1] ग्रणोहि[2] ॥ ११३ ॥
च्युत्वा मनुष्येषु ग्रवोचि तेषां प्रतिष्ठ भोती परिपूर्णकल्पान्।
ततश्च भूयो ऽक्षरकल्पनेकांश्युताश्च[3] तत्र प्रपतन्ति[4] बालाः ॥ ११४ ॥
यदा च नरकेषु[5] च्युता भवन्ति ततश्च तिर्यक्षु व्रजन्ति भूयः[6]।
सुदुर्बलाः श्वानशृगालभूताः परेषु[7] क्रीडापनका भवन्ति ॥ ११५ ॥
वर्णेन ते कालक तत्र भोन्ति कल्माषका व्राणिक कण्डुलाश्च।
निर्लोमका दुर्बल भोन्ति भूयो विद्वेषमाणा मम ग्रग्रबोधिम् ॥ ११६ ॥
बुभुक्षिता प्राणिषु नित्य भोन्ति लोष्टप्रहाराभिहता मुहुस्तः।
दण्डेषु[10] संत्रासित तत्र तत्र क्षुधापिपासार्दित शुष्कगात्राः ॥ ११७ ॥
उष्ट्राश्च वा गर्दभ भोन्ति भूयो भारं वहन्तः कशदण्डताडिताः।
ग्राहारचित्तामनुचिन्तयन्तो ये बुद्धनेत्री[11] क्षिपि बालबुद्धयः ॥ ११८ ॥
पुनश्च ते क्रोष्टुक भोन्ति[12] तत्र बीभत्सकाः[13] काणकु कण्डकाश्च।
उत्पोडिता ग्रामकुमारकेहि लोष्टप्रहाराभिहताश्च बालाः ॥ ११९ ॥

1) विपाकममिकं A. W. विपाकमभिक B. विपाकं ममिक Cb. O. विपाकमिक K. Perhaps originally इदं in the sense of «now».
2) थ A. K. W. O.
3) क्षरनेककल्पान् B. °नैकांश् A. K. W.
4) व्रजन्ति Cb. च्युताश्च्युतास्तत्र पतन्ति O. preferable.
5) नरकेभ्य O.
6) तिर्यग्गतौ ते पुनरेव यान्ति O.
7) Sic O.; परेषु the rest.
8) व्र A. Cb. K. W. त्रा B.
9) ण्ड A. B. K. W. ण्डु Cb. खुडुलका व्राणोत्सता O.
10) दण्डेन O. दण्डेषु perhaps a misread दण्डेहि.
11) R. °नेत्रीं?
12) तु A. K. W. भोंति B. शांति Cb.
13) विभत्स A. भीभत्स B. K. W. भभित्स Cb.

ततश्च्यवित्वान च भूयु बालाः पञ्चाशतीनां सम योजनानाम्।
दीर्घात्मभावा हि भवन्ति प्राणिनो जडाश्च मूढाः परिवर्तमानाः ॥ १२० ॥
ग्रपादका भोन्ति च कोडसङ्किनो[1] विखाद्यमाना बकप्राणिकोटिभिः।
सुदारुणां ते ग्रनुभोन्ति वेदनां क्षिपित्व सूत्रं इदमेवद्रूपम् ॥ १२१ ॥
पुरुषात्मभावं च यदा लभन्ते ते कुण्डका[2] लङ्गक भोन्ति तत्र।
कुब्जाश्च काणा च जडा जघन्या ग्रग्रद्यत्ता[3] इम सूत्र मन्धम् ॥ १२२ ॥
ग्रप्रत्ययनीयाश्च[4] भवन्ति लोके पूती मुखात्तेष[5] प्रवाति गन्धः[6]।
पक्षग्रहो उक्रमि[7] तेष[8] कांये ग्रग्रद्यत्तानिम[9] बुद्धबोधिम् ॥ १२३ ॥
दरिद्रका प्रेषणाकारकाश्च उपस्थायका नित्य परस्य दुर्बलाः[10]।
ग्राबाध तेषां बकाश्च भोन्ति ग्रनाथभूता विकरन्ति लोके ॥ १२४ ॥
यस्यैव ते तत्र करोन्ति सेवनामदातुकामो भवती[11] स तेषाम्।
दत्तं पि चो[12] नश्यति क्षिप्रमेव फलं हि पापस्य इमेवद्रूपम् ॥ १२५ ॥

1) कोत्रशक्किणो A. कोधिसंकानः B. कोडसङ्किना Cb. कोडसंक्किणो K. कोडसङ्किणो W. कोडसर्पि O.
2) ल A. Cb. K. W. O. ला B. For कुण्डका O. has खुडुका.
3) धत्ता Cb. धित्वा O.
4) का Cb.
5) षु Cb.
6) नित्यं Cb.
7) उक्रमि A. Cb. K. O. ग्रोक्रमि B. उग्रमि W.
8) षु A. W.
9) तानि मम A. तानिम B. K. W. तानि मय Cb.
10) ला in all MSS. The original Prākṛt had, of course, no visarga. Cp. काणा च for Skr. काणाश्च १२२. Likewise दरिद्रका.
11) ति K. W.
12) चो A. B. K. W. चा Cb. The lengthening here not necessary. The reading in O. quite different.

यच्चापि[1] ते तत्र लभन्ति औषधं सुपुक्कद्रूपं कुशलेहि दत्तम्।
तेनापि तेषां रुजु भूय वर्धते सो व्याधिरत्तं न कदाचि गच्छति ॥ १२६ ॥
अन्येहि चौर्याणि कृतानि भोन्ति उमरांश्च[2] डिम्बास्तथ विग्रकाश्च।
द्रव्यापहाराश्च कृतास्तथान्यैर्निपतन्ति तस्योपरि[3] पापकर्मणः ॥ १२७ ॥
न ज्ञातु सो पश्यति लोकनाथं नरेन्द्रराजं महि शासमानम्।
तस्यात्मभोष्वेव हि वासु[4] भोति इमां क्षिपित्वा मम बुद्धनेत्रीम् ॥ १२८ ॥
न चापि सो धर्म शृणोति बालो बधिरश्च सो भोति अचेतनश्च।
क्षिपित्व बोधीमिममेवद्रूपामुपशान्ति तस्या न कदाचि भोति ॥ १२९ ॥
सहस्रनेकां[5] नयुतांश्च भूयः कल्पान कोट्यो यथ गङ्गवालिकाः।
जडात्मभावो विकलश्च भोति क्षिपित्व सूत्रं इमु पापकं[6] फलम् ॥ १३० ॥
उद्यानभूमो नरको ऽस्य भोति निवेशनं तस्य अपायभूमिः।
खरसूकरा क्रोष्टुक भूमिसूचकाः[7] प्रतिष्ठितस्येह भवन्ति नित्यम् ॥ १३१ ॥
मनुष्यभावत्वमुपेत्य चापि अन्धत्व बधिरत्व जडत्वमेति।
परप्रेष्य[8] सो भोति दरिद्र नित्यं तत्कालि[9] तस्याभरणानिमानि[10] ॥ १३२ ॥
वस्त्राणि चो व्याधय भोन्ति[11] तस्य व्रणान कोटीनयुताश्च काये।
विचर्चिका कण्डु तथैव पामा कुष्ठं किलासं तथ गात्रगन्धः ॥ १३३ ॥

1) यत्रापि A. यं चापि B. Cb. यच्चापि K. W.
2) उमरं च डिम्ब कलहं च O.
3) तस्य Cb. तेषां O.
4) धासु K. W. भवाति वासं O.
5) All but O. नेकां.
6) इममीदृशं A. B. K. W. इमु पापकं Cb. इदं पापकं O.
7) सूचिकाः O.
8) ष्य A. Cb. K. W. O. ष्यु B.
9) त्र Cb. K. W. सत्कालस्तस्या B. तस्मि कालि O.
10) °वरणा भवन्ति O.
11) बहूनि तस्यैव भवन्ति व्याधयो O.

सत्कायदृष्टिश्च घनास्य भोति उदीर्यते क्रोधबलं च तस्य।
संरागु तस्यातिभृशं च भोति तिर्याणयोनीषु[1] च सो सदा रमी ॥ १३४ ॥
सचेदहं शारिसुताद्य तस्य परिपूर्णकल्पं प्रवदेय दोषान्।
यो स्त्री ममा एतु क्षिपेय[2] सूत्रं पर्यन्तु दोषाण न शक्य गन्तुम् ॥ १३५ ॥
संपश्यमानो इदमेव चार्थं त्वां संदिशामी[3] अहु शारिपुत्र ॥
मा खैव त्वं[4] बालजनस्य अग्रतो भाषिष्यसे सूत्रमिमेवद्रूपम् ॥ १३६ ॥
ये तू इह व्यक्त बहुश्रुताश्च स्मृतिमन्त ये पण्डित ज्ञानवन्तः।
ये प्रस्थिता उत्तममग्रबोधिं ताभ्यावयेस्त्वं परमार्थमेतत् ॥ १३७ ॥
दृष्टाश्च येस्त्री बहुबुद्धकोट्यः कुशलं च यै रोपितमप्रमेयम्।
अध्याशयश्च दृढ येषु[5] च स्यात्ताभ्यावयेस्त्वं परमार्थमेतत् ॥ १३८ ॥
ये वीर्यवन्तः सद मैत्रचित्ता भावेन्ति[6] मैत्रीमिह दीर्घरात्रम्।
उत्सृष्टकाया तथ जीविते च तेषामिदं[7] सूत्र भणेः समीक्षम् ॥ १३९ ॥
अन्योन्यसंकल्प सगौरवाश्च येषां च बालेहि[8] न संस्तवो[9] ऽस्ति।
ये चापि तुष्टा गिरिकन्दरेषु ताभ्यावयेस्त्वं इदं[10] सूत्र भद्रकम्[11] ॥ १४० ॥

1) हि A. B.
2) क्षिपेत O. B. K. क्षिपेय A. W. क्षिपित्व Cb.
3) संधितस्याभ्यहु Cb. संदिशामि O.
4) मार्षो हे ख त्वं A. मा खे हु त्वं B. मा स्त्री खु तं Ca. मा खा हु त्वं Cb. मा खो हु त्वं K. मा खो हु त्वं W. मा त्वमिद O. Our reading conjectural.
5) ष K. O. षु the others.
6) भवेन्ति Cb. K. भवन्ति B. भावेन्ति O. भवित्वा A. W.
7) मं B. K.
8) षु A. Ca. Cb. W. न O.
9) सम्भवो K.
10) यस्व O.
11) म A. B. K. W. द् Cb. O.

कल्याणमित्रांश्च निषेवमाणाः[1] पापांश्च मित्रान्परिवर्जयन्ताः।
यानीदृशान्पश्यसि बुद्धपुत्रांस्तेषामिदं[2] सूत्रं प्रकाशयेसि ॥ १४१ ॥
अच्छिद्रशीला[3] मणिरत्नसादृशा वैपुल्यसूत्राण परिग्रहे स्थिताः।
पश्येसि यानीदृशबुद्धपुत्रांस्तेषाग्रतः[4] सूत्रमिदं वदेसि ॥ १४२ ॥
अक्रोधना ये सद आर्जवाश्च कृपासमन्वागत सर्वप्राणिषु।
सगौरवा ये सुगतस्य अन्तिके तेषाग्रतः[4] सूत्रमिदं वदेसि ॥ १४३ ॥
यो धर्मु[5] भाषे परिषाय मध्ये असङ्गप्राप्तो वदि[6] युक्तमानसः।
दृष्टान्तकोटीनयुतैरनेकैस्तस्येद सूत्रं उपदर्शयेसि[7] ॥ १४४ ॥
मूर्ध्नाञ्जलिं यश्च करोति बद्धा[8] सर्वज्ञभावं परिमार्गमाणः।
दिशो[9] दश यो ऽपि च चङ्क्रमेत[10] सुभाषितं भिक्षु गवेषमाणः ॥ १४५ ॥
वैपुल्यसूत्राणि च धारयेत[11] न चास्य रुष्यन्ति[12] कदाचिदन्ये।
एकां[13] पि गाथां न च धारये ऽन्यतः[14] संश्रावयेत्तं वरसूत्रमेतत् ॥ १४६ ॥

1) ना A. B. Cb. W. नां K. नाः O.
2) त्रं K. तेषाग्रतः सूत्रमिदं भणास्व O.
3) ला A. Cb. K. O. W. लात्म B.
4) षामग्रतः W. भाषाहि तेषाग्रत एत सूत्रम् O. But तेषाग्रतः सूत्रमिदं भणाहि vs. 143.
5) धर्म A. B. Cb. W. O. धर्मु K.
6) वदि for वदे (वदेत्).
7) दर्शयासि O.
8) वद्धा in all MSS. except O., which has करित्व तिष्ठेत्.
9) दिशोदशो B. K. O. has दिशा च विदिशापि. दशो दिशो the others.
10) ते A. W. तत् B. तं Cb. त K.
11) यानि A. येत् B. K. येन Cb. येत W. यत्तो O.
12) रोदंति A. W. रुष्यंति B. Cb. K. O.
13) एका A. B. Cb. W. एकां K.
14) येन्यतः A. येत्तत् B. येतः Cb. येत्ततः K. येन्यंतं W. रेत अन्यम् O.

तथागतस्य यथ धातु धारयेत्तथैव यो मार्गति कोचि तं नरः[1]।
एमेव[2] यो मार्गति सूत्रमीदृशं लभित्व[3] च मूर्धनि[4] धारयेत ॥ १४७ ॥
अन्येषु सूत्रेषु न[5] कदाचि चित्ता लोकायतैरन्यतरैश्च शास्त्रैः[6]।
बालान एतादृश भोत्ति गोचरास्तांस्त्वं विवर्जित्व प्रकाशयेरिदम्[7] ॥ १४८ ॥
पूर्णो पि[8] कल्पं अक्ष शारिपुत्र वदेयमाकारमकृत्रकोव्यः।
ये प्रस्थिता उत्तममग्रबोधिं तेषाग्रतः सूत्रमिदं वदेसि[9] ॥ १४९ ॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याय श्रीपम्यपरिवर्तो नाम तृतीयः ॥

1) कोविते नरः A. कोविडं नरः W. कोविदन्यः B. Cb. केचिदन्यः K.
2) K. adds व.
3) Sic O.; लब्धा the rest.
4) मूर्ध्नारिह A. मूर्धेनि च B. मूढेति च Cb. मूधेर्ह च K. मूढि इह W. मूर्धनि O.
5) अन्येभि सूत्रेभि न तस्य O. Corrupt; perhaps to r. अन्येहि सूत्रेहि न तस्य.
6) लोकायतं नैव कदाचि चित्तयो O.
7) रान् ते त्वं A. W. राः तास्त्वं B. रा एवं Cb. रास्तांस्त्वं K.
8) °शयेदिदम् all but O., which has °शयेसि.
9) पूर्णापि A. W.
10) सोति A. Cb. K. भणाहि O.

IV.

अथ खल्वायुष्मान्सुभूतिरायुष्मांश्च महाकात्यायन आयुष्मांश्च महाकाश्यप आयुष्मांश्च महामौद्गल्यायन इममेवंरूपमश्रुतपूर्वं धर्मं श्रुत्वा भगवतो ऽन्तिकात्संमुखमायुष्मतश्च शारिपुत्रस्य व्याकरणं श्रुत्वानुत्तरायां सम्यक्संबोधावाश्चर्यप्राप्ता अद्भुतप्राप्ता मौद्गल्यप्राप्तास्तस्यां वेलायामुत्थायासनेभ्यो येन भगवांस्तेनोपसंक्रामन्नुपसंक्रम्यैकांसमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणामयित्वा भगवन्तमभिमुखमुल्लोकयमाना अवनतकाया अभिनतकायाः प्रणतकायास्तस्यां वेलायां भगवन्तमेतदवोचन् ॥

वयं हि भगवञ्जीर्णा वृद्धा महल्लका अस्मिन्भिक्षुसंघे स्थविरसमता जराजीर्णाभूता निर्वाणप्राप्ताः स्म इति भगवन्नरुध्यमाना अनुत्तरायां सम्यक्संबोधावप्रतिबलाः स्माप्रतिवीर्याराम्भाः स्म। यदापि भगवान्धर्मं देशयति चिरं निषण्णश्च भगवान्भवति वयं च तस्यां धर्मदेशनायां प्रत्युपस्थिता भवामः। तदाप्यस्माकं भगवन् चिरं निषण्णानां भगवन्तं चिरं पर्युपासितानामङ्गप्रत्यङ्गानि दुःखन्ति संधिविसंधयश्च दुःखन्ति। ततो वयं भगवन्भगवतो

1) उपसंक्रामन् left out in K. उपसंक्रमी पसंक्रमित्वा O.
2) °सङ्गानि° दक्षिणानि °मण्डलानि.
3) Sic O.; प्रणाम्य the rest; correct would be प्रणम्य or प्रणामय्य.
4) अभि K.
5) वि K. O.
6) A. adds प्रणष्टकाया.
7) All but O. जीर्णाभूता.
8) रुत्सुका A. B. W. रुध्यमाना Ca. Cb. रुध्यामः O.
9) दुःख्यंति A. Ca.

धर्मं देशयमानस्य शून्यतानिमित्ताप्रणिहितं सर्वमाविष्कुर्मो नास्माभिरेषु बुद्धधर्मेषु बुद्धक्षेत्रव्यूहेषु वा बोधिसत्त्वविक्रीडितेषु वा तथागतविक्रीडितेषु वा स्पृहोत्पादिता। तत्कस्य हेतोः। यच्चास्माद्भगवंस्त्रैधातुकान्निर्धाविता निर्वाणसंज्ञिनो वयं च जराजीर्णाः। ततो भगवन्नस्माभिरप्यन्ये बोधिसत्त्वा श्रववदिता अभूवन्ननुत्तरायां सम्यक्संबोधावनुशिष्टाश्च न च भगवंस्तत्रास्माभिरेकमपि स्पृहाचित्तमुत्पादितमभूत्। ते वयं भगवन्नेतर्हि भगवतो ऽन्तिकाच्छ्रावकाणामपि व्याकरणमनुत्तरायां सम्यक्संबोधौ भवतीति श्रुत्वाश्चर्याद्भुतप्राप्ता महालाभप्राप्ताः स्म भगवन्नद्य सकृत्सैवेममेवंरूपमश्रुतपूर्वं तथागतघोषं श्रुत्वा महारत्नप्रतिलब्धाश्च स्म भगवन्नप्रमेयरत्नप्रतिलब्धाश्च स्म। भगवन्नमार्गितमपर्येष्टमचिन्तितमप्रार्थितं चास्माभिर्भगवन्निदमेवंरूपं महारत्नं प्रतिलब्धम्। प्रतिभाति नो भगवन्प्रतिभाति नः सुगत ॥

तद्यथापि नाम भगवन्कश्चिदेव पुरुषः पितुरन्तिकाद्पक्रामेत् सो ऽपक्रम्यान्यतरं जनपदप्रदेशं गच्छेत्। स तत्र बह्वनि वर्षाणि विप्रवसेद्विंशतिं वा त्रिंशद्वा चत्वारिंशद्वा पञ्चाशद्वा। अथ स भगवन्महान्पुरुषो भवेत्स च दरिद्रः स्यात्स च वृत्तिं पर्येषमाणो ग्रामाग्रचीवरक्षेत्रोर्दश दिशः प्रक्रामन्नन्यतरं जनपदप्रदेशं गच्छेत्। तस्य च स पितान्यतमं जन-

1) ष्करोम Cb. ष्क्रामः K. मनसि करोम O.
2) हो प्यु A. B. क्राप्यु Ca. क्रामु Cb. क्रा उ K. क्रोत्पा W. O.
3) जराव्याधिकीर्णा A. जराभिभूता O.
4) शास्ता Cb.
5) श्रा A. B. Ca. Cb. W. चा K.
6) पर्यन्विष्ट A. B. Ca. W. पर्येष्ट Cb. K. पर्येषित O., better.
7) प्रतिलाभिनो °नः A. Ca. W.
8) क्रा Cb. K. W. क्र Cb. O. का प्रका A. सान्तिकाद्पक्र O.
9) च in Ca. only.
10) दिशविदिशः A. B. W. दिशोविदिशः Ca. दिशोदिशः Cb. दशोदिशः K.
11) In Ca. Cb. O. only.
12) तम left out in Ca. Cb. O.

पदं प्रक्रान्तः स्याद्बकुधनधान्य[1]हिरण्यकोशकोष्ठागारश्च भवेद्बकुसुवर्णाद्रूप्य[2]मणिमुक्तावैडूर्यशङ्खशिलाप्रवाडजातद्रूपरजत[3]समन्वागतश्च भवेद्बकुदासीदासकर्मकरपौरुषेयश्च भवेद्बकुहस्त्यश्वरथगवेडकसमन्वागतश्च भवेत्। महापरिवारश्च भवेन्महाजनपदेषु च धनिकः स्यादायोगप्रयोगकृषिवणिज्य[4]प्रभूतश्च भवेत्॥

अथ खलु[5] भगवन्स दरिद्रपुरुष आकारचीवरपर्येष्टिकेतोर्ग्रामनगरनिगमजनपदराष्ट्रराजधानीषु पर्यटमानो[6] ऽनुपूर्वेण यत्रासौ पुरुषो बकुधनहिरण्यसुवर्णकोशकोष्ठागारस्तस्यैव पिता वसति तन्नगरमनुप्राप्तो भवेत्। अथ खलु भगवन्स दरिद्रपुरुषस्य पिता बकुधनहिरण्यकोशकोष्ठागारस्तस्मिन्नगरे वसमानस्तं पञ्चाशद्वर्षनष्टं पुत्रं सततसमितमनुस्मरेत्समनुस्मरमाणश्च न कस्यचिदाचक्षी[7]तान्यत्रैक एवात्मनाध्यात्मं संतप्येदेवं च चिन्तयेत्। अकृतमस्मि जीर्णो वृद्धो महल्लकः प्रभूतं मे हिरण्यसुवर्णधनधान्यकोशकोष्ठागारं संविद्यते न च मे पुत्रः कश्चिदस्ति। मा कैव मम कालक्रिया भवेत्सर्वमिदमपरिभुक्तं विनश्येत्। स तं पुनः पुनः पुत्रमनुस्मरेत्। अहो नामाहं निर्वृतिप्राप्तो भवेयं[8] यदि मे स पुत्र इमं धनस्कन्धं परिभुञ्जीत[9]॥

अथ खलु भगवन्स दरिद्रपुरुष आकारचीवरं पर्येषमाणो ऽनुपूर्वेण येन तस्य प्रभूतहिरण्यसुवर्णधनधान्यकोशकोष्ठागारस्य समृद्धस्य[10] पुरुषस्य[11] निवेशनं तेनोपसंक्रामेत्।

1) धान्य in K. only.
2) द्रूप्य left out in A. W.
3) रजत left out in K.
4) वाणिज्य P. वणिक् O.
5) खलु is left out in B. Ca. Cb. throughout this chapter.
6) Sic P. अनुहिण्डमानः O. पर्येषमाणो the rest.
7) चक्षेयाद् O.; an instance of wrong Sanskritisation of an original आचक्खेय, Skr. आचक्षीत.
8) भूयो Ca. Cb. K. भूयां P. भवेद् O. भूयां for भूयासं.
9) त् A. Cb. त Ca. यात् K. P.
10) In Cb. only.
11) In Cb. K. only.

अथ खलु भगवन्स तस्य दरिद्रपुरुषस्य पिता स्वके निवेशनद्वारे महत्या ब्राह्मणक्षत्रियविट्[1]शूद्रपरिषदा परिवृतः पुरस्कृतो महासिंहासने सपादपीठे सुवर्णद्रूप्यप्रतिमण्डित उपविष्टो हिरण्यकोटीशत[2]सहस्रैर्व्यवहारं कुर्वन्वालव्यजनेन वीज्यमानो वितते वितानेपृथिवीप्रदेशे मुक्तकुसुमाभिकीर्णे रत्न[3]दामाभिप्रलम्बिते महत्यर्घ्योपविष्टः स्यात्[4]। अद्राक्षीत्स भगवन्दरिद्रपुरुषस्तं स्वकं पितरं स्वके निवेशनद्वार एवंरूपयर्घ्योपविष्टं महता जनकायेन परिवृतं गृहपतिकृत्यं कुर्वाणम्। दृष्ट्वा च पुनर्भीतस्त्रस्तः संविग्नः संकृष्ट[5]रोमकूप[6]जात उद्विग्नमानस[7] एवमुनविचिन्तयामास। सकृत्सैवायं मया राज्ञा वा राजमात्रो वासादितो नास्त्यस्माकमिह किंचित्कर्म। गच्छामो वयम्। येन दरिद्रवीथी तत्रास्माकमाकारचीवरमल्पकृच्छ्रेणोत्पत्स्यते। अलं मे चिरं विलम्बितेन। मा कैवाहमिह वैष्टिको[8] वा गृह्येयान्यतरं वा दोषमनुप्राप्नुयाम्॥

अथ खलु भगवन्स दरिद्रपुरुषो दुःखपरामर्शनसिकारभयभीतस्त्वरमाणः प्रक्रामेत्पलायेत्र तत्र संतिष्ठेत्। अथ खलु भगवन्स आढ्यः पुरुषः स्वके निवेशनद्वारे सिंहासन उपविष्टस्तं स्वकं पुत्रं सकृद्दर्शनेनैव प्रत्यभिज्ञानीयात्। दृष्ट्वा च पुनस्तुष्ट उदग्र आत्तमनस्कः[9] प्रमुदितः प्रीतिसौमनस्यजातो भवेद्देवं च चिन्तयेत्। आश्चर्यं याव[10]च्चत्र किं[11] नामास्य[11] महतो हिरण्यसुवर्णधनधान्यकोशकोष्ठागारस्य परिभोक्तोपलब्धः। अहं चैतमेव पुनः पुनः समनुस्मरामि। अयं च स्वयमेवेहागतः। अहं च जीर्णो वृद्धो महल्लकः॥

1) विट्च्छू A. K. गृहपतिपर्षदा B. Cb. गृहपतिपरिषदा O.
2) शत in Ca. Cb. O. only.
3) रत्नवितान A. B. K. W. P.
4) स्यात् left out in K.
5) संकृषित Cb. संकृष्ट O. The others संकुर्षित.
6) Left out in Cb.
7) अनुवि left out in A. Cb. K. O. P.
8) विष्टोकारको O. 9) मनाः B. O.
10) यावत् यस्य A. यत्र (without यावत्) Ca. Cb. O.
11) Left out in K. नामेमस्य for नामास्य O.

अथ खलु भगवन्स पुरुषः पुत्रतृष्णा[1]संपीडितस्तस्मिन्क्षणलवमुहूर्ते[2][3] द्रवेनान्पुरुषान्संप्रेषयेत्[4][5]। गच्छत मार्षा एतं पुरुषं शीघ्रमानयध्वम्। अथ खलु भगवंस्ते पुरुषाः सर्व एव द्रवेन प्रधाविताः[6]स्तं दरिद्रपुरुषमध्यालम्बेयुः। अथ खलु भगवन्स दरिद्रपुरुषस्तस्यां वेलायां भीतस्त्रस्तः संविग्नः संकृष्टरोमकूपजात उद्विग्नमानसो[7] दारुणमार्तस्वरं मुञ्चेदारवेद्विरवेत्[8]। नाहं युष्माकं किंचिदपराध्यमिति वाचं भाषेत। अथ खलु ते पुरुषा बलात्कारेण तं दरिद्रपुरुषं विरवन्तमप्याकर्षेयुः। अथ खलु स दरिद्रपुरुषो भीतस्त्रस्तः संविग्न[9] उद्विग्नमानस[10] एवं च चिन्तयेत्। मा तावदहं वध्यो दण्ड्यो भवेयं नश्यामीति। स मूर्च्छितो धरण्यां प्रपतेत्। विसंज्ञश्च स्यादासन्ने चास्य स पिता भवेत्। स तान्पुरुषा[11][12]नेवं वदेत्। मा भवन्त एतं पुरुषमानयन्विति[13][14] तमेनं शीतलेन वारिणा परिसिञ्चित्वा न भूय

1) ष्णायां B. ष्णाया O.

2) Cb. O. add तस्मिन्समये.

3) B. Cb. read क्षणे तस्मिं लवे तस्मिं मुहूर्ते. O. has क्षणे लयमुहूर्ते.

4) Sic O.; द्रविनान् the rest.

5) संप्रयच्छति K.

6) MSS. संकृषित.

7) From सो till उद्विग्नमान (before एवं चिंतयेत्) left out in Cb. मना Ca. O.

8) रवेन्नार्हं in all MSS.

9) O. has समुद्विग्नमना एवं च. After संविग्नः MSS. except Cb. O. add संकृषितरोमकूपजात.

10) मना A. Ca. K.

11) विसञ्ज्ञश्च भवेदा O. विषर्षश्च स्या A. B. K. W. विषषाश्च सा Ca. निषषा स्या Cb.

12) स च तावत्पु Cb.

13) एवं A. K. W. एन Ca. एतं Cb.

14) नयिस्विति A. नयतस्तमेन B. नयतेति Ca. नयंतु Cb. नययुरिति K. नयेयुरिति P. नयस्विति W. नयथ A. थ ग्राह्यपुरुषस्त O.

ग्रालपेत्। तत्कस्य हेतोः। ज्ञानाति स गृहपतिस्तस्य[1] दरिद्रपुरुषस्य क्षीनाधिमुक्तिकतामात्मनश्चोदारस्थामतां ज्ञानाति च ममैष[2] पुत्र इति॥

अथ खलु भगवन्स गृहपतिरुपायकौशल्येन न कस्यचिदाचक्षेन्ममैष पुत्र इति[3]। अथ खलु भगवन्स गृहपतिरन्यतरं पुरुषमामन्त्रयेत्। गच्छ त्वं भोः पुरुष। एनं दरिद्रपुरुषमेवं वदस्व। गच्छ त्वं भोः पुरुष येनाकाङ्क्षसि मुक्तो ऽसि। एवं वदति स पुरुषस्तस्मै प्रतिश्रुत्य येन स दरिद्रपुरुषस्तेनोपसंक्रामेदुपसंक्रम्य तं दरिद्रपुरुषमेवं वदेत्। गच्छ त्वं भोः पुरुष येनाकाङ्क्षसि मुक्तो ऽस्मीति[4]। अथ खलु स दरिद्रपुरुष इदं वचनं श्रुत्वाश्चर्याद्भुत[5]प्राप्तो भवेत्। स उत्थाय तस्मात्पृथिवीप्रदेशाच्चेन दरिद्रवीथो तेनोपसंक्रामेदाक्षारचोवरपर्येष्टिहेतोः। अथ खलु स गृहपतिस्तस्य दरिद्र[6]पुरुषस्याकर्षणाहेतोरुपायकौशल्यं प्रयोजयेत्। स तत्र द्वौ पुरुषौ प्रयोजयेद्दुर्वर्णावल्पौजस्कौ। गच्छतां[7] भवन्तौ यो ऽसौ पुरुष इहागतो ऽभूत्[8]। तं युवां द्विगुणया दिवसमुद्रयात्मवचनेनैव भर्त्सयित्वेह मम निवेशने कर्म कारापयेथाम्[10]। सचेत्स एवं वदेत्किं कर्म कर्तव्यमिति स युवाभ्यामेवं वक्तव्यः संकारधानं शोधयितव्यं महावाभ्यामिति। अथ[11] तौ पुरुषौ तं दरिद्र[6]पुरुषं पर्येषयित्वा[12] तया क्रियया संपादयेताम्। अथ खलु तौ द्वौ पुरुषौ स च दरिद्रपुरुषो वेतनं गृहीत्वा तस्य महाधनस्य

1) A. K. add च.

2) व A. B. ष Ca. Cb. K. स्ववशगतश्च मे एष O.

3) This sentence is left out in Cb.

4) इति in B. Ca. only.

5) धर्म is added in A. B. Cb. K. W. आश्चर्यप्राप्तो O.

6) दरिद्र left out in K.

7) थ A. त B. Ca. Cb. W. तं K. तु O.

8) भवेत् A. K. W.

9) भरित्वा आनयथ इह O.

10) यथाः A. यतः B. P. येथाः Ca. K. W. गत Cb. कारापणाय O.

11) K. adds खलु.

12) पर्येष्य Ca. पर्येषित्वा Cb.

पुरुषस्यान्तिकात्तस्मिन्नेव निवेशने संकारधानं शोधयेयुः[1]। तस्यैव च महाधनस्य पुरुषस्य गृहपरिसरे कटपल्लिकुञ्चिकायां[2] वासं कल्पयेयुः। स चाढ्यः पुरुषो गन्धोदकावापनेन तं स्वकं पुत्रं पश्येत्संकारधानं शोधयमानम्। दृष्ट्वा च पुनराश्चर्यप्राप्तो भवेत्॥

अथ खलु स गृहपतिः स्वकान्निवेशनाद्वतीर्यापनयित्वा[3] माल्याभरणान्यपनयित्वा मृडुकानि वस्त्राणि चौक्षाण्युदाराणि[4] मलिनानि वस्त्राणि प्रावृत्य दक्षिणेन पाणिना पिटकं परिगृह्य पांसुना स्वगात्रं दूषयित्वा दूरत एव संभाषयमाणो[5] येन स दरिद्रपुरुषस्तेनोपसंक्रामेदुपसंक्रम्यैवं वदेत्। वहन्तु भवन्तः पिटकानि मा तिष्ठत[6] हरत पांसूनि। अनेनोपायेन तं पुत्रमालपेत्संलपेच्चैनं वदेत्। इहैव त्वं भोः[7] पुरुष कर्म कुरुष्व मा भूयोऽन्यत्र गमिष्यसि। सविशेषं ते ऽहं वेतनकं दास्यामि। येन येन च ते कार्यं भवेत्तद्विश्रब्धं मां याचेर्यदि वा कुण्डमूल्येन यदि वा कुण्डिकामूल्येन यदि वा स्थालिकामूल्येन[8] यदि वा काष्ठमूल्येन यदि वा लवणमूल्येन यदि वा भोजनेन यदि वा प्रावरणेन। अस्ति मे भोः पुरुष क्षौर्णाशाटी। सचेत्तया ते कार्यं स्याद्याचेरहं ते ऽनुप्रदास्यामि। येन येन ते भोः पुरुष कार्यमेवंरूपेण परिष्कारेण तं तमेवाहं ते सर्वमनुप्रदास्यामि। निर्वृतस्त्वं भोः पुरुष भव यादृशस्ते पिता तादृशस्ते ऽहं मन्तव्यः। तत्कस्य हेतोः। अहं च वृद्धस्त्वं च दरिद्रो मम च त्वया बत कर्म कृतमिमं संकारधानं शोधयता न च त्वया भोः पुरुषात्र कर्म कुर्वता

1) शोधयामासुः Ca. शोधयामास Cb.

2) गृहपतिसरे कटके पल्लिकुंचिकायां A. W. कटकपलेकुंचिकाया B. गृहपरिसरे कटपल्लिकुंचिकया Ca. °कायां Cb. गृहपतिसकरे K. P. कटपल्लिकुंचिकायां P. गृहपार्श्वे कुक्षिपलोकुच्चे O. Cp. vs. 23 below.

3) अपनीय B. तीर्थ संकरद्रूषितगात्रस्य। मूलमुपसंक्रमति। अपनामयित्वा O.

4) चौक्षाणि left out in K.

5) Probably an error for संभावयमानो; O. has संक्रामयमाणो.

6) त A. B. Cb. K. W. ता Ca.

7) In Cb. only. For भोः MSS. except O. commonly भो.

8) क A. B. Ca. K. P. W. चोटकम्बलेन O. and for भोजनेन is has स्थालीमूल्येन.

शाठ्यं[1] वा वक्रता वा कौटिल्यं वा मानो वा मदो वा कृतपूर्वः करोषि वा। सर्वथा ते भोः पुरुष न समनुपश्याम्येकमपि पापकर्म यत्रैषामन्येषां पुरुषाणां कर्म कुर्वतामिमे दोषाः संविद्यन्ते। यादृशो मे पुत्र औरसस्तादृशस्त्वं ममाद्यायेण भवसि॥

अथ खलु भगवन्स गृहपतिस्तस्य दरिद्रपुरुषस्य पुत्र इति नाम कुर्यात्स च दरिद्रपुरुषस्तस्य गृहपतेरन्तिके पितृसंज्ञामुत्पादयेत्। अनेन भगवन्पर्यायेण स गृहपतिः पुत्रकामतृषितो[2] विंशतिवर्षाणि तं पुत्रं संकारधानं शोधापयेत्[3]। अथ विंशतेर्वर्षाणामत्ययेन स दरिद्रपुरुषस्तस्य गृहपतेर्निवेशने विश्रब्धो भवेन्निष्क्रमणप्रवेशे[4] तत्रैव च कटपल्लिकुञ्चिकायां[5] वासं कल्पयेत्[6]॥

अथ खलु भगवंस्तस्य गृहपतेर्ग्लान्यं प्रत्युपस्थितं भवेत्स मरणकालसमयं चात्मनः प्रत्युपस्थितं समनुपश्येत्। स तं दरिद्रपुरुषमेवं वदेत्। आगच्छ त्वं भोः पुरुष[7]। इदं मम प्रभूतं हिरण्यसुवर्णधनधान्यकोशकोष्ठागारमस्त्यहं[8] बाढग्लान इच्छाम्येतं[9] यस्य दातव्यं यतश्च[10] ग्रहीतव्यं यच्च[11] निधातव्यं भवेत्। सर्वं संजानीयाः। तत्कस्य हेतोः। यादृशं[12] एवाहमस्य द्रव्यस्य स्वामी तादृशस्त्वमपि मा च मे त्वं किंचिदतो विप्रणाशयिष्यसि[13]॥

1) साथता A. शाठ्यता K.

2) का A. W. P. क Ca. Cb. K.

3) विंशतीनां O. A. B. Cb. K. W. P. विंशतेरू Ca.

4) विस्रम्भी P. विस्रम्भिको O.

5) ष्क्रा A.

6) पारिकुंचिताया A. पल्लिकुंचे Ca. पलिकुंचे Cb. परिकुंचिकायां K. P. पलिकुंचिनायां W. कोणपलिकुंचे O.

7) पुरुषेदं O.

8) A. adds च.

9) तं A. K. P. नं Ca.

11) त left out in K.

10) यतश्च Cb. Read येन च?

12) मे Ca. Cb. K.

13) शेषामीति O.

अथ खलु भगवन्स दरिद्रपुरुषो ऽनेन पर्यायेण तच्च तस्य गृहपतेः प्रभूतं हिरण्यसुवर्णधनधान्यकोशकोष्ठागारं संजानीयादात्मना च ततो निःस्पृहो भवेन्न च तस्मात्किंचित्प्रार्थयेदुत्तशः सक्तुप्रस्थमूल्यमात्रमपि तत्रैव च कटपल्लिकुञ्चिकायां[1] वासं कल्पयेत्तामेव दरिद्रचित्तामनुविचित्तयमानः[2] ॥

अथ खलु भगवन्स गृहपतिस्तं पुत्रं शक्तं परिपालकं परिपक्वं[3] विदित्वात्मार्दितचित्तमुदारसंज्ञया च पौर्विकया दरिद्रचित्तयातीर्यन्तं[4] जेह्रीयमाणं जुगुप्समानं विदित्वा मरणकालसमये प्रत्युपस्थिते तं दरिद्रपुरुषमानाय्य[5] सकृतो ज्ञातिसंघस्योपनामयित्वा[6] राज्ञो वा राजमात्रस्य वा पुरतो नैगमज्ञानपदानां च संमुखमेवं संश्रावयेत्। शृणवन्तु भवन्तो ऽयं मम पुत्र औरसो मयैव जनितः। अमुकं नाम नगरं तस्मादेष पञ्चाशद्वर्षो नष्टः। अमुको नामैष नाम्नाकृमप्यमुको नाम। ततश्चाहं नगरादेतमेव मार्गमाण इहागतः। एष मम पुत्रो ऽहमस्य पिता। यः कश्चिन्ममोपभोगो ऽस्ति तं सर्वमस्मै पुरुषाय निर्यातयामि पच्च मे किंचिदस्ति प्रत्यात्मकं धनं तत्सर्वमेष एव जानाति ॥

अथ खलु भगवन्स दरिद्रपुरुषस्तस्मिन्समय इममेवंरूपं घोषं श्रुत्वाश्चर्याद्भुतप्राप्तो भवेदेवं च विचित्तयेत्सकृमेव मयेदमेव तावद्धिरण्यसुवर्णधनधान्यकोशकोष्ठागारं प्रतिलब्धमिति ॥

एवमेव भगवन्वयं तथागतस्य पुत्रप्रतिरूपकास्तथागतश्चास्माकमेवं वदति पुत्रा मम यूयमिति यथा स गृहपतिः। वयं च भगवंस्तिसृभिर्दुःखताभिः संपीडिता अभूम[7]।

---

1) पल्लिकुंचितायां A. परि° W. पल्लिकुंचे Ca. पलिकुंचे Cb. कटकपल्लिकुंचिकायां K. कोणे पलिकुंचे O.

2) चित्तयेत् Ca.

3) परि left out in K. परिपालनसमर्थं O.

4) Better °यतीर्य° (i. e. °या + ऋतीय); °या ऋतीय° P.

5) Sic P.; नयित्वा the others.

6) उपनाम्य च added in K. P.

7) अभूवन् A. K. W. अभूवं Cb. आसीत् O.

कतमाभिस्तिसृभिर्यदुत दुःखदुःखतया संस्कारदुःखतया[1] विपरिणामदुःखतया च संसारे च क्लेशाधिमुक्तिकाः। ततो वयं भगवता बह्वन्धर्मान्प्रत्यवरान्[2] संस्कारधानसदृशाननुविचित्तयिताः[3]। तेषु चास्म प्रयुक्ता घटमाना व्यायच्छमाना[4] निर्वाणमात्रं च वयं भगवन्दिवसमुद्रामिव पर्येषमाणा मार्गामः। तेन च वयं भगवन्निर्वाणेन प्रतिलब्धेन तुष्टा भवामो बह्व च लब्धमिति मन्यामहे[5] तथागतस्यात्तिकादेषु[6] धर्मेष्वभियुक्ता[7] घटित्वा व्यायमित्वा[8]। प्रजानाति[9] च तथागतो ऽस्माकं क्लेशाधिमुक्तिकतां ततश्च भगवानस्मानुपेक्षते[10] न संभिनत्ति[11] नाचष्टे यो ऽयं तथागतस्य ज्ञानकोश एष एव युष्माकं भविष्यतीति। भगवांश्चास्माकमुपायकौशल्येनास्मिंस्तथागतज्ञानकोशे दायादान्संस्थापयति[12]। निःस्पृहाश्च[13] वयं भगवंस्तत एवं जानीम एतदेवास्माकं बह्वकरं[14] यद्वयं[15] तथागतस्यात्तिकाद्दिवसमुद्रामिव निर्वाणं प्रतिलभामहे। ते वयं भगवन्[16] बोधिसत्त्वानां महासत्त्वानां तथागतज्ञानदर्शनमारभ्योदारां

---

1) K. puts the 2nd as the 3rd.

2) बह्वो धर्माः प्रत्यवराः P. बह्वो धर्माः वयं च तथागतज्ञानं व्यवकारयामः प्रत्यवराः K.

3) विचिंतापितास् Ca. चित्तापयमानास् O. चित्तयिता P.

4) घटामहे व्यायच्छामहे Ca.

5) मन्यमानाः ॥ B. K.

6) व A. W.

7) युज्य B. योजित्वा O., more original.

8) व्यायम्य B. Ca.

9) प्र left out in K. O. P.

10) Sic P. नस्यानु K. नस्माकमनु A. B. Ca. Cb. ज्ञात्वा चास्माकं तथागत उपेक्षति O.

11) संभिन्दति O.

12) A. W. P. add वयं च तथागतज्ञानं व्यवकारयामः O. has तथागतज्ञानरत्नकोशे व्योकारापयि.

13) K. adds तत्र.

14) All but O. तरं.

15) यद् left out in A. W.

16) भगवन् left out in A. W.

धर्मदेशनां कुर्मस्तथागतज्ञानं विवरामो दर्शयाम उपदर्शयामो [1]वयं भगवंस्ततो निःस्पृहाः समानाः[2]। तत्कस्य हेतोः। उपायकौशल्येन तथागतो ऽस्माकमधिमुक्तिं प्रजानाति। तच्च वयं न जानीमो न बुध्यामहे यदिदं भगवतेतर्हि कथितं यथा वयं भगवतो भूताः पुत्रा भगवांश्चास्माकं स्मारयति तथागतज्ञानदायादान्[3]। तत्कस्य हेतोः। यथापि नाम वयं तथागतस्य भूताः पुत्रा इति। अपि तु खलु पुनर्हीनाधिमुक्ताः। सचेद्भगवानस्माकं पश्येद्-धिमुक्तिबलं बोधिसत्त्वशब्दं भगवानस्माकमुदाहरेद्वयं पुनर्भगवता द्वे कार्ये कारापिता[4] बोधिसत्त्वानां चाग्रतो हीनाधिमुक्तिका इत्युक्तास्ते चोदारापां बुद्धबोधौ समादापिताः। अस्माकं चेदानीं भगवानधिमुक्तिबलं ज्ञात्वेदमुदाहृतवाननेन वयं भगवन्पर्यायेणैवं वदामः। सकृत्सैवास्माभिर्निःस्पृहैर्[5]नाकाङ्क्षितममार्गितमपर्येषितमचिन्तितमप्रार्थितं सर्वज्ञतारत्नं प्रतिलब्धं यथापीदं तथागतस्य पुत्रैः॥

अथ खल्वायुष्मान्महाकाश्यपस्तस्यां वेलायामिमा गाथा अभाषत॥

आश्चर्यभूता[6] स्म तथाद्भुताश्च[7] प्रीतिलप्राप्ता[8] स्म अणिव घोषम्।
सकृत्सैव अस्माभिरयं तथाश्च[9] मनोज्ञघोषः श्रुतु नायकस्य॥ १॥
विशिष्टरत्नान महत्तरांशिर्मुहूर्तमात्रेणयमश्च लब्धः[10]।
न चिन्तितो नापि कदाचि प्रार्थितस्तं श्रुत्व आश्चर्यगता स्म सर्वे॥ २॥

1) In A. added च.

2) In A. K. W. P. only.

3) दानं A. दानां B. दान्मान Ca. दान् K. दायं W. दर्शनस्य दातार दा° O.

4) पि A. Ca. W. O. पि K. P.

5) निःस्पृहेभिर्निष्पिपासेभिर O.

6) र्याङ्गु A. K. र्याङ्गू P. र्यभू Ca. र्यप्राप्ता O.

7) भू A. W. ङ्गु Ca. K.

8) स्म Ca.

9) तथ्यथा A. K. तवाश्च Ca. Quite different O.: सकृत्सा हि अस्मैरिदमेवद्रूपं मनुज्ञघोषं श्रुत.

10) All but O. महत्त. So too in the sequel.

यद्यपि बालः पुरुषो भवेत उत्त्रासितो बालजनेन मत्तः।
पितुः सकाशात्तु[1] अपक्रमेत[2] अन्यं च देशं व्रजि सो सुदूरम्॥ ३॥
पिता च तं शोचति तस्मि काले पलायितं ज्ञात्व स्वकं हि पुत्रम्।
शोचत्तु सो दिग्विदिशासु कंचे[3] वर्षाणि पञ्चाशदनूनकानि॥ ४॥
तथा च सो पुत्र गवेषमाणो अन्यं मरुत्तं नगरं हि गत्वा।
निवेशनं मापिय तत्र तिष्ठेत्समर्पितो कामुगणेहि पञ्चभिः॥ ५॥
बक्कुं हिरण्यं च सुवर्णरूप्यं धान्यं धनं शङ्खशिलाप्रवाडम्।
हस्ती च अश्वाश्च पदातयश्च गावः पशूश्चैव तथैडकाश्च॥ ६॥
प्रयोग आयोग तथैव क्षेत्रा दासी च दासा बक्कु प्रेष्यवर्गः।
समत्कृतः प्राणिसहस्रकोटिभो[4] राज्ञश्च सो वल्लभु नित्यकालम्॥ ७॥
कृताञ्जली तस्य भवन्ति[5] नागरा[6] ग्रामेषु ये चापि वसन्ति ग्रामिणः[7]।
बक्कुवाणिज्यास्तस्य व्रजन्ति अन्तिके बहूहि कार्येहि कृताधिकाराः॥ ८॥
एतादृशो ऋद्धिमतो नरः स्याज्जीर्णश्च वृद्धश्च महल्लकश्च।
स पुत्रशोकं अनुचिन्तयन्तः क्षपेय[8] रात्रिंदिव नित्यकालम्॥ ९॥

1) MSS. शात्तु.

2) त् B. W. म प्रक्रमेय O.

3) कंच A. कंचो B. कंचे K. दिशा च विदिशा च समन्त अण्वते O. The verb omitted in P. Cp. अण्वति in Mahāvastu, but also Skr. अञ्चति; further अण्ठते and Pāli *andhati*.

4) भि A. K. W. O. षु Cb. भी Ca. P.

5) भवन्ति A. B. K. W. O. P. नमन्ति Ca.

6) रो A. K. W. P. र Ca. रा Cb. O.

7) भवन्ति ग्रामिका O.

8) Sic P. O. क्षेपेय the rest.

स तादृशो दुर्मति मह्य पुत्रः पञ्चाश वर्षा पि तदा पलायकः[1]।
अयं च कोशो विपुलो ममास्ति कालक्रिया चो[2] मम प्रत्युपस्थिता ॥ १० ॥
सो चापि बालो तद् तस्य पुत्रो दरिद्रकः कृपणाकु नित्यकालम्।
ग्रामेण ग्रामं अनुचङ्क्रमन्तः पर्येषते भक्त[3] तथापि चोडम् ॥ ११ ॥
पर्येषमाणो ऽपि कदाचि किंचिल्लभेत किंचित्पुन नैव किंचित्।
स शुष्यते[4] परमरणेषु[5] बालो दहूय कण्डूय विदिग्धगात्रः[6] ॥ १२ ॥
सो च व्रजेत्तं नगरं यत्किं[7] पिता अनुपूर्वशो[8] तत्र गतो भवेत।
भक्तं च चोडं च गवेषमाणो निवेशनं यत्र पितु स्वकस्य[9] ॥ १३ ॥
सो चापि आढ्यः पुरुषो महाधनो द्वारस्मि सिंहासनि[10] संनिषण्णः।
परिवारितः प्राणिशतैरनेकैर्वितान[11] तस्य[12] विततो ऽन्तरोक्षे ॥ १४ ॥
आप्तो जनश्चास्य समन्ततः स्थितो धनं क्रिणयं च गणेत्ति केचित्।
केचित्तु लेखानपि लेखयन्ति केचित्प्रयोगं च प्रयोजयन्ति ॥ १५ ॥

1) Better in O. वर्षाणि यदा पलायितः.

2) यां A. चो B. Ca. K. W. P. च Cb. O. The lengthening not necessary before the pause.

3) भक्तम A. Ca. भक्तं त K. भक्त तथैव चोटकम् O.

4) शोचते O.

5) Read परि?

6) Have we to r. विदग्ध? O. has किलासगात्रः.

7) क्रिषिं A.

8) शस्त O.; सो त the others.

9) पितु सो उपागमि O.; पिता स्वकोऽस्य P.; पिता स्वकस्य the rest.

10) न K. P. ने Cb.

11) नु B. Ca. Cb. K. P. न A. W. नि O.

12) Sic O.; तस्यो P.; तस्या the rest.

सो चा[1] दरिद्रो तत्कि एतु दृष्ट्वा विभूषितं गृहपतिनो निवेशनम्।
कत्किं नु[2] अद्य अहमत्र आगतो राजा अयं भेष्यति राजमात्रः ॥ १६ ॥
मा दानि[3] दोषं पि लभेयमत्र गृह्णित्व वेष्टिं पि च कारयेयम्।
अनुचित्तयन्तः स पलायते नरो दरिद्रवोर्थो परिपृच्छमानः ॥ १७ ॥
सो चा[4] धनी तं स्वकु पुत्र दृष्ट्वा सिंहासनस्थश्च भवेत्प्रहृष्टः।
स दूतकान्प्रेषयि तस्य अन्तिके आनेथ एतं पुरुषं दरिद्रम् ॥ १८ ॥
समनन्तरं तेकि गृह्णातु सो नरो गृहीतमात्रो अथ मूर्च्छं[5] गच्केत्।
ध्रुवं खु मह्यं वधका उपस्थिताः किमथ्य चोडेन[6] थ भोजनेन वा ॥ १९ ॥
दृष्ट्वा च सो पण्डितु तं महाधनी क्रोनाधिमुक्तो अयु बाल दुर्मतिः।
न अद्दधी मह्यमिमां विभूषितां पिता ममायं ति[7] न चापि अद्दधीत् ॥ २० ॥
पुरुषांश्च सो तत्र प्रयोजयेत[8] वङ्काश्च ये काणक कुण्ठकाश्च।
कुचैलका कृष्णक क्रोनसन्नाः पर्येषथा तं नरु कर्मकारकम् ॥ २१ ॥
संकारधानं इमु मह्य पूतिकमुच्चारप्रस्रावविनाशितं च।
तं शोधनार्थाय करोकि[9] कर्म द्विगुणं च ते वेतनकं प्रदास्ये ॥ २२ ॥

1) च O.

2) तु Cb. W.

3) मेदानि O.

4) धनि A. B. Ca. W. धनी Cb. वनी K. धनो O. MSS. च for चा.

5) मूर्च्छि A. B. K. W. P. मूर्च्छं Ca. Cb. O.

6) च A. B. Cb. K. W. O. P. थ Ca.

7) पि ति A. W. पि न K. P. ति न B. Ca. Cb. न चापि श्रोकल्पयि एष मे पिता O.

8) त A. K. त् Ca. Cb. W.

9) चे A. B. Ca. W. चै K. ले Cb. डुश्रोडिकाः O.

10) Better तच्छोध O.

11) थ A. B. Cb. K. W. P. कि Ca. O.

एतादृशं घोष श्रुणित्व सो नरो आगत्य संशोधयि तं प्रदेशम्।
तत्रैव सो आवसथं च कुर्यान्निवेशनस्य[1] पलिकुच्चिके ऽस्मिन्॥ २३॥
सो चा धनी[2] तं पुरुषं निरीक्षेद्भवात आलोकनकेकि[3] नित्यम्।
क्षीनाधिमुक्तो अयु मह्य पुत्रः संकारधानं शुचिकं करोति॥ २४॥
स[4] आतरित्वा पिटकं गृहीत्वा मलिनानि वस्त्राणि च प्रावरित्वा।
उपसंक्रमेत्तस्य नरस्य अन्तिके अवभर्त्सयत्तो न करोथ कर्म॥ २५॥
द्विगुणं च ते वेतनकं ददामि द्विगुणं च भूयस्तथ पादमक्षणम्।
मलोणभक्तं च ददामि तुभ्य शाकं च शाटिं च पुनर्ददामि॥ २६॥
एवं च तं भर्त्सयि[6] तस्मि काले संक्षेषयेत्तं पुनरेव पण्डितः।
सुष्ठु खलु[7] कर्म करोषि अत्र पुत्रो ऽसि व्यक्तं मम नात्र संशयः॥ २७॥
स स्तोकस्तोकं च गृहं प्रवेशयेत्कर्म च कारापयि तं मनुष्यम्।
विंशच्च वर्षाणि सुपूरितानि क्रमेण विश्रम्भयि तं नरं सः॥ २८॥
क्षिरण्यु[8] सो मौक्तिकु[8] स्फाटिकं च प्रतिशामयोत्तत्र[9] निवेशनस्मिन्[10]।
सर्वं च सो संगणनां करोति अर्थं च सर्वं अनुचिन्तयेत[11]॥ २९॥

1) स्या P.; other MSS. have स्यो; O. has स्यमतिदूरि वासम्.
2) द्वनो A. धनी O. वनो P. MSS. च. Original r. perhaps चद्ध.
3) Sic P.; श्रौलो O.; उल्लो the others.
4) प्रत A. प्रेत W. श्रोत्त Ca. Cb. श्रोत K. O. P.
5) भत्स in all MSS. except O., which has उत्थेय्ययत्तश्च! probably for उत्तेजयत्तश्च.
6) भत्सिय A. B. W. भर्त्सिय Ca. भंत्सिय Cb. भंसयि K. P.
7) खलु A. B. Ca. K. W. च लं Cb. च म O.
8) एयु कु Ca. एय क in other MSS.
9) ये तस्मिन् P.; येत्तत्र A. B. Ca. Cb. W. K. Our r. follows O.
10) All but O. नेऽस्मिन्. To r. also कस्मिन् vs. 23.
11) येत् या A. येत Ca. येत्वा Cb. गिष्ये K. O. येतया W.

बाकृर्ध[1] सो तस्य निवेशनस्य कुटिकाय एको वसमानु बालः।
दरिद्रचित्तामनुचिन्तयेत न मे ऽस्ति एतादृश भोगु[2] केचित्[3]॥ ३०॥
ज्ञात्वा च सो तस्य इमेवद्रूपमुदारसंज्ञाभिगतो मि[4] पुत्रः।
स आनयित्वा मुक्तज्ञातिसंघं[5] निर्यातयिष्याम्यक्षु[6] सर्वमर्थम्॥ ३१॥
राज्ञान सो नैगमनागरांश्च[7] समानयित्वा बकुवाणिजांश्च।
एवं उवाच[8] परिषाय मध्ये पुत्रो ममायं चिर विप्रनष्टकः॥ ३२॥
पञ्चाश वर्षाणि सुपूर्णकानि[9] अन्ये चतो विंशतिये मि[10] दृष्टः[11]।
अमुकातु नगरातु ममैष नष्टो अहं च मार्गत्त इहैवमागतः[12]॥ ३३॥
सर्वस्य द्रव्यस्य अयं प्रभुर्मे एतस्य निर्यातयि सर्वशेषतः।
करोतु कार्यं च पितुर्धनेन सर्वं कुटुम्बं च ददामि एतत्॥ ३४॥
आश्चर्यप्राप्तश्च भवेन्नरो ऽसौ दरिद्रभावं पुरिमं स्मरित्वा।
क्षीनाधिमुक्तिं च पितुश्च तान्गुणाँल्लब्ध्वा[13] कुटुम्बं सुखितो ऽस्मि अद्य॥ ३५॥

1) वर्किधू A. बक्किश्च O.
2) Some MSS. भाग or भागु.
3) किञ्चित् O. Read कोचित्.
4) इमे A. B. Ca. K. W. इममे Cb. P.
5) घात्रि K. घानि P.
6) ष्ये ऽस्मिन् P. ष्ये ऽस्यिम O.
7) नागरनेगमांश्च B.
8) एवमुवाच A. B. W. O. एवं उवाच Ca. Cb. उवाच एवं K. P.
9) र्ण सर्वे A. Ca. W. र्णकानि B. K. P. रितानि Cb. सुपूर पूर्वम् O.
10) मी A. क्षि B. पि Ca. P. K. मि Cb. षि W. विंशानि यतोस्मि O.
11) दृष्ट्वा K. P.
12) क्षैव आगतः O. The *m* is a means to avoid hiatus.
13) गुणां दृष्ट्वा A. B. K. P. गुणान् दृष्ट्वा Cb. गुणां लब्ध्वा Ca.

तथैव चास्माकं[1] विनायकेन क्षीणाधिमुक्तिर्[2]व विज्ञानियान[3]।
न आवितं बुद्ध भविष्यथेति यूयं किल आवक मह्य पुत्राः ॥ ३६ ॥
अस्मांश्च अध्येषति लोकनाथो ये प्रस्थिता उत्तममग्रबोधिम्।
तेषां वदे[4] काश्यप मार्गनुत्तरं[5] यं मार्ग[6] भाविंव[7] भवेषु बुद्धाः ॥ ३७ ॥
वयं च तेषां सुगतेन प्रेषिता बकुबोधिसत्त्वान महाबलानाम्।
अनुत्तरं मार्ग[8] प्रदर्शयाम[9] दृष्टान्तकेतूनपुतान कोटिभिः ॥ ३८ ॥
श्रुत्वा च अस्माक जिनस्य पुत्रा बोधाय भावेन्ति सुमार्गमग्र्यम्।
ते व्याक्रियन्ते च क्षणस्मि तस्मिन्[10] भविष्यथा बुद्ध इमस्मि लोके ॥ ३९ ॥
एतादृशं कर्म करोम तायिनः संरक्षमाणा इम धर्मकोशम्।
प्रकाशयन्तश्च जिनात्मज्ञानां वैश्वासिकस्तस्य यथा नरः सः ॥ ४० ॥
दरिद्रचित्ताश्च विचित्तयाम विश्राणयन्तो इमं[12] बुद्धकोशम्[13]।
न चैव प्रार्थेम जिनस्य ज्ञानं जिनस्य ज्ञानं च प्रकाशयामः[14] ॥ ४१ ॥

1) कं A. K. कु Ca. क Cb. W. O. P.
2) क्तिं च A. B. Ca. W. क्तिव Cb. O. क्तिस्व K. P. It ought to be क्तव.
3) नं A. W. नः B. न् Ca. न Cb. K. P.
4) च ते K. P. देशेकि लं O.
5) एतमर्थं B. एवमर्थं W.
6) र्गं A. B. Cb. W. O. र्गु Ca. र्गं K.
7) Sic all for भावेत्व.
8) र्गं A. B. Cb. K. W. O. P. र्गु Ca.
9) मो Ca. प्रकाशयाम Cb. प्रदापीम W.
10) तस्मि O.
11) नां A. O. नः Ca. Cb. K. W. P.
12) इम Ca. Cb. K. P. O. इमु A. W.
13) घोषं Cb. K.
14) A. W. read this half a line as प्रकाशयामो इममग्रबोधिं.

प्रत्यात्मिकों निर्वृतिं[1] कल्पयाम एतावता ज्ञानमिदं न भूयः।
नास्माक हर्षो[2]पि कदाचि भोति क्षेत्रेषु बुद्धान शृणित्व व्यूढान्[3] ॥ ४२ ॥
शास्ताः किल सर्विमि धर्म नास्रवा निरोधउत्पादविवर्जिताश्च।
न चात्र कश्चिद्भवतीह धर्मो[4] एवं तु चित्तेव[5] न भोति श्रद्धा[6] ॥ ४३ ॥
मुनिःस्पृहा[7] स्म वयं[8] दीर्घरात्रं बौद्धस्य ज्ञानस्य अनुत्तरस्य[9]।
प्रणिधानमस्माक न ज्ञातु तत्र इयं परा निष्ठ जिनेन उक्ता ॥ ४४ ॥
निर्वाणपर्यन्ति[11] समुच्छ्रये ऽस्मिन्परिभाविता शून्यत दीर्घरात्रम्।
परिमुक्त त्रैधातुकदुःखपीडिताः[14] कृतं च अस्माभि जिनस्य शासनम् ॥ ४५ ॥
यं हि[15] प्रकाशेम[16] जिनात्मज्ञानां ये प्रस्थिता भोन्ति इहाग्रबोधौ[17]।
तेषां च यत्किंचि वदाम धर्मं स्पृहु तत्र अस्माकं[19] न ज्ञातु भोति ॥ ४६ ॥

1) त्मकी नि Cb. P. त्मिकीन्नि Ca. त्मकीं नि K. त्मकं नि O.
2) All but O. हर्षेपि or हर्षम्पि.
3) वियूढ़ श्रुत्वा O. probably more original.
4) र्म K. P. O.
5) Sic P.; the others चित्तित्वा.
6) Verses 43 and 44 are left out in B.
7) स्र Cb.
8) Sic P.; च वय O. वयमिह A. B. Ca. Cb.
9) अनाग्रवस्य Cb. K. P. बुद्धान ज्ञानस्मि अनुत्तरस्मि O.
10) धातु स्र A. Ca. धानमस्माक Cb. O. धात अस्माक W. धानमस्माकु P.
11) न्तं W.
12) क्ति A. W.
13) कि A.
14) पीडया O.
15) यस्मिं K. P. यं मि Cb. यंपि O.
16) मु Ca.
17) र्धिं K. P. अग्रबोधीय भवन्ति प्रस्थिता O.
18) मि A. B. Cb. K. W. मु Ca.
19) कं K. क P. O. कु the others.

तं चास्म लोकाचरियः[1] स्वयंभूरूपेक्षते कालमवेक्षमाणः।
न भाषते भूतपदार्थसंधिं अधिमुक्तिमस्माकं[2] गवेषमाणः॥ ४७॥
उपायकौशल्य यथैव तस्य महाधनस्य पुरुषस्य काले।
क्षीनाधिमुक्तिं[3] सततं दमेति[4] दमियान चास्मै[5] प्रददाति वित्तम्॥ ४८॥
सुदुष्करं कुर्वति लोकनाथो उपायकौशल्य प्रकाशयन्तः[6]।
क्षीनाधिमुक्तान्दमयन्तु पुत्रान्दमेव च ज्ञानमिदं ददाति[8]॥ ४९॥
आश्चर्यप्राप्ता सहसा स्म अद्य यथा दरिद्रो लभियान वित्तम्।
फलं च प्राप्तं इह[9] बुद्धशासने प्रथमं विशिष्टं च अनास्रवं च॥ ५०॥
यच्छीलमस्माभि च दीर्घरात्रं संरक्षितं लोकविदुष्य शासने।
अस्माभि लब्धं फलमद्य तस्य शीलस्य पूर्वं चरितस्य नाथ॥ ५१॥
यद्ब्रह्मचर्यं परमं विशुद्धं निषेवितं शासनि नायकस्य।
तस्यो[10] विशिष्टं फलमद्य लब्धं शान्तं उदारं च अनास्रवं च॥ ५२॥
अद्यो[11] वयं श्रावकभूत नाथ संश्रावयिष्यामथ[12] चाग्रबोधिम्।

1) कः Cb. यो महर्षि O.
2) क Cb. K. P. O. कु the rest.
3) मुक्तं O.; the others मुक्तिं.
4) ति A. Ca. W. त Cb. थ K. P. मि O.
5) च तस्य द Cb. O. चौ तस्य द K. तद्धनम् for वित्तम् O.
6) प्रयोजयन्तः O.
7) मि A. B. Ca. मियान ज्ञा O.
8) प्रदेति O.
9) इमिह K.
10) तस्यो Ca. तस्य Cb. A. K. W. P. O.
11) द्य Cb. P. O.
12) म इमाद्य O. Cp. लभामद्य Mahāvastu III, 9, 17; श्रावामद्य 19; ज्ञोवामद्य 11, 15; भवेमद्य 17.

बोधोयं[1] शब्दं च प्रकाशयामस्तेनो[2][3] वयं श्रावक भोष्मकल्पाः॥ ५३॥
अर्हत्त[4]भूता वयमद्य नाथ अर्हामहे पूज सदेवकात[5]ः।
लोकात्समाग[6]तु सब्रह्मकातः सर्वेष सत्त्वान च अन्तिकात[6]ः॥ ५४॥
को नाम शक्तः प्रतिकर्तु तुभ्यमुभुक्तरूपो बुद्धकल्पकोच्यः।
सुदुष्कराणीदृशका करोषि सुदुष्करान्यानिह[7][8] मर्त्यलोके॥ ५५॥
कस्तेहि पादेहि शिरेण[9] चापि प्रतिप्रियं दुष्करकं हि कर्तुम्।
शिरेण अंसेन पयोधरेण परिपूर्णाकल्पान्यथ गङ्गवालिकाः॥ ५६॥
खाद्यं ददेद्भोजनवस्त्रपानं[10] शयनासनं च[11][12] विमलोत्तरच्छदम्।
विहार कारापयि चन्दनामयान्संस्तीर्य चो[13] दूष्ययुगेहि दद्यात्॥ ५७॥
ग्लानभैषज्य बुद्धप्रकारं[14] पूजार्थ दद्यात्सुगतस्य नित्यम्।
ददेय[15] कल्पान्यथ गङ्गवालिका नैवं कदाचित्प्रतिकर्तु शक्यम्॥ ५८॥

1) बोधो च Cb. बोधाय A. B. Ca. बोधिय K. P.
2) मो A.
3) न Cb. O.
4) अर्हन्त्य A. अर्हत्य Ca. W. अर्हत्त Cb. K. O.
5) लोकातो K. कातु O. preferable; कातो in other MSS.
6) मात्स A. मारानुस Ca. मारात्स Cb. K. लोकासमागतस W. मारात्च, सब्रह्मकाच्च and सान्तिकातु O.
7) य दुष्करमोदृशकं O.; सुदुष्करानीदृशकान् the others.
8) रं O. रान् the rest.
9) ण Cb. K. O. P. हि the others.
10) नं A. Ca. K. W. णां Cb.
11) शय्या O. शया P.
12) चो A. B. Ca. W.
13) वा Cb. च O. चो the rest. The lengthening not necessary.
14) रं A. Ca. K. W. O. P. रां Cb. रान् B.
15) य K. O. P. ददेत the others.

महात्मधर्मो अतुलानुभावो महर्द्धिकः शान्तिबले प्रतिष्ठितः।
बुद्धो महाराज अनास्रवो जिनो[1] महन्ति बालो[2] न ईदृशानि[3]॥ ५९॥
अनुवर्तमानस्तथ नित्यकालं निमित्तचारीण ब्रवीति धर्मम्।
धर्मेश्वरो ईश्वरु[4] सर्वलोके महेश्वरो लोकविनायकेन्द्रः॥ ६०॥
प्रतिपत्ति दर्शेति बहुप्रकारं[5] सत्त्वान स्थानानि प्रजानमानः।
नानाधिमुक्तिं च विदित्व तेषां हेतूमहन्तेहि ब्रवीति धर्मम्॥ ६१॥
तथागतश्चर्यं[6]c प्रजानमानः सर्वेष सत्त्वान थ पुद्गलानाम्।
बहुप्रकारं हि ब्रवीति धर्मं निदर्शयन्तो इममग्रबोधिम्॥ ६२॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याय अधिमुक्तिपरिवर्तो नाम चतुर्थः॥

---

1) ना A. Ca. Cb. O. नाः B. न K. नो W. The plural throughout in O. So too in the following.

2) Kumārajīva seems to read महति बालान etc. as he translates 能爲下劣忍于斯事 'he bears this matter for the sake of the low people'.

3) बलानि देशेत्ति तथैन्द्रियाणि O.

4) रु A. Ca. Cb. W. रू K.

5) रं A. B. W. रा Cb. रां K. P.

6) चरिये Cb. चरिय K. P. ताध्याशय ज्ञानमानाः O.

7) पुंग A. K.

V.

अथ खलु भगवानायुष्मन्तं महाकाश्यपं तांश्चान्यान्स्थविरान्महाश्रावकानामन्त्रया-
मास[1]। साधु साधु महाकाश्यप साधु खलु पुनर्युष्माकं काश्यप यद्भूयं तथागतस्य भूतान्गु-
णावर्णान्भाषधे[2]। एते च काश्यप तथागतस्य भूता गुणा अतश्चान्ये ऽप्रमेया असंख्येया
येषां न मुकरः पर्यन्तो ऽधिगन्तुमपरिमितानपि कल्पान्भाषमाणैः[3]। धर्मस्वामी काश्यप
तथागतः सर्वधर्माणां राज्ञा प्रभूर्वशी। यं च काश्यप तथागतो[4] धर्मं यत्रोपनिक्षिपति स
तथैव भवति। सर्वधर्मांश्च काश्यप तथागतो युक्त्योपदिशत्युपनिक्षिपति[5]। तथागतज्ञाने-
नोपनिक्षिपति[6] यथा ते धर्माः सर्वज्ञभूमिमेव गच्छन्ति। सर्वधर्मार्थगतिं च तथागतो व्य-
वलोकयति। सर्वधर्मार्थवशिताप्राप्तः[7] सर्वधर्माध्याशयप्राप्तः सर्वधर्मविनिश्चयकौशल्यज्ञा-
नपरमपारमिताप्राप्तः सर्वज्ञज्ञानसंदर्शकः सर्वज्ञज्ञानावतारकः[8] सर्वज्ञज्ञानोपनिक्षेपकः का-
श्यप तथागतो ऽर्हन्सम्यक्संबुद्धः[8]॥

तद्यथापि नाम काश्यपास्यां त्रिसाहस्रमहासाहस्रायां[10] लोकधातौ यावन्तस्तृणगु-
ल्मौषधिवनस्पतयो नानावर्णा नानाप्रकारा ओषधिग्रामा नानानामधेयाः पृथिव्यां जाताः

---

1) यते स्म B. यति स्म O.

2) यतधे A. यत Cb. K. यद्य O.

3) षणैः A. W. षमाणेभिस्तत्कस्य हेतोः। O.

4) All but O. गतेन. यत्रोप wanting in O. Probably to r. यद्या for यत्र.

5) उपदिशति left out in Cb.

6) A. Cb. add तद्या (तथो चो Cb.) पनिक्षिपति.

7) Left out in Cb.

8) Left out in K. O.

9) अस्मिं स्रे B. पेमस्मिंस्तु O.

10) स्रे B. Cb. स्यां K. सहस्रमहासहस्रे O. So too in the sequel.

पर्वतगिरिकन्दरेषु वा मेघश्च महावारिपरिपूर्णा[1] उन्नमेदुन्नमित्वा[2] सर्वावतीं[3] त्रिसाहस्रमहासाहस्रां[4] लोकधातुं संछादयेत्संछाद्य च[5] सर्वत्र समकालं वारि प्रमुञ्चेत्। तत्र काश्यप ये[6] तृणगुल्मौषधिवनस्पतयो ऽस्यां[7] त्रिसाहस्रमहासाहस्रलोकधातौ[8] तत्र ये तरुणाः कोमलनाडशाखापत्रपलाशास्तृणगुल्मौषधिवनस्पतयो द्रुमा महाद्रुमाः सर्वे ते ततो महामेघप्रमुक्ताद्वारिणो[9] यथाबलं[10] यथाविषयमब्धातुं प्रत्यापिबन्ति ते चैकरसेण वारिणा प्रभूतेनैकमेघप्रमुक्तेन[11] यथाबोधमन्वयं विवृद्धिं विरूढिं विपुलतामापद्यन्ते तथा च पुष्पफलानि प्रसवन्ति ते च पृथक्पृथग्नानानामधेयानि प्रतिलभन्ते। एकधरणीप्रतिष्ठिताश्च ते सर्व ओषधिग्रामा बोधग्रामा एकरसतोयाभिष्यन्दिताः। एवमेव काश्यप तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उत्पद्यते। यथा महामेघ उन्नमते[12] तथा[13] तथागतो ऽप्युत्पद्य सर्वावन्तं सदेवमानुषासुरं लोकं स्वरेणाभिविज्ञापयति। तद्यथापि नाम काश्यप महामेघः सर्वावतीं[14][15] त्रिसाहस्रमहासाहस्रां[16] लोकधातुमवच्छादयति। एवमेव काश्यप तथागतो

1) प्रति MSS. except K. O.
2) न्मद्य च B.
3) वंतं A. W. O. वंतमिमं B. वतीयं Cb. K.
4) स्रां A. स्रं O. स्रे B. स्रो Cb. स्रों K. स्रापां W.
5) In B. only,
6) यास्तास्तृ A. B. W. ये तृ Cb. O. ये ते तृ K.
7) स्मिं A. K. स्मिंस्त्रि B. स्यां Cb.
8) स्रां Cb. स्यां K.
9) पु A. B.
10) W. adds यथाविभज्ञवानं. A. B. Ca. K. यथाभज्ञविमानं. वि left out in B. The whole compound is left out in Cb. O. Perhaps meant यथाविभज्ञनं.
11) पु in all MSS. except K. O.
12) ति Cb. K.
13) Left out in B. K.
14) B. K. O. add स.
15) वतीं A. Cb. K. W. वंतं B. O.
16) स्रां A. W. स्रं O. B. स्रों K. स्रे Cb.

ऽर्हन्सम्यक्संबुद्धः सदेवमानुषासुरस्य लोकस्य पुरत एवं शब्दमुदीरयति घोषमनुश्रावयति। तथागतो ऽस्मि भवन्तो देवमनुष्या अर्हन्सम्यक्संबुद्धस्तीर्णस्तारयामि मुक्तो मोचयाम्याश्वस्त आश्वासयामि परिनिर्वृतः परिनिर्वापयामि। अहमिमं च लोकं परं च लोकं सम्यक्प्रज्ञया यथाभूतं प्रजानामि सर्वज्ञः सर्वदर्शी। उपसंक्रामन्तु मां भवन्तो देवमनुष्या[2] धर्मश्रवणाय। अहं मार्गस्याख्याता मार्गदेशिको मार्गविन्मार्गश्रावको मार्गकोविदः। तत्र काश्यप बह्वनि प्राणिकोटीनयुतशतसहस्राणि[3] तथागतस्य धर्मश्रवणायोपसंक्रामन्ति। अथ तथागतो ऽपि तेषां सत्त्वानामिन्द्रियवीर्यपरापरत्वं[4] विमात्रतां ज्ञात्वा[5] तांस्तान्धर्मपर्यायानुपसंहरति। तां तां धर्मकथां कथयति बह्वीं विचित्रां हर्षणीयां परितोषणीयां प्रामोद्यकारणीं[5] हितसुखसंवर्तनकरीं[6] यया कथया ते सत्त्वा दृष्ट एव धर्मे सुखिता भवन्ति कालं च कृत्वा सुगतीषूपपद्यन्ते यत्र प्रभूतांश्च कामान्परिभुञ्जते धर्मं च शृण्वन्ति। श्रुत्वा च तं धर्मं विगतनीवरणा भवत्यनुपूर्वेण च सर्वज्ञधर्मेष्वभिमुख्यते यथाबलं यथाविषयं यथास्थामन्[7][8]॥

तद्यथापि नाम काश्यप[9] महामेघः सर्वावतीं[10] त्रिसाहस्रमहासाहस्रां[11] लोकधातुं संछाद्य समं[12] वारि प्रमुञ्चति सर्वांश्च तृणगुल्मौषधिवनस्पतीन्वारिणा संतर्पयति यथाबलं

1) मुक्तो मोचयामि left out in K.
2) त्तः सदेवमानुषासुर Cb. त्तो दवमनुष्यासुरा O.
3) नि A. Ca. W.
4) पराज्ञ K. Omitted in O.
5) विदिं A. O.
6) करणीं K. O. करणीयां the rest. Further संवर्तनीं O.
7) MSS. except Cb. O. add यथाभज्ञमानं.
8) मञ्च K.
9) B. O. add स.
10) वंतं A. Ca. K. O. वंत W. वतीयं Cb.
11) स्रां A. W. स्रं B. K. O. स्रों Cb.
12) Sic O., the others सम, but above समकालं, where in O. सम.

यथाविषयं यथास्थामं च ते तृणगुल्मौषधिवनस्पतयो वार्यापिबन्ति स्वकस्वकां च जातिप्रमाणतां गच्छन्ति। एवमेव काश्यप तथागतो ऽर्हन्सम्यक्संबुद्धो यं धर्मं भाषते सर्वः सं[1] धर्म एकरसो यदुत[2] विमुक्तिरसो विरागरसो निरोधरसः सर्वज्ञज्ञानपर्यवसानः। तत्र काश्यप ये ते सत्त्वास्तथागतस्य धर्मं भाषमाणस्य शृण्वन्ति धारयन्त्यभिसंपुण्यन्ते[3] न[4] आत्मनात्मानं[5] जानन्ति[6] वा वेदयन्ति[6] वा बुध्यन्ति[6] वा। तत्कस्य हेतोः। तथागत एव काश्यप तान्सत्त्वांस्तथा जानाति[8] ये च ते यथा च ते यादृशाश्च ते। यं च ते[9] चिन्तयन्ति यथा च ते चिन्तयन्ति[10] येन च ते चिन्तयन्ति। यं च ते भावयन्ति यथा च ते भावयन्ति येन च ते भावयन्ति। यं च ते प्राप्नुवन्ति यथा च ते प्राप्नुवन्ति येन च ते प्राप्नुवन्ति। तथागत एव काश्यप तत्र प्रत्यक्षः[11] प्रत्यक्षदर्शी यथा च दर्शी तेषां सत्त्वानां तासु तासु भूमिषु स्थितानां तृणगुल्मौषधिवनस्पतीनां क्षीणोत्कृष्टमध्यमानाम्[12]। सो ऽहं काश्यपैकारसं[13] धर्मं विदित्वा यदुत[14] विमुक्तिरसं निर्वृतिरसं निर्वाणपर्यवसानं नित्यपरिनिर्वृतमेकभूमिकमाकाशगतिकमधिमुक्तिं सत्त्वानामनुरक्षमाणो[1] न सकृदेव[2] सर्वज्ञज्ञानं संप्रकाशयामि। आश्चर्यप्राप्ता अद्भुतप्राप्ता यूयं काश्यप यद्यूयं संधाभाषितं तथागतस्य न शक्नुथावतरितुम्[3]। तत्कस्य हेतोः। दुर्विज्ञेयं काश्यप तथागतानामर्हतां सम्यक्संबुद्धानां संधाभाषितमिति[4]॥

अथ खलु भगवांस्तस्यां वेलायामिममेवार्थं भूयस्या मात्रया संदर्शयमान इमा गाथा अभाषत[5]॥

धर्मराजा[6] अहं लोके[7] उत्पन्नो भवमर्दनः।
धर्मं भाषामि सत्त्वानामधिमुक्तिं विजानियं[8]॥ १॥
धीरबुद्धो महावीरा चिरं[9] रक्षन्ति भाषितम्।
रक्षयं चापि धारेन्ति[10] न च भाषन्ति प्राणिनाम्॥ २॥
दुर्बोध्यं चापि तज्ज्ञानं सहसा श्रुत्व बालिशाः।
काङ्क्षां कुर्युः सुदुर्मेधास्ततो भ्रष्टा भवेयु ते॥ ३॥
यथाविषयं[11] भाषामि यस्य यादृशकं बलम्।
अन्यमन्येहि अर्थेहि[12] दृष्टिं कुर्वामि ऊजुकाम्[13]॥ ४॥

---

1) सर्वधर्मं A. सर्वं तं धर्मं. The others सर्वः सद्धर्म.
2) यदिदं Cb. K.
3) ष A. Cb. K. O. ष्य Ca.
3) न्ति Cb. K. O.
4) ते in all MSS.
5) आत्मानात्मानं A. आत्मानामात्मानं B. आत्मनात्मानं Cb. आत्मना आत्मानं K. आत्मनातनं W.
6) Left out in K.
7) विदन्ति A. W.
8) जानीते A. W.
9) यं च ते left out in K. यं Prākṛticism for यत्.
10) यथा °न्ति left out in Cb.
11) Left out in K.
12) A. W. add वा.
13) सं K. O.
14) यद्दिदं Cb. K. W. O. यदियं A. यद्धत B.

1) रज्यन्न A. रक्तन्न B. रक्तमाणो न Cb. K. O. रक्ष्यमाणोन्न W.
2) वं K.
3) Left out in Cb. O.
4) तर्तुं A. O.
5) म A. मा B. द् Cb. K. O. व W.
6) ज्ञ A. B. ज्ञा Cb. K. O. ज्ञो W. Ca.
7) लोके O.; preferable on account of the pause.
8) या A. O. यः B. य Cb. K. नोय W.
9) राशिरं O.; रा गिरं the rest; then भाषितम् points to a Prāk. *bhāsitaṃ*.
10) धारयंति Cb.
11) यं A. W. यु B: K. य Cb.
12) न्येषु चार्थेषु B. Cb. K.
13) For ऋजुक.

यथापि काश्यपा[1] मेघो लोकधातूप[2] उन्नतः ।
सर्वमोनकृ[3]तो चापि क्षादयन्नो वसुंधराम् ॥ ५ ॥
सो च वारिस्य[4] संपूर्णो विद्युन्मालो महाम्बुदः ।
निर्नादयन्न[5] शब्देन हर्षयेत्सर्वदेहिनः ॥ ६ ॥
सूर्यरश्मो निवारित्वा शीतलं कृत्व[7] मण्डलम् ।
कृस्तप्राप्तो ज्वतिष्ठन्तो वारि मुञ्चेत्समन्ततः ॥ ७ ॥
स चैव सम मुञ्चेत ग्रापस्कन्धमनल्पकम् ।
प्राखरन्त[8]ः समन्तेन तर्पयेन्मेदिनोमिमाम् ॥ ८ ॥
इह या काचि मेदिन्यां ज्ञाता ग्रोषधयो भवेत् ।
तृणगुल्मवनस्पत्य[10]ो द्रुमा वाथ महाद्रुमाः ॥ ९ ॥
सस्यानि विविधान्येव यद्यपि कृरितं भवेत् ।
पर्वते कन्दरे चैव निकुञ्जेषु च यद्भवेत् ॥ १० ॥
सर्वान्संतर्पयेन्मेघस्तृणगुल्मवनस्पतीन् ।
तृषितां धर[11]णीं [12]तर्पत्परिषिञ्चति चौषधीः[13] ॥ ११ ॥

1) पो A. प K.
2) तुपडु A. Cb. W. तूप उ O.
3) कृन A. K. W. नकृते B. Cb.
4) स्प A. B. W.
5) न्न A. B. Ca. Cb. W. न K. निनादयन्न O.
6) यन्स A. B. Ca. Cb. यं स W. यत्स K. यीत्त O.
7) त्व A. B. Ca. Cb. K. O. त W.
8) प्रात्खरंतः A. प्रखरन्तः B. K. प्रत्यारन्नः Cb. प्राखिरन्तः W. प्रागरन्तः O. Skr. प्रक्षरन् Pāli *paggharanto.*
9) कश्चि A. W. कश्चित् Cb.
10) तपो Cb.
11) णो in all MSS.
12) तर्पेत A. तर्पेति Cb.
13) धोम् O., धीन् the rest.

तच्च[1] एकरसं वारि मेघमुक्तमिह स्थितम् ।
यथाबलं यथाविषयं तृणगुल्मापिबन्ति तत्[2] ॥ १२ ॥
द्रुमाश्च ये केचि महाद्रुमाश्च खुद्रा[3]क मध्याश्च यथावशाश्च ।
यथाबलं सर्व[4] पिबन्ति वारि पिबन्ति वर्धन्ति[5] यथेच्छकामाः[6] ॥ १३ ॥
काण्डेन नाडेन त्वचा यथैव शाखाप्रशाखाय तथैव पत्रैः ।
वर्धन्ति पुष्पेहि फलेहि चैव मेघाभिवृष्टेन महौषधोघः ॥ १४ ॥
यथाबलं ता[6] विषयश्च यादृशो यासां[7] च यद्यादृशकं च बोज्ञम्[8] ।
स्वकस्वकं तो[9]ः प्रसवं ददन्ति वारिं च तं एकरसं प्रमुक्तम् ॥ १५ ॥
एमेव बुद्धो ऽपि ह[11] लोकि काश्यप उत्पद्यते वारिधरो व लोके ।
उत्पद्य च[12] भाषति लोकनाथो भूतां चरिं दर्शयते च प्राणिनाम् ॥ १६ ॥
एवं च संग्रावयते महर्षिः पुरस्कृतो लोकि सदेवकस्मिन्[13] ।
तथागतो ऽहं द्विपदोत्तमो जिनो उत्पन्नु[14] लोकस्मि[15] यथैव मेघः ॥ १७ ॥

1) तच्च B. Cb. K.
2) तं Cb. K. O.
3) खुड्डोक O.
4) सर्वे A. सर्वि K. सर्व the others.
5) रिं K. ग्रापं O.
6) वर्द्धन्ते Cb. वर्धन्ति O. वर्धेन्ति the rest.
6) ते A. K. W. ता B. तेन Cb.
7) येषां A. Cb. K. W. यासां B.
8) Sic O; the others यत्सादृशकञ्च बोज्ञाः.
9) तेः A. W. ताः B. ते Cb. K. O.
10) एवमेव A. W.
11) All but O. हि.
12) ते A. च B. Cb. तो K. left out in W.
13) केस्मिं in all MSS. except O., which has सदेवकस्य.
14) न्न O.
15) केस्मि and केस्मिं, except in O.

संतर्पयिष्याम्यद्य सर्वसत्त्वान्संशुष्कगात्रांस्त्रिभवे विलग्नान्।
दुःखेन मुह्यत्त सुखे स्थपेयं[1] कामांश्च दास्याम्यद्य निर्वृतिं च ॥ १८ ॥
शृणोथ मे देवमनुष्यसंघा उपसंक्रमध्वं मम दर्शनाय।
तथागतो ऽर्हं भगवाननाभिभूः संतारणार्थं इह[2] लोकि जातः ॥ १९ ॥
भाषामि च प्राणिसकृन्नकोटिनां धर्मं विशुद्धं अभिदर्शनीयम्।
एका च तस्य[3] समता तथत्वं यदिदं विमुक्तिश्चय निर्वृती च ॥ २० ॥
स्वरेण चैकेन वदामि धर्मं बोधिं निदानं करियान नित्यम्।
समं[5] हि एतद्विषमत्वं[6] नास्ति न कश्चि[7] विद्वेषु न रागु विद्यते ॥ २१ ॥
अनुनीयता मह्य न काचिदस्ति प्रेमा च दोषश्च न मे कहिंचित्।
समं च धर्मं प्रवदामि देहिनां यथैकसत्त्वस्य तथा परस्य ॥ २२ ॥
अनन्यकर्मा[8] प्रवदामि धर्मं गच्छन्तु तिष्ठन्तु निषीदमानः।
निषण्णशय्यासनमाहरित्वा क्लिासिता मह्य न ज्ञातु[10] विद्यते ॥ २३ ॥
संतर्पयामो इमु सर्वलोकं मेघो व वारिं सम मुञ्चमानः।
आर्येषु नीचेषु च तुल्यबुद्धिर्दुःशीलभूतेष्वथ शीलवत्सु ॥ २४ ॥

1) स्थपिष्ये K. O.
2) धर्मिह K.
3) तस्यो B.
4) रसता तथत्वं O. समता तथत्वं A. W. तथता समत्वं B. Cb. K.
5) समा Cb.
6) एतेद्विषमस्ति A. एनं विषमेषु B. एतं विषमंति Cb. एतं विषमत्व K. W.
7) किंचि B. K. कदा Cb. कश्चिद्वि W. काचिद् O., r. कोचिद्.
8) र्मः Cb.
9) शयन Cb. K.
10) कदाचि A. W. काचि B. K. ज्ञातु Cb. मे न कदाचि O.

विनष्टचारित्र तथैव ये नराश्चारित्र–आचारसमन्विताश्च[1]।
दृष्टिष्ठिता ये च विनष्टदृष्टी सम्यग्दृशो[2] ये च विशुद्धदृष्टयः[3] ॥ २५ ॥
हीनेषु चो श्रेष्ठमतोषु[4] चापि ऋद्धिन्द्रियेषु प्रवदामि धर्मम्।
क्लिामितां सर्व विवर्जयित्वा सम्यक्प्रमुञ्चाम्यद्य[5] धर्मवर्षम् ॥ २६ ॥
यथाबलं च शृणियान[6] मह्यं विविधासु भूमीषु प्रतिष्ठहन्ति[7]।
देवेषु मर्त्येषु मनोरमेषु शक्रेषु ब्रह्मेष्वथ चक्रवर्तिषु ॥ २७ ॥
तृणानुतृणा इम[8] ओषधीयो[9] तृणीक[10] एता इह याव लोके[11]।
अन्या च मध्या महती च ओषधी शृणोथ ताः सर्व प्रकाशयिष्ये ॥ २८ ॥
अनास्रवं धर्मं प्रजानमाना निर्वाणप्राप्ता विकुरुन्ति ये नराः।
षडभिज्ञत्रैविद्य भवन्ति ये च सा तृणिका[10] ओषधि संप्रवुत्ता[12] ॥ २९ ॥
गिरिकन्दरेषु विकुरुन्ति ये च प्रत्येकबोधिं स्पृहयन्ति ये नराः।
ये ईदृशा मध्यविशुद्धबुद्धयः सा मध्यमा ओषधि संप्रवुत्ता[13] ॥ ३० ॥
ये प्रार्थयन्ते पुरुषर्षभत्वं बुद्धो भविष्ये नरदेवनाथः।
वीर्यं च ध्यानं च निषेवमाणाः सा ओषधी अग्र इयं प्रवुच्चति[14] ॥ ३१ ॥

1) च्च K.
2) शा A. K. W. O.
3) This quarter of the verse is left out in Cb.
4) उत्कृष्ट for चो श्रेष्ठ O. चो for च here not necessary.
5) प्रवर्षा A. प्रवर्ष्या W.
6) णु Cb.
7) Sic A. W. O. ष्ठि the rest.
8) इमि A. इम B. K. O. इत्वम् Cb. इति W.
9) या A. यु O.
10) खुड्डीक O.
11) यावल्लोके Cb. ये च लोके O.
12) प्रमुच्यते (r. प्रवुच्यते) O. संप्रवृत्ता the rest.
13) गा प्रवुच्यते O. संप्रवृत्ता the rest.
14) च्य A. W. O. च्च B. Ca. Cb. च्यते O.

ये चापि युक्ताः सुगतस्य पुत्रा मैत्रीं निषेवन्ति इह शान्तचर्याम्।
निष्काङ्क्षप्राप्ता पुरुषर्षभत्वे अयं द्रुमो वुच्यति एवद्रूपः ॥ ३२ ॥
अविवर्तिचक्रं हि प्रवर्तयन्तो ऋद्धीबलस्मिन्स्थित ये च धीराः।
प्रमोचयन्तो बहुप्राणिकोटी महाद्रुमो सो च प्रवुच्चते हि ॥ ३३ ॥
समश्च सो धर्म जिनेन भाषितो मेघेन वा वारि समं प्रमुक्तम्।
चित्रा अभिज्ञा इम एवद्रूपा यथौषधीयो धरणीतलस्थाः ॥ ३४ ॥
अनेन दृष्टान्तनिदर्शनेन उपायु ज्ञानाहि तथागतस्य।
यथा च सो भाषति एकधर्मं नानानिरुक्तो जलबिन्दवो वा ॥ ३५ ॥
ममापि चो वर्षतु धर्मवर्षं लोको ह्ययं तर्पितु भोति सर्वः।
यथाबलं चानुविचिन्तयन्ति सुभाषितं एकरसं पि धर्मम् ॥ ३६ ॥
तृणगुल्मका वा यथ वर्षमाणे मध्या पि वा ओषधियो यथैव।
द्रुमा पि वा ते च महाद्रुमा वा यथ शोभयन्ते दशदिनु सर्वे ॥ ३७ ॥
इयं सदा लोकहिताय धर्मता तर्पेति धर्मेणिमु सर्वलोकम्।
संतर्पितश्चाप्यथ सर्वलोकः प्रमुच्चते ओषधि पुष्पकाणि ॥ ३८ ॥

1) बुद्धा A. वुच्य W. उच्य O. वुच्चति B. Ca. Cb.
2) अवैवर्त्य Cb. अविवर्तिकं चक्रं O.
3) च A. B K. W. हि Cb. wanting in O.
4) Sic O.; यन्ती the others.
5) ह्यष A. केष Cb. ह्येष W. सोति B. सो च K. एष इह O.
6) वुच्यते O. प्रवुच्चते हि the others.
7) या A. B. Cb. यो K. W. O.
8) य A. Cb. K. W. O. यु B.
9) ति Cb. हि B. O. सि A. Ca. K. W.
10) नानाधिमुक्तो B. K.
11) Sic O. चो the others.
12) ये A. W. ये वापि O.
13) शोभन्ति यथ लोकदशदिशासु O.

मध्यापि च ओषधियो विवर्धयी अर्हन्त ये ते स्थित आस्रवक्षये।
प्रत्येकबुद्धा वनषण्डचारिणो निष्पादयी धर्ममिमं सुभाषितम् ॥ ३९ ॥
बहुबोधिसत्त्वाः स्मृतिमन्त धीराः सर्वत्र त्रैधातुकि ये गतिंगताः।
पर्येषमाणा इममग्रबोधिं द्रुमा व वर्धन्ति ते नित्यकालम् ॥ ४० ॥
य ऋद्धिमन्तश्चतुध्यानध्यायिनो ये शून्यतां श्रुत्व जनेन्ति प्रीतिम्।
रश्मीसहस्राणि प्रमुञ्चमानास्ते चैव वुच्चन्ति महाद्रुमा इह ॥ ४१ ॥
एतादृशी काश्यप धर्मदेशना मेघेन वा वारि समं प्रमुक्तम्।
येह्नो विवर्धन्ति महौषधीयो मनुष्य पुष्पाणि अनन्तकानि ॥ ४२ ॥
स्वप्रत्ययं धर्म प्रकाशयामि कालेन दर्शेमि च बुद्धबोधिम्।
उपायकौशल्यु मयेतदग्रं सर्वेष चो लोकविनायकानाम् ॥ ४३ ॥
परमार्थ एषा मम भूतभाषिता ये श्रावकाः सर्वि त एति निर्वृतिम्।
चरन्ति एते वरबोधिचारिकां बुद्धा भविष्यन्तिमि सर्वश्रावकाः ॥ ४४ ॥

पुनरपरं काश्यप तथागतः सत्त्वविनये समो न चासमः। तद्यथा काश्यप चन्द्रसूर्यप्रभा सर्वलोकमवभासयति कुशलकारिणमकुशलकारिणं चोर्ध्वावस्थितमधरावस्थितं च सुगन्धि दुर्गन्धि च सर्वत्र समं प्रभा निपतति न विषमम्। एवमेव काश्यप तथागतानामर्हतां सम्यक्संबुद्धानां सर्वज्ञज्ञानचित्तप्रभा सर्वेषु पञ्चगत्युपपन्नेषु सत्त्वेषु यथाधिमु-

1) Sic O. मध्यानि चो the rest.
2) वर्द्धन्ति ते Cb. O. ते वर्द्धन्ति हि K. ते वर्द्धिषु A. B. Ca.
3) यथा B. K. O.
4) मम added by us conjecturally. O. has धर्मेष मय धर्म देशितं.
5) Reading conjectural. MSS. न एति निर्वृताः; but O. has कश्चि for एति.
6) The following latter part of this chapter is altogether left out in Kumārajīva's version, while it is preserved or added in the other two Chinese versions.
7) सर्वविनय A. सर्वविषयेषु B. K. W. सत्त्वविनय Cb. सत्त्वविनयने O.
8) भा A. B. O. प्रभाः in other MSS., which also in the sequel have the plural ending in the verbs.

किं[1] महायानिकाप्रत्येकबुद्धयानिकश्रावकयानिकेषु[2] सद्धर्मदेशना समं प्रवर्तते । न च तथागतस्य ज्ञानप्रभायां[3] ऊनता वातिरिक्तता वा यथा पुण्यज्ञानसमुदागमाय संभवति । न सन्ति काश्यप त्रीणि यानानि केवलमन्योन्यचरिताः सत्त्वाः । तेन त्रीणि यानानि प्रज्ञप्यन्ते ॥

[6]एवमुक्त आयुष्मान्महाकाश्यपो भगवन्तमेतदवोचत् । यदि भगवन्न सन्ति त्रीणि यानानि किंकारणं प्रत्युत्पन्नेऽध्वनि श्रावकप्रत्येकबुद्धबोधिसत्त्वानां प्रज्ञप्तिः प्रज्ञप्यते ॥

एवमुक्तो भगवानायुष्मन्तं महाकाश्यपमेतदवोचत् । तद्यथा काश्यप कुम्भकार[7]ः समासु मृत्तिकासु भाजनानि करोति । तत्र कानिचिद्गुडभाजनानि भवन्ति कानिचिद्घृतभाजनानि[8] कानिचिद्दधिक्षीर[9]भाजनानि कानिचिद्धीनान्यशुचिभाजनानि भवन्ति । न च[10] मृत्तिकाया नानात्वमथ च द्रव्यप्रक्षेपमात्रेण भाजनानां नानात्वं प्रज्ञायते । एवमेव काश्यपैकमेवेदं यानं यदुत बुद्धयानं[11] न द्वितीयं न तृतीयं वा यानं संविद्यते ॥

एवमुक्त आयुष्मान्महाकाश्यपो भगवन्तमेतदवोचत् । यद्यपि भगवन्सत्त्वा[12] नानाधिमुक्तयो ये त्रैधातुकान्निःसृताः किं तेषामेकं निर्वाणमिति द्वे त्रीणि वा ॥ भगवानाह

1) क्या A. K. का B. O.
2) के B.
3) केषु B. K.
4) B. K. add च.
5) गतप्रज्ञयान (read प्रज्ञाया) O.
6) The whole paragraph is left out in A.
7) B. K. add क.
8) Left out in K.
9) क्षीर left out in Cb. W
10) च left out in B. K.
11) महा B. Cb. K.
12) नां added in Cb.

सर्वधर्मसमतावबोधाद्धि[1] काश्यप निर्वाणम् । तच्चैकं न द्वे न त्रीणि । तेन हि काश्यपोपमां ते करिष्याम्युपमयेहैकत्या[2] विज्ञपुरुषा भाषितस्यार्थमाजानन्ति ॥

तद्यथा काश्यप जात्यन्धः पुरुषः स[3] एवं ब्रूयान्न सन्ति सुवर्णदुर्वर्णानि रूपाणि न सन्ति सुवर्णदुर्वर्णानां रूपाणां द्रष्टारो न स्तः[4] सूर्याचन्द्रमसौ न सन्ति नक्षत्राणि न सन्ति ग्रहा न सन्ति ग्रहाणां द्रष्टारः । अथान्ये पुरुषास्तस्य जात्यन्धस्य पुरुषस्य पुरत एवं वदेयुः । सन्ति सुवर्णदुर्वर्णानि रूपाणि सन्ति सुवर्णदुर्वर्णानां रूपाणां द्रष्टारः स्तः[5] सूर्याचन्द्रमसौ[6] सन्ति नक्षत्राणि सन्ति ग्रहाः सन्ति ग्रहाणां द्रष्टारः । स च जात्यन्धः पुरुषस्तेषां पुरुषाणां न श्रद्दध्यान्नोक्तं गृह्णीयात् । अथ कश्चिद्वैद्यः सर्वव्याधिज्ञः स्यात् । स तं जात्यन्धं पुरुषं पश्येत्तस्यैवं स्यात् । अस्य पुरुषस्य पूर्व[7]पापेन कर्मणा व्याधिरुत्पन्नः । ये च केचन व्याधय उत्पद्यन्ते ते सर्वे चतुर्विधा वातिकाः पैत्तिकाः श्लैष्मिकाः सान्निपातिकाश्च । अथ स वैद्यस्तस्य व्याधेर्व्युपशमनार्थं पुनः पुनरुपायं चिन्तयेत्तस्यैवं स्यात् । यानि खल्विमानि[8] द्रव्याणि प्रचरन्ति न तैः शक्यो व्यं व्याधिश्चिकित्सितुं सन्ति तु क्ष्मिवति पर्वतराजे चतस्र ओषधयः[9] । कतमाश्चतस्रः । तद्यथा । प्रथमा सर्ववर्णरसस्थानानुगता[10] नाम द्वितीया सर्वव्याधि[11]प्रमोचनी नाम तृतीया सर्वविषविनाशनी[12] नाम चतुर्थी यथास्थानस्थि-

1) तावबोधधी A. तावबोधाद्धि B. Cb. तावबोधा एतद्धि K. तावबोधाद्धि W.
2) Sic O. कस्य for कत्या in other MSS. Left out in B. K.
3) Left out in O.
4) संविद्यते B. K. स्तः O. सन्ति the rest.
5) संविद्यन्ते A. B. K. W. एवं सन्ति Cb. स्त O.
6) Sic O. चन्द्रसूर्यौ the rest.
7) पूर्व left out in B. K.
8) खल्विदं B. Cb. K. O.
9) A. W. add संविद्यंते. Cb. adds विद्यंते. O. अस्ति.
10) स्थायनी B. Cb. K. Perhaps to r. स्थाम for स्थान.
11) वि B. K. O. विमोच A. Ca. W.
12) विनाश B. K. O. प्रसम Cb.
13) म B. K.

तमुखप्रदा नाम । इमाश्चतस्र ओषधयः । अथ स वैद्यस्तस्मिञ्जात्यन्धे कारुण्यमुत्पाद्य तादृशमुपायं चिन्तयेद्येनोपायेन किमवत्तं पर्वतराजं शक्नुयादुल्लङ्घयितुम् । गत्वा चोर्ध्वमप्यारोहेद्(1) दधो ऽप्यवतरेत्तिर्यगपि प्रविचिनुयात् । स एवं प्रविचिन्वंस्ताश्चतस्र ओषधीरारागयेद्(2) रागयेच्च कांचिद्वर्त्तिः लोदितां कृत्वा दद्यात्कांचित्पेषयित्वा दद्यात्कांचिदन्यद्रव्यसंयोजितां पाचयित्वा दद्यात्कांचिदम्लद्रव्यसंयोजितां कृत्वा दद्यात्कांचिच्छलाकया शरीरस्थानं(3) विद्ध्वा दद्यात्कांचिदग्निना परिदाह्य दद्यात्कांचिदन्योन्यद्रव्यसंयुक्तां यावत्पानभोजनादिष्वपि योजयित्वा दद्यात् । अथ स जात्यन्धपुरुषस्तेनोपायेन(4) योगेन(5) चक्षुः प्रतिलभेत । स प्रतिलब्धचक्षुर्बहिरध्यात्मं दूरं ग्रामक्षेत्रे च चन्द्रसूर्यप्रभां नक्षत्राणि ग्रहान्सर्वरूपाणि च पश्येत् । एवं च वदेत् । अहो बताहं मूढो यो ऽहं पूर्वमाचक्षमाणानां न श्रद्दधामि(7) नोक्तं गृह्णामि । सो ऽहमिदानीं सर्वं पश्यामि मुक्तो ऽस्म्यन्धभावात्प्रतिलब्धचक्षुश्चास्मि न च मे(8) कश्चिद्विशिष्टतरो ऽस्तीति । तेन च समयेन पञ्चाभिज्ञा ऋषयो भवेयुर्दिव्यचक्षुर्दिव्यश्रोत्रपरचित्तज्ञानपूर्वनिवासानुस्मृतिज्ञानर्द्धिविमोक्षक्रियाकुशलास्ते तं पुरुषमेवं वदेयुः । केवलं भोः पुरुष त्वया चक्षुः प्रतिलब्धं न तु भवान्किंचिज्जानाति । कुतो ऽभिमानस्ते समुत्पन्नः । न च ते ऽस्ति प्रज्ञा न चासि पण्डितः । तमेनमेवं वदेयुः । यदा त्वं भोः पुरुषानर्गकं(9) निषण्णो बहिरन्यानि(10) रूपाणि न पश्यसि न च जानासि नापि ते ये सत्त्वाः स्त्रि-

1) रुक्षेत् B. रोक्षेत् K. O. रुक्षेत् A.
2) आरागयित्वा A. Cb. W. आराग्य B. A. आराधयेदाराध्य O.
3) Read शिरास्थानं.
4) पुरुष left out in B. Cb. O.
5) येन W.
6) प्रति left out in B. Cb. K.
7) धे B. K.
8) Hardly right. O. has मत्तो. Perhaps to r. मत्काश्चि.
9) क्ष K. W. The true r. probably क्षे; cp. Pāli *antogahe*.
10) बहिर्गतानि O.

र्ग्धचित्ता वा दुर्ग्धचित्ता वा । न विजानीषे पञ्चयोजनान्तरस्थितस्य जनस्य भाषमाणस्य(1) । भेरीशङ्खादीनां शब्दं न प्रजानासि(2) न शृणोषि । क्रोशान्तरमप्यनुत्क्षिप्य पादौ(3) न शक्नोषि गन्तुं । ज्ञातसंवृद्धश्चासि मातुः कुक्षौ तां च क्रियां न स्मरसि । तत्कथमसि पण्डितः कथं च(4) सर्वं पश्यामीति वदसि । तत्साधु भोः पुरुष यद्न्धकारं तत्प्रकाशमिति संजानीषे यच्च प्रकाशं तद्न्धकारमिति संजानीषे ॥

अथ स पुरुषस्तानृषीनेवं वदेत् । क उपायः किं वा शुभं कर्म कृत्वेदृशीं(6) प्रज्ञां प्रतिलभेय युष्माकं प्रसादाच्चैतान्गुणान्प्रतिलभेय ॥ अथ खलु(7) त ऋषयस्तस्य पुरुषस्यैवं कथयेयुः । यदीच्छस्यरण्ये वस पर्वतगुहासु वा निषण्णो धर्मं चिन्तय क्लेशाश्च ते(8) प्रहातव्याः । तथा धूतगुणसमन्वागतो ऽभिज्ञाः प्रतिलप्स्यसे ॥ अथ स पुरुषस्तमर्थं गृहीत्वा प्रव्रजितः । अरण्ये वसन्नेकाग्रचित्तो लोकतृष्णां प्रहाय पञ्चाभिज्ञाः प्राप्नुयात् । प्रतिलब्धाभिज्ञश्च चिन्तयेत्(10) । यदहं पूर्वमन्यत्कर्म कृतवान् तेन मे न कश्चिद्गुणो ऽधिगतः । इदानीं यथाचित्तं गच्छामि पूर्वं चाहमल्पप्रज्ञो ऽल्पप्रतिसंवेद्यन्धभूतो ऽस्म्यासं(11) ॥

इति हि काश्यपोपमैषा कृतास्यार्थस्य विज्ञप्तये । अयं च पुनरत्रार्थो द्रष्टव्यः । जात्यन्ध इति काश्यप षड्गतिसंसारस्थितानां सत्त्वानामेतदधिवचनं ये सद्धर्मं न जानन्ति

1) भाषतो Cb. W. O.
2) प्र in Cb. only.
3) द्दान्न A. K. W. दौ न B. Cb. दा न O. MSS. अनुत्क्षिप्य.
4) A. K. W. add सर्वं जानासि कथं च. O. has सर्वं जनामि पश्यामीति.
5) संजानासि O.
6) शां B.
7) In B. K. only.
8) यन् A. Cb. य B. K. O. गः W.
9) Left out in Cb.
10) तच्चि B. K.
11) अस्मा संवृत्तः A. अस्म्या संवृत्तः W. आसत् O.
12) पुनर् in A. W. only.
13) पञ्चगतिक B. Cb. K. पञ्चसंसारगति O.
14) Sic O.; the others पि for धि.

क्लेशतमोऽन्धकारं च संवर्धयन्ति । ते चाविद्यान्धा अविद्यान्धाश्च संस्कारानुपविचिन्वन्ति संस्कारप्रत्ययं च नामरूपं यावदेवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति ॥

एवमविद्यान्धास्तिष्ठन्ति सत्त्वाः संसारे तथागतस्तु करुणां जनयित्वा[1] त्रैधातुकान्निःसृतः पितेव प्रिय एकपुत्रके करुणां जनयित्वा[1] त्रैधातुके ज्वलतीर्य सत्त्वान्[3] संसारचक्रे परिभ्रमतः[4] संपश्यति[5] न च[6] संसारान्निःसरणं[7] प्रजानन्ति[7]। अथ भगवांस्तान्प्रज्ञाचक्षुषा पश्यति दृष्ट्वा च जानाति। अमी सत्त्वाः पूर्वं कुशलं[8] कृत्वा मन्दद्वेषास्तीव्ररागा मन्दरागास्तीव्रद्वेषाः[9] केचिदल्पप्रज्ञाः केचित्पण्डिताः केचित्परिपाकमुद्गाः केचिन्मिथ्यादृष्टयस्तेषां सत्त्वानां तथागत उपायकौशल्येन[10] त्रीणि यानानि देशयति ॥

तत्र यथा त ऋषयः पञ्चाभिज्ञा विप्रमुक्तचेतस एवं बोधिसत्त्वा बोधिचित्तान्युत्पाद्यानुत्पत्तिकीं[11] धर्मक्षान्तिं[12] प्रतिलभ्यानुत्तरां सम्यक्संबोधिमभिसंबुध्यन्ते ॥

तत्र यथासौ भैषज्यराज एवं तथागतो द्रष्टव्यः। यथासौ जात्यन्धस्तथा मोहान्धा सत्त्वा द्रष्टव्याः। यथा वातपित्तश्लेष्माण एवं रागद्वेषमोहाः। द्वाषष्टि च दृष्टिकृतानि द्रष्टव्यानि। यथा चतस्र ओषधयस्तथा शून्यतानिमित्ताप्रणिहितनिर्वाणद्वारं च द्रष्ट-

---

1) संजनय्य B. संजनया K.
2) A. W. add च.
3) सत्त्वाः A. W. सत्त्वा K.
4) परिभ्रमंति A. W. भ्रमतः B. Cb. K. भ्रममाणानि O.
5) संदृश्यते Cb. संदृश्यन्ते O.
6) च न Cb. O. तेन च K.
7) प्रजानातीति A. W. संजानन्ति B. संजान्ति K. जानाति Cb. जानन्तीति O. A. W. add यथाभूतं after निःसरणं.
8) B. K. O. add मूलं.
9) तीव्ररागाः added in A. B. Ca. K.
10) भगवानु B. Cb. K.
11) किं Cb. v. l. कं.
12) धर्म left out in O.

व्यम्। यथा यथा द्रव्याण्युपयुज्यन्ते तथा तथा व्याधयः प्रशाम्यन्तीति। एवं शून्यतानिमित्ताप्रणिहितानि[1] विमोक्षमुखानि[2] भावयित्वा सत्त्वा अविद्यां निरोधयन्ति। अविद्यानिरोधात्संस्कारनिरोधः। यावदेवमस्य केवलस्य महतो दुःखस्कन्धस्य निरोधो भवति। एवं चास्य चित्तं न कुशले तिष्ठति न पापे ॥

यथान्धश्चक्षुः प्रतिलभते तथा श्रावकप्रत्येकबुद्धयानीयो[3] द्रष्टव्यः। संसारक्लेश-[4] बन्धनानि छिनत्ति[5] क्लेशबन्धनान्निर्मुक्तः प्रमुच्यते[6][7] षड्गतिकात्त्रैधातुकात्। तेन श्रावकयानीय एवं जानात्येवं च वाचं भाषते। न सन्त्यपरे धर्मा अभिसंबोद्धव्या निर्वाणप्राप्तोऽस्मीति। अथ खलु तथागतस्तस्मै[8] धर्मं देशयति। येन सर्वधर्मा न प्राप्ताः कुतस्तस्य निर्वाणमिति। तं भगवान्बोधौ समादापयति। स उत्पन्नबोधिचित्तो न संसारस्थितो न निर्वाणप्राप्तो भवति। सो ज्वबुध्य त्रैधातुकं दृशसु दिक्षु शून्यं निर्मितोपमं मायोपमं स्वप्नमरीचिप्रतिश्रुत्कोपमं लोकं पश्यति। स सर्वधर्माननुत्पन्नाननिरुद्धानबद्धानमुक्तान्न तमोऽन्धकारान्न प्रकाशान्पश्यति। य एवं गम्भीरान्धर्मान्पश्यति स पश्यत्यपश्यनया सर्वत्रैधातुकं[10] परिपूर्णमन्योन्यसत्त्वाशयाधिमुक्तम्[11] ॥

अथ खलु भगवानिममेवार्थं भूयस्या मात्रया संदर्शयमानस्तस्यां वेलायामिमा गाथा अभाषत ॥

---

1) ते Cb. ता K. त O.
2) मुखां Cb. विमोक्ष wanting in O.
3) यानिका O.; the plural also in the sequel.
4) रे K.
5) छिन्दात्त O.
6) नाद्विमुक्त विमुच्यते B. K. नाविमुक्त प्रमुंचते Cb. ना प्रमुक्ता प्रमुच्यन्ते O.
7) पञ्चगति Cb. K. O.
8) भगवां Cb. K. O.
9) अबद्धान् left out in K.
10) सर्वं A. K.
11) Thus O.; other MSS. °यवि.
12) अभिद्योतयमान O.

चन्द्रसूर्यप्रभा यद्वन्निपतन्ति समं नृषु ।
गुणवत्स्वथ पापेषु प्रभाया नोनपूर्णता ॥ ४५ ॥
तथागतस्य प्रज्ञा च भासदादित्यचन्द्रवत् ।
सर्वसत्त्वान्विनयते न चोना नैव चाधिका ॥ ४६ ॥
यथा कुलालो मृद्भाण्डं कुर्वन्मृत्सु समास्वपि ।
भवन्ति भाजना[1] तस्य गुडक्षीरघृताम्भसाम् ॥ ४७ ॥
अशुचेः[2] कानिचित्तत्र दृष्ट्वा[3] न्यानि[4] भवन्ति[5] तु ।
मृदमेकां स गृह्णाति कुर्वन्भाण्डानि भार्गवः ॥ ४८ ॥
यादृक्प्रक्षिप्यते द्रव्यं भाजनं तेन लक्ष्यते[6] ।
सत्त्वाविशेषे[7] ऽपि[8] तथा रुचिभेदात्तथागताः ॥ ४९ ॥
यानभेदं वर्णयन्ति बुद्धयानं तु निश्चितम् ।
संसारचक्रस्याज्ञानान्निर्वृतिं न विजानते[9] ॥ ५० ॥
यस्तु शून्यान्विजानाति धर्मानात्मविवर्जितान् ।
संबुद्धानां भगवतां बोधिं जानाति तत्त्वतः ॥ ५१ ॥
प्रज्ञामध्यव्यवस्थानात्प्रत्येकज्ञिन उच्यते ।
शून्यज्ञानविहीनत्वाच्छ्रावकः संप्रभाष्यते[10] ॥ ५२ ॥

1) MSS. भाजनास्तस्य, but O. has भाजनानां पृथक्कृ स्याद्.
2) दृश्य (r. दृश्य) O.; अशुचि the rest.
3) Thus O.; the others have दृष्टो.
4) अशुचेरपराणि O.; दृश्यन्यानि the others.
5) च A. O.
6) द्य A. K. W. भ्य Ca. त्त Cb. तस्य तद्भवेत् O.
7) सत्त्वा A. B. Ca. K. W. संधा Cb.
8) Sic all MSS.
9) विज्ञायते W.
10) ज्ञानावबोधातु O.

सर्वधर्मावबोधात्तु सम्यक्संबुद्ध उच्यते ।
तेनोपायशतैर्नित्यं धर्मं देशेति[1] प्राणिनाम् ॥ ५३ ॥
यथा हि कश्चिज्जात्यन्धः सूर्येन्दुग्रहतारकाः[2] ।
अपश्यन्नेवमाक्षासौ[3] नास्ति[4] रूपाणि सर्वशः ॥ ५४ ॥
जात्यन्धे तु भवेद्वैद्यः कारुण्यं संनिवेश्य कः[5] ।
किमवक्तं स गत्वा[6] च तिर्यगूर्ध्वमधस्तथा ॥ ५५ ॥
सर्ववर्णरसस्थामा नगाल्लभत ओषधीः[8] ।
एवमादीश्चतस्रो ऽथ प्रयोगमकरोत्ततः[9] ॥ ५६ ॥
दत्तैः संचूर्ण्य कांचित्तु[10] पिष्ट्वा चान्यां तथापराम् ।
सूच्यग्रेण प्रवेश्याङ्गे जात्यन्धाय प्रयोजयेत् ॥ ५७ ॥
स लब्धचक्षुः संपश्येत्सूर्येन्दुग्रहतारकाः[11] ।
एवं चास्य भवेत्पूर्वमज्ञानात्तद्वदाहृतम् ॥ ५८ ॥
एवं सत्त्वा महाज्ञानाज्जात्यन्धाः संसरन्ति हि ।
प्रतीत्योत्पादचक्रस्य अज्ञानाद्दुःखधर्मणः[12] ॥ ५९ ॥

1) देशंति A. देशेत्ति W. देसेति B. देशेत Cb. देशेति K. O.
2) का O.; कान् the rest.
3) नै A. W. ने B. Cb. K.
4) वमोक्षासौ A. W. वमोक्षात्सौ B. वमक्षासौ Cb वमोक्षौसौ K. वमाक्षासौ O.
5) Thus O. वेश हि A. वेश्य हि Cb. W. वेशयेत् B. K.
6) Thus Cb. O.; तु the rest. Perhaps to r. गत्वाथ or गत्वान.
7) All स्थाना.
8) All but O. ओषधीम्.
9) रोत्तु तम् A. रोत्तः B. रोत्त तम् Ca. W. रोत्तः K. रोत्ततः O.
10) All but O. काश्चि° and चान्यांस्त°.
11) All but O. कान्.
12) वर्माणः O.; one MS. has वर्त्मनः. We conjecture धर्मिणः.

एवमज्ञानसंमूढे लोके सर्वविदुत्तमः।
तथागतो महावैद्य उत्पन्नः करुणात्मकः ॥ ६० ॥
उपायकुशलः शास्ता सद्धर्मं देशयत्यसौ।
अनुत्तरां बुद्धबोधिं देशयत्यमयानिके[1] ॥ ६१ ॥
प्रकाशयति मध्यां तु मध्यप्रज्ञाय नायकः।
संसारभीरवे बोधिमन्यां संवर्णयत्यपि ॥ ६२ ॥
त्रैधातुकान्निःसृतस्य श्रावकस्य विजानतः।
भवत्येवं मया प्राप्तं निर्वाणममलं शिवम् ॥ ६३ ॥
तामेव[3] तत्र[4] प्रकाशेमि नैतन्निर्वाणमुच्यते।
सर्वधर्मावबोधात्तु निर्वाणं प्राप्यते ऽमृतम् ॥ ६४ ॥
महर्षयो यथा तस्मै करुणां संनिवेश्य वै[6]।
कथयन्ति च मूढो ऽसि मा ते ऽभूज्ज्ञानवानहम् ॥ ६५ ॥
अभ्यन्तरावस्थितो ऽपि यदा भवसि कोष्ठके।
बहिर्यद्वर्तते तद्वै[7] न जानीषे त्वमल्पधीः ॥ ६६ ॥

1) यायिन A. W. यायिने Ca. यानिके B. K. O.

2) र B. Ca. K. O. रे A. W.

3) This halfverse in A. W. only.

4) षु A. व W.

5) तत्र left out in W. तामेव is here meaningless; the original Prākṛt may have had तं व. (Skr. तदेव).

6) In O. वे; कि the others; originally probably कृ, cp. vs. 55.

7) किञ्चि O.

यो ऽभ्यन्तरे ऽवस्थितस्तु बहिर्ज्ञातं कृताकृतम्[1]।
सो ह्यद्यापि[2] न जानाति कुतस्त्वं वेत्स्यसे[3] ऽल्पधीः[4] ॥ ६७ ॥
पञ्चयोजनमात्रे तु यः शब्दो निश्चरेद्दिक्।
तं श्रोतुं न समर्थो ऽसि प्रागेवान्यं विदूरतः[5] ॥ ६८ ॥
त्वयि ये पापचित्ता वा अनुनीतास्तथापरे।
ते न शक्यं त्वया ज्ञातुमभिमानैः[6] कुतो ऽस्ति ते ॥ ६९ ॥
क्रोशमात्रे ऽपि गन्तव्ये पदवीं[8] न विना गतिः।
मातुः कुक्षौ च यद्वृत्तं विस्मृतं तत्तदेव ते ॥ ७० ॥
अभिज्ञा यस्य पञ्चैताः स सर्वज्ञ इहोच्यते।
त्वं मोहादप्यकिंचिज्ञः सर्वज्ञो ऽस्मीति भाषसे ॥ ७१ ॥
सर्वज्ञत्वं प्रार्थयसे यद्यभिज्ञाभिनिर्हारैः[10]।
तं चाभिज्ञाभिनिर्हारमरण्यस्थो विचिन्तय[11]।
धर्मं विशुद्धं तेन त्वमभिज्ञाः प्रतिलप्स्यसे ॥ ७२ ॥

1) ज्ञाने A. Ca. K. W. ज्ञाने B. ज्ञोसि O. कृताकृते O. Our reading conjectural.

2) धातु A. द्याप B. Ca. प्याद्यापि K.

3) वेत्स्यत्य A. W. वेत्स B. ज्ञास्यसे Ca. वेत्स्यसे K. तद्वक्ष्यते O.

4) नधः B. K. सदा O. read तदा.

5) सु for वि O.

6) नं A. W.

7) व्यं A. B. W. व्ये Ca. K. O.

8) त्तु Ca. W. तु A. त्र B K. वों न O.

9) ज्ञासु नि° O.

10) रेत् A. र O.

11) येत् A. यः B. ये Ca. W. य K. O.

सो ऽर्थं गृह्य गतो ऽरण्यं चिन्तयेत्समुमाहितः।
अभिज्ञाः प्राप्तवान्पञ्च नचिरेण गुणान्वितः ॥ ७३ ॥
तथैव श्रावकाः सर्वे प्राप्तनिर्वाणसंज्ञिनः।
जिनो ऽथ देशयेत्तस्मै विश्रामो ऽयं न निर्वृतिः ॥ ७४ ॥
उपाय एष बुद्धानां वदन्ति यदिमं[1] नयम्।
सर्वज्ञत्वमृते नास्ति निर्वाणं तत्समारभेत[2] ॥ ७५ ॥
त्र्यध्वज्ञानमनन्तं च षट्[3] च पारमिताः प्रभाः।
शून्यतामनिमित्तं च प्रणिधानविवर्जितम् ॥ ७६ ॥
बोधिचित्तं च ये चान्ये धर्मा निर्वाणगामिनः।
सास्रवा नास्रवाः शान्ताः सर्वे[4] गगणसंनिभाः ॥ ७७ ॥
ब्रह्मविहाराश्चत्वारः संग्रहा ये च कीर्तिताः।
सत्त्वानां विनयार्थाय कीर्तिताः परमर्षिभिः[5] ॥ ७८ ॥
यश्च धर्मान्विजानाति मायास्वप्नस्वभावकान्।
कदलीस्कन्धनिःसारान्प्रतिश्रुत्कामसमानकान् ॥ ७९ ॥
तत्स्वभावं च जानाति त्रैधातुकमशेषतः[6][7]।
अबद्धमविमुक्तं[8] च[9] स विजानाति निर्वृतिम् ॥ ८० ॥

1) All but O. यदिदं.
2) समाचर् O.
3) पंच A. K. W. षट् B. Ca. Cb. O.
4) सर्वे Ca. K. सर्व the rest. The whole stanza wanting in O., and in the Chinese versions by Dharmarakṣa and Kumārajīva, whereas in the translation by Jñānagupta and Dharmagupta only the first half strophe is rendered.
5) ता ये मरु K.
6) मि A. सि B. तिः W. ति Ca. Cb. K.
7) ऋः W.
8) द्धान A.
9) क्तांश्च A. W. क्तश्च Cb. क्तं च B. Ca. क्तञ्च K. O.

सर्वधर्मान्समाञ्शून्यान्निर्नानाकरणात्मकान्।
न चैतान्[1]प्रेक्षते नापि किंचिद्धर्मं विपश्यति ॥ ८१ ॥
स पश्यति महाप्रज्ञो धर्मकायमशेषतः।
नास्ति यानत्रयं किंचिदेकयानमिहास्ति तु ॥ ८२ ॥
सर्वधर्माः समाः सर्वे समाः समसमाः सदा।
एवं ज्ञात्वा विजानाति निर्वाणममृतं शिवम् ॥ ८३ ॥
इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याय ओषधीपरिवर्तो नाम पञ्चमः ॥

1) चैनां A. W. चैतां B. चेन्नां Ca. चते Cb. चैताम्रे K. चैव O.

VI.

अथ खलु भगवानिमा गाथा भाषित्वा सर्वावन्तं भिक्षुसंघमामन्त्रयते स्म । आरोचयामि वो भिक्षवः प्रतिवेदयामि । अयं मम श्रावकः काश्यपो भिक्षुस्त्रिंशतो[1] बुद्धकोटीसहस्राणामन्तिके[2] सत्कारं करिष्यति गुरुकारं माननां पूजनामर्चनामपचायनां[3] करिष्यति तेषां च बुद्धानां भगवतां सद्धर्मं धारयिष्यति । स पश्चिमे समुच्छ्रय[4] श्रवभासप्राप्तायां लोकधातौ महाव्यूहे कल्पे रश्मिप्रभासो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके[5] भविष्यति विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान् । द्वादश चास्यान्तरकल्पानायुष्प्रमाणं[6] भविष्यति । विंशतिं[7] चास्यान्तरकल्पान्सद्धर्मः[8] स्थास्यति । विंशतिमेवान्तरकल्पान्सद्धर्मप्रतिरूपकः स्थास्यति । तच्चास्य बुद्धक्षेत्रं शुद्धं भविष्यति शुध्यपगतपाषाणशर्करकठल्यमपगतश्वभ्रप्रपातमपगतस्यन्दनिका[9][10] गूथोडिगल्लं[11] समं रमणीयं प्रासादिकं दर्शनीयं वैडूर्यमयं रत्नवृक्षप्रतिमण्डितं

1) तां A. W.
2) अन्तिके left out in B. K.
3) अपचायनां left out in Cb.
4) Wrong for येऽव.
5) लोके left out in Cb.
6) चास्य left out in Cb. K.
7) युष्प्र B. Cb. K. W. युः प्र A.
8) ति in all MSS.
9) अस्य left out in Cb. K.
10) स्यन्दनिका left out in B. Cb. K.
11) गूठोदिगल्लं A. भूथोडिल्लं B. भूथोतिल्लं Cb. गूथोडिल्लं K. गूथोडिगल्लं W. गूथोडं O. Cp. Pāli *oligalla*.

सुवर्णसूत्राष्टापदनिबद्धं पुष्पाभिकीर्णम् । बहूनि च तत्र बोधिसत्त्वशतसहस्राण्युत्पत्स्यन्ते[1] । अप्रमेयाणि च तत्र श्रावककोटीनयुतशतसहस्राणि[2] भविष्यन्ति । न च तत्र मारः पापीयान्[3] अवतारं लप्स्यते न च[4] मारपर्षत्प्रज्ञास्यते[5] । भविष्यति तत्र खलु पुनर्मारश्च मारपर्षच्च[6] । अपि तु खलु पुनस्तत्र लोकधातौ[7] तस्यैव भगवतो रश्मिप्रभासस्य तथागतस्य शासने सद्धर्मपरिग्रहायाभियुक्ता भविष्यन्ति ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

पश्याम्यहं भिक्षव[8] बुद्धचक्षुषा स्थविरो ह्ययं काश्यप बुद्ध[9] भेष्यति[10] ।
अनागते ऽध्वनि असंख्येयकल्पे[11] कृत्वान पूजां द्विपदोत्तमानाम् ॥ १ ॥
त्रिंशत्सहस्राः परिपूर्णकोट्यो जिनानयं द्रक्ष्यति काश्यपो ह्यपम्[12] ।
चरिष्यती तत्र च ब्रह्मचर्यं बौद्धस्य ज्ञानस्य कृतेन भिक्षवः[13] ॥ २ ॥
कृत्वान पूजां द्विपदोत्तमानां समुद्गतेयं[14] ज्ञानमिदं अनुत्तरम् ।
स पश्चिमे चोच्छ्रयि लोकनाथो भविष्यते ऽप्रतिमो महर्षिः ॥ ३ ॥

1) चात्र Cb. O.
2) नि in all MSS. but O.
3) मारा पापीमत्तो O.
4) From अवतारं till त च left ont in Cb.
5) दा A. त् B. र्षा वा Cb. षन् K. र्षत्दा W. परिषदो pl. n. O.; so, too, in the sequel.
6) भविष्यन्ति K. All the other MSS. read भविष्यति °मारश्च after which Cb. adds पापीयां.
7) From खलु till तौ left out in Cb.
8) वो A. व K. O.
9) बुद्धो A.
10) भवि W.
11) ख्येय A. ख्येये W. One folio wanting in O.
12) ह्य left out in Cb. हि only to avoid hiatus.
13) भिक्षुः Cb. K.
14) नो A. नियं Cb.

क्षेत्रं च तस्य प्रवरं भविष्यति विचित्र[1] शुद्धं शुभ[2] दर्शनीयम्[3]।
मनोज्ञरूपं सद् प्रेमणीयं सुवर्णसूत्रैः समलंकृतं च ॥ ४ ॥
रत्नामया[4] वृत्त तस्मिं विचित्रा अष्टापदस्मिं तस्मि एकमेके।
मनोज्ञगन्धं च विमुञ्चमाना भेष्यन्ति क्षेत्रस्मि इमस्मि भिक्षो[5] ॥ ५ ॥
पुष्पप्रकारैः[6] समलंकृतं च विचित्रपुष्पैरुपशोभितं च[7]।
अधप्रपाता न च तत्र सन्ति समं शिवं भेष्यति दर्शनीयम् ॥ ६ ॥
तस्मि बोधिसत्त्वान सहस्रकोट्यः सुदान्तचित्तान महर्द्धिकानाम्।
वैपुल्यसूत्रान्तधराण तायिनां बहू भविष्यन्ति सहस्रनेके ॥ ७ ॥
अनास्रवा अन्तिमदेहधारिणो भेष्यन्ति ये श्रावक धर्मराज्ञः[8]।
प्रमाणु तेषां न कदाचि विद्यते दिव्येन ज्ञानेन गणेव[9] कल्पान् ॥ ८ ॥
सो द्वादश अन्तरकल्प स्थास्यति सद्धर्म विंशान्तरकल्प स्थास्यति[10]।
प्रतिरूपकश्चान्तरकल्पविंशति[11] रश्मिप्रभासस्य वियूक्ष[12] भेष्यति ॥ ९ ॥

अथ खल्वायुष्मान्महामौद्गल्यायनः स्थविर आयुष्मांश्च सुभूतिरायुष्मांश्च महाका-

---

1) विशिष्ट instead of भविष्यति विचित्र in A. W.
2) शुभ left out in K.
3) A. W. add मनोरमं.
4) This verse and the first quarter of the following verse are left out in A.
5) Read भिक्षूः? or भिक्षवो?
6) MSS. पुष्पैः.
7) This second quarter is left out in Cb.
8) भवि B.
9) ज्ञः A. B. K. W. ज्ञाः Cb. (perhaps meant ज्ञः).
10) गणेव B. preferable; गणेन Cb.
11) This second quarter is left out in Cb.
12) कल्पु स्थास्यति K.
13) वियूक्ष B. विक्षग Cb. वियूक्ष K. स व्यूक्ष in others.

त्यायनः प्रवेपमानैः कायैर्गगवत्तमनिमिषैर्नेत्रैर्व्यवलोकयन्ति स्म। तस्यां च वेलायां पृथक्पृथङ्मनःसंगीत्येमा गाथा अभाषन्त[1] ॥

अर्हन्त के महावीर शाक्यसिंह नरोत्तम[3]।
अस्माकमनुकम्पाय बुद्धशब्दमुदीरय ॥ १० ॥
अवश्यमवसरं ज्ञात्वा अस्माकं पि नरोत्तम[4]। 5
अमृतेनेव सिञ्चित्वा व्याकुरुष्व[5] विभो जिन[6] ॥ ११ ॥
दुर्भिक्ष[7] आगतः कश्चिन्नरो लब्धा सुभोजनम्।
प्रतीत भूय उच्येत हस्तप्राप्तस्मि भोजने ॥ १२ ॥
एवमेवोत्सुका अस्मो[8] क्षीनयानं विचिन्तिय[9]।
दुष्कालभग्नसत्त्वा वा बुद्धज्ञानं लभामके ॥ १३ ॥ 10
न तावदस्मान्संबुद्धो व्याकरोति महामुनिः।
यथा हस्तस्मि प्रतिष्ठं न तद्भुञ्जीत भोजनम् ॥ १४ ॥
एवं च उत्सुका वीर श्रुत्वा घोषमनुत्तरम्।
व्याकृता[11] यदि भेष्यामस्तदा[12] भेष्याम निर्वृताः ॥ १५ ॥

---

1) Read with O. नमः समसं.
2) भाषंते स्म B. K.
3) गाः A. म B. मः Cb. K. मा W.
4) मः B. K. W. Quite different in O. आशयं साश्रमस्माकं कदास्म व्याकरिष्यसि.
5) व्याकुरुष्व वि A. K. W. व्याकरिष्यति B. Cb.
6) The dialect requires व्याकरोक्षि; cp. vs. 16. नं A. नः B. Cb. K.
7) MSS. दुर्भिक्षादा. A var. r. has क्ष आ.
8) अस्म A. B. अस्मे Cb. O. अस्मो K. अस्य W.
9) ये A. W. क्ष B. क्षय Cb. क्षयः K. क्षया O.
10) सत्वभग्ना A. भग्नसत्वो B. Cb. W. भग्नसत्वा K. दुर्भिक्षे यथ भुक्तार्थो बुद्धयानं कथं लभेत् O.
11) यदि K. W. यद् भेष्याम O.
12) तथा K.

व्याकरोहि[1] महावीर क्षितिषो[2] ग्रनुकम्पकः[3]।

ग्रपि दारिद्र्यचित्तानां भवेद्दत्तो महामुने ॥ १६ ॥

ग्रथ खलु भगवांस्तेषां महाश्रावकाणां स्थविराणामिममेवंरूपं चेतसैव चेतःपरिवितर्कमाज्ञाय पुनरपि सर्वावन्तं भिक्षुसंघमामन्त्रयते स्म। ग्रयं मे भिक्षवो महाश्रावकः स्थविरः सुभूतिस्त्रिंशत[4] एव बुद्धकोटीनयुत[5]शतसहस्राणां सत्कारं करिष्यति गुरुकारं माननां पूजनामर्चनामपचायनां करिष्यति। तत्र च[6] ब्रह्मचर्यं चरिष्यति बोधिं च समुदानयिष्यति। एवंरूपांश्चाधिकारान्कृत्वा पश्चिमे समुच्छ्रये शशिकेतु[7]र्नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यति विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्॥

रत्नसंभवं च[8] नामास्य तद्बुद्धक्षेत्रं भविष्यति। रत्नावभासश्च नाम स कल्पो भविष्यति। समं च तद्बुद्धक्षेत्रं भविष्यति रमणीयं स्फटिकमयं रत्नवृक्षविचित्रितमपगतश्वभ्रप्रपातमपगतगूथोडिगल्लं[9] मनोज्ञं पुष्पाभिकीर्णम्। कूटागारपरिभोगेषु चात्र पुरुषा वासं कल्पयिष्यन्ति। बह्वश्चास्य श्रावका भविष्यन्त्यपरिमाणा येषां न शक्यं गणनया पर्यन्तो ऽधिगन्तुम्। बह्वनि चात्र बोधिसत्त्वकोटी[10]नयुतशतसहस्राणि भविष्यन्ति। तस्य च भगवतो द्वादशान्तरकल्पानायुष्प्रमाणं भविष्यति। विंशतिं चान्तरकल्पान्सद्धर्मः स्थास्यति।

1) All but O. व्याकुरुष्व.
2) षी ग्र A. Cb. K. W. O. षित्र B.
3) कः B. K. O. The rest क.
4) तामेव A. Cb. W. त एव B. K. त्रिंशानामेव O.
5) नयुत Cb. K. W. O. नियुत A. B. Ca.
6) च left out in A. B. सर्वत्र O.
7) यशस्केतु O.
8) वं च A. वां चास्य Cb. वञ्च B. K. वश्च W. O.
9) MSS. गूथोडिल्लं and गूथोड्यं. Cp. p. 144.
10) All but O. नि.

विंशतिमेवान्तरकल्पान्सद्धर्मप्रतिरूपकः स्थास्यति[1]। स च भगवान्वैकायसमन्तरोत्ते स्थित्वा तीक्ष्णां धर्मं देशयिष्यति बह्वनि च बोधिसत्त्वशतसहस्राणि बह्वनि च श्रावकशतसहस्राणि विनेष्यति[2]॥

ग्रथ खलु भगवांस्तस्यां वेलायामिमा गाथा ग्रभाषत॥

ग्राचोचयामि ग्रहमद्य भिक्षवः प्रतिवेदयाम्यद्य मम शृणोथ।
स्थविरः सुभूतिर्मम श्रावको ऽयं भविष्यते बुद्ध ग्रनागते ऽध्वनि ॥ १७ ॥
बुद्धांश्च पश्यित्व महानुभावान् त्रिंशच्च पूर्णा नयुतान कोटीः[3]।
चरिष्यते चर्य तदानुलोमिकीमिमस्य ज्ञानस्य कृतेन चैषाम्[4][5]॥ १८ ॥
स पश्चिमे वीर समुच्छ्रयस्मिन्द्वात्रिंशतीलक्षणरूपधारी।
सुवर्णयूपप्रतिमो महर्षिर्भविष्यते[6] लोकहितानुकम्पी ॥ १९ ॥
सुदर्शनोयं च सुक्षेत्र[7] भेष्यति इष्टं मनोज्ञं च महाजनस्य।
विरुरिष्यते यत्र स लोकबन्धुस्तारित्व प्राणो[8]नयुतान कोटीः ॥ २० ॥
बह्वबोधिसत्त्वात्र[9] महानुभावा ग्रविवर्त्यचक्रस्य प्रवर्तितारः।
तीक्ष्णेन्द्रियास्तस्य जिनस्य शासने य शोभयिष्यन्ति[10] तं बुद्धक्षेत्रम् ॥ २१ ॥

1) This sentence is left out in A.
2) विनयि Cb. O. विनेयि K.
3) ग्राः A. Ca. Cb. W. टीः B. K. ट्यः O.
4) लोमां Cb. लोमिका A. B. W. O. लोमिकी K.
5) भिक्षुः B. K. Perhaps to r. चैषः.
6) भविष्यति would do as well, a pause following.
7) सुभिक्ष भवि A. सुक्षेत्र भे B. Cb. K. W.
8) णा O. The lengthening not required.
9) त्र in Cb. K. O. only.
10) तत A. तद्बु B. त Cb. O. च K. ष्यंतम W. शोभ O. for शोध of the others.

बङ्कश्रावकास्तस्य न संख्य तेषां प्रमाणु[1] नैवास्ति कदाचि तेषां।[2]
षडभिज्ञत्रैविद्यमहर्द्धिकाश्च अष्टाविमोक्षेषु[3] प्रतिष्ठिताश्च[4] ॥ २२ ॥
अचिन्तियं ऋद्धिबलं च भेष्यति[5] प्रकाशयन्तस्यिममग्रबोधिम्[6]।
देवा मनुष्या यथ गङ्गवालिका भेष्यन्ति[7] तस्यो सततं कृताञ्जलो[8] ॥ २३ ॥
सो द्वादशो अन्तरकल्प स्थास्यति[9] सद्धर्मु[10] विंशान्तरकल्पु[11] स्थास्यति[12]।
प्रतिरूपको विंशतिमेव स्थास्यति कल्पान्तराणि द्विपदोत्तमस्य ॥ १४ ॥

अथ खलु भगवान्पुनरेव[13] सर्वावन्तं भिक्षुसंघमामन्त्रयते स्म। आरोचयामि वो भिक्षवः प्रतिवेदयामि। अयं मम श्रावकः स्थविरो महाकात्यायनो[14] ऽष्टानां बुद्धकोटीशतसहस्राणामन्तिके[15][16] सत्कारं करिष्यति गुरुकारं माननां पूजनामर्चनामपचायनां करिष्यति। परिनिर्वृतानां च तेषां तथागतानां[17] स्तूपान्करिष्यति योजनसहस्रं[18][19] समुच्छ्रयेण पञ्चाशद्योज-

1) णु A. K. णा B. Cb. W. O.
2) तत्र A. W. विद्येत O.
3) अष्टौ A. Cb. K. W.
4) क्षैश्च A. Cb. W.
5) च भवि A. B. भवि K. च भ W. भे Cb. लो स्य (Skr. अस्य) भे O.
6) शयिष्यंति ममग्र A. ममाग्र K. W. शयन्तस्मिमिमग्र Cb. We follow O.
7) तस्य O., preferable.
8) लिं B. लीः K. O.
9) भोत्स्यति B. भेष्यति K. थास्यति O., certainly more original.
10) र्मु A. र्म B. Cb. K. W. र्मं O.
11) ल्पु A. K. ल्प B. Cb. W.
12) भेष्यति B. K. थास्यति O.
13) र्पि K.
14) रका B. K.
15) नियुतशत, except in Cb. O. नयुत W. O.
16) अन्तिके left out in B. K.
17) बुद्धानां B. बुद्धानाम्भगवतां K.
18) B. adds शत.
19) सहस्र left out in K.

नानि परिणाहेन[1] सप्तानां रत्नानाम्। तद्यथा सुवर्णस्य रूप्यस्य वैडूर्यस्य स्फटिकस्य लोहितमुक्तेरश्मगर्भस्य मुसारगल्वस्य सप्तमस्य रत्नस्य। तेषां च स्तूपानां पूजां करिष्यति पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाविजयवैजयन्तीभिश्च[2][3] । ततश्च भूयः[4] परेण परतरेण पुनर्विंशतीनां बुद्धकोटीनामन्तिके[5] एवंरूपमेव[6] सत्कारं करिष्यति गुरुकारं माननां पूजनामर्चनामपचायनां करिष्यति। स[7] पश्चिमे[8] समुच्छ्रये[9] पश्चिम आत्मभावप्रतिलम्भे जाम्बूनदप्रभासो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यति विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। परिशुद्धं चास्य बुद्धक्षेत्रं भविष्यति समं रमणीयं प्रासादिकं दर्शनीयं स्फटिकमयं रत्नवृक्षाभिविचित्रितं सुवर्णसूत्रोच्छ्रोडितं[10] पुष्पसंस्तरसंस्तृतमपगतनिरयतिर्यग्योनियमलोकासुरकायं बङ्कुनरदेवप्रतिपूर्णं[11] बङ्कुश्रावकशतसहस्रोपशोभितं बङ्कुबोधिसत्त्वशतसहस्रालंकृतम्। द्वादश चास्यान्तरकल्पानायुष्प्रमाणं भविष्यति[12]। विंशतिं[13] चास्यान्तरकल्पान्सद्धर्मः स्थास्यति[14]। विंशतिमेवान्तरकल्पान्सद्धर्मप्रतिरूपकः स्थास्यति[15] ॥

1) न्यायामेन B. न्यायाम K. Meant व्यामेन.
2) B. adds घण्ट.
3) काभिश् in A. K. W.
4) Our r. follows O.; cp. p. 153. Other MSS. leave out च भूयः.
5) अन्तिके in Cb. only.
6) व A. W. वं B. Cb. K.
7) A. W. add ततः.
8) Cb. adds च.
9) K. adds स.
10) त्रोच्छ्रो Cb. Other MSS. badly त्राच्छादि.
11) A. W. add क.
12) अस्य left out in B. K.
13) ति in all MSS. except O. having विंश.
14) अस्य in Cb. only.
15) This sentence is left out in K.

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

शृणोथ मे भिक्षव अद्य सर्वे उदाहरत्तस्य गिरामनन्यथाम्[1]।
कात्यायनः स्थविरु[2] अयं मि[3] श्रावकः करिष्यते पूज्य विनायकानाम् ॥ २५ ॥
सत्कारु[4] तेषां च बहुप्रकारं बहुविधं लोकविनायकानाम्।
स्तूपांश्च कारापयि निर्वृतानां पुष्पेहि गन्धेहि च पूजयिष्यति ॥ २६ ॥
लभित्व सो पश्चिमकं समुच्छ्रयं परिशुद्धक्षेत्रस्मि जिनो भविष्यति।
परिपूरयित्वा इममेव ज्ञानं देशेष्यते प्राणिसहस्रकोटिनाम् ॥ २७ ॥
स[6] सत्कृतो लोकि सदेवकस्मिन् प्रभाकरो[7] बुद्ध[8] विभुर्भविष्यति।
जाम्बूनदाभासु स चापि[9] नाम्ना संतारको[10] देवमनुष्यकोटिनाम् ॥ २८ ॥
बहुबोधिमन्त्रास्तथ श्रावकाश्च अमिता असंख्या पि च तत्र क्षेत्रे।
उपशोभयिष्यन्ति ते[11] बुद्धशासनं भवप्रकोणा[12] विभवाश्च सर्वे ॥ २९ ॥

अथ खलु भगवान्पुनरेव सर्वावन्तं भिक्षुसंघमामन्त्रयते स्म। आरोचयामि वा भिक्षवः प्रतिवेदयामि। अयं मम श्रावकः स्थविरो महामौद्गल्यायनो ऽष्टाविंशति[13][14] बुद्धसहस्राणि[15]या-

1) अनन्यथा O.
2) रु A. B. W. O. रू Cb. K.
3) अ left out in K.
4) रु B. W.
5) सु A. B. Cb. W. स K. क W. left out in A.
6) प्रभंकरो O.
7) सो भगवां A. W. नाम विभरू Cb. B. बुद्ध विभरू K. भगव विभुरू O.
8) स Cb. O.
9) चैव B. K.
10) मि B. K.
11) नक्षत्रव K.
12) ममाग्र B. K. मे भिक्षवः अग्र O.
13) बु K.
14) कोटिसहु O.
15) णया K. राणामा the others.

रागयिष्यति[1] तेषां[2] च बुद्धानां भगवतां विविधं सत्कारं करिष्यति गुरुकारं माननां पूजनामर्चनामपचायनां करिष्यति। परिनिर्वृतानां च तेषां बुद्धानां भगवतां स्तूपान्कारयिष्यति[3] सप्तरत्नमयान्। तद्यथा सुवर्णस्य द्रूप्यस्य वैडूर्यस्य स्फटिकस्य लोहितमुक्तेरश्मगर्भस्य मुसारगल्वस्य। योजनसहस्रं[4][5] समुच्छ्रयेण पञ्चयोजनशतानि परिणाहेन। तेषां च स्तूपानां विविधां पूजां करिष्यति पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताका[6][7]वैजयन्तीभिः। ततश्च[8] भूयः परेण परतरेण विंशतेर्बुद्धकोटीशतसहस्राणामेवंरूपमेव सत्कारं करिष्यति गुरुकारं माननां पूजनामर्चनामपचायनां करिष्यति। पश्चिमे चात्मभावप्रतिलम्भे तमालपत्रचन्दनगन्धो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यति[11] विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। मनोऽभिरामं च नामास्य[12] तद्बुद्धक्षेत्रं भविष्यति। रतिप्रपूर्णश्च[13] नाम स कल्पो भविष्यति। परिशुद्धं चास्य तद्बुद्धक्षेत्रं भविष्यति समं रमणीयं प्रासादिकं सुदर्शनीयं स्फाटिकमयं रत्नवृक्षाभिविचित्रितं मुक्तकुसुमाभिकीर्णं बहुनरदेवप्रतिपूर्णं[14]मृषिशतसहस्रनि-

1) राध O.
2) राज्ञ नेषां K.
3) कारिष्यति A.
4) B. adds शत.
5) स्र in all MSS.
6) A. W. add घण्ट.
7) A. W. add भिरू.
8) All but O. तयो (r. ततो).
9) शतोनां A. Cb. W. शते B. शतिरू K.
10) B. K. add नियुत.
11) लोक उत्पत्स्यते A. B. W.
12) च नाम left out in Cb. K. O. The name of the *kṣetra* in O. is मनापाभिराम्यं.
13) Some MSS. have रतिप्रतिपूर्ण; O. only परिपूर्ण.
14) प्रतिपूर्ण in B. only. O has परिपूर्ण.

षेवितं यदुत[1] श्रावकैश्च बोधिसत्त्वैश्च । चतुर्विंशतिं[2] चास्यान्तरकल्पानायुष्प्रमाणं भविष्यति । चत्वारिंशच्चान्तरकल्पान्सद्धर्मः स्थास्यति । चत्वारिंशदेवान्तरकल्पान्सद्धर्मप्रतिरूपकः स्थास्यति ॥

अथ खलु[5] भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

मौद्गल्यगोत्रो मम श्रावको ऽयं ज्ञास्यित्व मानुष्यकमात्मभावम् ।
विंशत्सहस्राणि जिनान तायिनामन्या च[7] अष्टौ विरजान द्रक्ष्यति ॥ ३० ॥
चरिष्यते तत्र च ब्रह्मचर्यं बौद्धं इमं ज्ञान गवेषमाणः ।
सत्कारु तेषां द्विपदोत्तमानां विविधं तदा कारि विनायकानाम् ॥ ३१ ॥
सद्धर्मु तेषां विपुलं प्रणीतं धारेत्व कल्पान सहस्रकोट्यः ।
पूजां च स्तूपेषु करिष्यते तदा परिनिर्वृतानां सुगतान तेषाम् ॥ ३२ ॥
रत्नामयान्स्तूप सवैज्ञयन्तान् करिष्यते तेष जिनोत्तमानाम् ।
पुष्पेहि गन्धेहि च पूजयन्तो वाद्येहि वा लोकहितानुकम्पिनाम् ॥ ३३ ॥
तत्पश्चिमे चैष समुच्छ्रयस्मिन् प्रियदर्शने तत्र मनोज्ञक्षेत्रे ।
भविष्यते लोकहितानुकम्पी तमालपत्रचन्दनगन्धनाम्ना ॥ ३४ ॥
चतुर्विंशपूर्णान्तरकल्प तस्य आयुष्प्रमाणं सुगतस्य भेष्यति ।
प्रकाशयन्तस्यिम बुद्धनेत्रो मनुजेषु देवेषु च नित्यकालम् ॥ ३५ ॥

1) यादृदं Cb. O.
2) ति in all MSS.
3) अस्य left out in A. B. K. W.
4) शदेवांतर A. B. K. W. शच्चांतर Cb.
5) Left out in K.
6) Thus O.; the others विंशतिस.
7) MSS. अन्यांश्च.
8) र्म B. Cb. W. O.
9) All तुर्विंश, and शति for श A. W.
10) यंतस्मिं सु A. यंतस्मिम B. Cb. यत्तस्मि सु K. यं तस्मिं स W. यत्तस्यिमं O.

बक्कुश्रावकास्तस्य जिनस्य तत्र कोटीसहस्रा यथ गङ्गवालिकाः ।
षडभिज्ञत्रैविद्यमहर्द्धिकाश्च अभिज्ञप्राप्ताः सुगतस्य शासने ॥ ३६ ॥
अवैवर्तिकाश्च बक्कुबोधिसत्त्वा आरब्धवीर्याः सत[2] संप्रजानाः ।
अभियुक्तरूपाः सुगतस्य शासने तेषां सहस्राणि बहूनि तत्र ॥ ३७ ॥
परिनिर्वृतस्यापि जिनस्य तस्य सद्धर्मु संस्थास्यति तस्मिं[4] काले ।
विंशच्च विंशान्तरकल्प पूर्णा[5] एतत्प्रमाणं प्रतिरूपकस्य[6] ॥ ३८ ॥
महर्द्धिकाः पञ्च मि श्रावका ये[7] निर्दिष्ट ये ते मय अग्रबोधये ।
अनागते ऽध्यानि जिना स्वयंभुवस्तेषां च चर्या[9] शृणुथा ममात्तिकात् ॥ ३९ ॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये व्याकरणपरिवर्तो नाम षष्ठः ॥

1) Better अवि O.
2) स्मृति O. sanskritized from a reading सति, but the word required is सत, Skr. स्मृत. The other MSS. have सद्.
3) र्म B. Cb.
4) स्मिं A. K. W. स्मिन् Cb. स्मि B. O.
5) र्णामे A. र्णा B. Cb. र्णाः K. र्णा W. र्णान् O.
6) All but O. कश्च.
7) MSS. but O. मे. The reading in O. is पञ्च मम श्रावका ये.
8) MSS. निर्देष्टा ये ते मम, but O. has ये चेक्ह निर्दिष्ट मयाग्र°.
9) चर्या A. Cb. K. W. चर्य B. Rather चर्या.

VII.

भूतपूर्वं भिक्षवो ऽतीते ऽध्वन्यसंख्येयैः कल्पैरसंख्येयतरैरविपुलैरप्रमेयैरचिन्त्यैरपरिमितैरप्रमाणैस्ततः परेण परतरेण यदासीत्तेन कालेन तेन समयेन महाभिज्ञाज्ञानाभिभूनाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उदपादि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्संभवायां लोकधातौ महाह्रदे कल्पे। किंयच्चिरोत्पन्नः स भिक्षवस्तथागतो ऽभूत्। तद्यथापि नाम भिक्षवो यावानिह त्रिसाहस्रमहासाहस्रे लोकधातौ पृथिवीधातुस्तं काश्चिदेव पुरुषः सर्वं चूर्णीकुर्यान्मषिंकुर्यात्। अथ खलु स पुरुषस्तस्माल्लोकधातोरेकं परमाणुरजो गृहीत्वा पूर्वस्यां दिशि लोकधातुमहस्रमतिक्रम्य तदेकं परमाणुरज उपनिक्षिपेत्। अथ स पुरुषो द्वितीयं च परमाणुरजो गृहीत्वा ततः परेण परतरं लोकधातुमहस्रमतिक्रम्य द्वितीयं परमाणुरज उपनिक्षिपेत्। अनेन पर्यायेण स पुरुषः सर्वावत्तं पृथिवीधातुमुपनिक्षिपेत्पूर्वस्यां दिशि।

1) परि K.
2) तरं Cb.
3) भूतो नाम A. भूतोः नाम W.
4) केवचिरो O., wholly Prākṛt.
5) स्रायां A. K. W. more usual.
6) स्तां Cb.
7) सर्वांश्चू Cb.
8) र्णा B. K. र्णं W.
9) मार्घं A. W. मसिं K. Our reading is that of O.
10) In A. only.
11) गृह्य Cb. °ज्ञोद्गृह्णीत O.
12) ग K.

तत्किं मन्यध्वे भिक्षवः शक्यं तेषां लोकधातूनामन्तो वा पर्यन्तो वा गणनयाधिगन्तुम्। तआहुः। नो हीदं भगवन्नो हीदं सुगत। भगवानाह। शक्यं पुनर्भिक्षवस्तेषां लोकधातूनां केनचिद्गणकेन वा गणकमहामात्रेण वा गणनया पर्यन्तो ऽधिगन्तुं येषु वोपनिक्षिप्तानि तानि परमाणुरजांसि येषु वा नोपनिक्षिप्तानि। न ह्येव तेषां कल्पकोटीनयुतशतसहस्राणां शक्यं गणनायोगेन पर्यन्तो ऽधिगन्तुम्। यावत्तः कल्पास्तस्य भगवतो महाभिज्ञाज्ञानाभिभुवस्तथागतस्य परिनिर्वृतस्यैतावान्स कालो ऽभूदेवमचिन्त्य एवमप्रमाणः। तं चाहं भिक्षवस्तथागतं तावच्चिरं परिनिर्वृतमनेन तथागतज्ञानदर्शनबलाधानेन यथाद्य श्वो वा परिनिर्वृतमनुस्मरामि॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

अभू अतीता बहु कल्पकोट्यो अनुस्मरामि द्विपदानमुत्तमम्।
अभिज्ञज्ञानाभिभुवं महामुनिमभूषि तत्कालमनुत्तमो जिनः॥ १॥
यथा त्रिसाहस्रिमं लोकधातुं काश्चिद्बलं कुर्य अणुप्रमाणम्।
परमाणुमेकं च ततो गृहीत्वा क्षेत्रं सहस्रं गमियान निक्षिपेत्॥ २॥

1) तासां Cb.
2) यासु Cb.
3) In B. only.
4) नि A. B. न Cb. K. र W.
5) गणनया A.
6) रो W.
7) MSS. क्ष्यमे.
8) प्रमेयः K. प्रमाणम् the rest.
9) दर्शन left out in K.
10) मि K. O. The rest मी.
11) मं Cb.
12) मि Cb.
13) स्रां K. W.

(1)द्वितियं तृतीयं पि च एव निक्षिपेत् सर्वं पि सो निक्षिपि तं रजो गतम्।
रिक्ता भवेत इयं(2) लोकधातुः सर्वश्च सो पांसु भवेत क्षीणः(3)॥ ३॥
यो लोकधातूषु भवेत तासु पांसु रजो(4) यस्य प्रमाणु नास्ति।
रजं करित्वान अशेषतस्तं लक्ष्यं(5) ददे कल्पशते गते च॥ ४॥
एवाप्रमेया बकुकल्पकोट्यः परिनिर्वृतस्य सुगतस्य तस्य।
परमाणु सर्वे न(6) भवन्ति लक्ष्यास्तावद्बकु क्षीण भवन्ति कल्पाः(8)॥ ५॥
तावच्चिरं निर्वृतु तं विनायकं ताञ्श्रावकांस्तांश्च पि बोधिसत्त्वान्।
एतादृशं ज्ञानु तथागतानां स्मरामि सर्वाण्यथ अग्र श्रो वा॥ ६॥
एतादृशं भित्तव ज्ञानमेतदनन्तज्ञानस्य(9) तथागतस्य।
बुद्धं मया कल्पशतैरनेकैः स्मृतीय सूक्ष्माय अनास्रवाय॥ ७॥

तस्य खलु पुनर्भिक्षवो महाभिज्ञाज्ञानाभिभुवस्तथागतस्यार्हतः सम्यक्संबुद्धस्य चतुष्पञ्चाशत्कल्पकोटीनियुतशतसहस्राण्यायुष्प्रमाणमभूत्(10)(11)॥

पूर्वं(12) च स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽनभिसंबुद्धो ऽनुत्तरां सम्यक्संबो-

1) This quarter is left out in A. MSS. द्वितीयं.
2) इक्ष B.
3) णां A. W. णाः B. Cb. णः K.
4) रजं O. conform to the dialect of the verse.
5) क्षं A. B. Cb. क्ष्यन् K. क्ष्ये W. क्ष्यं O. and स्मिन् for च. Perhaps the original reading was गतेक्षि.
6) ण in all MSS.
7) MSS. लक्षा.
8) This quarter is left out in Cb.
9) तद् तमनन्त K.
10) चतुष्पंचा A. W. चतुः B. Cb.
11) नि A. B. न Cb. K. O.
12) पूर्वं च in Cb. O. only.

धिं(1) बोधिमण्डवराग्रगत एवं(2) सर्वो(3) मारसेनां प्रभञ्जीत्पराजैषीत्प्रभञ्जयित्वा पराजयित्वानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यामीति। न च तावत्तस्य ते धर्मा आमुखीभवन्ति(4) स्म। स बोधिवृक्षमूले बोधिमण्ड एकमन्तरकल्पमस्थात्। द्वितीयमप्यन्तरकल्पमस्थान्न च तावदनुत्तरां सम्यक्संबोधिमभिसंबुध्यते। तृतीयमपि(5) चतुर्थमपि(6) पञ्चममपि षष्ठमपि सप्तममप्यष्टममपि नवममपि दशममप्यन्तरकल्पं बोधिवृक्षमूले बोधिमण्डे ऽस्थात्सकृद्दर्तनेन पर्यङ्केनान्तरादव्युत्थितः। अनिञ्जमानेन चित्तेनाचलमानेनावेधमानेन(7) कायेनास्थान्न च तावदस्य ते धर्मा आमुखीभवन्ति(8) स्म॥

तस्य खलु पुनर्भिक्षवो भगवतो(9) बोधिमण्डवराग्रगतस्य देवैस्त्रायस्त्रिंशैर्मकासिंहासनं प्रज्ञप्तमभूद्योजनशतसहस्रसमुच्छ्रयेण यत्र स भगवान्निषद्यानुत्तरां सम्यक्संबोधिमभिसंबुद्धः। समनन्तरनिषण्णस्य च खलु पुनस्तस्य भगवतो बोधिमण्डे अथ(10) ब्रह्मकायिका देवपुत्रा दिव्यं पुष्पवर्षमभिप्रवर्षयामासुर्बोधिमण्डस्य(11) परिसामन्तकेन योजनशतमन्तरिक्षे(12) च वातान्प्रमुञ्चन्ति ये तं(13) जीर्णपुष्पमवकर्षयन्ति। यथाप्रवर्षितं च तत्पुष्पवर्षं तस्य भगवतो बोधिमण्डे निषण्णस्याव्युच्छिन्नं प्रवर्षयन्ति परिपूर्णान्दशान्तरकल्पान्(14)स्तं भगवन्तम

1) A. W. add अभिसंबोद्धुं.
2) गतमेवं A. W. गत एवं B. गतमेव Cb. गत एव K. त एव O.
3) All but O. add च.
4) आमुखी K. अभिमुखो the rest.
5) A. K. W. add क.
6) B. K. add क.
7) वेध O., certainly more original.
8) आभि A.
9) In Cb. O. only.
10) बोधिवृक्षमूले O.
11) एडे W. All but Cb. O. add निषण्ण.
1) शतयोजनसमंतरिक्षे न A.
13) A. grammatical error for the neuter form.
14) From तं till दशान्तरकल्पान् left out in A.

भ्यवकिरन्ति स्म[1]। तथा प्रवर्षंतं च तत्पुष्पवर्षं प्रवर्षयन्ति स्म[2] यावत्परिनिर्वाणकालसमये तस्य[3] भगवतस्तं भगवत्तमभ्यवकिरन्ति स्म[4]। चातुर्महाराजकायिकाश्च देवपुत्रा दिव्यां देवदुन्दुभिमभिप्रवादयामासुस्तस्य भगवतो बोधिमण्डवराग्रगतस्य[5] सत्कारार्थमव्युच्छिन्नं प्रवादयामासुः। परिपूर्णान्द्शानन्तरकल्पांस्तस्य भगवतो निषण्णस्य तत उत्तरि तानि दिव्यानि तूर्याणि सततसमितं प्रवादयामासुर्यावत्तस्य भगवतो महापरिनिर्वाणकालसमयात्[6]॥

अथ खलु भिक्षवो दशानामनन्तरकल्पानामत्ययेन स[7] भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धो ऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धः। समनन्तराभिसंबुद्धं च[8] तं विदित्वा ये तस्य भगवतः कुमारभूतस्य षोडश पुत्रा अभूवन्वीरसा ज्ञानाकरो नाम तेषां ज्येष्ठो ऽभूत्। तेषां च खलु पुनर्भिक्षवः षोडशानां राजकुमाराणामेकैकस्य च विविधानि क्रीडनकानि रामणीयकान्यभूवन्विचित्राणि दर्शनीयानि। अथ खलु भिक्षवस्ते षोडश राजकुमारास्तानि विविधानि क्रीडनकानि रामणीयकानि विसर्जयित्वा तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धमनुत्तरां सम्यक्संबोधिमभिसंबुद्धं[9] विदित्वा मातृभिर्धातृभिश्च रुदन्तीभिः[10] परिवृताः पुरस्कृतास्तेन च महाराजा चक्रवर्तिनार्यकेण महाकोशेन राजामात्यैश्च बहुभिश्च प्राणिकोटीनयुतशतसहस्रैः परिवृताः पुरस्कृता येन

1) Left out in B. K. W.

2) Left out in O. The others प्रवर्षन्ति.

3) यस्त B. येस्तस्य Cb. यस्तस्य K. W.

4) B. W. add स्म.

5) प्राप्त W. मण्डनिषण्णस्य O.

6) समयात् B. Cb. K. समयोभूत् O. समये A. Ca. W.

7) In B. K.

8) ङ तं च A. ङच्च तं B. ङश्च तं Cb. W. ङं च तं K.

9) इति added except in B. K. The whole passage after विसर्जयित्वा and before मातृ° left out in O.

10) Ungrammatical for रुदतीभिः. The reading in O. is रोदमानेभिश्च!

11) नि A. B. K. न Cb. W. O.

भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धो बोधिमण्डवराग्रगतस्तेनोपसंक्रामन्ति स्म[1]। तस्य भगवतः सत्कारार्थाय गुरुकारार्थाय माननार्थाय पूजनार्थायार्चनार्थायापचायनार्थायोपसंक्रान्ता उपसंक्रम्य तस्य भगवतः पादौ शिरोभिर्वन्दित्वा[2] तं भगवन्तं त्रिष्प्रदक्षिणीकृत्याञ्जलिं[3] प्रगृह्य तं भगवन्तं संमुखमाभिर्गाथाभिः साङ्ग्याभिरभिष्टुवन्ति स्म॥

महाभिषट्को ऽसि अनुत्तरो ऽसि अनन्तकल्पैः समुदागतो ऽसि।
उत्तारणार्थायिह सर्वदेहिनां परिपूर्ण संकल्पु[4] अयं ति भद्रकः॥ ८॥
सुदुष्करा अन्तरकल्पिमे[5] दश कृता ते[6] एकासनि संनिषद्य।
न च ते ऽन्तरा कायु कदाचि चालितो न कस्तपादं न पि चान्यदङ्गम्[7]॥ ९॥
चित्तं पि ते शान्तिगतं[8] सुसंस्थितमनिञ्जभूतं सद अप्रकम्प्यम्।
क्षितेषु नैवास्ति कदाचितत्व[9] अत्यन्तशान्तस्थितु त्वं अनास्रवः॥ १०॥
दिष्टासि[10] क्षेमेण च स्वस्तिना च अविकोठितः प्राप्त इमं[11] बोधिम्।
अस्माकमृद्धो इयमेवरूपा दिष्टा च वर्धाम[12] नरेन्द्रसिंह॥ ११॥

1) रगत O.

2) शिरसा वं B. K.

3) MSS. लीं.

4) ल्पु A. ल्प B. Cb. K. W.

5) All but O. मा.

6) स्ति A. W. स्त Ca. Cb. B. K. नि O.

7) न चान्तरे O. न च ते ऽन्तरान्का° the others.

8) देशकः K. the others देशम्; but O. has शीव! Our reading conjectural.

9) शान्ति O.

10) तव is here impossible; O. has तुभ्यम्. The original text must have had तुह्म or a similar Prākṛt form.

11) दृष्ट्वा च A. B. K. W. दिष्टास्व Cb.

12) Thus O.; शिममग्र the rest.

13) दृष्ट्वा च वर्द्धाय A. B. W. दृष्ट्वा मदोम Cb. दृष्ट्वा च वद्धामि K. दृष्ट्वा च वन्दाम O. All wrong.

अनायिकेयं प्रज्ञ सर्वदुःखिता उत्पाटितात्तो व निकीनसौख्या ।
मार्गं न जानन्ति दुखान्तगामिनं न मोक्षकृतोऽनयन्ति वीर्यम् ॥ १२ ॥
अपाय वर्धन्ति च दीर्घरात्रं दिव्याश्च कायाः[1] परिक्षाणधर्माः[2] ।
न श्रूयते ज्ञातु जिनान शब्दस्तमोऽन्धकारो अयु सर्वलोकः[3] ॥ १३ ॥
प्राप्तं च ते लोकविदू इहाद्य शिवं पदं उत्तमनाम्नवं च[4] ।
वयं च लोकश्च अनुगृहीतः[5] शरणं च ला एति[6] अज्ञाम[7] नाथ ॥ १४ ॥

अथ खलु भिक्षवस्ते षोडश राजकुमाराः कुमारभूता एव बालकास्ते भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धमाभिः सान्नप्याभिर्गाथाभिः संमुखमभिष्टुत्य तं भगवन्तमध्येषन्ते स्म । धर्मचक्रप्रवर्तनतायै[8] देशयतु भगवान्धर्मं देशयतु सुगतो धर्मं बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च । तस्यां च वेलायामिमा गाथा अभाषन्त[9] ॥

[10]देशेहि धर्मं शतपुण्यलक्षणा[11] विनायका अप्रतिमा महर्षे[12] ।
लब्धं ति[13] ज्ञानं प्रवरं विशिष्टं प्रकाशया[14] लोकि सदेवकस्मिन् ॥ १५ ॥

1) दिव्यां च कायां A. दिव्याश्च कायाः B. K. O. दिव्यां च कायाः Cb. W.
2) क्षाणि K. which seems preferable. परिक्षायिषु सदा O.
3) के A. B. W.
4) मा B.
5) का K.
6) ताः K.
7) एभि प्र Cb. एति त्र O. एत त्र the rest.
8) र्तनाय O.
9) षते स्म A. W. षत्ते स्म B. K. षत Cb. षुः O.
10) A. B. K. W. add देशेहि धर्मं द्विपदानमुत्तमा.
11) ण W.
12) र्षे O. र्षी the rest.
13) लब्धं ति B. Cb. K. O. लब्धान्त other MSS.
14) य O. The lengthening unnecessary. The same applies to प्रवर्तया vs. 17.

अस्मांश्च तारेहि इमांश्च सत्त्वान्निर्दर्शय ज्ञानु तथागतानाम् ।
यथा वयं पि[1] इममग्रबोधिं अनुप्राप्नुयामो अथ[2] इमे च सत्त्वाः ॥ १६ ॥
चर्या च ज्ञानं पि च सर्व ज्ञानसि अध्याशयं पूर्वकृतं च पुण्यम् ।
अधिमुक्ति ज्ञानासि च सर्वप्राणिनां प्रवर्तया चक्रवरं[3] अनुत्तरमिति ॥ १७ ॥

तेन खलु पुनर्भिक्षवः समयेन तेन[4] भगवता महाभिज्ञाज्ञानाभिभुवा तथागतेनार्हता सम्यक्संबुद्धेनानुत्तरां सम्यक्संबोधिमभिसंबुध्यमानेन[5] दशसु दिक्ष्वेकैकस्यां दिशि पञ्चाशल्लोकधातुकोटीनयुतशतसहस्राणि षड्विकारं प्रकम्पितान्यभूवन्महता चावभासेन स्फुटान्यभूवन् । सर्वेषु च तेषु लोकधातुषु या लोकान्तरिकास्तासु[7] य[8] अन्धकाराः संवृता[9] अन्धकारतमिस्रा यत्रेमावपि चन्द्रसूर्यावेवं महर्द्धिकावेवं महानुभावावेवं महौजस्कावाभयाप्याभां नानुभवतो वर्णोनापि वर्णं तेजसापि तेजो नानुभवन्ति[10] । तास्वपि तस्मिन्समये महतो अवभासस्य[11] प्रादुर्भावो अभूत् । ये अपि तासु लोकान्तरिकासु सत्त्वा उपपन्नास्ते अप्यन्योन्यमेवं पश्यन्त्यन्योन्यमेवं संजानन्ति । अन्ये अपि बत भोः सत्त्वाः सत्त्वीकोपपन्नाः । अन्ये अपि बत भोः सत्त्वाः सत्त्वीकोपपन्ना[12] इति । सर्वेषु च तेषु लोकधातुषु यानि देवभवनानि देवविमानानि

1) Thus O.; पी the rest.
2) पुनेयाम इमे O. The original text must have had अनुपापुनेयाम इमे.
3) रं ख्य O. रम the rest. Both wrong.
4) In B. Cb. O. only.
5) बुद्धेन B. बुध्यता Cb.
6) नि A. B. K. न Cb. W. O.
7) Var l. कोत्तरि.
8) This ought to be ये अन्त.
9) A. W. add अंधकारा; O. has संवृत्ता. The whole passage has been adulterated by the scribes. Cp. Mahāvastu I, 41 and Burnouf, Lotus, Append. XVI.
10) त O. तौ the rest.
11) B. K. add लोके.
12) W. does not repeat this passage.

च यावद्ब्रह्मलोकात्षड्विकारं प्रकम्पितान्यभूवन्मरुता[1] चावभासेन स्फुटान्यभूवन्नतिक्रम्य देवानां देवानुभावम्। इति हि भिक्षवस्तस्मिन्समये तेषु लोकधातुषु मरुतः[2] पृथिवीचालस्य मरुतश्चोदारिकस्यावभासस्य लोके[3] प्रादुर्भावो ऽभूत्॥

अथ पूर्वस्यां दिशि तेषु पञ्चाशत्सु लोकधातुकोटीनियुतशतसहस्रेषु[4] यानि ब्राह्माणि विमानानि तान्यतीव भ्राजन्ति[5] तपन्ति विराजन्ति[5] श्रीमन्त्योजस्वीनि च। अथ खलु भिक्षवस्तेषां महाब्रह्मणामेतद्भवत्[6]। इमानि खलु पुनर्ब्राह्माणि विमानान्यतीव भ्राजन्ति तपन्ति विराजन्ति श्रीमन्त्योजस्वीनि च। कस्य खल्विदं पूर्वनिमित्तं भविष्यतीति। अथ खलु भिक्षवस्तेषु पञ्चाशत्सु लोकधातुकोटीनियुतशतसहस्रेषु ये महाब्रह्माणस्ते[7] सर्वे अन्योन्यभवनानि[8] गत्वारोचयामासुः। अथ खलु भिक्षवः[9] सर्वसत्त्वत्राता नाम महाब्रह्मा तं महान्तं ब्रह्मगणं गाथाभिरध्यभाषत॥

अतीव नो हर्षित अद्य सर्वे विमानश्रेष्ठा इमि प्रज्वलन्ति।
श्रिया द्युतीया च मनोरमा ये किंकारणं ईदृशु भेष्यते ऽद्य॥ १८॥
साधु गवेषामथ एतमर्थं को देवपुत्रो उपपन्नु अद्य।
यस्यानुभावो अयमेवरूपो अभूतपूर्वो अयमद्य दृश्यते॥ १९॥

---

1) चा left out in K. O.

2) तश्च Cb. K.

3) Left out in Cb.

4) न W. O. नि the rest.

5) न्ते K. विरोचन्ति O. for विराजन्ति throughout the whole chapter.

6) All but O. ब्राह्मणानाम्.

7) Here too and in the sequel all but O. ब्राह्माण for ब्रह्माण.

8) न्यं A. B. Cb. K. न्य W.

9) A. B. K. W. add तेषु पञ्चाशत्सु लोकधातुकोटीनियुतशतसहस्रेषु; Cb. leaves out the whole.

यदि वा भवेद्बुद्ध नरेन्द्रराज्ञा उत्पन्नु लोकास्मिं[1] कश्चिंदद्य।
यस्यो[2] निमित्तं इममेवरूपं श्रिया दृशो[3] दित्तु ज्वलन्ति अद्य[4]॥ २०॥

अथ खलु भिक्षवस्तेषु पञ्चाशत्सु लोकधातुकोटीनियुतशतसहस्रेषु ये महाब्रह्माणास्ते सर्वे सन्निपतिताः समवस्तानि दिव्यानि स्वानि स्वानि ब्राह्माणि विमानान्यभिरुह्य दिव्यांश्च सुमेरुमात्रान्पुष्पपुटान्गृहीत्वा चतसृषु दिक्ष्वनुचङ्क्रम्यन्तो[5] ऽनुविचरन्तः पश्चिमं दिग्भागं प्रक्रान्ताः। अद्राक्षुः खलु पुनस्तेषु पञ्चाशत्सु लोकधातुकोटीनियुतशतसहस्रेषु भिक्षवस्ते महाब्रह्माणः पश्चिमे दिग्भागे तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धं बोधिमण्डवराग्रगतं बोधिवृक्षमूले सिंहासनोपविष्टं पर्यङ्कं पुरस्कृतं देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यैस्तैश्च पुत्रैः षोडशभी राजकुमारैरध्येष्यमाणं धर्मचक्रप्रवर्तनतायै[6]। दृष्ट्वा च पुनर्येन[7] स भगवांस्तेनोपसंक्रान्ता उपसंक्रम्य तस्य[8] भगवतः पादौ शिरोभिर्वन्दित्वा[9] तं भगवन्तमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य तैश्च सुमेरुमात्रैः पुष्पपुटैस्तं भगवन्तमभ्यवकिरन्ति स्माभिप्रकिरन्ति स्म तं च बोधिवृक्षं दृशयोजनप्रमाणम्। अभ्यवकीर्य[10] तानि ब्राह्माणि विमानानि तस्य[11] भगवतो निर्यातयामासुः।

---

1) स्मिं K.

2) स्यो B. K. W. स्या A. स्मिन् Cb.

3) शो B. Cb. K. शा A. W.

4) Thus O. Other MSS. seem to have मेघ. The Locat. दित्तु is unexplainable. The *pāda* apparently corrupt; perhaps to r. दृशो(or दृशा or दृशट्) दिशा अद्य श्रिया ज्वलन्ति.

5) क्रम्यमाणा B. K. The words between °त्वा and प° wanting in O.

6) नतायै A. W. नाय B. K. O. नायै Cb.

7) Left out in Cb. K.

8) तस्य in K. only.

9) शिरसाभिवन्दित्वा B. K.

10) किरित्वा O.

11) All but O. तस्यैव.

परिगृह्णातु भगवानिमानि ब्राह्मणि विमानान्यस्माकमनुकम्पामुपादाय । परिभुञ्जतु सुगत इमानि ब्राह्मणि विमानान्यस्माकमनुकम्पामुपादाय ॥

अथ खलु भिक्षवस्ते महाब्रह्माणस्तानि स्वानि स्वानि विमानानि तस्य भगवतो निर्यात्य तस्यां वेलायां तं[5] भगवन्तं संमुखमाभिर्गाथाभिः साङ्ग्प्याभिरभिष्टुवन्ति स्म ॥

आश्चर्यभूतो[1] ऽसि अप्रमेयो उत्पन्न लोकस्मिं[2] कितानुकम्पो ।
नाथो ऽसि शास्तासि गुरु सि[2] ज्ञातो अनुग्रकोता[3] दर्शिमा[4] दिशो ऽग्र ॥ २१ ॥
पञ्चाशतो कोटिसकस्रपूर्णा या लोकधातून इतो भवन्ति ।
यतो वयं वन्दन आगता ऽसिं विमानश्रेष्ठान्प्रजहित्व सर्वशः ॥ २२ ॥
पूर्वेण कर्मेण कृतेन अस्मिन्विचित्रचित्रा हि इमे विमानाः ।
प्रतिगृह्य अस्माकमनुग्रकार्थं परिभुञ्जतां लोकविदू यथेष्टम् ॥ २३ ।

अथ खलु भिक्षवस्ते महाब्रह्माणस्तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धं संमुखमाभिः साङ्ग्प्याभिर्गाथाभिरभिष्टुत्य[5] तं भगवन्तमेतदूचुः । प्रवर्तयतु भगवान्धर्मचक्रं[6] प्रवर्तयतु सुगतो धर्मचक्रं लोके देशयतु भगवान्निर्वृतिं तारयतु भगवान्सज्ञाननुगृह्णातु[7] भगवानिमं लोकं देशयतु भगवान्धर्मस्वामी[8] धर्ममस्य सदेवकस्य लोकस्य समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः सदेवमानुषासुरायाः । तद्भविष्य-

5) In K. O. only. In O. added समसंगोत्या एकस्वरेण.
1) र्याद्भुत A.
2) स्मिं A. All but O. के for क.
2) गुरुरसि A. गुरु सि B. गुरु सि Cb. K. W.
3) तो A. Cb. W. All but O. अनुगृ; original Prākṛt अनुग्ग.
4) श K.
5) भिस्तविला Cb. O.
6) This passage is left out in Cb. O.
7) All but O. ह्लीष.
8) Left out in Cb. O.

ति बकुञ्जनकिताय बकुञ्जनसखाय लोकानकुम्पाये मकतो ञनकायस्यार्थाय किताय सुखाय देवानां च मनुष्याणां च ॥

अथ खलु भिक्षवस्तानि पञ्चाशद्ब्रह्मकोटीनयुतशतसकस्राणयेकस्वरेण[1] समसंगोत्या[2] तं[3] भगवन्तमाभिः साङ्ग्प्याभिर्गाथाभिरध्यभाषन्त[4] ॥

देशेहि भगवन्धर्मं देशेहि द्विपदोत्तम ।
मैत्रोबलं च देशेहि[5] सत्त्वांस्तारेहि दुःखितान् ॥ २४ ॥
दुर्लभो लोकप्रद्योतः पुष्पमौदुम्बरं यथा ।
उत्पन्नो ऽसि महावीर अध्येषामस्तथागतम्[6] ॥ २५ ॥

अथ खलु भिक्षवः स भगवांस्तेषां महाब्रह्मणां तूष्णीभावेनाधिवासयति स्म ॥

तेन खलु पुनर्भिक्षवः समयेन पूर्वदक्षिणे दिग्भागे तेषु पञ्चाशत्सु लोकधातुकोटी-[7]नयुतशतसकस्रेषु यानि ब्राह्मणि विमानानि तान्यतीव भाजन्ति तपन्ति विराजन्ति श्रीमत्योजस्वीनि च । अथ खलु भिक्षवस्तेषां ब्रह्मणामेतदभवत् । इमानि खलु पुनर्ब्राह्मणि विमानान्यतीव भाजन्ति तपन्ति विराजन्ति श्रीमत्योजस्वीनि च । कस्य खल्विदं पूर्वनिमित्तं भविष्यतीति । अथ खलु भिक्षवस्तेषु पञ्चाशत्सु लोकधातुकोटीनयुतशतसकस्रेषु ये महाब्रह्माणस्ते ऽपि सर्वे ऽन्योन्यभवनानि गत्वारोचयामासुः । अथ खलु भिक्षवो ऽधिमात्रकारुणिको नाम महाब्रह्मा तं महान्तं ब्रह्मगणं गाथाभिरध्यभाषत ॥

1) नियुत in A. B. Ca. W.
2) All but O. समसंगोत्य.
3) In K. only.
4) Instead of आभिः etc. O. has गीतेन धर्मचक्रप्रवर्तनाये अध्येषिसुः ॥
5) दर्शेहि O.
6) This verse is wanting in the Chinese versions.
7) नि in all but Cb. O.

कस्य पूर्वनिमित्तेन मारिषा[1] अद्य दृश्यते।
विमानाः सर्वि[2] भाजन्ति अधिमात्रं यशस्विनः॥ २६॥
यदि वा देवपुत्रो ऽद्य पुण्यवन्त[3] इहागतः[4]।
यस्येमे[5] अनुभावेन विमानाः सर्वि शोभिताः॥ २७॥
अथ वा बुद्ध[6] लोके ऽस्मिन्नुत्पन्नो द्विपदोत्तमः।
अनुभावेन यस्याद्य विमाना इमि[7] ईदृशाः॥ २८॥
सङ्क्षिताः सर्वि मार्गामो नैतत्कारणमल्पकम्।
न खल्वेतादृशं पूर्वं निमित्तं ज्ञातु दृश्यते[8]॥ २९॥
चतुर्दिशं प्रपश्यामो अश्रामः[9] क्षेत्रकोटियो[10]।
व्यक्तं लोके ऽद्य बुद्धस्य प्रादुर्भावो भविष्यति॥ ३०॥

अथ खलु भिक्षवस्तान्यपि पञ्चाशद्ब्रह्मकोटीनयुतशतसहस्राणि तानि स्वानि स्वानि दिव्यानि ब्राह्मणि विमानान्यभिरुह्य दिव्यांश्च सुमेरुमात्रान्पुष्पपुटान्गृहीत्वा चतसृषु दिक्ष्वनुचङ्क्रमन्तो[11] ऽनुविचरन्त उत्तरपश्चिमं दिग्भागं प्रक्रान्ताः। अद्राक्षुः[12] खलु पुनर्भिक्षवस्ते महाब्रह्माण उत्तरपश्चिमे दिग्भागे तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथा-

1) All but O. मार्षा.
2) र्वे K. र्वि O. र्व the rest.
3) न्तो Cb. K.
4) महागणः Cb.
5) Thus O. यस्येमे the others.
6) द्धो A. W.
7) ति A. O. म K. मि Cb. W.
8) All but O. दृष्टमभूत्.
9) अश्राम A. W. अन्धम: B. अश्रामो Cb. अश्रामः K. अण्वामः O.
10) या A. Cb. याः B. योः K. यो W. ट्यः O.
11) चंक्रम्यमाणा K.
12) Cb. adds अथ O. ददृशुश्च, omitting खलु पुनर्.

गतमर्हन्तं सम्यक्संबुद्धं बोधिमण्डवराग्रगतं बोधिवृक्षमूले सिंहासनोपविष्टं परिवृतं पुरस्कृतं देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यैस्तैश्च पुत्रैः षोडशभी राजकुमारैरध्येष्यमाणं धर्मचक्रप्रवर्तनतायै[1]। दृष्ट्वा च पुनर्येन स[2] भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तेनोपसंक्रान्ता उपसंक्रम्य च तस्य[4] भगवतः पादौ शिरोभिर्वन्दित्वा तं भगवन्तमनेकशतसहस्रकृत्वः प्रदक्षणीकृत्य तैः सुमेरुमात्रैः पुष्पपुटैस्तं भगवन्तमभ्यवकिरन्ति स्माभिप्रकिरन्ति स्म तं च बोधिवृक्षं दशयोजनप्रमाणम्। अभ्यवकीर्य तानि ब्राह्मणि विमानानि तस्य भगवतो निर्यातयामासुः। परिगृह्णातु भगवानिमानि ब्राह्मणि विमानान्यस्माकमनुकम्पामुपादाय। परिभुञ्जतु सुगत इमानि ब्राह्मणि विमानान्यस्माकमनुकम्पामुपादाय॥

अथ खलु भिक्षवस्ते महाब्रह्माणस्तानि स्वानि स्वानि विमानानि तस्य भगवतो निर्यात्य तस्यां वेलायां तं[6] भगवन्तं संमुखमाभिः सारूप्याभिर्गाथाभिरभिष्टुवन्ति स्म॥

नमो ऽस्तु ते[7] अप्रतिमा[8] महर्षे देवातिदेवा कलविङ्कसुस्वरा[9]।
विनायका लोकि सदेवकस्मिन्वन्दामि ते लोकहितानुकम्पो[10]॥ ३१॥
आश्चर्यभूतो ऽसि कथंचिल्लोके उत्पन्नु अद्यो[11] सुचिरेण नाथ।
कल्पान पूर्णा शत शून्य[12] आसीदशीति बुद्धैरयु जीवलोकः॥ ३२॥

1) वर्तनाय B. K. O.
2) स in A. W. only.
3) From महा till बुद्ध left out in Cb.
4) च तस्य left out in B. Cb.
5) तस्मै भगवते K. The other MSS. but O. तस्यैव.
6) तस्मै भगवते निर्यात्यत्तम् K.
7) Left out in K.
8) मो Cb. K. मं O.
9) रुत (for सु) A. W.
10) कंपका A. B. K. W. कंपो Cb. कम्पकः O. Rather कम्पिन्.
11) अद्य O. The lengthening unnecessary.
12) All but O. अद्य.

शून्यश्च[1] ग्रामोद्विपदोत्तमेकि ग्रपायभूमो तद[2] उत्सदासि।
दिव्याश्च कायाः परिक्षायिषू[3] तदा ग्रशीति कल्पान शता सुपूर्णा[4] ॥ ३३ ॥
सो दानि चतुश्च गतिश्च लेनं त्राणं पिता च तथ बन्धुभूतः।
उत्पन्नु लोकस्मि[5] क्षितानुकम्पी ग्रस्माक पुण्यैरिकि धर्मराजा ॥ ३४ ॥

ग्रथ खलु भिक्षवस्ते महाब्रह्माणास्तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धं संमुखमाभिः सारूप्याभिर्गाथाभिरभिष्टुत्य तं भगवन्तमेतदूचुः। प्रवर्तयतु भगवान्धर्मचक्रं प्रवर्तयतु सुगतो धर्मचक्रं लोके देशयतु भगवान्निर्वृतिं तारयतु भगवान्सद्धाननुगृह्णातु[6] भगवानिमं लोकं देशयतु भगवान्धर्ममस्य सदेवकस्य लोकस्य समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः सदेवमानुषासुरायाः। तद्भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥

ग्रथ खलु भिक्षवस्तानि पञ्चाशद्ब्रह्मकोटीनयुतशतसहस्राण्येकस्वरेण समसंगीत्या[7] तं भगवन्तमाभ्यां सारूप्याभ्यां गाथाभ्यामध्यभाषन्त[8] ॥

प्रवर्तय चक्रवरं महामुने प्रकाशय धर्मु दशादिशासु।
तारेहि सत्त्वान्दुखधर्मपीडितान् प्रामोद्यहर्षे जनयस्व देहिनाम् ॥ ३५ ॥

1) शून्यं च लोको O.; r. शून्ये च लोके.
2) मि मद् O. मीस्तद् the rest.
3) क्षायष्ट A. W. क्षायिषू B. क्षायिषु O. क्षायसू Cb. K.
4) यु A. B. K. W. स Cb.
5) भूते A. W. The others but O. लोके.
6) MSS. ह्लोष; the passage wanting in O.
7) All but O. संम संगोत्य.
8) माभिः गाथाभिरध्यभषंते स्म A. W. सारूप्याभिर् is added in Cb. माभ्यां गाथाभ्यामध्यभाषन्ते स्म B. K. Differently in O. भगवन्तं गाथाभिर्गोतेन धर्मचक्रप्रवर्तनायाद्येषिषु ॥

यं श्रुत्व बोधीय[1] भवेयु[2] लाभिनो दिव्यानि स्थानानि त्यजेयु चापि।
क्षायेयु[3] च ग्रामुरकाय सर्वे शान्ताश्च दान्ताश्च सुखीभवेयुः[4] ॥ ३६ ॥

ग्रथ खलु भिक्षवः स भगवांस्तेषामपि महाब्रह्मणां तूष्णीभावेनाधिवासयति स्म ॥

तेन खलु पुनर्भिक्षवः समयेन दक्षिणस्यां दिशि तेषु पञ्चाशत्सु लोकधातुकोटीनयुतशतसहस्रेषु यानि ब्राह्माणि विमानानि तान्यतीव भ्राजन्ति तपन्ति विराजन्ति ग्रोमत्योज्वस्वीनि च। ग्रथ खलु भिक्षवस्तेषां महाब्रह्मणामेतदभवत्[5]। इमानि खलु पुनर्ब्राह्माणि विमानान्यतीव भ्राजन्ति तपन्ति विराजन्ति ग्रोमत्योज्वस्वीनि च। कस्य खल्विदमेवंरूपं पूर्वनिमित्तं भविष्यति। ग्रथ खलु भिक्षवस्तेषु पञ्चाशत्सु लोकधातुकोटीनयुतशतसहस्रेषु ये महाब्रह्माणास्ते सर्वे[6] ग्न्योन्यभवनानि गत्वारोचयामासुः। ग्रथ खलु भिक्षवः सुधर्मो नाम महाब्रह्मा[7] तं महान्तं ब्रह्मगणं गाथाभ्यामध्यभाषत[8] ॥

नाकेतु नाकारणमद्य मार्षाः सर्वे विमाना इह ज्राज्वलन्ति।
निमित्तं दर्शेन्ति इह किम्पि[9] लोके साधु गवेषाम तमेतमर्थम्[10] ॥ ३७ ॥
ग्रनून[11] कल्पान शत क्षतीता[12] नैतादृशं ज्ञातु निमित्तमासीत्।
यदि वोपपन्नो इह देवपुत्रो उत्पन्नु लोके यदि वेह बुद्धः ॥ ३८ ॥

1) All बोधाय.
2) म A. B. Cb. W. यु K. O.
3) त्यजेय A. B. W. त्यजेयु K. ग्रायेयु Cb. O. क्षायेयु O.
4) मः A. W. म B. युः Cb. O. यु K.
5) भूत् A. वोचत् B. W. Quite different and more prolix in O.
6) न्यन्यं A. B. W. न्यन्य Cb. न्यन्यस्तम्भव K.
7) ब्राह्मणास्तं Cb.
8) गाथाभिरध्य Cb.
9) Thus O. क्षिमस्मि A. क्षमस्मि B. क्षि कंपि Cb. क्षि कस्मि K. क्षिमस्मिं W.
10) मथ एतद् O. preferable reading मथ एतम.
11) ग्रनून Cb. K. बहूनि O. The others ग्रनन्त.
12) शतान्यतीतान्ये O. शतं क्षतीतं the others. Our reading conjectural शतान्यतीता would do as well.

अथ खलु भिक्षवस्तेषु पञ्चाशत्सु लोकधातुकोटीनयुतशतसहस्रेषु ये महाब्रह्माणस्ते[1] सर्वे सन्निताः समग्रास्तानि दिव्यानि स्वानि स्वानि ब्राह्माणि विमानान्यभिरुह्य दिव्यांश्च सुमेरुमात्रान्पुष्पपुटान्गृहीत्वा चतसृषु दिक्ष्वनुचङ्क्रमन्तो ऽनुविचरन्त उत्तरं दिग्भागं प्रक्रान्ताः। अद्राक्षुः[2] खलु पुनर्भिक्षवस्ते महाब्रह्माण उत्तरे दिग्भागे तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धं बोधिमण्डवराग्यगतं बोधिवृक्षमूले सिंहासनोपविष्टं परिवृतं पुरस्कृतं देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यैस्तैश्च पुत्रैः षोडशभी राजकुमारैरध्येष्यमाणां धर्मचक्रप्रवर्तनतायै[3][4]। दृष्ट्वा च पुनर्यत्र स भगवांस्तेनोपसंक्रान्ता उपसंक्रम्य तस्य भगवतः पादौ शिरोभिर्वन्दित्वा[5] तं भगवन्तमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य तैः सुमेरुमात्रैः पुष्पपुटैस्तं भगवन्तमभ्यवकिरन्ति स्माभिप्रकिरन्ति स्म तं च बोधिवृक्षं दशयोजनप्रमाणम्। अभ्यवकीर्य तानि ब्राह्माणि दिव्यानि विमानानि तस्य भगवतो[6] निर्यातयामासुः। परिगृह्णातु भगवानिमानि ब्राह्माणि विमानान्यस्माकमनुकम्पामुपादाय। परिभुञ्जतु सुगत इमानि ब्राह्माणि विमानान्यस्माकमनुकम्पामुपादाय॥

अथ खलु भिक्षवस्ते ऽपि[7] महाब्रह्माणस्तानि स्वानि स्वानि विमानानि तस्य भगवतो[8] निर्यात्य तस्यां वेलायां तं भगवन्तं संमुखमाभिः सान्नूप्याभिर्गाथाभिरभिष्टुवन्ति स्म॥

---

1) ब्रह्माणस्ते K.

2) A. B. W. add अथ; दृदृशुश्च O. omitting खलु पुनर्.

3) महा added in some MSS.

4) नाय K. O.

5) शिरसाभिवन्दित्वा K.

6) तस्मै भगवते B. K. The other MSS. but O. तस्यैव.

7) In Cb. only.

8) तस्मै भगवते B. K. The others as above.

सुदुर्लभं दर्शन[1] नायकानां स्वभ्यागतं ते भवरागमर्दन[2]।
सुचिरस्य ते दर्शनमद्य लोके परिपूर्णकल्पान शतेभि[3] दृश्यसे[4]॥ ३९॥
तृषितां प्रज्ञां तर्पय लोकनाथ अदृष्टपूर्वो ऽसि कथंचि दृश्यसे।
औडुम्बरं पुष्प यथैव दुर्लभं तथैव दृष्टो ऽसि कथंचि नायक॥ ४०॥
विमान अस्माकमिमा[5] विनायक तवानुभावेन विशोभिताग्र्य।
परिगृह्य एतानि समन्तचक्षुः परिभुञ्ज चास्माकमनुग्रहार्थम्॥ ४१॥

अथ खलु भिक्षवस्ते महाब्रह्माणस्तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धं संमुखमाभिः सान्नूप्याभिर्गाथाभिरभिष्टुत्य तं भगवन्तमेतदूचुः। प्रवर्तयतु भगवान्धर्मचक्रं लोके देशयतु भगवान्निर्वृतिं तारयतु भगवान्सज्ञाननुगृह्णातु भगवा[6]निमं लोकं देशयतु भगवान्धर्ममस्य सदेवकस्य लोकस्य[7] समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः सदेवमानुषासुरायाः। तद्भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च॥

अथ खलु भिक्षवस्तानि पञ्चाशद्ब्रह्मकोटीनयुतशतसहस्राण्येकस्वरेण समसंगीत्या[8] तं भगवन्तमाभ्यां सान्नूप्याभ्यां गाथाभ्यामध्यभाषन्त[9]॥

---

1) नं A. नु B. न Cb. W. O. त K.

2) नं A. W. न B. Cb. K. O.

3) All but O. शतेति.

4) MSS. दृश्यते.

5) All इमे, but it appears from एतानि in the third *pāda* that विमान is here used in the neuter gender.

6) All but O. ह्लीष; भगवन्निमं K.

7) Cb. adds पुरतः.

8) All but O. समं संगीत्य.

9) माभिः सान्नूप्याभिर्गाथाभिरध्यभाषंते स्म A. W. स्म left out in Cb. माभ्यां गाथाभ्यामध्यभाषत्ते स्म B. K. O. has भगवन्तमभिगीतेन धर्मचक्रप्रवर्तनायाध्येषिषुः॥

देशेहि धर्मं भगवन्विनायक प्रवर्तयाँ[1] धर्ममयं च चक्रम्।
निर्नादया[2] धर्ममयं च दुन्दुभिं तं धर्मशङ्खं च प्रपूरयस्व ॥ ४२ ॥
सद्धर्मवर्षं वर्षयस्व[3] लोके वल्गुस्वरं भाष[4] सुभाषितं च।
अध्येषितो[5] धर्ममुदीरयस्व मोचेहि सत्त्वानयुतान कोट्यः ॥ ४३ ॥

अथ खलु भित्तवः स भगवांस्तेषां महाब्रह्मणां तूष्णीभावेनाधिवासयति स्म ॥

पेयालं[6]। एवं दक्षिणपश्चिमायां दिश्येवं पश्चिमायां[7] दिश्येवं पश्चिमोत्तरस्यां[8] दिश्येवमुत्तरस्यां[9] दिश्येवमुत्तरपूर्वस्यां[10] दिश्येवमधोदिशि[11] ॥

अथ खलु भित्तव ऊर्ध्वायां दिशि[12] तेषु पञ्चाशत्सु लोकधातुकोटीनयुतशतसहस्रेषु यानि ब्राह्माणि विमानानि तान्यतीव भ्राजन्ति तपन्ति विराजन्ति श्रीमत्त्योजस्वीनि च। अथ खलु भित्तवस्तेषां महाब्रह्मणामेतदभवत्। इमानि खलु पुनर्ब्राह्माणि विमानान्यतीव भ्राजन्ति तपन्ति विराजन्ति श्रीमत्त्योजस्वीनि च। कस्य खल्विदमेवंरूपं पूर्वनिमित्तं भविष्यतीति। अथ खलु भित्तवस्तेषु पञ्चाशत्सु लोकधातुकाटीनयुतशतसहस्रेषु ये महा-

1) य O.
2) निना O., better.
3) च प्रवर्ष O. preferable.
4) स्व B.
5) All but O. तं.
6) In A. W. only.
7) Left out in A. B. Cb.
8) रायां A. W. उत्तरपश्चिमायां O.
9) Left out in Cb.
10) Left out in B.
11) मध्योदिशि A. मधदिशि B. मधस्तान्दिशि Cb. मधोदिशि K. W. क्षेष्टिमायां दिशि कर्तव्यम् ॥ O.
12) ऊर्ध्वान्दिशि Cb.

ब्रह्माणास्ते सर्वे ऽन्योन्यभवनानि गत्वारोचयामासुः। अथ खलु भित्तवः शिखी नाम महाब्रह्मा तं महान्तं ब्रह्मगणं गाथाभिरध्यभाषत ॥

किंकारणं मार्ष इदं भविष्यति येना विमानानि परिस्फुटानि।
ओजेन वर्णेन द्युतीय चापि अधिमात्रवृद्धानि किमत्र कारणम् ॥ ४४ ॥
न ईदृशं नो अभिदृष्टपूर्वं श्रुतं च केनो तथ पूर्व आसीत्।
ओजस्फुटानि[2] यथ अद्य एता[3] अधिमात्र भ्राजन्ति किमत्र कारणम् ॥ ४५ ॥
यदि वा नु कश्चिद्भवि देवपुत्रः शुभेन कर्मेण समर्पितो इह।
उपपन्नु तस्यो अयमानुभावो यदि वा भवेद्बुद्ध कदाचि लोके ॥ ४६ ॥

अथ खलु भित्तवस्तेषु पञ्चाशत्सु लोकधातुकोटीनयुतशतसहस्रेषु ये महाब्रह्माणास्ते सर्वे सङ्गताः समग्रास्तानि दिव्यानि स्वानि स्वानि ब्राह्माणि विमानान्यभिरुह्य दिव्यांश्च सुमेरुमात्रान्पुष्पपुटान्गृहीत्वा चतसृषु दिक्ष्वनुचङ्क्रमन्तो ऽनुविचरन्तो येनाधोदिग्भागस्तेनोपसंक्रान्ताः। अद्राक्षुः खलु पुनर्भित्तवस्ते महाब्रह्माणो[5] ऽधोदिग्भागे तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धं बोधिमण्डवराग्रगतं बोधिवृक्षमूले सिंहासनोपविष्टं परिवृतं पुरस्कृतं देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यैस्तैश्च पुत्रैः षोडशभी राजकुमारैरध्यष्येमाणां[6] धर्मचक्रप्रवर्तनतायै। दृष्ट्वा च पुनर्येन स भगवांस्तेनोपसंक्रान्ता उपसंक्रम्य भगवतः पादौ शिरोभिर्वन्दित्वा[7] तं भगवन्तमनेकशतसहस्रकृत्वः प्रदक्षिणीकृत्य तैः सुमेरुमात्रैः पुष्पपुटैस्तं भगवन्तमभ्यवकिरन्ति स्माभिप्रकि-

1) न्यं A.
2) All but O. हि.
3) All एते.
4) ददृशुश्च O., omitting खलु पुनर्.
5) महाब्राह्माणा अधर्दि O. महाब्राह्माणा अधोदि the rest.
6) All but O. महाध.
7) शिरसाभिवन्दित्वा W. वन्द्य Cb.

रन्ति स्म तं च बोधिवृक्षं दशयोजनप्रमाणम्। अभ्यवकीर्य तानि दिव्यानि स्वानि स्वानि ब्राह्माणि विमानानि तस्य भगवतो[1] निर्यातयामासुः। प्रतिगृह्णातु भगवानिमानि ब्राह्माणि विमानान्यस्माकमनुकम्पामुपादाय। परिभुञ्जतु सुगत इमानि ब्राह्माणि विमानान्यस्माकमनुकम्पामुपादायेति[2] ॥

अथ खलु भिक्षवस्ते ऽपि महाब्रह्माणस्तानि स्वानि स्वानि[3] विमानानि तस्य भगवतो[1] निर्यात्य तस्यां वेलायां तं भगवन्तं संमुखमाभिः[4] मात्रूप्याभिर्गाथाभिरभिष्टुवन्ति स्म ॥

साधु दर्शन बुद्धानां लोकनाथान तायिनाम्।
त्रैधातुकस्मि बुद्धा वै सत्त्वानां[5] ये प्रमोचकाः ॥ ४७ ॥
समन्तचक्षु लोकेन्द्रा[6] व्यवलोकेन्ति[7] दिशो दश।
विवरित्वामृतद्वारं[8] मोतारेन्ति बहूञ्जनान् ॥ ४८ ॥
शून्या अचित्तिया[9] कल्पा अतीता[10] पूर्वि ये[11] अभूः।
अदर्शना[12] जिनेन्द्राणां अन्धा आसोद्दिशो दश ॥ ४९ ॥
वर्धन्ति नरकास्तीव्रास्तिर्यग्योनिस्तथासुराः।

1) तस्मै भगवते B. K. The others but O. तस्यैव भगवतो.
2) This sentence is left out in A. Cb.
3) B. K. add ब्राह्माणि.
4) संमुखम् only in O., but see p. 172
5) केस्मिं सत्त्वानां बुद्धानां A. W. कस्मिं सत्त्वानां बुद्धानां B. Cb. O. कस्मिं बुद्धा वै सत्त्वानां K.
6) न्तुर्लो B.
7) न्द्रो A. W. न्द्रा B. K. न्द्र Cb.
8) मव A. B. K. W. मो Cb.
9) या K.
10) ताः B.
11) भूत् A. भूः B. Cb. K. W. O.
12) नानां A. W. नो नेरे O.

प्रेतेषु चोपपद्यन्ते प्राणिकोट्यः[1] सहस्रशः ॥ ५० ॥
दिव्याः कायाश्च[2] क्षीयन्ते च्युता गच्छन्ति दुर्गतिम्।
अश्रुत्वा धर्मं बुद्धानां गत्येषां भोति[3] पापिका[4] ॥ ५१ ॥
चर्याशुद्धिगतिप्रज्ञा[2] क्षीयन्ते सर्वप्राणिनाम्।
सुखं विनश्यतो तेषां सुखसंज्ञा च नश्यति ॥ ५२ ॥
अनाचाराश्च ते भोन्ति असद्धर्मे प्रतिष्ठिताः।
अदान्ता लोकनाथेन दुर्गतिं प्रपतन्ति ते ॥ ५३ ॥
दृष्टो[5] ऽसि लोकप्रद्योत सुचिरेणासि आगतः।
उत्पन्नु सर्वसत्त्वानां कृतेन अनुकम्पकः ॥ ५४ ॥
दिष्ट्या[6] तेमेण प्राप्तो ऽसि बुद्धज्ञानमनुत्तरम्।
वयं ते अनुमोदामो लोकश्चैव सदेवकः ॥ ५५ ॥
विमानानि सुचित्राणि अनुभावेन ते विभो।
ददाम[7] ते महावीर प्रतिगृह्ण[8] महामुने ॥ ५६ ॥
अस्माकमनुकम्पार्थं परिभुञ्ज[9] विनायक।
वयं च सर्वसत्त्वाश्च यया बोधिं स्पृशेमहि[10] ॥ ५७ ॥

1) व्य A. B. W. व्या Cb. व्यः K.
2) All but Cb. O. क्षीयन्ते.
3) भौ A. भो Cb. K. W. गतौ च भवति O.
4) पापकाः A. पापिकाः B. पातिका Cb. पापिका K. पापिता W. पापका O.
5) दिष्टो O.
6) All दृष्ट्वा.
7) वि Cb.
8) मि Cb.
9) ङ्क A. K. W. ङ्का B. ङ्ग Cb. ङ्गाहि नायक O.
10) भुक्ता B. भुक्त्वं Cb. भुंक्ष्व K.
11) स्पृशेषत A. W. स्पृसेमहि B. K. स्पृक्षेमहि Cb. स्पृशेमत्र O., probably more original; cp. similar forms Mahāvastu III, 9.

अथ खलु भित्तवस्ते महाब्रह्माणस्तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धं संमुखमाभिः सान्नप्याभिर्गाथाभिरभिष्टुत्य तं भगवन्तमेतदूचुः । प्रवर्तयतु भगवान्धर्मचक्रं प्रवर्तयतु सुगतो धर्मचक्रं लोके देशयतु भगवान्निर्वृतिं तारयतु भगवान्सर्वसत्त्वाननुगृह्णातु[1] भगवानिमं लोकं देशयतु भगवान्धर्मस्य सदेवकस्य लोकस्य समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः सदेवमानुषासुरायाः । तद्भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥

अथ खलु भित्तवस्तानि पञ्चाशद्ब्रह्मकोटीनयुतशतसहस्राण्येकस्वरेण समसंगीत्या[2] तं भगवन्तमाभ्यां सान्नप्याभ्यां गाथाभ्यामध्यभाषन्त[3] ॥

प्रवर्तय[4] चक्रवरमनुत्तरं प्राहणस्व[5] अमृतस्य दुन्दुभिम् ।
प्रमोचय[6] दुःखशतैश्च सत्त्वान्निर्वाणमार्गं च प्रदर्शयस्व ॥ ५८ ॥
अस्माभिरध्येषितु भाष धर्ममस्माननुगृह्ण इमं च लोकम् ।
वल्गुस्वरं[7] च मधुरं प्रमुञ्च[8] समुदानितं कल्पसहस्रकोटिभिः ॥ ५९ ॥

अथ खलु भित्तवः स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तेषां ब्रह्मकोटीनयुतशतसहस्राणामध्येषणां[9] विदित्वा तेषां च षोडशानां पुत्राणां राजकुमाराणां

1) ह्लोष MSS. The whole passage wanting in O.
2) All but O. समं संगीत्य.
3) माभिः सान्नप्याभिर्गाथाभिरभाषते स्म A. °ध्यभाषत्ते Cb. °भाषत्ते स्म W. माभ्यां °षत्ते स्म B. माभ्यां °षत K. गाथाभिगीतेन धर्मचक्रप्रवर्तनायाध्येषिषु O.
4) या Cb. K.
5) हनाहि O., more original.
6) याहि O.
7) च B. K. W. O. चो Cb. मधुरं च A.
8) मनोरमं B.
9) B. adds मा.

तस्यां वेलायां[1] धर्मचक्रं प्रवर्तयामास त्रिपरिवर्तं द्वादशाकारमप्रवर्तितं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वान्येन वा केनचित्पुनर्लोके सह धर्मेण । यदिदं[2] दुःखमयं दुःखसमुदयो ऽयं दुःखनिरोध इयं दुःखनिरोधगामिनी प्रतिपदार्यसत्यमिति । प्रतीत्यसमुत्पादप्रवृत्तिं च विस्तरेण संप्रकाशयामास । इति हि भित्तवो ऽविद्याप्रत्ययाः[3] संस्काराः[3] संस्कारप्रत्ययं विज्ञानं विज्ञानप्रत्ययं नामरूपं नामरूपप्रत्ययं षडायतनं षडायतनप्रत्ययः स्पर्शः स्पर्शप्रत्यया वेदना वेदनाप्रत्यया तृष्णा तृष्णाप्रत्ययमुपादानमुपादानप्रत्ययो भवो भवप्रत्यया जातिर्जातिप्रत्ययं जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति । एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति । अविद्यानिरोधात्संस्कारनिरोधः संस्कारनिरोधाद्विज्ञाननिरोधो विज्ञाननिरोधान्नामरूपनिरोधो नामरूपनिरोधात्षडायतननिरोधः षडायतननिरोधात्स्पर्शनिरोधः स्पर्शनिरोधाद्वेदनानिरोधो वेदनानिरोधात्तृष्णानिरोधस्तृष्णानिरोधादुपादाननिरोध उपादाननिरोधाद्भवनिरोधो भवनिरोधाज्जातिनिरोधो जातिनिरोधाज्जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यन्ते । एवमस्य केवलस्य महतो दुःखस्कन्धस्य निरोधो भवति ॥

सहप्रवर्तिते चेदं भित्तवस्तेन भगवता महाभिज्ञाज्ञानाभिभुवा तथागतेनार्हता सम्यक्संबुद्धेन धर्मचक्रं[4] सदेवकस्य लोकस्य[5] समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः सदेवमानुषासुरायाः पर्षदः पुरस्तादथ[6] तस्मिन्नेव क्षणलवमुहूर्ते षष्टेः[7] प्राणिकोटीनयुतशतसहस्राणामनुपादायास्रवेभ्यश्चित्तानि विमुक्तानि सर्वे च ते त्रैविद्याः

1) महा added except in Cb. O.
2) इदम् in Cb. only. यदुत इदं O.
3) या °रा K. W.
4) B. adds प्रवर्त.
5) Left out in K.
6) व Cb. K. W.
7) B. O. add खलु.
8) षष्टीनां A. Cb. W. षष्टेः B. षष्ठः K.

षडभिज्ञा अष्टविमोक्षध्यायिनः[1] संवृत्ताः। पुनरनुपूर्वेण भिक्षवः स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धो द्वितीयां धर्मदेशनामकार्षीत्तृतीयामपि धर्मदेशनामकार्षीच्चतुर्थीमपि धर्मदेशनामकार्षीत्[2]। अथ खलु भिक्षवस्तस्य भगवतो महाभिज्ञाज्ञानाभिभुवस्तथागतस्यार्हतः सम्यक्संबुद्धस्यैकैकस्यां धर्मदेशनायां गङ्गानदीवालुकासमानां[3] प्राणिकोटीनयुतशतसहस्राणामनुपादायास्रवेभ्यश्चित्तानि विमुक्तानि। ततः पश्चाद्भिक्षवस्तस्य भगवतो गणनासमतिक्रान्तः श्रावकसंघो ऽभूत्॥

तेन खलु पुनर्भिक्षवः समयेन ते षोडश राजकुमाराः कुमारभूता एव समानाः श्रद्धयागारादनागारिकां प्रव्रजिताः सर्वे च ते श्रामणेरा अभूवन्पण्डिता व्यक्ता मेधाविनः कुशला बहुबुद्धशतसहस्रचरितविनो ऽर्थिनश्चानुत्तरायाः सम्यक्संबोधेः[4]। अथ खलु भिक्षवस्ते षोडश श्रामणेरास्तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतमर्हन्तं सम्यक्संबुद्धमेतदूचुः। इमानि खलु पुनर्भगवंस्तथागतस्य बहूनि श्रावककोटीनयुतशतसहस्राणि महर्द्धिकानि महानुभावानि महेशाख्यानि भगवतो धर्मदेशनया परिनिष्पन्नानि। तत्साधु भगवांस्तथागतो ऽर्हन्सम्यक्संबुद्धो ऽस्माकमनुकम्पामुपादायानुत्तरां सम्यक्संबोधिमारभ्य धर्मं देशयतु यदयमपि तथागतस्यानुशिष्टेमहि। अर्थिनो वयं भगवंस्तथागतज्ञानदर्शनेन। भगवानेवास्माकमस्मिन्नेवार्थे साक्षी त्वं च[7] भगवन्सर्वसत्त्वाशयज्ञो ज्ञानीषे ऽस्माकमध्याशयमिति॥

---

1) MSS. but O. have मोक्षा for मोक्ष; O. has अर्हत्सः. But अष्टविमोक्षा as a Bahuvrīhi is meaningless.

2) From महा till बुद्धो left out in Cb. O. राजकुमारां added here in A. K. W.

3) From महा till बुद्धस्य left out in Cb. O.

4) कोप Cb. वालि for वालु O.

5) या: °धे: B. Cb. K. O. यां °धौ A. Ca. W.

6) नायां O.

7) In Cb. only.

तेन खलु पुनर्भिक्षवः समयेन तान्बालान्दारकान्राजकुमारान्प्रव्रजितान्श्रामणेरान्दृष्ट्वा यावांस्तस्य राज्ञश्चक्रवर्तिनः परिवारस्ततो ऽर्धः प्रव्रजितो ऽभूदशीतिप्राणिकोटीनयुतशतसहस्राणि॥

अथ खलु भिक्षवः स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तेषां श्रामणेराणामध्याशयं विदित्वा विंशतेः कल्पसहस्राणामत्ययेन सद्धर्मपुण्डरीकं नाम धर्मपर्यायं सूत्रान्तं महावैपुल्यं बोधिसत्त्वाववादं सर्वबुद्धपरिग्रहं विस्तरेण संप्रकाशयामास तासां सर्वासां चतसृणां पर्षदाम्॥

तेन खलु पुनर्भिक्षवः समयेन तस्य भगवतो भाषितं ते षोडश राजकुमाराः श्रामणेरा[1] उद्गृहीतवन्तो धारितवन्त[2] आराधितवन्तः पर्यापन्नवन्तः[3]॥

अथ खलु भिक्षवः स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तान्षोडश श्रामणेरान्व्याकार्षीदनुत्तरायां सम्यक्संबोधौ। तस्य खलु पुनर्भिक्षवो महाभिज्ञाज्ञानाभिभुवस्तथागतस्यार्हतः सम्यक्संबुद्धस्येमं सद्धर्मपुण्डरीकं धर्मपर्यायं भाष्यमाणस्य श्रावकाश्चाधिमुक्तवन्तस्ते[7] च षोडश श्रामणेरा बहूनि च प्राणिकोटीनयुतशतसहस्राणि[8] विचिकित्साप्राप्तान्यभूवन्॥

---

1) In Cb. K. only. श्रामणेरका: O.

2) ह्लीषु O. ह्लीत the rest.

3) Left out in Cb. धारयिषु O.

4) आधरित B. left out in O.; which seems preferable.

5) पर्यापुनिषु O.

6) ष्य B.

7) मुच्यिषु: O.

8) This agrees with Kumārajīva's version, as he reads 其餘衆生千萬億種皆生疑惑 'all the rest of beings, a thousand myriads of Koṭis, all felt doubts, and incertainty!» One Msc. has निर्वि°, which would seem more appropriate.

अथ खलु भिक्षवः स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्ध इमं सद्धर्मपुण्डरीकं धर्मपर्यायमष्टौ कल्पसहस्राण्यविश्रान्तो भाषित्वा विहारं प्रविष्टः प्रतिसंलयनाय तथा प्रतिसंलीनश्च भिक्षवः स तथागतश्चतुरशीतिकल्पसहस्राणि विहारस्थित एवासीत्॥

अथ खलु भिक्षवस्ते षोडश श्रामणेरास्तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतं प्रतिसंलीनं विदित्वा पृथक्पृथग्धर्मासनानि सिंहासनानि प्रज्ञाप्य तेषु निषण्णास्तं भगवन्तं महाभिज्ञाज्ञानाभिभुवं तथागतं नमस्कृत्य तं सद्धर्मपुण्डरीकं धर्मपर्यायं विस्तरेण चतसृणां पर्षदां चतुरशीतिकल्पसहस्राणि संप्रकाशितवन्तः। तत्र भिक्षव एकैकः श्रामणेरो बोधिसत्त्वः षष्टिषष्टिगङ्गानदीवालुकासमानि प्राणिकोटीनयुतशतसहस्राण्यनुत्तरायां सम्यक्संबोधौ परिपाचितवान्समादापितवान्संहर्षितवान्समुत्तेजितवान्संप्रकर्षितवानवतारितवान्॥

अथ खलु भिक्षवः स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तेषां चतुरशीतेः कल्पसहस्राणामत्ययेन स्मृतिमान्संप्रज्ञानंस्तस्मात्समाधेर्व्युत्तिष्ठेत् व्युत्थाय

1) All but O. add कोटी.
2) From महा till गतं left out in Cb.
3) Left out in A. Cb.
4) From भगवन्तं till तं left out in Cb.
5) Some MSS. add कोटी.
6) कः K.
7) रा B. W.
8) ब्रा Cb.
9) षष्टि is repeated in A only.
10) समादापितवान् left out in Cb.
11) संहर्षितवान् left out in B. Cb. O.
12) ति A. W. तेः B. तीनां Cb. K. O.
13) कोटी added in A. B. Ca. W.
14) त्यगात् K.

च स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो[1] येन तद्धर्मासनं तेनोपसंक्रामदुपसंक्रम्य[2] प्रज्ञप्त एवासने न्यषीदत्॥

अनन्तरनिषण्णश्च खलु पुनर्भिक्षवः स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतस्तस्मिन्धर्मासने[3] ऽर्धं तावदेव सर्वावन्तं पर्षन्मण्डलमवलोक्य भिक्षुसंघमामन्त्रयामास। आश्चर्यप्राप्ता भिक्षवो ऽद्भुतप्राप्ता इमे षोडश श्रामणेराः प्रज्ञावन्तो बहुबुद्धकोटीनयुतशतसहस्रपर्युपासिताश्चीर्णचरिता बुद्धज्ञानपर्युपासका बुद्धज्ञानप्रतिग्राहका बुद्धज्ञानावतारका बुद्धज्ञानसंदर्शकाः। पर्युपासध्वं भिक्षव एतान्षोडश श्रामणेरान्पुनः पुनर्ये केचिद्भिक्षवः श्रावकयानिका वा प्रत्येकबुद्धयानिका वा बोधिसत्त्वयानिका वैषां कुलपुत्राणां धर्मदेशनां न प्रतिक्षेप्स्यन्ति न प्रतिबाधिष्यन्ते सर्वे ते क्षिप्रमनुत्तरायाः सम्यक्संबोधेर्लाभिनो भविष्यन्ति सर्वे च ते तथागतज्ञानमनुप्राप्स्यन्ति॥

[9]तैः खलु पुनर्भिक्षवः षोडशभिः कुलपुत्रैस्तस्य भगवतः शासने ऽयं सद्धर्मपुण्डरीको धर्मपर्यायः पुनः पुनः संप्रकाशितो ऽभूत्। तैः खलु पुनर्भिक्षवः षोडशभिः श्रामणेरैर्बोधिसत्त्वैर्महासत्त्वैर्यानि तान्येकैकेन बोधिसत्त्वेन महासत्त्वेन षष्टिषष्टिगङ्गानदीवालुकासमानि सत्त्वकोटीनयुतशतसहस्राणि बोधाय समादापितान्यभूवन्सर्वाणि च तानि तैरेव सार्धं

1) From महा till गतो left out in Cb.
2) क्रामदुपसं left out in A. B. W. क्रामुपसं K.
3) From महा till गतस् left out in Cb. O. तथागतस् left out in K.
4) A. B. K. W. add खलु.
5) From अद्भुत till णेराः left out in Cb.
6) All but O. नियुत.
7) Left out in Cb.
8) In Cb. only. In O. much more prolix.
9) तेन B. Cb. तैश्च O.
10) कोप B.

तासु तासु ज्ञातिष्वनुप्रव्रजितानि तान्येव सननुपश्यत्तस्तेषामेवात्तिकाद्धर्ममश्रौषुः। तैश्चत्वारिंशद्बुद्धकोटीसहस्राणयारागितानि केचिद्व्याप्यारागयत्ति॥

आरोचयामि वो भिक्षवः प्रतिवेदयामि वो ये ते षोडश राजकुमाराः कुमारभूता ये तस्य भगवतः शासने श्रामणेरा धर्मभाणका अभूवन्सर्वे ते ऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धाः सर्वे च त एतर्हि तिष्ठन्ति धियत्ते यापयन्ति दशसु दिक्षु नानाबुद्धक्षेत्रेषु बहूनां श्रावकबोधिसत्त्वकोटीनयुतशतसहस्राणां धर्मं देशयन्ति। यदुत पूर्वस्यां दिशि भिक्षवो ऽभिरत्यां लोकधातावक्षोभ्यो १ नाम तथागतो ऽर्हन्सम्यक्संबुद्धो २ मेरुकूटश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। पूर्वदक्षिणस्यां दिशि भिक्षवः ३ सिंहघोषश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः ४ सिंहध्वजश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। दक्षिणस्यां दिशि भिक्षव ५ आकाशप्रतिष्ठितश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धो ६ नित्यपरिनिर्वृतश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। दक्षिणपश्चिमायां दिशि भिक्षव ७ इन्द्रध्वजश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धो ८ ब्रह्मध्वजश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। पश्चिमायां दिशि भिक्षवो ९ ऽमितायुश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः १० सर्वलोकधातूपद्रवोद्वेगप्रत्युत्तीर्णश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। पश्चिमोत्तरस्यां दिशि भिक्षवस्तमालपत्रचन्दनगन्धाभिज्ञश्च ११ नाम तथागतो ऽर्हन्सम्यक्संबुद्धो १२ मेरुकल्पश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। उत्तरस्यां दिशि भिक्षवो १३ मेघस्वरदीपश्च नाम तथागतो ऽर्ह-

1) कात्सद्धर्म K.

2) Left out in Cb.

3) बोधिसत्त्व left out in A. W.

4) यदिदं Cb. O.

5) ब्रह्मध्वजश्च A. K. W.

6) निर् left out in A. K. W.

7) The whole sentence is left out in A. B.

8) मेघस्वरो B. मेघस्वरदीपश्च Cb. मेघस्वराश्च K. मेघस्वरदीपो नाम O.

न्सम्यक्संबुद्धो १४ मेघस्वरराजश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। उत्तरपूर्वस्यां दिशि भिक्षवः १५ सर्वलोकभयोद्वेगक्षोभितत्वविध्वंसनकरश्च नाम तथागतो ऽर्हन्सम्यक्संबुद्धो ऽर्हंश्च भिक्षवः १६ शाक्यमुनिर्नाम तथागतो ऽर्हन्सम्यक्संबुद्धः षोडशमो मध्ये खल्वस्यां सहायां लोकधातावनुत्तरां सम्यक्संबोधिमभिसंबुद्धः॥

ये पुनस्ते भिक्षवस्तदास्माकं श्रामणेरभूतानां सत्त्वा धर्मं श्रुतवन्तस्तस्य भगवतः शासन एकैकस्य बोधिसत्त्वस्य महासत्त्वस्य बहूनि गङ्गानदीवालुकासमानि सत्त्वकोटीनयुतशतसहस्राणि यान्यस्माभिः समादापितान्यनुत्तरायां सम्यक्संबोधौ तान्येतानि भिक्षवो ऽद्यापि श्रावकभूमावेवावस्थितानि परिपाच्यन्त एवानुत्तरायां सम्यक्संबोधौ। एषैषामानुपूर्व्यनुत्तरायाः सम्यक्संबोधेरभिसंबोधनाय। तत्कस्य हेतोः। एवं दुरधिमोच्यं हि भिक्षवस्तथागतज्ञानम्। कतमे च ते भिक्षवः सत्त्वा ये मया बोधिसत्त्वेन तस्य भगवतः

1) मेघस्वर B. W. O. मेघश्वर Cb. मेधेश्वर Ca.

2) This sentence till बुद्धः is left out in A.

3) भय B. W. भया Cb. K. लोकादीप्तभयमन्यितांविधंस° O. Var. rr. mentioned in English translation p. 179: भयाक्षितक्षम्भि° and भयद्वेगक्षम्भि°.

4) रायां °धौ A. W.

5) सत्त्वाना A. B. Cb. K. सत्त्वा W.

6) In B. only.

7) कोप A. B. Cb. W.

8) एतानि left out in W.

9) पर्यंत Cb.

10) एव left out in B.

11) पूर्वी अनु A. B. Cb. W.

12) रां Cb.

13) बोधिमभिसंबुध्य Cb.

14) धिगमो वा A. धिमोच्यां B. धिमोक्ष्यं Cb. धिमोच्यं K. धिमोचा W. धिमुच्यनीयं O.

शासने अप्रमेयाण्यसंख्येयानि गङ्गानदीवालुकासमानि सत्त्वकोटीनयुतशतसहस्राणि सर्वज्ञतामधिमुनश्रावितानि। यूयं ते भिक्षवस्तेन कालेन तेन समयेन सत्त्वा अभूवन्॥

ये च मम परिनिर्वृतस्यानागते ऽध्वनि श्रावका भविष्यन्ति बोधिसत्त्वचर्यां च श्रोष्यन्ति न चावभोत्स्यन्ते बोधिसत्त्वा वयमिति। किं चापि ते भिक्षवः सर्वे परिनिर्वाणसंज्ञिनः परिनिर्वास्यन्ति। अपि तु खलु पुनर्भिक्षवो यदृक्मन्यासु लोकधातुष्वन्योन्यैर्नामधेयैर्विकरामि तत्र ते पुनरुत्पत्स्यन्ते तथागतज्ञानं पर्येषमाणास्तत्र च ते पुनरेवैतां क्रियां श्रोष्यन्ति। एकमेव तथागतानां परिनिर्वाणं नास्त्यन्यद्द्वितीयमितो बहिर्निर्वाणं तथागतानाम्। एतद्भिक्षव उपायकौशल्यं वेदितव्यं धर्मदेशनाभिनिर्हारश्च। यस्मिन्भिक्षवः समये तथागतः परिनिर्वाणकालसमयमात्मनः समनुपश्यति परिप्लुतां च पर्षदं पश्यत्यधिमुक्तिसारां शून्यधर्मगतिंगतां ध्यानवतीं महाध्यानवतीम्। अथ खलु भिक्षवस्तथागतो ऽयं काल इति विदित्वा सर्वान्बोधिसत्त्वान्सर्वश्रावकांश्च संनिपात्य पञ्चादेतमर्थं संश्रावयति। न भिक्षवः किंचिदस्ति लोके द्वितीयं नाम यानं परिनिर्वाणं वा कः पुन-

1) लि K. W.
2) कोप Cb.
3) ता left out in B. ज्ञता left out in Cb. ज्ञताय ध O.
4) ते A.
5) समर्षयि B. W. समयि K.
6) न्येषु B. Ca. K.
7) व्यवक्रियेय B. K. °र्यवक्रिये Cb.
8) पुनरेतां K.
9) द्धि K.
10) परि in K. O. only.
11) सर्वान्सर्वश्रा° B. सर्वबोधि° K.
12) संनिपातयित्वा Cb. समानयित्वा O.
13) व Cb. दिदमर्थं श्रा O.
14) Left out in Cb.

र्वादस्तृतीयस्य। उपायकौशल्यं खल्विदं भिक्षवस्तथागतानामर्कृतां दूरप्रणष्टं सत्त्वधातुं विदित्वा क्लेशाभिरतान्कामपङ्कमग्नांस्तत एषां भिक्षवस्तथागतस्तार्निर्वाणं भाषते यदधिमुच्यन्ते॥

तद्यथापि नाम भिक्षव इह स्यात्पञ्चयोजनशतिकमटवीकान्तारं महाँश्चात्र जनकायः प्रतिपन्नो भवेत्। रत्नद्वीपं गमनाय देशिकश्चैषामेको भवेद्विक्तः पण्डितो निपुणो मेधावी कुशलः खल्वटवीदुर्गाणां स च तं सार्थमटवीमवक्रामयेत्। अथ खलु स महाजनकायः श्रान्तः क्लान्तो भीतस्त्रस्त एवं वदेत्। यत्खल्वार्य देशिक परिणायक जानीया वयं हि श्रान्ताः क्लान्ता भीतास्त्रस्ता अनिर्वृताः। पुनरेव प्रतिनिवर्तयिष्यामो ऽतिदूरमितो ऽटवीकान्तारमिति। अथ खलु भिक्षवः स देशिक उपायकुशलस्तान्पुरुषान्प्रतिनिवर्तितुकामान्विदित्वा एवं चित्तयेत्। मा खल्विमे तपस्विनस्तादृशं महारत्नद्वीपं न गच्छेयुरिति। स तेषामनुकम्पार्थमुपायकौशल्यं प्रयोजयेत्। तस्या अटव्या मध्ये योजनशतं वा

1) अर्कृतां left out in Cb.
2) तां A. B. Cb. ता W. तं K.
3) मग्नां तत्र A. मग्नां तत K. मग्नांस्तत Cb. विलग्नंस्तत K. लग्नां तत्र W. लग्नाः ततो भि° O.
4) त्तः B. ये for यद्द् O.
5) क left out in K.
6) Left out in Cb. O.
7) अति for अव O.
8) यत् left out in Cb.
9) A. B. K. W. O. add आर्य.
10) दूरेयम O.
11) वर्तिं A. Cb. K. वर्त्तयि B. वर्त्ति W.
12) Cb. K. add स.
13) व्यां A. Cb. वी B. व्या K. W. All तस्याम°.

द्वियोजनशतं वा[1] त्रियोजनशतं वातिक्रम्यर्द्धिमयं नगरमभिनिर्मिमीयात्। ततस्तान्पुरुषानेवं वदेत्। मा भवन्तो भैष्ट[3] मा निवर्तध्वमयमसौ महाजनपदो[4] ऽत्र विश्राम्यत।[5] यत्र वो यानि कानिचित्करणीयानि तानि सर्वाणि कुरुध्वमत्र निर्वाणप्राप्ता विहरध्वमत्र विश्रान्ताः। यस्य पुनः कार्यं भविष्यति स तं महारत्नद्वीपं[6] गमिष्यति॥

अथ खलु भिक्षवस्ते कान्तारप्राप्ताः सन्तो आश्चर्यप्राप्ता अद्भुतप्राप्ता[7] भवेयुर्मुक्ता वयमटवीकान्तारादिह निर्वाणप्राप्ता विहरिष्याम इति। अथ खलु भिक्षवस्ते पुरुषास्तद्दृद्धिमयं[8] नगरं प्रविशेयुरागतसंज्ञिनश्च भवेयुर्निस्तीर्णसंज्ञिनश्च भवेयुः[9]। निर्वृताः शीतीभूताः स्म इति मन्येरन्। ततस्तान्स देशिको विश्रान्तान्विदित्वा तद्दृद्धिमयं[10] नगरमन्तर्धापयेदन्तर्धापयित्वा च तान्पुरुषानेवं वदेत्। आगच्छन्तु भवन्तः सन्तो अभ्यासान्न[11] एष महारत्नद्वीपः। इदं तु मया नगरं युष्माकं विश्रामणार्थमभिनिर्मितमिति॥

एवमेव भिक्षवस्तथागतो ऽर्हन्सम्यक्संबुद्धो युष्माकं सर्वसत्त्वानां च देशिकः। अथ खलु भिक्षवस्तथागतो ऽर्हन्सम्यक्संबुद्ध एवं पश्यति। महदिदं क्लेशकान्तारं[12] निर्गन्तव्यं[13]

1) वा द्वि° वा left out in A. W.

2) त्रि° वा left out in B. Cb. K.

3) A. adds मितो B. W. add मितिः Cb. reads माषध (meant भायधे) for भैष्ट. O. has भायथ.

4) ज्ञनपदे K.

5) आम अत्र K. अमथ O.

6) द्वीपनगरं A. W. महानगरं रत्नद्वीपं B. K.

7) Left out in Cb.

8) मृ B. Cb. K.

9) K. adds निर्वाणसंज्ञिनश्च भवेयुः.

10) मृ B. Cb. K.

11) से B. K. शे O.

12) महांतमिदं Cb. O.

13) र्भे A. B. K. W.

निष्क्रान्तव्यं[1] प्रक्रान्तव्यम्[2]। मा खल्विमं एकमेव[3] बुद्धज्ञानं श्रुत्वा द्रवेणैव[4] प्रतिनिवर्तयेर्युर्नैवोपसंक्रमेयुः। बकुपरिक्लेशमिदं[5] बुद्धज्ञानं समुदानयितव्यमिति। तत्र तथागतः सत्त्वान्दुर्बलाशयान्विदित्वा यथा स देशिकस्तद्दृद्धिमयं नगरमभिनिर्मिमीते तेषां सत्त्वानां विश्रामणार्थं विश्रान्तानां चैषामेवं[6] कथयतीदं खल्वृद्धिमयं नगरमिति। एवमेव भिक्षवस्तथागतो ऽप्यर्हन्सम्यक्संबुद्धो महोपायकौशल्येनान्तरा द्वे निर्वाणभूमी सत्त्वानां विश्रामणार्थं देशयति संप्रकाशयति[7]। यदिदं श्रावकभूमिं प्रत्येकबुद्धभूमिं च। यस्मिंश्च भिक्षवः समये ते सत्त्वास्तत्र स्थिता भवन्ति। अथ खलु[8] भिक्षवस्तथागतो ऽप्येवं संश्रावयति। न खलु पुनर्भिक्षवो यूयं कृतकृत्याः कृतकरणीयाः[9]। अपि तु खलु पुनर्भिक्षवो युष्माकमभ्यांश[10] इतस्तथागतज्ञानं व्यवलोकयध्वं भिक्षवो व्यवचारयध्वं यद्युष्माकं निर्वाणं नैव निर्वाणम्[11]। अपि तु खलु पुनरुपायकौशल्यमेतद्भिक्षवस्तथागतानामर्कृतां सम्यक्संबुद्धानां यन्नीणि यानानि संप्रकाशयन्तीति॥

अथ खलु भगवानिममेवार्थं[12] भूयस्या मात्रयोपदर्शयमानस्तस्यां वेलायामिमा गाथा अभाषत॥

1) In Cb. only.

2) Left out in B. Cb.

3) खलु मे एमेव A. खल्विमे एकमेव B. खल्विमे एवमेव Cb. खल्विदमेव K. खल्वमे एकमेव W. खल्विमे सत्त्वा एक एव O.

4) द्राविनाथ Cb.

5) A. W. add सं.

6) K. adds सत्त्वानाम् before एवम्.

7) In A. W. only.

8) Left out in A. K. W.

9) पुनर् left out in A. B. Cb. K.

10) From अपि till निर्वाणम् left out in A.

11) अभ्यासे in B. K. W.

12) नैतन्नि K. नैव O. नैवं the rest.

13) र्थगतिं A. B. W. मामेवार्थगतिं K.

अभिज्ञज्ञानाभिभु लोकनायको यदोधिमण्डस्मि निषण्ण आसीत्।
दशेक्ख[2] सो अत्तरकल्प पूर्णान्न लप्सि बोधिं परमार्थदर्शी॥ ६०॥
देवाथ नागा असुराथ गुह्यका उद्युक्त पूजार्थ जिनस्य तस्य।
पुष्पाण वर्षं प्रमुमोचु तत्र बुद्धे च बोधिं नरनायके ऽस्मिन्॥ ६१॥
उपरिं[3] चे खे दुन्दुभयो विनेदुः[4] सत्कारपूजार्थ जिनस्य तस्य।
सुदुःखिता चापि जिनेन तत्र चिरबुध्यमानेन अनुत्तरं पदम्॥ ६२॥
दशान चो अत्तरकल्प[6] अत्ययात्स्पृशे स बोधिं भगवाननाभिभूः।
हृष्टा उदग्गास्तद ग्रामु[7] सर्वे देवा मनुष्या भुजगासुराश्च॥ ६३॥
वीराः कुमारा अथ तस्य षोडश पुत्रा गुणाग्या नरनायकस्य।
उपसंक्रमी प्राणिसहस्रकोटिभिः पुरस्कृतास्तं द्विपदेन्द्रमग्र्यम्॥ ६४॥
वन्दित्व पादौ च विनायकस्य अध्येषिषू धर्म प्रकाशयस्व।
अस्मांश्च तर्पेहि इमं च लोकं सुभाषितेनेक्ख नरेन्द्रसिंह॥ ६५॥
चिरस्य लोकस्य दशद्दिशे ऽस्मिन्विदितो ऽसि उत्पन्नु महाविनायक।
निमित्तसंचोदनहेतु प्राणिनां ब्राह्मा[8] विमानानि प्रकम्पयन्तः[9]॥ ६६॥
दिशाय पूर्वाय सहस्रकोट्यः क्षेत्राण पञ्चाशदभूषि कम्पिताः।
तत्रापि ये ब्राह्म[10]विमान अग्रास्ते तेजवन्तो अधिमात्रमासि[11]॥ ६७॥

1) यदि Cb. O.
2) दशसहस्रो K.
3) उपरि खे A. उपरिञ्च खे B. K. उपरेव च Cb. उपरिं खे W. उपरे च ते O.
4) विनर्दति Cb. निनादयो O.
5) चासि O.
6) म Cb. O.
7) सो A. स B. सि Cb. W. O. सु K.
8) ब्राह्मं K. W.
9) प्रकाश Cb. °यन्तो O.
10) ब्र A. W.
11) अधिमानमासी A. W. अधिमात्र आसि B. Cb. K. O.

विदित्व ते पूर्वनिमित्तमीदृशमुपसंक्रमी लोकविनायकेन्द्रम्।
पुष्पैरिक्ष[1]भ्योकिरियाण नायकमर्पेसि[2] ते सर्व विमान तस्य॥ ६८॥
अध्येषिषू चक्रप्रवर्तनाय गाथाभिगीतेन[3] अभिस्तविंसु।
तूष्णीं च सो आसि नरेन्द्रराजा न ताव कालो मम धर्म भाषितुम्॥ ६९॥
एवं दिशा दक्षिणयापि तत्र अथ पश्चिमाक्ष्टिम[5] उत्तरस्याम्।
उपरिष्टिमायां विदिशासु चैव आगत्य ब्रह्माण[6] सहस्रकोट्यः॥ ७०॥
पुष्पेभि[7] अभ्योकिरियाण नायकं[8] पादौ च वन्दित्व विनायकस्य।
निर्यातयित्वा च विमान सर्वानभिष्टवित्वा पुनरभ्ययाचि[10]॥ ७१॥
प्रवर्तया[11] चक्रमनुत्तचक्षुः सुदुर्लभस्त्वं बहुकल्पकोटिभिः।
दर्शेक्ष्हि मैत्रीबल[12] पूर्वसेवितमपावृणोक्ष्हि[13] अमृतस्य द्वारम्॥ ७२॥
अध्येषणां ज्ञात्व अनुत्तचक्षुः प्रकाशते[14] धर्म बहुप्रकारम्।
चत्वारि सत्यानि च विस्तरेण प्रतीत्य सर्वे इमि[15] भाव उत्थिताः[16]॥ ७३॥

1) अभ्यो B. K. O. अभ्या the rest.
2) स्पशेषु Cb. °क्किरि तं महामुनि निर्यादयिन्मुश्च वि O.
3) गीतेन A. K. W. O. गीतेभि the rest.
4) जिने Cb.
5) मक्ष A. W. मेक्ष B. माक्ष Cb. मक्ष्ये K. पश्चिमायोत्तरक्ष्टिमायाम् O.
6) ब्रह्मण W. ब्राह्मण Cb.
7) Only in O.
8) च तथ तायिनं B. अभ्योकिरीयान च ते तायिनं K. अभ्याकिरियाण च Cb.
9) सर्वे K. O.
10) पुनरभ्ययाचि A. B. K. W. पुनरप्यवाचि Cb. पुनरेव याचि O.
11) य K. O. The final vowel long before the pause.
12) मैत्राबल O.; cp. Pāli *mettā*.
13) वृणाक्हि O.; better.
14) प्रभाषते Cb. प्रकाशि स O.
15) इम K.
16) उत्थिता A. W. उच्छ्रिता B. संभुता Cb. उत्थिताः K.

अविद्य आदीकरियाण[1][2] चतुमान्प्रभाषते स मरणान्तिडुःखम्[3]।
ज्ञातिप्रसूता इमि सर्वदोषा मृत्युं च मानुष्यमिमेव ज्ञानद्य ॥ ७४ ॥
समनन्तरं भाषितुं[4] धर्म तेन वङ्कप्रकारा विविधा अनन्ताः।
श्रुत्वानशीतोनयुतान कोट्यः सत्त्वाः स्थिताः आवकभूतले लघुम्[5][6] ॥ ७५ ॥
तेषां द्वितीयं अथ अभूषि जिनस्य तस्यो[7] वङ्कधर्म भाषतः।
विशुद्धसत्त्वा यथ गङ्गवालुकाः तेषोन ते आवकभूत आसीत्[8] ॥ ७६ ॥
ततोत्तरिं[9][10] अगणिषु[11] तस्य आसीत्संघस्तदा लोकविनायकस्य।
कल्पान कोटीनयुता गणेत्त[12] एकैक[13] नो चान्तु[14] लभेय तेषाम् ॥ ७७ ॥
ये चापि ते षोडश राजपुत्रा ये ओरसा चैलकभूत[15] सर्वे।
ते आमणेरा अवचिंसु[16] तं जिनं प्रकाशयां[17] नायक अग्रधर्मम् ॥ ७८ ॥

1) आदि A. W. आशी B. Cb. आदी K. O.
2) णाय K.
3) All but O. मरणमनन्त.
4) त K. O.
5) Left out in Cb.
6) भूमिये लघु O.; the others भूतलेघुम्.
7) तस्य O., preferable.
8) लि Cb. K. W. O.
9) भूमि B. K. सर्वि Cb. O.
10) रं A. read रिं.
11) य A. B. W.
12) गणोत्तो K. गणेया O.
13) कु Cb. K. कि O.
14) त्त A. Cb. K. W. त्तु B. नो च लभेत अन्तम् O. The others have लभेयु.
15) बल A. चेल्ल B. K. वेल्ल Cb. चेल W. चेड O.
16) °चित्मु K. चिन्मु O.
17) शय O.; correctly.

यथा वयं लोकविदू[1] भवेम यथेव त्वं सर्वज्ञिनानमुत्तम[2][3]।
इमे च सत्त्वा भवि सर्वि[4] एवं यथेव त्वं वीर विशुद्धचक्षुः[5] ॥ ७९ ॥
सो चा जिनो[6] आशयु ज्ञात्व तेषां कुमारभूतान तथात्मज्ञानाम्[7]।
प्रकाशयी उत्तममग्रबोधिं दृष्टान्तकोटीनयुतैरनेकैः ॥ ८० ॥
केतूसहस्रैरुपदर्शयन्तो[8] अभिज्ञज्ञानं च प्रवर्तयन्तः[9]।
भूतां चरिं[10] दर्शयि[11] लोकनाथो यथा चरन्तो[12] विदुबोधिसत्त्वाः ॥ ८१ ॥
इदमेव सद्धर्मपुण्डरीकं वैपुल्यसूत्रं भगवानुवाच[13]।
गाथासहस्रेकि अनल्पकेकि[14] येषां प्रमाणं यथ गङ्गवालिकाः[15] ॥ ८२ ॥
सो चा जिनो[16] भाषिय सूत्रमेतद्विहारु[17] प्रविशिव[18] विलप्तयीत[19]।
पूर्णानशीतिश्चतुरश्च कल्पान्समाकृतिकासनि लोकनाथः ॥ ८३ ॥

1) य A. B. Cb. W. त K.
2) प्रज्ञा A. B. K. W. ज्ञिना Cb. प्रज्ञान उ O.
3) मा K.
4) सर्व एवं A. W. सर्वमेव B. सत्त्व एव Cb. सर्वि एव K.
5) चतुषा Cb.; i. e. चतुषः.
6) चञ्जिना Cb. चञ्जिनो K. च जिनो A. B. Ca. W. च जिन O.
7) दा Cb.
8) यंत A. B. W. O. यंतो Cb. K.
9) प्रवर्तयंतः A. B. प्रकीर्तयंतो Cb. प्रवर्त्तयंतो K. प्रवर्त्तयंतो W.
10) श्च Cb. W.
11) देशय Cb.
12) व B. Cb. W. च K. Read चरन्ति.
13) स B. सु K. left out in Cb. W. From अभिज्ञानं until वैतुल्य° wanting in O.
14) त्त Cb. अनूनकेभिः O.
15) In all but A. W. का.
16) चञ्जिनो W. च जिनो the rest.
17) र् A. Cb. K. W. O. रु B.
18) प्रांषसिव A. W. प्रविसिव B. प्रतिसिव Cb. प्रविशिव K. O.
19) यीत A. Cb. W. यीत् K. पित्वा B. यीतः O.

ते श्रामणेराश्च विदित्व नायकं विरहारि[1] श्रासन्नमनिष्क्रमन्तम्।
संश्रावयिंसु[2] बहुप्राणिकोटिनां बोधं इमं ज्ञानमनास्रवं शिवम्॥ ८४॥
पृथक्पृथगासन[3] प्रज्ञपित्वा श्रभाषि तेषामिदमेव सूत्रम्।
सुगतस्य तस्य[4] तद् शासनस्मिन् श्रधिकार[5] कुर्वन्तिममेवरूपम्॥ ८५॥
गङ्गा यथा वालुक श्रप्रमेया[6] सकृन्नषिष्टं तद् श्रावयिंसु।
एकैकु[7] तस्य[8] सुगतस्य पुत्रो विनेति सत्त्वानि श्रनल्पकानि॥ ८६॥
तस्यो[9] जिनस्य[9] परिनिर्वृतस्य चरित्व ते पश्यिसु[10] बुद्धकोट्यः।
तेही[11] तदा श्रावितकेहि सार्धं कुर्वन्ति पूजां द्विपदोत्तमानाम्॥ ८७॥
चरित्व चर्यां विपुलां[12] विशिष्टां बुद्ध्वा[13] च ते बोधि दशदि्[14]शासु।
ते षोडशा तस्य जिनस्य पुत्रा दिशासु सर्वासु द्वयो द्वयो जिनाः॥ ८८॥

1) र A. B. Cb. K. रि W. रमा O.
2) यत्सु A. यंसू B. यिंसू Cb. K. यिन्सु O. यित् W.
3) All but O. नि; but श्रासनम् is of the neuter gender.
4) All तस्यो, except O.
5) रु K.
6) यो W. Rather याः.
7) क A. B. K. W. O. कु Cb.
8) तत्र B. K.
9) स्य A. Cb. W. O. स्यो B. K.
10) चरिष्यते पस्यिसु Cb.
11) तेहि K. तेभिः सह O.
12) विमलां O.
13) बुध्या A. बुध्वा W. प्राप्ताश्च O.
14) दशन्दि् O.

ये चापि संश्रावितका तदासो[1] ते श्रावका तेष[2] जिनान सर्वे।
इममेव[3] बोधिं उपनामयन्ति क्रमक्रमेण[4] विविधैरुपायैः॥ ८९॥
श्रहं पि श्रभ्यन्तरि[5] तेष[6] श्रासीन्मयापि संश्रावित सर्विं यूयम्[7]।
तेनो[8] मम श्रावक यूयमद्य बोधावुपायेन[9] कृ सर्वि नेमि॥ ९०॥
श्रयं[10] खु हेतुस्तद पूर्व श्रासीद्यं प्रत्ययो येन क्रु धर्म भाषे।
नयाम्यहं येन[11] ममाग्रबोधिं मा भित्तवो उत्त्रसथेह स्थाने॥ ९१॥
यथाटवी उग्र भवेय[12] दारुणा शून्या निरालम्ब निराश्रया च
बहुश्वापदा चैव श्रपानिया[13] च बालान सा भीषणिका भवेत॥ ९२॥
पुरुषाण च तत्र सहस्रनेका[14] ये प्रस्थितास्तामटवीं भवेयुः।
श्रटवी च सा शून्य भवेत दीर्घा पूर्णानि पञ्चाशत[15] योजनानि॥ ९३॥

1) सि B. K.
2) षु A. K.
3) द् A. B. K. W. म Cb. कृमेव बाधौ O.
4) णा A. B. K. W. O. णा Cb.
5) रु Cb. र O. रि the rest.
6) षु A. Cb. K. W. ष B. O.
7) युष्मि सर्वे O. Cp. युष्मे Mahāvastu I, 313, 8; III, 86, 7.
8) तेन A. B. W. O. तेनो Cb. K.
9) नरु A. W. O. तिम Cb. निरु B. Ca. K. रु = क्रु, Skr. श्रहं.
10) श्रहं Cb.
11) योनि B. येमि K. W. येन यमग्र O. Read येनिममग्र°.
12) यथापि श्रटवी भवि श्रग्र Cb. यथापि श्रटवी भवि दुर्ग O.
13) चैव पद्मानिया च A. W. चैव श्रपानियानि B. चैव श्रपानिया च K. श्रपान Cb.
14) का A. O. क B. के Cb. K. को W.
15) ति A. B. K. W. त Cb. O.

पुरुषश्च आद्यः स्मृतिमत्तु[1] व्यक्तो धीरो विनीतश्च विशारदश्च
यो देशिकस्तेषु[2] भवेत[3] तत्र अटवीय दुर्गाय सुभैरवाय ॥ ९४ ॥
[4]ते चापि खिन्ना बकु[5]प्राणिकोव्य[6] उवाच तं देशिक तस्मि[7] काले ।
खिन्ना वयं आर्य न शक्नुयाम निवर्तनं अग्यिकु[9] रोचते नः ॥ ९५ ॥
कुशलश्च सो पि[10] तद पण्डितश्च प्रणायकोपाय[11] तदा विचिन्तयेत् ।
धिक्कष्ट रत्नैरिमि सर्वि बाला अश्यन्ति[13] आत्मान निवर्तयन्तः ॥ ९६ ॥
[14]यन्नून कं ऋद्धिबलेन[15] वाप्य नगरं मरुत्तं अभिनिर्मिणेयम्[16] ।
प्रतिमण्डितं वेश्मसहस्रकोटिभिर्विकार-उद्यानुपशोभितं च ॥ ९७ ॥
वापो नदीयो[17] अभिनिर्मिणेयम्[16] आरामपुष्पे[18] प्रतिमण्डितं च ।
प्राकारद्वारैरुपशोभितं च नारीनरैश्चाप्रतिमैरुपेतम् ॥ ९८ ॥

1) त्त B. O.
2) तत्र भवेत तेषाम् O. The others have तस्य for तेष.
3) भवेच्च K.
4) ये K.
5) प्राण K. O.
6) व्याः B. व्यो Cb. ट्य O.
7) तस्मिं K. W. तस्मिन् A.
8) कामा A. W. कर्मा B. चासो Cb. यामो K. यामु O.
9) अद्दिकु K.
10) पि A. B. K. W. O. पी Cb.
11) पु K.
12) चात्र Cb. वारा W.
13) वसेति B. श्रेशिन्सु O.
14) The whole of the 97th verse and the first half of the next are left out in Cb.
15) चा K. W. अ O.
16) °र्मियणित्वा A. °र्मिनित्वा B. °र्मिणित्वा K. अर्निमिलित्वा W. °र्मिणेयम् O.
17) या A. यो B. K. left out in W.
18) ष्प A. K. W. O. ष्पे B.

निर्माणु[1] कृत्वा इति तान्वदेय मा भायथा कश्च कदाचि चैव ।
प्राप्ता भवन्तो नगरं वरिष्ठं प्रविश्य कार्याणि कुरुध्व[3] क्षिप्रम् ॥ ९९ ॥
उदग्रचित्ता भवथेकु निर्वृता निस्तीर्ण[4] सर्वा अटवी अशेषतः ।
आश्वासनार्थाय वदेति वाचं कथं न[5] प्रत्यागत[6] सर्वि अस्या[7] ॥ १०० ॥
विश्रान्तरूपांश्च विदित्व सर्वान्समानयित्वा च पुनर्ब्रवीति ।
आगच्छथ[8] मक्ष शृणोथ भाषतो ऋद्धीमयं नगरमिदं विनिर्मितम् ॥ १०१ ॥
युष्माक खेदं च मया विदित्वा निवर्तनं मा च भविष्यतीति ।
उपायकौशल्यमिदं ममेति ज्ञनेथ वीर्यं गमनाय द्वीपम् ॥ १०२ ॥
[10]एमेव कं भिक्षव देशिको वा [11]प्रणायकः प्राणिसहस्रकोटिनाम् ।
खिद्यन्त पश्यामि तथैव प्राणिनः क्लेशाण्डकोशं न प्रभोन्ति भेत्तुम् ॥ १०३ ॥
ततो मया चिन्तितु एष अर्थो विश्रामभूता इमि[12] निर्वृतीकृता[13] ।
सर्वस्य दुःखस्य निरोध[14] एष अकृत्तभूमौ कृतकृत्य यूयम् ॥ १०४ ॥

1) णा A. Cb. K. W. णु B. अभिनिर्मिणित्वा O.
2) अभासं A. W. मा ना K. थ for था O., correctly.
3) ध्वं W. करोथ O., better.
4) All but O. absurdly वि for नि.
5) च B. नु in the others.
6) गत left out in A. W.
7) अस्मा A. W. अस्या, Skr. स्यात्, for अस्यु, Skr. स्युः.
8) ध्व K. था the rest but O.
9) °र्त्तन माखु न भेष्य K. तु for च O. The original r. perhaps मा सु, Skr. मा स्म.
10) एवमेवाकं A.
11) परि O.
12) इय B. K.
13) ता in all MSS.
14) निरोध O. नुबोध in all other MSS. But Kumārajīva seems to read निरोध.

समये यदा तु स्थित अत्र स्थाने पश्यामि यूयमर्कृत[1] तत्र[2] सर्वान्[3]।
तदा[4] च सर्वानिह संनिपात्य[5] भूतार्थमाख्यामि यथैष धर्मः ॥ १०५ ॥
उपायकौशल्य[6] विनायकानां यथान देशेन्ति त्रयो मर्हषी।
एकं हि यानं न द्वितीयमस्ति विश्रामणार्थं तु द्वि यान देशिता[8] ॥ १०६ ॥
ततो वदेमि[9] अहमद्य भिक्षवो जनेथ वीर्यं परमं उदारम्।
सर्वज्ञज्ञानस्य कृतेन यूयं नैतावता निर्वृति काचि भोति[10] ॥ १०७ ॥
सर्वज्ञज्ञानं तु यदा स्पृशिष्यथ दशो बला ये च जिनान धर्माः।
द्वात्रिंशतीलक्षणचित्रकायो बुद्धा भविष्यथ भवेथ निर्वृताः ॥ १०८ ॥
एतादृशी देशन नायकानां विश्रामहेतोः प्रवदन्ति निर्वृतिम्।
विश्रान्त ज्ञात्वा न च निर्वृतीये[11] सर्वज्ञज्ञाने उपनेन्ति सर्वान्[12] ॥ १०९ ॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये[13] पूर्वयोगपरिवर्तो नाम सप्तमः ॥

---

1) कृत A. Cb. K. W. O. कृत B. To read वो for यूयम्?
2) In B. only.
3) सत्वात् Cb. O. has भूमौ for तत्र सर्वान्.
4) तथा A. B. W. ततो कृ O.
5) त्य B.
6) ल्य A. B. K. W. O. ल्यु Cb.
7) यश्च A. च B. न K. र्च W. left out in Cb.
8) ता A. W. ते Cb. देशना B. K.
9) All but O. वदामी.
10) This latter half of the verse is left out in Cb. MSS. वि for चि.
11) या O.; should be य.
12) सर्वमिति B. सर्वान्निति Cb. सर्वे O. उपनेति सर्वानिति K.
13) इति सद्धर्मपुंडरीके A. W. आर्यसद्धर्मपुंडरीकस्य धर्मपर्याय B. आर्य °पर्यायं K. left out altogether in Ca. Cb.

VIII.

अथ खल्वायुष्मान्[1] पूर्णो मैत्रायणीपुत्रो भगवतो ऽर्चिकादिदृमेवंरूपमुपायकौशल्य-ज्ञानदर्शनं[2] संधाभाषितनिर्देशं श्रुत्वेषां च महाश्रावकाणां व्याकरणं श्रुत्वेमां च पूर्वयोगप्रतिसंयुक्तां कथां श्रुत्वेमां च भगवतो वृषभतां[4] श्रुत्वाश्चर्यप्राप्तो ऽभूद्[5] द्भुतप्राप्तो ऽभून्निरामिषेण[6] च चित्तेन[7] प्रीतिप्रामोद्येन स्फुटो ऽभूत्। मुक्तश्च प्रीतिप्रामोद्येन मुक्तया च धर्मगौरवेणोत्थायासनाद्भगवतश्चरणयोः प्रणिपत्यैवं चित्तमुत्पादितवान्[8]। आश्चर्यं भगवन्नाश्चर्यं सुगत परमदुष्करं तथागता अर्हन्तः सम्यक्संबुद्धाः कुर्वन्ति य इमं नानाधातुकं लोकमनुवर्तयन्ते[10] बहुभिश्चोपायकौशल्यज्ञाननिर्दर्शनैः सत्त्वानां धर्मं देशयन्ति[11] तस्मिंस्तस्मिंश्च सत्त्वान्विलग्नानुपायकौशल्येन प्रमोचयन्ति। किमत्र भगवन्नस्माभिः शक्यं कर्तुम्। तथागत एवास्माकं जानीत आशयं पूर्वयोगचर्यां च। स भगवतः पादौ शिरसाभिवन्द्यैकान्ते स्थितो ऽभूद्भगवन्तमेव नमस्कुर्वन्ननिमिषाभ्यां च नेत्राभ्यां[12] संप्रेक्षमाणः ॥

---

1) र्ण B.
2) न Cb. K. W.
3) तं K.
4) भि Cb. K. भितं O.
5) भूत् in Cb. only. बभूव in O.
6) In Cb. only.
7) Left out in B. Cb. K. भोजनं is added in A. W.
8) योर्नि K. पादयोः शिरसा O.
9) A. W. add उत्पादयामासुः; Cb. O. read °मास.
10) न्तीति B. Cb. K. र्तयन्तीति O..
11) A. adds स्म.
12) नयना B. K. °भिर्नेत्रेभि प्रे° O.

अथ खलु भगवानायुष्मतः पूर्णस्य मैत्रायणीपुत्रस्य चित्ताशयमवलोक्य सर्वावन्तं भिक्षुसंघमामन्त्रयते स्म। पश्यथ[1] भिक्षवो यूयमिमं आवकं पूर्णं मैत्रायणीपुत्रं यो मयास्य[2] भिक्षुसंघस्य धर्मकथिकानामग्र्यो[3] निर्दिष्टो वर्ण्यश्च भूतैर्गुणैरभिष्टुतो वर्ण्यश्च प्रकारैरस्मिन्मम शासने सद्धर्मपरिग्रहायाभियुक्तः[4]। चतसृणां पर्षदां संदर्शकः[5] समादापकः समुत्तेजकः संप्रहर्षको[6] ऽक्लान्तो धर्मदेशनया[7] अनालसस्य धर्मस्याख्याता अलमनुग्रहीता सब्रह्मचारिणाम्। मुक्त्वा भिक्षवस्तथागतं नान्यः शक्तः पूर्णं[8-9] मैत्रायणीपुत्रमर्थतो वा व्यञ्जनतो वा पर्यादातुम्। तत्किं मन्यध्वे भिक्षवो ममैवायं सद्धर्मपरिग्राहक इति। न खलु पुनर्भिक्षवो युष्माभिरेवं द्रष्टव्यम्[10]। तत्कस्य हेतोः। अभिज्ञानाम्यहं भिक्षवो ऽतीते ऽध्वनि नवनवतीनां बुद्धकोटीनां यत्रानेनैव तेषां बुद्धानां भगवतां शासने सद्धर्मः परिगृहीतः। तत्रापि नाम ममैतर्हि सर्वत्र चाग्र्यो[11] धर्मकथिकानामभूत्सर्वत्र च[12] शून्यतागतिंगतो[13] ऽभूत्सर्वत्र च प्रतिसंविदां लाभ्यभूत्सर्वत्र च बोधिसत्त्वाभिज्ञासु गतिंगतो ऽभूत्। सुविनिश्चितधर्मदेशको निर्विचिकित्सधर्मदेशकः परिशुद्धधर्मदेशकश्चाभूत्। तेषां च बुद्धानां भगवतां शासने यावदायुष्प्रमाणं[14] ब्रह्मचर्यं चरितवान्सर्वत्र च आवक इति संज्ञायते स्म। स

1) Some MSS. have पश्यध्वं.
2) स्य left out in A. W. ये O.
3) ग्रो B. K. O.
4) ग्रहायभि K. ग्रहायाभि O.; the rest ग्रहाभि.
5) दर्शकः K.
6) Left out in Cb.
7) यै A. Cb. W. या B. O. नया K.
8) ता ग्र A. Cb. W. ताः ग्र B. ताल K.
9) र्णा A. K. W.
10) पुनरेवं भि B. K. युष्माभिर् wanting in O.
11) चैषाग्र्यो O.
12) Left out in K. W.
13) A. W. add यान; B. K. add योग. शून्यतापा ग O.; read °यां.
14) प्रमाणं in K. only. ष्कं O.; preferable.

खल्वनेनोपायेनाप्रमेयाणामसंख्येयानां सत्त्वकोटीनयुतशतसहस्राणामर्थमकार्षीदप्रमेयानसंख्येयांश्च सत्त्वान्परिपाचितवाननुत्तरायां सम्यक्संबोधौ। सर्वत्र च बुद्धकृत्येन सत्त्वानां प्रत्युपस्थितो ऽभूत्सर्वत्र चात्मनो बुद्धक्षेत्रं परिशोधयति स्म सत्त्वानां च[2] परिपाकायाभियुक्तो[3] ऽभूत्। एषामपि भिक्षवो विपश्यिप्रमुखानां सप्तानां तथागतानां येषामहं सप्तम एष एवाग्र्यो धर्मकथिकानामभूत्[4]॥

यदपि तद्भिक्षवो भविष्यत्यनागते ऽध्वन्यस्मिन्भद्रकल्पे चतुर्भिर्बुद्धैर्भगवद्भिर्[5] बुद्धसहस्रं तेषामपि शासन एषैव[6] पूर्णो मैत्रायणीपुत्रो ऽग्र्यो धर्मकथिकानां भविष्यति सद्धर्मपरिग्राहकश्च[7] भविष्यति। एवमनागते ऽध्वन्यप्रमेयाणामसंख्येयानां बुद्धानां भगवतां सद्धर्ममाधारयिष्यति[8] अप्रमेयाणामसंख्येयानां सत्त्वानामर्थं करिष्यति[9] अप्रमेयानसंख्येयांश्च सत्त्वान्परिपाचयिष्यत्यनुत्तरायां सम्यक्संबोधौ। सततसमितं चाभियुक्तो भविष्यत्यात्मनो बुद्धक्षेत्रपरिशुद्धये सत्त्वपरिपाचनाय[10]। स इमामेवंरूपां बोधिसत्त्वचर्यां परिपूर्य[11] अप्रमेयैरसंख्येयैः कल्पैरनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यते। धर्मप्रभासो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यति विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवानस्मिन्नेव बुद्धक्षेत्र उपपत्स्यते॥

1) अथ खलु तेषां तेनो A. W.
2) In K. only.
3) परिपाकायाभि B. K. O. परिपाकाभि Cb. विपाकाभि A. Ca. W.
4) From भूत् till धर्मकथिकानां in the following paragraph is left out in A.
5) बुद्धैर्भगवद्भिर्बुद्धानां B. K.
6) वं Cb. ष एव O.. correctly.
7) प्रति Cb.
8) मागमि B. Cb. मारागयि K. This points to a r. आराधयिष्यति.
9) कृत्वा अप्र B. K.
10) पाकाय च B. K. O.
11) पूरयित्वा A. Cb. W. O. more original.

तेन खलु पुनर्भिक्षवः समयेन[1] गङ्गानदीवालुकोपमात्त्रिसाहस्रमहासाहस्रलोकधातव एकं[2] बुद्धक्षेत्रं भविष्यति । समं पाणितलजातं सप्तरत्नमयमपगतपर्वतं सप्तरत्नमयैः कूटागारैः परिपूर्णं भविष्यति । देवविमानानि चाकाशस्थितानि[3] भविष्यन्ति देवा अपि मनुष्यान्द्रक्ष्यन्ति मनुष्या[4] अपि देवान्द्रक्ष्यन्ति । तेन खलु पुनर्भिक्षवः समयेनेदं बुद्धक्षेत्रमपगतपापं भविष्यत्यपगतमातृग्रामं च । सर्वे च ते सत्त्वा औपपादुका भविष्यन्ति ब्रह्मचारिणो मनोमयैरात्मभावैः स्वयंप्रभा ऋद्धिमन्तो वैकायसंगमा वीर्यवन्तः स्मृतिवन्तः प्रज्ञावन्तः सुवर्णवर्णैः समुच्छ्रयैर्द्वात्रिंशद्भिर्महापुरुषलक्षणैः समलंकृतविग्रहाः । तेन खलु पुनर्भिक्षवः समयेन तस्मिन्बुद्धक्षेत्रे तेषां सत्त्वानां द्वावाहारौ भविष्यतः । कतमा द्वौ । यदुत[6] धर्मप्रीत्याहारो ध्यानप्रीत्याहारश्च । अप्रमेयाणि[7] चासंख्येयानि बोधिसत्त्वकोटीनयुतशतसहस्राणि भविष्यन्ति सर्वेषां च[8] महाभिज्ञाप्राप्तानां प्रतिसंविदतिंगतानां सत्त्ववशवादकुशलानाम्। गणनासमतिक्रान्ताश्चास्य श्रावका भविष्यन्ति महर्द्धिका महानुभावा अष्टविमोक्षध्यायिनः । एवमपरिमितगुणसमन्वागतं तद्बुद्धक्षेत्रं भविष्यति । रत्नावभासश्च नाम स कल्पो भविष्यति । सुविशुद्धा च नाम सा लोकधातुर्भविष्यति । अप्रमेयानसंख्येयांश्चास्य कल्पानायुष्प्रमाणं भविष्यति । परिनिर्वृतस्य च तस्य भगवतो[10] धर्मप्रभासस्य तथागतस्यार्हतः

1) From गङ्गा till समयेनेदं left out in Cb.

2) वं B.

3) स्थानि A. W.

4) मनुष्याश्च B.

5) Left out in Cb. MSS. except K. add कायैरु. The words वीर्य° till °ग्रहाः wanting in O.

6) यदितं Cb., meant यदिदं. कतमौ द्वौ । यदुत wanting in O.

7) चास्यासं in K.

8) O. has सर्वे च and instead of the following Genitives नि. Read सर्वे च and °साः, °गताः and लाः.

9) सत्त्वानामव A. W.

10) O. has तथागतस्य धर्म°; the following words धर्मप्र° तथा° and सद् are wanting in O.

सम्यक्संबुद्धस्य सद्धर्मश्चिरस्थायी भविष्यति । रत्नमयैश्च स्तूपैः सा लोकधातुः स्फुटा भविष्यति । एवमचिन्त्यगुणसमन्वागतं भिक्षवस्तस्य भगवतस्तद्बुद्धक्षेत्रं भविष्यति ॥

इदमवोचद्भगवान्। इदं वदित्वा सुगतो[1] ऽथापरमेतदुवाच शास्ता ॥

शृणोथ मे भिक्षव[2] एतमर्थं यथा चरी मह्य सुतेन[3] चीर्णा ।
उपायकौशल्यसुशिक्षितेन यथा च चीर्णा इयं[4] बोधिचर्या ॥ १ ॥
क्षीणाधिमुक्ता इम[5] सत्त्व ज्ञात्वा उदारयाने च समुत्तसन्ति ।
तनु[6] श्रावका भोन्तिमि बोधिसत्त्वाः प्रत्येकबोधिं च निदर्शयन्ति ॥ २ ॥
उपायकौशल्यशतैरनेकैः परिपाचयन्ति[7] बकुबोधिसत्त्वान् ।
एवं च भाषन्ति वयं हि श्रावका दूरे वयं उत्तममग्रबोधिया[8] ॥ ३ ॥
एतां चरिं तेषनुशिक्षमाणाः परिपाकु[10] गच्छन्ति[11] हि सत्त्वकोट्यः ।
क्षीणाधिमुक्ताश्च कुसीदरूपा अनुपूर्व ते सर्वि भवन्ति बुद्धाः ॥ ४ ॥

1) हि wanting in O.

2) वः W.

3) तान O.

4) यं A. चरन्ति इम बोधिचारिकाम् O.

5) मुक्तानिमिमेव A. W. मुक्तिमिति सर्व B. मुक्तानिम सर्व Cb. मुक्तानिमि सर्व K. मुक्ता इम ज्ञात्व सत्वा O.

6) तत्र A. W. ततः B. K. न तु Cb. ततु O.

7) न्ति Cb. K. O. न्ते the rest.

8) All but O. धये. The *m* after उत्तम to avoid hiatus.

9) All but O. ते अ.

10) क B. K. W. O.

11) कृ O.

अज्ञानचर्या च चरन्ति[1] एते वयं खलु[2] आवक अल्पकृत्याः।
निर्विद्य सर्वासु च्युतोपपत्तिषु[3] स्वकं च क्षेत्रं परिशोधयन्ति ॥ ५ ॥
सरागतामात्म निदर्शयन्ति सदोषतां चापि समोक्षतां च।
दृष्टीविलग्नांश्च विदित्व सत्त्वांस्तेषां पि दृष्टीं समुपाश्रयन्ति ॥ ६ ॥
एवं चरन्तो[4] बहु मह्य आवकाः सत्त्वानुपायेन विमोचयन्ति[5]।
उत्पाडु[6] गच्छेयु नरा अविद्वसू सचैव सर्वं चरितं प्रकाशयेत् ॥ ७ ॥
पूर्णा अयं आवक मह्य भिक्षवश्चरितो पुरा बुद्धसहस्रकोटिषु।
तेषां च सद्धर्म परियेषीद्धे[7] इदं ज्ञान गवेषमाणाः[8] ॥ ८ ॥
सर्वत्र चैषो अभु अग्रश्रावको बहुश्रुतश्चित्रकथी विशारदः।
संकर्षकश्चा[9] अकिलासि नित्यं सद बुद्धकृत्येन च प्रत्युपस्थितः ॥ ९ ॥
महाभिज्ञासु सदा गतिंगतः प्रतिसंविदानां च अभूषि लाभी।
सत्त्वान[10] चो इन्द्रियगोचरज्ञो धर्मं च देशेति[11] सदा विशुद्धम् ॥ १० ॥
सद्धर्मश्रेष्ठं च प्रकाशयन्तः परिपाचयी सत्त्व सहस्रकोट्यः।
अनुत्तरस्मिन्निरु अग्रयाने क्षेत्रं स्वकं श्रेष्ठु विशोधयन्तः ॥ ११ ॥

1) अज्ञातचर्याय O.
2) ये ते O.
3) किल O.; preferable.
4) सत्वाभि चुतोपपत्तिभि° O.
5) तं A. W. ता B. ते Cb. त्तो K.
6) त्त A. W. च B. Cb. K. O.
7) उत्पाडु A. B. उत्पाद् Cb. O. उत्पाडुरू K. उपाडु W. To r. उन्माद्? Cp. English translation.
8) दं A. W. मं B. Cb. K.
9) णो A. B. णाः Cb. णा K. नो W. णाः O.
10) श्च K. correctly.
11) च A. W. O. correctly.
12) सि O.

अनागते चापि[1] तथैव[2] अद्धे पूजेष्यन्ती[3] बुद्धसहस्रकोट्यः।
सद्धर्मश्रेष्ठं च परिग्रहीष्यति स्वकं च क्षेत्रं परिशोधयिष्यति ॥ १२ ॥
देशेष्यन्तो[3] धर्म सदा विशारदो उपायकौशल्यसहस्रकोटिभिः।
बहूंश्च सत्त्वान्परिपाचयिष्यति सर्वज्ञज्ञानस्मि अनास्रवस्मिन् ॥ १३ ॥
सो[4] पूज्य कृत्वा नरनायकानां सद्धर्मश्रेष्ठं सद धारयित्वा[5]।
भविष्यतो[3] बुद्ध स्वयंभु लोके धर्मप्रभासो दिशतासु विश्रुतः ॥ १४ ॥
क्षेत्रं च तस्य[6] सुविशुद्ध भेष्यती[7] रत्नान सप्तान सदा विशिष्टम्।
रत्नाभासश्च स कल्पु भेष्यती[7] सुविशुद्ध सो भेष्यति लोकधातुः ॥ १५ ॥
बहुबोधिसत्त्वान सहस्रकोट्यो महाभिज्ञासु सुकोविदानाम्[9]।
येकि[10] स्फुटो भेष्यति लोकधातुः सुविशुद्ध शुद्धेकि महर्द्धिकेकि ॥ १६ ॥
अथ श्रावकाणां पि सहस्रकोट्यः संघस्तदा भेष्यति नायकस्य।
महर्द्धिकानष्टविमोक्षध्यायिनां प्रतिसंविदासू च गतिंगतानाम् ॥ १७ ॥
सर्वे च सत्त्वास्तकि बुद्धक्षेत्रे शुद्धा भविष्यन्ति च ब्रह्मचारिणः।
उपपादुकाः सर्वि सुवर्णवर्णा द्वात्रिंशतीलक्षणसूपधारिणः ॥ १८ ॥

1) चैव B. K. अधि O.
2) अर्थे K. काले O.
3) ते O.
4) स A. W. O.
5) ष्यति B. K.
6) तस्य A. Cb. O. K. W. तसो B. तस्यो Ca.
7) ति A. W. O. ती B. Cb. K.
8) प्र for अव O.
9) सु left out in Cb.
10) क्षी K. भि for कि O. throughout.

आकारसंज्ञा च न[1] तत्र भेष्यति अन्यत्र धर्मे रति ध्यानप्रीतिः[2]।
न मातृग्रामो ऽपि च तत्र भेष्यति न चाप्यपायान[3] च दुर्गतीभयम्॥ १९॥
एतादृशं क्षेत्रवरं भविष्यति पूर्णस्य संपूर्णगुणान्वितस्य।
आकीर्ण सत्त्वेहि सुभद्रकेहि यत्किंचिमात्रं पि[4] इदं प्रकाशितम्[5]॥ २०॥

अथ खलु तेषां द्वादशानां वशीभूतशतानामेतदभवत्। आश्चर्यप्राप्ताः[6] स्माद्भुतप्राप्ताः[7] स्म[8]। सचेदस्माकमपि भगवान्यथेमे[9] ऽन्ये महाश्रावका व्याकृता एवमस्माकमपि तथागतः पृथक्पृथग्व्याकुर्यात्। अथ खलु भगवांस्तेषां महाश्रावकाणां चेतसैव चेतः परिवितर्कमाज्ञायायुष्मन्तं महाकाश्यपमामन्त्रयते स्म[10]। इमानि[11] काश्यप द्वादश वशीभूतशतानि येषामहमेतर्हि संमुखीभूतः सर्वाण्येतान्यहं काश्यप द्वादश वशीभूतशतान्यनन्तरं व्याकरोमि। तत्र काश्यप कौण्डिन्यो भिक्षुर्महाश्रावको द्वाषष्टीनां बुद्धकोटीनयुतशतसहस्राणां परेण परतरं समन्तप्रभासो[12] नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यति विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्।

1) न च B. Cb.
2) MSS. ज्ञान for ध्यान O.
3) ती न चैवपायान K.
4) पि A. W. O. स्यि B. Cb. left out in K.
5) प्रकाश्यपति A. W. प्रकाशितं B. K. O. प्रकाशितमिति Cb.
6) ता in all MSS. स्म badly for स्मः throughout in all.
7) श्च B. स्म श्र° O.; better.
8) अद्भुतप्राप्ताः A. W. °प्ता स्म K. O. left out altogether in B. Cb.
9) इमे left out in A. W.
10) From एव till आयुष्मंतं left out in A.
11) यामास A. W. यति स्म O.
12) महा is added in K.
13) प्रभो O. So too in the sequel. Cp. vs. 22.

तत्र काश्यपानेनैकेन[1] नामधेयेन पञ्च तथागतशतानि भविष्यन्ति। अतः[2] पञ्च महाश्रावकशतानि सर्वाण्यनन्तरमनुत्तरां[3] सम्यक्संबोधिमभिसंभोत्स्यन्ते सर्वाण्येव समन्तप्रभासनामधेयानि भविष्यन्ति। तद्यथा गयाकाश्यपो नदीकाश्यप उरुविल्वाकाश्यपः कालः कालोदायी[4] अनिरुद्धो[5] रेवतः कप्फिणो[6] बक्कुलश्चुन्दः स्वागत इत्येवंप्रमुखानि पञ्च वशीभूतशतानि॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

कौण्डिन्यगोत्रो मम श्रावको ऽयं तथागतो भेष्यति लोकनाथः।
अनागते ऽध्वनि अनन्तकल्पे विनेष्यते प्राणिसहस्रकोट्यः॥ २१॥
समन्तप्रभो नाम जिनो भविष्यति क्षेत्रं च तस्य[8] परिशुद्ध भेष्यति।
अनन्तकल्पस्मि[9] अनागते ऽध्वनि दृष्ट्वान बुद्धान्बहूंस्तु[10] ज्ञानवान्॥ २२॥
प्रभास्वरो बुद्धबलेनुपेतो विधुष्टशब्दो दशसु दिशासु।
पुरस्कृतः प्राणिसहस्रकोटिभिर्देशेष्यतो[11] उत्तममग्रबोधिम्॥ २३॥
ते हि बोधिसत्त्वा अभियुक्तरूपा विमानश्रेष्ठान्यभिरुह्य चापि।

1) एव added in Cb. K. एकेन left out in Cb.
2) ततः Cb.
3) एयत्तरानन्तर K. एयत्तरात्तरेणा O., but below after °शतानि it repeats सर्वाण्यत्तरेणानुत्तरां स° सम्बोधिमभिसंभोत्स्यन्ति.
4) द् A. Cb. MSS. but O. add उदाय्य.
5) नु for नि in O.
6) स्फि B. Cb. K. फि W. प्फि A. प्फिनो O.
7) कु A. W.
8) तस्या A. K. W. तस्यो B. तस्य Cb. O.
9) ल्पे A. W.
10) बुद्धा A. B. Cb. बुद्धां K. W.
11) ते O.

विकुर्वन्ति तत्र अनुचित्तयन्ति विप्रुद्धशीला मद् साधुवृत्तयः[1][2] ॥ २४ ॥
श्रुत्वान[3] धर्मं द्विपदोत्तमस्य अन्यानि क्षेत्राण्यपि चो सदा ते[4]।
व्रजन्ति[5] ते बुद्धसकाशवन्दकाः पूजां च तेषां विपुलां करोन्ति[6] ॥ २५ ॥
क्षणेन ते चापि तदास्य क्षेत्रं प्रत्यागमिष्यन्ति विनायकस्य।
प्रभासनामस्य नरोत्तमस्य[7] चर्याबलं तादृशकं भविष्यति ॥ २६ ॥
षष्टिसहस्रा[8][9] परिपूर्णकल्पानायुष्प्रमाणं सुगतस्य तस्य।
ततश्च भूयो द्विगुणेन तायिनः परिनिर्वृतस्येह स धर्म[10] स्थास्यति ॥ २७ ॥
प्रतिरूपकश्चास्य भविष्यते पुनस्त्रिगुणं ततो एतकमेव कालम्[11]।
सद्धर्मधृष्टे तद तस्य तायिनो दुःखिता[12] भविष्यन्ति नरा मद्र च ॥ २८ ॥
जिनान तेषां[13] समनामकानां समन्तप्रभाणां पुरुषोत्तमानाम्।
परिपूर्णपञ्चाशतनायकानां एते भविष्यन्ति परंपराय ॥ २९ ॥

---

1) तत्र A. तत्रो B. K. W. तत्रा Cb. विकुर्वन्ति तत्र अनुचित्तयन्ता O.

2) वृत्ताः A. Cb. W. वृत्तयः B. K. The 2d pāda wanting in O.

3) धर्मं A. W. शब्दं B. शोलं Cb. शब्दां K.

4) क्षेत्राणि अन्यानि च नित्यकालं B. K. अन्यत्र क्षेत्रेषु सदा व्रजन्ति O.

5) MSS. पश्यन्ति; O. wholly different.

6) करिंषु B. करित्सु K. करोन्ति O.

7) समन्तप्रभानां पुरुषोत्तमानां O.

8) षष्टिः B. K.

9) स्रं A. स्रा K. O.

10) ल्पा K., better.

11) सद्धर्म A. B. Cb. O. सद्धर्मु K. सधर्म W. To r. सुधर्म.

12) द्विगुणं तत एकमेव कल्पान् A. त्रिगुणं तत्रो एतकमेक कल्पान् B. तृगुणं तदा एतेकमेव कालम् Cb. त्रिगुणन्ततो एतकमेव कल्पान् K. द्विगुणं ततो एकमेव कल्पान् W. द्विगुणे ततो एतकाकल्पमेव O.

13) दुःखी K. To r. दुखिता.

14) जिनस्य तस्य A. K. W. जि° तस्यो B. जि° मे स्य Cb. Our reading is that of O.

सर्वेष[1] एतादृशकाश्च व्यूहा सद्धीबलं[2] च तथ बुद्धक्षेत्रम्।
गणाश्च[3] सद्धर्म[4] तथैव ईदृशः सद्धर्मस्थानं च समं भविष्यति ॥ ३० ॥
सर्वेषमेतादृशकं[5] भविष्यति नामं[6] तदा लोकि सदेवकस्मिन्।
यथा मया पूर्वि प्रकीर्तितासीत्समन्तप्रभासस्य नरोत्तमस्य[7] ॥ ३१ ॥
परंपरा एव[8] तथान्यमन्यं ते व्याकरिष्यन्ति क्षितानुकम्पी।
अनुत्तरायं[9] मम अद्य भेष्यति यथैव शासाम्यद्ध[10] सर्वलोकम् ॥ ३२ ॥
एवं खु[11] एते त्वमिकाश्च काश्यप धारेहि पञ्चाशतनूनकानि।
वशिभूत ये चापि ममान्यश्रावका: कथयाहि[12] चान्येष्वपि श्रावकेषु[13] ॥ ३३ ॥

अथ खलु तानि पञ्चार्हच्छतानि भगवतः संमुखमात्मनो व्याकरणानि श्रुत्वा[14] तुष्टा उदग्रा आत्तमनसः प्रमुदिताः प्रीतिसौमनस्यजाता येन भगवांस्तेनोपसंक्रान्ता उपसंक्रम्य

---

1) सर्वेष A. K. W. O. सर्वे त B. मे स्य Cb.

2) A. W. add तस्य.

3) णा A.

4) सद्धर्मु K.

5) स्य A. W. ष ए O.

6) All but O. शब्दस्तदा; O. has एतादृशनामधेयं भविष्यते; our r. conjectural.

7) °प्रभासस्य नरोत्त A. B. K. W. °प्रभस्य नरोत्त Cb. O.

8) एक K. राय तथ अ O. The original Prākṛt परंपराए (= °राय) misunderstood; we have to follow O.

9) अनुत्तरायां A. Cb. W.

10) भाषाम्यद्ध K. शास्ताम्यद्ध O.

11) खलु A. W. ख B. खु Cb. K. तु O.

12) य A. B. याहि O. येसि the rest.

13) Cb. adds इति; K. reads °केभ्य इति; O. ष च श्रावकानाम्.

14) अनुत्तरायां सम्यक्संबोधौ put in before श्रुत्वा in A. W., and after it in B. K. O., but left out in Cb.

भगवतः पादयोः शिरोभिर्निपत्यैवमाङ्कः[1]। अत्ययं[2] वयं भगवन्देशयामो यैरस्माभिर्भगवन्नेवं सततसमितं चित्तं परिभावितमिदमस्माकं[3] परिनिर्वाणं। परिनिर्वृता वयमिति यथापीदं भगवन्नव्यक्ता अकुशला अविधिज्ञाः। तत्कस्य हेतोः। यैर्नामास्माभिर्भगवंस्तथागतज्ञाने[4] ऽभिसंबोद्धव्यं[5] एवंरूपेण परीत्तेन ज्ञानेन परितोषं गताः स्म॥

तद्यथापि नाम भगवन्कस्यचिदेव[6] पुरुषस्य कंचिदेव मित्रगृहं प्रविष्टस्य[7] मत्तस्य वा सुप्तस्य वा स मित्रो ऽनर्घमणिरत्नं वस्त्रान्ते बध्नीयादस्येदं[8] मणिरत्नं भवत्विति। अथ खलु भगवन्स[9] पुरुष उत्थायासनात्प्रक्रामेत्[10]। सो ऽन्यं जनपदप्रदेशं प्रपद्येत[11]। स तत्र कृच्छ्रप्राप्तो भवेदाहारचीवरपर्येषणहेतोः कृच्छ्रमापद्येत[12]। महता च व्यायामेन कथंचित्कंचिदाहारं प्रतिलभेत तेन च संतुष्टो भवेदात्तमनस्कः प्रमुदितः[13]। अथ खलु[14] भगवंस्तस्य पुरुषस्य[15] स पुराणमित्रः पुरुषो येन तस्य तदनर्घेयं मणिरत्नं वस्त्रान्ते बद्धं स तं पुनरेव

1) भिः प्रणिप K.

2) In A. O. only.

3) तमस्मकं B. तामिति अस्माकं Cb.

4) मा left out in A. K.

5) धये A. W. द्धव्ये B. द्धव्य Cb. धव्ये K. ज्ञानमभिसंबोद्धव्यमभविष्यते (r. त्ते) वयमेवन्नू° O.

6) In O. the construction of the following lines quite different; instead of the Genitive case it has the Nomin. case कश्चिदेव पुरुषः etc.

7) स्य left out in K.

8) K. adds महा.

9) स left out in K.

10) क्रा B. K. क्र W. O. क्रम्य Cb. left out in A.

11) द्यते A. W. द्येत B. Cb. प्रतिपद्येत K.

12) द्येत् K. left out in Cb.

13) In A. W. only.

14) Left out in B. Cb. K. O.

15) In K. O. only.

पश्येत्तमेवं वदेत्। किं त्वं भोः पुरुष कृच्छ्रमापद्यसे[1] आहारचीवरपर्येषणहेतोर्यदा[2] यावद्भोः पुरुष मया तव मुखविकारार्थं[3] सर्वकामनिवर्तकमनर्घेयं मणिरत्नं वस्त्रान्ते उपनिबद्धम्। निर्यातितं ते भोः पुरुष ममैतन्मणिरत्नं। तदेवमुपनिबद्धमेव भोः पुरुष वस्त्रान्ते मणिरत्नं। न च नाम त्वं भोः पुरुष प्रत्यवेक्षसे। किं मम बद्धं केन वा बद्धं को हेतुः[4] किंनिदानं वा बद्धम्। एतद्बालज्ञातीयस्त्वं[5] भोः पुरुष यस्त्वं कृच्छ्रेणाहारचीवरं पर्येषमाणस्तुष्टिमापद्यसे। गच्छ त्वं भोः पुरुषैतन्मणिरत्नं गृहीत्वा[6] महानगरं गत्वा परिवर्तयस्व। तेन च धनेन सर्वाणि धनकरणीयानि कुरुष्वेति॥

एवमेव भगवन्नस्माकमपि तथागतेन पूर्वमेव बोधिसत्त्वचर्यां चरता सर्वज्ञताचित्तान्युत्पादितान्यभूवन्। तानि च वयं भगवन्न जानीमो न बुध्यामहे। ते वयं भगवन्नर्कदूमो निर्वृताः स्म इति संजानीमः[7]। वयं कृच्छ्रं जीवामो यद्वयं[8] भगवन्नेवं परीत्तेन ज्ञानेन परितोषमापद्यामः[9] सर्वज्ञज्ञानप्रणिधानेन सदाविनष्टेन ते वयं भगवंस्तथागतेन संबोध्यमानाः। मा यूयं भिक्षव एतन्निर्वाणं मन्यध्वं[11] संविद्यन्ते भिक्षवो युष्माकं संताने कुशलमूलानि यानि मया पूर्वं परिपाचितानि। एतर्हि च ममैवेदमुपायकौशल्यं धर्मदेशनाभिलापेन[12] पर्यायमेत-

1) सि A. W. O. से B. Cb. K.

2) ता B. K. यदिदानी O.

3) सर्वसुखफालवि O. Cp. Pāli *phāsu*.

4) कस्य हेतोः B. K. कस्य हेतोर्वा O.; a better reading.

5) ज्ञातिकोसि O.

6) Rather गृहाय, i. e. having taken.

7) बद्धे A. वयं द्धे W. left out in B. Cb. K. O.

8) ये व O.

9) मद्धे A. W.

10) एवं परिणिर्वाणं मन्यध्वं K. मन्यथ O. मन्यध्वे the rest.

11) From से° till मन्यध्वं before एवं च left out in A.

12) यद्द् wanting in all but O.

र्हि निर्वाणमिति मन्यधे। एवं च वयं भगवता संबोधयित्वाध्यानुत्तरायां[1] सम्यक्संबोधौ व्याकृताः॥

अथ खलु तानि पञ्चवशीभूतशतान्याज्ञातकौण्डिन्यप्रमुखानि तस्यां वेलायामिमा गाथा अभाषन्त[2]॥

हृष्टा प्रहृष्टा[3] स्म शृणित्व एतां आश्वासनामीदृशिकामनुत्तराम्।
यं व्याकृता स्म[5] परमाग्रबोधये नमो ऽस्तु ते नायक नत्तचक्षुः[6]॥ ३४॥
देशेमके अत्ययु तुभ्यमन्तिके यथैव बाला अविद्वू अज्ञानकाः।
यं वै[7] वयं निर्वृतिमात्रकेण परितुष्ट आसीत्सुगतस्य शासने॥ ३५॥
यथापि पुरुषो भवि कश्चिदेव प्रविष्ट स स्यादिह[8] मित्रशालाम्।
मित्रं च तस्य[9] धनवन्तमाढ्यं सो तस्य दद्याद्भक्त खाद्यभोज्यम्॥ ३६॥
संतर्पयित्वान च भोजनेन अनेकमूल्यं रतनं स दद्यात्।
बद्ध्वान्तरीयं[10] वसनान्ति ग्रन्थिं दत्त्वा च तस्येह भवेत तुष्टः॥ ३७॥
सो चापि प्रक्रान्तु भवेत बालो उत्थाय सो ऽन्यं नगरं व्रजेत।
सो कृच्छ्रप्राप्तः कृपणो गवेषी आहार पर्येषति खिद्यमानः॥ ३८॥

---

1) सम्बोध्यानु B. K.
2) षन्ते स्म A. W. बभाषुः O.
3) तुष्टाश्च Cb. हृष्टाः प्रहृष्टा स्म K. O.
4) यां Cb. यं Prākṛt for यत्.
5) स्म A. Cb. W. O. स्मै B. स्मो K.
6) भगवन्नमंत A. Cb. W. O. नायक अनत्त B. नायक नत्त K.
7) यंक्षी A. W. यथे B. यचे Cb. यं वै K. यं for यत्.
8) प्रवृष्टं अस्या K. प्रविष्टक स्या° O.
9) तस्य A. Cb. W. O. तस्या B. तस्यो K. मित्रश्च तस्य धनवान्सु आढ्य स O.
10) बन्धित्वा च अन्तरिमे निवासने ग्रन्थीनि कृत्वा च भ° O. बद्धोऽन्तरीये the rest.
11) स A. B. K. W. O. सो Cb.

पर्येषितभोजननिर्वृतः स्याद्रत्नं उदारं अविचिन्तयन्तः।
तं[2] चापि रत्नं हि भवेत विस्मृतं बद्ध्वान्तरीये स्मृतिरस्य नास्ति॥ ३९॥
तमेव सो पश्यति पूर्वमित्रो येनास्य दत्तं रतनं गृहे स्वे।
तमेन सुष्ठू परिभाषयित्वा दर्शेति रत्नं वसनान्तरस्मिन्॥ ४०॥
दृष्ट्वा च सो परमसुखैः[3] समर्पितो रत्नस्य तस्यो अनुभाव ईदृशः[4]।
महाधनी कोशबली च सो भवेत्समर्पितः कामगुणेहि पञ्चहि[5]॥ ४१॥
एमेव[6] भगवन्वयमेवद्रूपमज्ञानमाना[7] प्रणिधानपूर्वकम्।
तथागतेनैव इदं हि दत्तं भवेषु[8] पूर्वेष्विह दीर्घरात्रम्॥ ४२॥
वयं च भगवन्निह[9] बालबुद्धयो अज्ञानका स्म[10] सुगतस्य शासने।
निर्वाणमात्रेण वयं हि[11] तुष्टा न उत्तरी प्रार्थयि नापि चित्तयी॥ ४३॥

---

1) पर्यष्यतां K. पर्यतां A. B. पर्येषतां Cb. पर्येषातं W. पर्येषितं O.
2) Prākṛt for तत्.
3) खी Cb. One would expect सुखा, Instrumental case, singular.
4) शैं A. K. W. एद् O.
5) षु °भिः A. W. हि °हि B. षु °सु Cb. K. भिः पञ्चभि O.
6) एव A. B. W.
7) A. W. add तायिन् B. K. have it for भगवन्. Here and vs. ४३ भग equal to once long syllable.
8) स A. W.
9) संबोधिनिहि A. नाथा इह B. भगवन्निह Cb. O. संबोधिनिह W. नाथो इह K.
10) स्म A. O. स्मो the others.
11) च A. W.

वयं च संबोधित लोकबन्धुना न एष एतादृश[1] काचि निर्वृतिः।
ज्ञानं प्रणीतं पुरुषोत्तमानां या निर्वृतीयं[2] परमं च सौख्यम्॥ ४४॥
इदं चुदारं विपुलं बहुविधं अनुत्तरं व्याकरणं च श्रुत्वा।
प्रीतो[3] उदग्रा विपुला स्म जाता[4]: परस्परं व्याकरणाय नाथ[5]॥ ४५॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये पञ्चभिक्षुशतव्याकरणापरिवर्तो नामाष्टमः॥

1) शि Cb. K. प्रोदृशिकयान नि O.
2) तिस्मा O. Have we to r. सा for या?
3) त्या Cb. त्य K. तिरू° O.
4) ता A. B. Cb. W. ताः K.
5) णे ना इति Cb. इति also in other MSS.

IX.

अथ खल्वायुष्मानानन्दस्तस्यां वेलायामेवं चिन्तयामास। अप्येव नाम वयमेवंरूपं[1] व्याकरणं प्रतिलभेमहि। एवं च[2] चिन्तयित्वानुविचिन्त्य[3] प्रार्थयित्वोत्थायासनाद्भगवतः पादयोर्निपत्य[4]। आयुष्मांश्च राहुलोऽप्येवं चिन्तयित्वानुविचिन्त्य प्रार्थयित्वा भगवतः पादयोर्निपत्यैवं वाचमभाषत[5]। अस्माकमपि तावद्भगवन्नवसरो भवत्यस्माकमपि तावत्सुगतावसरो भवतु। अस्माकं हि भगवान्पिता जनको जयनं त्राणं च। वयं हि[7] भगवन्सदेवमानुषासुरे लोके अतीव चित्रीकृताः। भगवतश्चैते पुत्रा भगवतश्चोपस्थायका भगवतश्च धर्मकोशं धारयन्तीति। तन्नाम भगवन्तमेव प्रतिरूपं भवेद्यद्भगवानस्माकं व्याकुर्यादनुत्तरायां सम्यक्संबोधौ॥

[9]अन्ये च द्वे भिक्षुसहस्रे सातिरेके शैक्षाशैक्षाणां श्रावकाणामुत्थायासनेभ्य एकांसमुत्तरासङ्गं[10] कृत्वाञ्जलिं प्रगृह्य भगवतोऽभिमुखं भगवन्तमुल्लोकयमाने[11] तस्थतुरेतामेव चिन्ता-

1) वयमप्येवं B. K. O.
2) A. adds वि
3) अनुविचिन्य left out in Cb. K.
4) प्रार्थ्य Ca. K.
5) शिरसा निपतित O. In Ca. added एत्र वाचमभाषत.
6) षते स्म A. Cb. W. वाचं भाषते स्म B. K.
7) वयमपि B. K.
8) यद् wanting in all but O.
9) This whole paragraph is left out in Cb. रेकं शैक्षाणां श्रावकाणां उ° O. दे ते चो° the rest, but cp. below after vs. 11.
10) संगानि B. K. O.
11) नास्तस्थु O.

मनुविचिन्तयमाने यदुतेदमेव बुद्धज्ञानम्। अप्येव नाम वयमपि व्याकरणं प्रतिलभेमह्यनुत्तरायां सम्यक्संबोधाविति[1]॥

अथ खलु भगवानायुष्मन्तमानन्दमामन्त्रयते स्म। भविष्यसि त्वमानन्दानागते ऽध्वनि सागरवरधरबुद्धिविक्रीडिताभिज्ञो[2] नाम तथागतो ऽर्हन्सम्यक्संबुद्धो[3] विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। द्वाषष्टीनां बुद्धकोटीनां[4] सत्कारं कृत्वा गुरुकारं[5] माननां पूजनां[6] च कृत्वा तेषां बुद्धानां भगवतां सद्धर्मं[7] धारयित्वा शासनपरिग्रहं च कृत्वानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यसि[8]। स त्वमानन्द अनुत्तरां सम्यक्संबुद्धः समानो विंशतिगङ्गानदीवालुकासमानि[9] बोधिसत्त्वकोटीनयुतशतसहस्राणि परिपाचयिष्यस्यनुत्तरायां सम्यक्संबोधौ। संमृद्धं[10] च ते बुद्धक्षेत्रं भविष्यति वैडूर्यमयं[11] च। अनवनामितवैजयन्ती च नाम सा[12] लोकधातुर्भविष्यति। मनोज्ञशब्दाभिगर्जितश्च नाम स कल्पो भविष्यति। अपरिमितांश्च कल्पांस्तस्य भगवतः सागरवरधरबुद्धिविक्रीडिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यायुष्प्रमाणं भविष्यति येषां कल्पानां न शक्यं गणनया पर्यन्तो ऽधिगन्तुम्।

---

1) वित्यर्थः A.

2) सागरवरबद्ध O. So too in the sequel.

3) B. K. add लोके.

4) कोटीनियुनशतसहस्राणां B. K.

5) A. W. add कृत्वा.

6) पूजनामर्थनामवचायनां Cb. पूजनमपचयनां O. च is put in after तेषां in K. च कृत्वा left out in O.

7) र्म A. B. Cb. W. र्मं K.

8) Sic O. In the other MSS. अभिसंभोत्स्यसि स त्वमानन्द् wanting.

9) बालिकोपमा Ca. O. बालुकोपमा Cb.

10) संभुद्धं O.

11) Left out in K. O.

12) त्तश्च स B. K.

तावदसंख्येयानि तानि कल्पकोटीनयुतशतसहस्राणि तस्य भगवत आयुष्प्रमाणं भविष्यति यावच्चानन्द तस्य भगवतः सागरवरधरबुद्धिविक्रीडिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यायुष्प्रमाणं भविष्यति। तद्द्विगुणं परिनिर्वृतस्य सद्धर्मः स्थास्यति। यावांस्तस्य भगवतः सद्धर्मः स्थास्यति[1] तद्द्विगुणं सद्धर्मप्रतिरूपकं स्थास्यति। तस्य खलु पुनरानन्द सागरवरधरबुद्धिविक्रीडिताभिज्ञस्य तथागतस्य दशसु दिक्षु बहूनि गङ्गानदीवालुकासमानि[3] बुद्धकोटीनयुतशतसहस्राणि वर्णं भाषिष्यन्ति[2]॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

आरोचयामी अद्य भिक्षुसंघे आनन्दभद्रो मम धर्मधारकः[4]।
अनागते ऽध्वनि जिनो भविष्यति पूजित्व षष्टिं सुगतान कोट्यः॥ ॥
नामेन सो सागरबुद्धिधारी[7] अभिज्ञप्राप्तो इति तत्र विश्रुतः।
परिशुद्धक्षेत्रस्मि सुदर्शनीये अनोनतायां ध्वजवैजयन्त्याम्[8]॥ २॥
तत्रि बोधिसत्त्वा यथ गङ्गवालिकास्तत्तश्च भूयो परिपाचयिष्यति।
मरुर्द्धिकश्च स जिनो भविष्यति दशदिशे लोकविघुष्टशब्दः॥ ३॥

---

1) This passage is left out in Cb., but more amplified in O.

2) कोपमा A. B. Cb. W. कासमा K. वालिकासमा O.

3) त्त इति Ca. K. गुणान्प्रकाशयिष्यन्ति added in O.

4) धर्मभाणकः B. Ca. K.

5) ङ्गे Cb. K.

6) O. has द्वाषष्टि जिनान, agreeing with the foregoing prose.

7) रको O.

8) अनुनामित सो ध्वजवैजयन्तः O.

9) दि A. B. Cb. K. W. द्दि Ca. शदि O.

10) लोके O.

अमितं च तस्यायु[1] तदा भावष्यति यः[2]स्थास्यते लोककितानुकम्पकः।
परिनिर्वृतस्यापि जिनस्य[3] तायिनो द्विगुणं च सद्धर्मु स तस्य स्थास्यति ॥ ४ ॥
प्रतिरूपकं तद्द्विगुणेन भूयः संस्थास्यते[5] तस्य जिनस्य शासने।
तदापि सत्त्वा पथ गङ्गवालिका केतुं जनेष्यन्तिह बुद्धबोधौ ॥ ५ ॥

अथ खलु तस्यां पर्षदि नवयानसंप्रस्थितानामष्टानां बोधिसत्त्वसहस्राणामेतदभवत्[6]। न बोधिसत्त्वानामपि तावदस्माभिरेवमुदारं व्याकरणं श्रुतपूर्वम् कः पुनर्वादः श्रावकाणाम्। कः खल्वत्र केतुर्भविष्यति कः प्रत्यय इति। अथ खलु भगवांस्तेषां बोधिसत्त्वानां चेतसैव चेतः परिवितर्कमाज्ञाय तान्बोधिसत्त्वानामन्त्रयामास[7]। सममस्माभिः कुलपुत्रा एकक्षण एकमुहूर्ते[8] मया चानन्देन चानुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितं धर्मगगनाभ्युद्गतराजस्य[9] तथागतस्यार्हतः सम्यक्संबुद्धस्य संमुखम्। तत्रैष कुलपुत्रा बाह्रुत्ये च सततसमितमभियुक्तो ऽभूदृद्धिं च वीर्याग्रे ऽभियुक्तः। तेन मया क्षिप्रतर[10]मनुत्तरा[11] सम्यक्संबोधि[12]रभिसंबुद्धा अयं पुनरानन्दभद्रो बुद्धानां भगवतां सद्धर्मकोशधर एव भवति

1) Sic O., but यदा for तदा; आयुष्यु seems to be the r. of the other MSS.; a mistaken आयु स्य.

2) All but O. सं.

3) च तस्य Cb. तथैव भूयो O.

4) णेन O.

5) ति K. O. better.

6) दभूत् K.

7) यते स्म B. K. यति स्म O.

8) एकस्मिं क्षणे एकस्मिन्मूहूर्ते B. K. एकक्षणेनैकमुहूर्तेन Ca. Cb. O.

9) म Ca.

10) तर in A. W. only.

11) रां A. B. Ca. K. W. रा Cb.

12) म A. B. Ca. K. W. र K. O.

स्म। यदुत बोधिसत्त्वानां परिनिष्पत्तिहेतोः[1] प्रणिधानमेतत्कुलपुत्रा अस्य कुलपुत्रस्येति ॥

अथ खल्वायुष्मानानन्दो भगवतो ऽन्तिकादात्मनो व्याकरणं श्रुत्वानुत्तरायां सम्यक्संबोधावात्मनश्च बुद्धक्षेत्रगुणव्यूहाञ्श्रुत्वा पूर्वप्रणिधानचर्यां[2] च श्रुत्वा तुष्ट उदग्र आत्तमनस्कः[3] प्रमुदितः प्रीतिसौमनस्यजातो ऽभूत्। तस्मिंश्च समये बह्वीनां बुद्धकोटीनयुतशतसहस्राणां सद्धर्ममनुस्मरति स्मात्मनश्च पूर्वप्रणिधानम्[4] ॥

अथ खल्वायुष्मानानन्दस्तस्यां वेलायामिमा गाथा अभाषत ॥

आश्चर्यभूता जिन अप्रमेया ये स्मार्यन्ति[5] मम धर्मदेशनाम्[6]।
परिनिर्वृतानां हि जिनान तायिनां समनुस्मरामी[7] यथ अद्य श्वो वा ॥ ६ ॥
निष्काङ्क्षप्राप्तो ऽस्मि स्थितो ऽस्मि बोधये उपायकौशल्य ममेदृशीदृशम्।
परिचारको ऽहं सुगतस्य भोमि सद्धर्म धारेमि च बोधिकारणात्[8] ॥ ७ ॥

अथ खलु भगवानायुष्मन्तं राकुलभद्रमामन्त्रयते स्म। भविष्यसि त्वं राकुलभद्रानागते ऽध्वनि सप्तरत्नपद्मविक्रान्तगामी[9] नाम तथागतो ऽर्हन्सम्यक्संबुद्धो विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवनां च मनुष्याणां च बुद्धो भगवान्। दशलोकधातुपरमाणुरजःसमांस्तथागतानर्हतः सम्यक्संबुद्धान्सत्कृत्य[10] गुरुकृत्य[10]

1) निष्पादन O.

2) च in Ca. Cb. O. only.

3) मना Ca. O.

4) र्मं समनुस्मरति O.

5) ति K. O. ती Cb. ते the rest.

6) ना Cb.

7) मि K. O. मी the other MSS.

8) कारणेति A. कारण इति W. कारणादिति B. Ca. Cb. K. हेतोः O. Cp. X, vs. 3.

9) क्रामी B. Cb. क्रमो O. So too in the sequel.

10) त्वा A. B. Cb. K. W. त्य Ca. गुरुकृत्य left out in Ca.

मानयित्वा पूजयित्वार्चयित्वा[1] सदा तेषां बुद्धानां भगवतां ज्येष्ठपुत्रो भविष्यसि तत्र्यथापि नाम मैत्रकि। तस्य खलु पुना राहुलभद्र भगवतः सप्तरत्नपद्मविक्रान्तगामिनस्तथागतस्यार्हतः सम्यक्संबुद्धस्यैवंरूपमेवायुष्प्रमाणं भविष्यत्येवंरूपैव सर्वाकारगुणसंपद्भविष्यति तत्र्यथापि नाम तस्य भगवतः सागरवरधरबुद्धिविक्रीडिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य सर्वाकारगुणोपेतां[2][3] बुद्धक्षेत्रगुणव्यूहां[3] भविष्यन्ति। तस्यापि राहुल सागरवरधरबुद्धिविक्रीडिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य त्वमेव ज्येष्ठपुत्रो भविष्यसि। ततः पश्चात्परेणानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यसीति॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

अयं मम[4] राहुल ज्येष्ठपुत्रो यो औरसो आसि[5] कुमारभावे।
बोधिं मि प्राप्तस्य ममैष पुत्रो धर्मस्य दायाद्यधरो महर्षिः॥ ८॥
अनागते ऽध्वे बहुबुद्धकोट्यो यान्द्रक्ष्यते येष प्रमाणु नास्ति।
सर्वेष तेषां हि जिनान पुत्रो भविष्यति बोधि गवेषमाणः॥ ९॥
अज्ञात चर्या इय राहुलस्य प्रणिधानमेतस्य अहं प्रजानमि[6]।
करोति संवर्णन लोकबन्धुर्[7] अहं किल पुत्र तथागतस्य॥ १०॥
गुणान कोटीनयुताप्रमेयाः प्रमाणु येषां न कदाचिदस्ति।
ये राहुकस्येह ममौरसस्य तथा हि एषो स्थितु बोधिकारणात्[8]॥ ११॥

1) अर्चयित्वा in B. K. only.
2) वरो A. B. Cb. K. W. गुणो Ca.
3) All but O. तो and क्को.
4) All but O. ममा.
5) भावि A.
6) मी Cb. K.
7) ना A. W. नां O. The original reading certainly नो.
8) र्णोति A. Ca. Cb. W. र्णादिति B. K. र्णां O. Cp. X, vs. 3.

अद्राक्षीत्खलु पुनर्भगवांस्ते द्वे श्रावकसहस्रे शैक्षाशैक्षाणां[1] श्रावकाणां भगवत्तमवलोकयमाने[2] ऽभिमुखं प्रसन्नचित्ते[3] मृदुचित्ते[3] मार्दवचित्ते[3]। अथ खलु भगवांस्तस्यां वेलायामायुष्मत्तमानन्दमामन्त्रयते स्म। पश्यसि त्वमानन्दैते द्वे श्रावकसहस्रे शैक्षाशैक्षाणां श्रावकाणाम्[4]। आह। पश्यामि भगवन्पश्यामि सुगत। भगवानाह। सर्व एवैत आनन्द द्वे भिक्षुसहस्रे समं बोधिसत्त्वचर्यां समुदानयिष्यन्ति पञ्चाशल्लोकधातुपरमाणुरजःसमांश्च बुद्धान्भगवतः सत्कृत्य[5] गुरुकृत्य[5] मानयित्वा पूजयित्वार्चयित्वापचायित्वा[6] सद्धर्मं च धारयित्वा पश्चिमे समुच्छ्रय एकक्षणेनैकमुहूर्तेनैकलवेनैकसंनिपातेन दशसु दिक्ष्वन्योन्यासु लोकधातुषु स्वेषु[7] स्वेषु[7] बुद्धक्षेत्रेष्वनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यन्ते। रत्नकेतुराजो[8] नाम तथागता अर्हन्त सम्यक्संबुद्धा भविष्यन्ति। परिपूर्णा चैषां कल्पमायुष्प्रमाणं भविष्यति। समाश्चैषां बुद्धक्षेत्रगुणव्यूहा भविष्यन्ति। समः श्रावकगणो बोधिसत्त्वगणाश्च भविष्यति। समं चैषां परिनिर्वाणं भविष्यति। समश्चैषां सद्धर्मः स्थास्यति[9]॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

द्वे वै सहस्रे इमि श्रावकाणां आनन्द ये ते मम अग्रतः स्थिताः।
तान्व्याकरोमो अहमद्य पण्डितानन्यागते ऽध्वानि तथागतत्वे॥ १२॥

1) श्रावकाणां wanting in Ca. K.
2) पंतो A. Ca. Cb. W. यमाने B. पंत्यभिमुखं K. यमानानि O.
3) चित्तां A. W. चित्ते B. K. चित्तात् Ca. Cb. चित्तानि O.
4) Only in O.
5) त्वा A. B. Cb. O. K. W. त्य Ca.
6) अर्चयित्वा अपचायित्वा in B. K. only. Cp. above p. 220.
7) तेषु A. W. स्वेषु B. Ca. Cb. स्वकस्वकेषु O. left out in K.
8) राज्ञानो B. Ca. Cb. O. राजो A. B. K. W., which is correct Skr., but certainly not the original reading.
9) W. adds इति.

अनन्तग्रीपम्यनिदर्शनेन्हि बुद्धान अग्र्यां करियाण पूज्ञाम्।
आरागयिष्यन्ति ममाग्रबोधिं स्थित्वा चरिमस्मि समुच्छ्रयस्मिन्॥ १३॥
एकेन नामेन दशद्दिशासु क्षणास्मि एकस्मि तथा मुहूर्ते।
निषद्य च द्रुमप्रवराणं मूले बुद्धा भविष्यन्ति स्पृशित्व ज्ञानम्॥ १४॥
एकं च तेषामिति नाम भेष्यति रत्नस्य केतूनिह लोकि विश्रुताः।
समानि क्षेत्राणि वराणि तेषां समो गणः श्रावकबोधिसत्त्वाः॥ १५॥
ऋद्धिप्रभूता इह सर्वि लोके समन्ततस्ते दशसु दिशासु।
धर्मं प्रकाशेत्व यदापि निर्वृताः सद्धर्मु तेषां सममेव स्थास्यति॥ १६॥

अथ खलु ते शैक्षाशैक्षाः श्रावका भगवतो ऽन्तिकात्संमुखं स्वानि स्वानि व्याकरणानि श्रुत्वा तुष्टा उदग्रा आत्तमनस्काः प्रमुदिताः प्रीतिसौमनस्यजाता भगवन्तं गाथाभ्यामध्यभाषन्त॥

तृप्ता स्म लोकप्रद्योत श्रुत्वा व्याकरणं इदम्।
अमृतेन यथा सिक्ताः सुखिता स्म तथागत॥ १७॥

1) मे A. B. K. W. म Cb. O. ये Ca.
2) दि A. B. O. Cb. K. W. द्दि Ca.
3) चो (च B) द्रुमवरराज B. K.
4) रतनस्य K.
5) केतूतिन्हि A. केतूनिह B. Cb. K. केतूनिभिन्हि W. केतूरिह O.
6) क्षेत्राप्रवरा K.
7) समो गणः K. O. समा गणाः the rest.
8) All but O. दि.
9) All have सदा except O.
10) इति added in all but A. W. O.
11) मनसः Ca. O.
12) भिर् Cb. O.
13) म B. Cb. K. W.

नास्माकं काङ्क्ष विमतिर्न भेष्याम नरोत्तमाः।
अद्यास्माभिः सुखं प्राप्तं श्रुत्वा व्याकरणं इदम्॥ १८॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याय आनन्दराक्षसाभ्यामन्याभ्यां च द्वाभ्यां भिक्षुसहस्राभ्यां व्याकरणपरिवर्तो नाम नवमः॥

1) मतिर्वा न A. B. Cb. मतिर्न Ca. कांक्ष विमतिर्वा न K. विमति या न W. विमतिर्वा O.
2) All but O. add इति.

X.

[1]अथ खलु भगवान्भैषज्यराजं[1] बोधिसत्त्वं महासत्त्वमामन्त्र्य तान्यशीतिं[2] बोधिसत्त्वसहस्राण्यामन्त्रयते स्म। पश्यसि त्वं भैषज्यराजास्यां पर्षदि[3] [4]बक्कदेवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यान्भिक्षुभिक्षुणीयुपासकोपासिकाः[6] श्रावकयानीयान्प्रत्येकबुद्धयानीयान्बोधिसत्त्वयानीयांश्च यैरयं धर्मपर्यायस्तथागतस्य संमुखं श्रुतः। आह। पश्यामि भगवन्पश्यामि सुगत। भगवानाह। सर्वे खल्वेते भैषज्यराज बोधिसत्त्वा महासत्त्वा यैरस्यां पर्षद्यक्षश एकापि गाथा श्रुतैकपदमपि श्रुतं यैर्वा पुनरक्षश एकचित्तोत्पादेनाप्यनुमोदितमिदं सूत्रं सर्वा एता[8] अर्हं भैषज्यराज चतस्रः पर्षदो[9] व्याकरोम्यनुत्तरायां सम्यक्संबोधौ। ये[10] ऽपि केचिद्भैषज्यराज तथागतस्य परिनिर्वृतस्येमं धर्मपर्यायं श्रोष्यत्यक्षश एकगाथामपि[11] श्रुत्वाक्षश एकेनापि चित्तोत्पादेनाभ्यनुमोदयिष्यन्ति[12] तानप्यहं भैषज्यराज कुलपुत्रान्वा कुलदुहितॄर्वा व्याकरोम्यनुत्तरायां सम्यक्संबोधौ। परिपूर्णबुद्धकोटीनयुतशतसहस्रपर्युपासितावितस्ते भैषज्यराज कुलपुत्रा वा कुलदुहितरो वा भविष्यन्ति। [1]बुद्धकोटीनयुतशतसहस्रकृतप्रणिधानास्ते भैषज्यराज कुलपुत्रा वा कुलदुहितरो वा भविष्यन्ति। सत्त्वानामनुकम्पार्थमस्मिञ्जम्बुद्वीपे मनुष्येषु प्रत्याजाता वेदितव्याः। य इतो धर्मपर्यायादक्षश एकगाथामपि धारयिष्यन्ति वाचयिष्यन्ति[2] प्रकाशयिष्यन्ति संग्राहयिष्यन्ति लिखिष्यन्ति[3] लिखित्वा चानुस्मरिष्यन्ति कालेन च कालं व्यवलोकयिष्यन्ति। तस्मिंश्च पुस्तके तथागतगौरवमुत्पादयिष्यन्ति शास्तृगौरवेण सत्करिष्यन्ति गुरुकरिष्यन्ति मानयिष्यन्ति पूजयिष्यन्ति। तं[4] च पुस्तकं पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावाद्यादिभिर्नमस्कारालिकर्मभिश्च पूजयिष्यन्ति। ये केचिद्भैषज्यराज कुलपुत्रा वा कुलदुहितरो वेतो धर्मपर्यायादक्षश एकगाथामपि[6] धारयिष्यत्यनुमोदयिष्यन्ति वा सर्वांस्तानहं भैषज्यराज व्याकरोम्यनुत्तरायां सम्यक्संबोधौ॥

तत्र भैषज्यराज यः कश्चिदन्यतरः वा पुरुषो[7] स्त्री वैवं वदेत्। कोदृशाः खल्वपि ते सत्त्वा भविष्यन्त्यनागते ऽध्वनि तथागता अर्हन्तः सम्यक्संबुद्धा इति। तस्य भैषज्यराज पुरुषस्य वा स्त्रिया वा स कुलपुत्रो वा कुलदुहिता वा दर्शयितव्यः। य इतो धर्मपर्यायादक्षश्चतुष्पादिकामपि गाथां[8] धारयिता[9] श्रावयिता वा देशयिता वा सगौरवो वेक्ष धर्मपर्याये। अयं स कुलपुत्रो वा कुलदुहिता वा यो ऽनागते ऽध्वनि तथागतो ऽर्हन्सम्य-

1) Dharmarakṣa has in his Chinese version a long prose passage and 12 verses at the beginning of this chapter.

1) ज्ञानं A. K. W. O.
2) ति W.
3) परिषदि K. राज ये इमस्मिं परिषदि O.
4) ह्लन्देव B. Ca. K. W. क्वो O.
5) ष्यान्भि B. Cb. K. ष्या वा O. ष्यभि A. Ca.
6) का A. कां Cb. K. का वा O.
7) वै A. B. W.
8) भविष्यति A.
9) परिषदो K. O.
10) पि in A. B. Ca. W. O. only.
11) एकामपि गाथां Ca. K.
12) Sic O.; the rest प्यनुमोदितं भविष्यन्ति.

1) B. K. O. add बक्क.
2) Left out in W.
3) A. adds लिखापयिष्यन्ति मानयिष्यन्ति.
4) Sic all for तच्च.
5) वाद्यै A. W.
6) शश्चतुष्पदिकामपि गाथां B. K.
7) स्त्री वा पुरुषो A. W. पुरुषो वा स्त्री B. Ca. Cb. O. पुरुषः स्त्री K.
8) काया गाथाया Cb. काया अपि गाथाया K. ष्पदिया गाथया O.
9) Left out in K.

क्संबुद्धो भविष्यति। एवं पश्य। तत्कस्य हेतोः। स हि भैषज्यराज कुलपुत्रो वा कुलदुहिता वा तथागतो वेदितव्यः सदेवकेन लोकेन तस्य च तथागतस्यैवं सत्कारः कर्तव्यो यः खल्वस्माद्धर्मपर्यायादेकगाथामपि धारयेत्कः पुनर्वादो य इमं धर्मपर्यायं सकलसमाप्तमुद्गृह्णीयाद्धारयेद्वा वाचयेद्वा पर्यवाप्नुयाद्वा प्रकाशयेद्वा लिखेद्वा लिखापयेद्वा लिखित्वा चानुस्मरेत्तत्र च पुस्तके सत्कारं कुर्यादुरुकारं कुर्यान्माननां पूजनामर्चनामपचायनां पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावाद्याञ्जलिनमस्कारैः प्रणामैः। परिनिष्पन्नः स भैषज्यराज कुलपुत्रो वा कुलदुहिता वानुत्तरायां सम्यक्संबोधौ वेदितव्यस्तथागतदृशी च वेदितव्यो लोकस्य हितानुकम्पकः प्रणिधानवशेनोपपन्नो ऽस्मिञ्जम्बुद्वीपे मनुष्येष्वस्य धर्मपर्यायस्य संप्रकाशनतायै। यः स्वयमुदारं धर्माभिसंस्कारमुदारां च बुद्धक्षेत्रोपपत्तिं स्थापयित्वास्य धर्मपर्यायस्य संप्रकाशनहेतोर्मयि परिनिर्वृते सत्त्वानां हितार्थमनुकम्पार्थं चेहोपपन्नो वेदितव्यस्तथागतदूतः स भैषज्यराज कुलपुत्रो वा कुलदुहिता वो वेदितव्यः। तथागतकृत्यक्रियास्तथागतसंप्रेषितः स भैषज्यराज कुलपुत्रो वा कुलदुहिता वा संज्ञातव्यो य इमं धर्मपर्यायं तथागतस्य परिनिर्वृतस्य संप्रकाशयेदक्षशो रुतसि चैर्येणापि कस्यचिदेकसत्त्वस्यापि संप्रकाशयेदाचक्षीत वा॥

यः खलु पुनर्भैषज्यराज कश्चिदेव सत्त्वो दुष्टचित्तः पापचित्तो रौद्रचित्तस्तथागतस्य संमुखं कत्थमवर्णं भाषेत्। यश्च तेषां तथारूपाणां धर्मभाणकानामस्य सूत्रान्तस्य धारकाणां गृहस्थानां वा प्रव्रजितानां वैकामपि वाचमप्रियां संश्रावयेदूनां वाभूतां वा। इदमागाढतरं पापकं कर्मेति वदामि। तत्कस्य हेतोः। तथागताभरणप्रतिमण्डितः स भैषज्यराज कुलपुत्रो वा कुलदुहिता वा वेदितव्यः। तथागतं स भैषज्यराजामिषेन परिष्करोति य इमं धर्मपर्यायं लिखित्वा पुस्तकगतं कृत्वामिषेन परिष्करोति। स येन येनैव प्रक्रामेत्तेन तेनैव सत्त्वैरञ्जलीकरणीयः सत्कर्तव्यो गुरुकर्तव्यो मानयितव्यः पूजयितव्यो ऽर्चयितव्यो ऽपचायितव्यो दिव्यमानुष्यकैः पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावाद्यखाद्यभोज्यान्नपानयानैरग्रप्राप्तैश्च दिव्यै रत्नराशिभिः। स धर्मभाणकः सत्कर्तव्यो गुरुकर्तव्यो मानयितव्यः पूजयितव्यो दिव्याश्च रत्नराशयस्तस्य धर्मभाणकस्योपनामयितव्याः।

---

1) K. adds लोके.
2) K. adds ति.एवं पश्य left out in A. O.
3) All but Cb. O. add समारकेण.
4) गते K.
5) एकामपि चतुष्पदीगाथां O.
6) Left out in B. Ca. Cb.
7) Left out in Cb. O.
8) From गुरु till पचायनां left out in Cb. Differently in O.
9) W. adds दीप.
10) B. adds घण्टा.
11) काभिः A. K. W. कादीपपङ्क्तिका O.
12) मैश्च B. K. मेभिर्वा O.
13) Cb. K. add स.ति for च in O.
14) स्य left out in A. W.
15) शनाय B. K. O.
16) Left out in K.

1) K. adds स भैषज्यराज, while Cb. leaves out तथागतसंप्रेषितः.
2) Left out in K. O.
3) K. adds पुद्गलानां.
4) All but O. घ.
5) Left out in A. Ca. W.
6) A. Cb. W. add स्म.
7) A. W. add स्म.
8) लिः कर्तव्या A. लोः करणीया B. लिं करणोयः Ca. लीकरणोया Cb. लोः करणीयाः K. लिं करणीयाः W. लोकरणीयं O.
9) In Ca. only.
10) सद्ध A. B. Ca. Cb. O. W. स घ K.
11) Left out in Ca. Cb. O.

तत्कस्य हेतोः। अप्येव नामैकवारमपीमं धर्मपर्यायं संश्रावयेयुः[2] श्रुत्वाप्रमेया असंख्येयाः सत्त्वाः क्षिप्रमनुत्तरायां सम्यक्संबोधौ परिनिष्पत्स्येयुः[3]॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

बुद्धत्वे स्थातुकामेन स्वयंभूज्ञानमिच्छता।
सत्कर्तव्याश्च ते सत्त्वा ये धारयन्ति इमं नयम्॥ १॥
सर्वज्ञत्वं च यो इच्छेत्कथं शीघ्रं भवेदिति।
स इमं धारयेत्सूत्रं सत्कुर्याद्वापि धारकम्॥ २॥
प्रेषितो लोकनाथेन सत्त्वविनेयकारणात्[4]।
सत्त्वानामनुकम्पार्थं सूत्रं यो वाचयेदिदम्॥ ३॥
उपपत्तिं शुभां त्यक्त्वा स धीर इह आगतः।
सत्त्वानामनुकम्पार्थं सूत्रं यो धारयेदिदम्॥ ४॥
उपपत्तिवशात्[5] तस्य येन[6] सो दृश्यते तत्र।
पश्चिमे काले भाषन्तो इदं सूत्रं निरुत्तरम्॥ ५॥
दिव्यैरपि पुष्पैरपि तं[7] सत्करेत मानुष्यकैश्चापि रपि सर्वगन्धैः।
दिव्यैरपि वस्त्रैरपि तं[8] छादयेया रत्नैरपि अभ्योकिरि धर्मभाणकम्॥ ६॥

1) अपि left out in A. Ca. W.

2) संप्रकाशये Cb. K.

3) All but O. add इति.

4) सत्त्वानां विनायकारणां A. W. सत्त्वानां विनयादिह O.

5) शं A. शितास्य तस्य यया O. metrically wrong. The other MSS. शो. Our reading शा (Instr. c. or Abl. c.) conjectural.

6) सा A. B. Cb. W. सो K. सौ O.

7) तं A. W. स B. Ca. च K. O.

8) तं A. W. च B. Ca. K. O. सं Cb.

कृताञ्जली तस्य भवेत नित्यं यथा जिनेन्द्रस्य स्वयंभुवस्तथा।
यः पश्चिमे कालि मुनीश्वरे ऽस्मिन्परिनिर्वृतस्य इदं[1] सूत्र धारयेत्॥ ७॥
खाद्यं च भोज्यं च तथान्नपानं विकारशय्यासनवस्त्रकोट्यः।
ददेय पूजार्थ जिनात्मजस्य अप्येकवारं पि वदेत सूत्रम्॥ ८॥
तथागतानां करुणीय कुर्वते[2] मया च सो प्रेषितु मानुषं भवम्।
यः सूत्रमेतच्चरिमस्मिं[3] काले लिखेय धारेय शृणेय वापि॥ ९॥
यश्चैव स्थित्वेह जिनस्य संमुखं आवेद्वर्णं परिपूर्णकल्पम्।
प्रदुष्टचित्तो भृकुटिं करित्वा बक्कुं नरो ऽसौ प्रसवेत पापम्[4]॥ १०॥
यश्चापि सूत्रान्तधराण तेषां प्रकाशयन्तानिह सूत्रमेतत्।
अवर्णमाक्रोश वदेय तेषां बह्वन्तरं[6] तस्य वदामि पापम्॥ ११॥
नरश्च यो संमुख संस्तवेया कृताञ्जली[6] मां परिपूर्णकल्पम्।
गाथान कोटीनयुतैरनेकैः पर्येषमाणो इममग्रबोधिम्॥ १२॥
बक्कुं खु[8] सो तत्र लभेत पुण्यं मां संस्तवित्वान प्रकर्षज्ञातः।
अतश्च सो बक्कुतरकं[9] लभेत यो वर्ण तेषां प्रवदेन्मनुष्यः॥ १३॥

1) इदं Ca. मम O.

2) ति B. Cb. K. O.

3) तच्चरस्मि A. तं चरिमस्मि B. K. Ca. तंचरथास्मि Cb. तंचरथास्मि W

4) बह्वन्तरासौ प्रवेन पापं K. read प्रसवेत.

5) This verse is left out in W.

6) ति O. मं rest.

7) नि A. K.

8) खलु A.

9) रकं A. B. K. रं Ca. Cb. O. रं क W.

अष्टादश[1][2] कल्पसकृन्नकोट्यो यस्तेषु पुस्तेषु करोति[3] पूजाम् ।
शब्देकि द्रुपेक्षि रसेक्षि चापि दिव्यैश्च गन्धैश्च स्पर्शैश्च दिव्यैः ॥ १४ ॥
करित्व पुस्तान तथैव पूजां[4] अष्टादश कल्पसकृन्नकोट्यः ।
यदि शृणो एकश[5] एत सूत्रं आश्चर्यलाभो ऽस्य भवेन्महानिति[6] ॥ १५ ॥

आरोचयामि ते भैषज्यराज प्रतिवेदयामि ते । बहवो हि मया भैषज्यराज धर्मपर्याया भाषिता भाषामि[7] भाषिष्ये[8] च । सर्वेषां च तेषां भैषज्यराज धर्मपर्यायाणामयमेव धमपर्यायः सर्वलोकविप्रत्यनीकः[9] सर्वलोकाभद्रधनीयः[10] । तथागतस्याप्येतर्हि भैषज्यराज आध्यात्मिकं[11] धर्मरत्नस्यं तथागतबलसंरक्षितमप्रतिभिन्नपूर्वमनाचक्षितपूर्वमनाख्यातमिदं स्थानम् । बहुजनप्रतिक्षिप्तो ऽयं भैषज्यराज धर्मपर्यायस्तिष्ठतो ऽपि तथागतस्य कः पुनर्वादः परिनिर्वृतस्य ॥

अपि तु खलु पुनर्भैषज्यराज तथागतचीवरच्छन्नास्ते कुलपुत्रा[14] वा कुलदुहितरो

1) श A. B. स: Ca. O. शो Cb. शा K. W.
2) वर्ष Cb.
3) करेत Cb. पस्थान करेत कश्चित् O.
4) कर्तव्य वस्थान सद्धर्मधारके O.
5) शृणोदेकापि A. शुते एकं पि B. शुणो एक पि Ca. K. शुणै एक पि Cb. शुणोदेकपि W. आवये एकश O.
6) क्षांमिति A. W. क्षांत इति B. Ca. Cb. K. Probably to r. महत्तः ॥.
7) भाषे B. K., more consistent.
8) भाषिष्यामि Ca. Cb., more original. भाषिष्याम O.
9) नीकभूतः A. W. नी B. नोयः Ca. Cb. O. नीकः K.
10) काश्च A. B. Ca. W. काश्च Cb. K. O.
11) राज्ञ अध्यात्मिक B. Ca. Cb. (r. आ° = O.). राज्ञ अप्यात्मिकं K.
12) लं A. Cb. W.
13) ति left out in B. Cb. O.
14) Left out in B. K. O.

वा[1] वेदितव्याः । अन्यलोकधातुस्थितैश्च[2] तथागतैरवलोकिताश्चाधिष्ठिताश्च । प्रत्यात्मिकं च तेषां श्रद्धाबलं भविष्यति कुशलमूलबलं च प्रणिधानबलं[4] च[4] । तथागतविकुर्वितस्थानं[5] निर्वाणगामिनश्च[6] ते भैषज्यराज कुलपुत्रा वा कुलदुहितरो वा भविष्यन्ति । तथागतपाणिपरिमार्जितमूर्धानश्च[7] ते[8] भविष्यन्ति[9] । य इमं धर्मपर्यायं तथागतस्य परिनिर्वृतस्य श्रद्धास्यन्ति[10] वाचयिष्यन्ति लिखिष्यन्ति सत्करिष्यन्ति गुरुकरिष्यन्ति परेषां[11] च संप्रकाशयिष्यन्ति[12] ॥

यस्मिन्खलु[13] पुनर्भैषज्यराज पृथिवीप्रदेशे ऽयं धर्मपर्यायो भाष्येत वा देश्येत वा लिख्येत वा लिखितो वा[14] पुस्तकगतः[14] स्वाध्यायेत वा संगायेत वा तस्मिन्भैषज्यराज पृथिवीप्रदेशे तथागतचैत्यं कारयितव्यं महत्तं रत्नमयमुच्चं प्रगृहीतं न च तस्मिन्नवश्यं तथागतशरीराणि प्रतिष्ठापयितव्यानि । तत्कस्य हेतोः । एकघनमेव तस्मिंस्तथागतशरीरमुपनिक्षिप्तं भवति[15] । यस्मिन्पृथिवीप्रदेशे ऽयं धर्मपर्यायो भाष्येत वा देश्येत वा पठ्येत[16]

1) रश्च B. K.
2) अन्यत्र A. K. W.
3) धातौ A. W.
4) Left out in B. Cb.
5) एक left out in Cb.
6) नि in A. Cb. only.
7) णिना W.
8) मूर्द्धा च A. मूर्धानश्च B. मूर्धा च Ca. मूर्धानश्च Cb. K. O. मूर्धाश्च W.
9) K. adds सत्वा.
10) श्रद्धास्यंति A. B. K. W. श्रद्दधास्यन्ति O.
11) A. B. K. W. add विस्तरेण.
12) संप्रकाशयिष्यन्ति K. आवष्यिन्ति O.
13) यस्मिंश्च खलु Cb.
14) Left out in Ca. Cb.
15) भविष्यति A. B. Cb. W.
16) वाच्येत वा स्वाध्यायेत वा leaving out पठ्येत वा in K. This reading agrees better with the preceding.

वा संगायेत वा लिख्येत वा लिखितो वा पुस्तकगतस्तिष्ठेत्तस्मिंश्च स्तूपे[1] सत्कारो गुरुकारो[2] मानना पूजनार्चना[3] करणीया सर्वपुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाविन्नयत्तोभिः[4] सर्वगीतवाद्यनृत्यतूर्यताडावचरसंगीतिसंप्रवादितैः[5] पूजा करणीया। ये च खलु पुनर्भैषज्यराज सत्त्वास्तं तथागतचैत्यं लभेरन्वन्दनाय[6] पूजनाय[7] दर्शनाय[8] वा सर्वे ते भैषज्यराजाभ्यासन्नीभूता[9] वेदितव्या अनुत्तरायाः[10] सम्यक्संबोधेः[11]। तत्कस्य हेतोः। बहवो भैषज्यराज गृहस्थाः प्रव्रजिताश्च बोधिसत्त्वचर्यां चरन्ति न च पुनरिमं[12] धर्मपर्यायं लभन्ते दर्शनाय वा श्रवणाय वा लिखनाय[12] वा पूजनाय वा। न तावत्ते भैषज्यराज बोधिसत्त्वचर्यायां कुशला भवन्ति यावन्नेमं धर्मपर्यायं शृण्वन्ति। ये[13] त्विमं धर्मपर्यायं शृण्वन्ति श्रुत्वा चाधिमुच्यन्त्यवतरन्ति विजानन्ति परिगृह्णन्ति तस्मिन्समये त आसन्नस्थायिनो भविष्यन्त्यनुत्तरायां सम्यक्संबोधावभ्याशीभूताः॥

---

1) स्तूपस्यैव A. W.

2) Left out in Cb. W.

3) अर्चना left out in Ca. Cb.

4) B. adds घण्टा.

5) त्य K.

6) रैः B.

7) संगीति left out in Ca. O.

8) ये in A. B. W. पूजनाये left out in Ca. Cb. वाचनाय is added after दर्शनाय in Cb. दर्शनाय वन्दनाय O.

9) °सन्ने वे° O.

10) यां Cb. O.

11) धौ Ca.

12) K. adds पर्युपासनाय.

13) यदा A. K. W. यदाहो पुनः O.

14) B. K. W. add बुध्यन्ते before ऽवतरन्ति. O. adds पत्तीयन्ति बुद्धयन्ति before विजानन्ति.

तद्यथापि नाम भैषज्यराज कश्चिदेव पुरुषो भवेदुदकार्थ्युदकगवेषी। स उदकार्थमुज्ज्ञङ्गले पृथिवीप्रदेश उदपानं खानयेत्[1]। स यावत्पश्येच्छुष्कं पाण्डरं[2] पांसुं निर्वाह्यमानं तावज्ज्ञानीयात्[3]। दूरं[4] इतस्तावदुदकमिति। अथ पुरुष समेन स पुरुष आर्द्रपांसुमुदकसंमिश्रं कर्दमपङ्कभूतमुदकबिन्दुभिः स्रवद्भिर्निर्वाह्यमानं पश्येत्तांश्च पुरुषानुदपानखानकान्कर्दमपङ्कदिग्धाङ्गान्[5]। अथ खलु पुनर्भैषज्यराज स पुरुषस्तत्पूर्वनिमित्तं दृष्ट्वा निष्काङ्क्षो भवेन्निर्विचिकित्स आसन्नमिदं खलूदकमिति। एवमेव भैषज्यराज दूरे ते बोधिसत्त्वा महासत्त्वा[6] भवन्त्यनुत्तरायां सम्यक्संबोधौ यावन्नेमं धर्मपर्यायं शृण्वन्ति नोद्गृह्णन्ति नावतरन्ति नावगाहन्ते न चिन्तयन्ति। यदा खलु पुनर्भैषज्यराज बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं शृण्वन्त्युद्गृह्णन्ति धारयन्ति[6] वाचयन्त्यवतरन्ति स्वाध्यायन्ति चिन्तयन्ति भावयन्ति तदा ते ऽभ्याशीभूता भविष्यन्त्यनुत्तरायां सम्यक्संबोधौ[7]। सत्त्वानामितो भैषज्यराज[8] धर्मपर्यायादनुत्तरा सम्यक्संबोधिराजायते[9]। तत्कस्य हेतोः। परमसन्धाभाषितविवरणो ह्ययं[10] धर्मपर्यायस्तथागतैरर्हद्भिः सम्यक्संबुद्धैर्धर्मनिगूढस्थानमाख्यातं[11] बोधिसत्त्वानां महासत्त्वानां परिनिष्पत्तिहेतोः[12]। यः कश्चिद्भैषज्यराज बोधिसत्त्वो ऽस्य धर्मपर्यायस्योन्नसेत्संत्रसेत्संत्रासमापद्येन्नवयानसंप्रस्थितः[13] स भैषज्यराज बोधिसत्त्वो महासत्त्वो वेदितव्यः। सचेत्पुनः

---

1) तद्ध° Cb.

2) पांसु B.

3) Sic O. दृष्ट्वा च पुनस्तस्यैवं भवेत् the rest.

4) दूरं O.

5) दिग्धागं A. K. W. दिग्धान् B. Ca. Cb.

6) Left out in Ca. Cb.

7) °या °धेः O. better.

8) Left out in K.

9) रूपन्ना Ca. रायत्ता O.

10) Sic O. परमसंभाषितं K. परमत्ता and परमत्वा the rest.

11) ते K. निष्कुट for ानगूढ O.

12) परिपाद्न O.

13) स्ये A. K. W.

श्रावकयानीयो[1] ऽस्य धर्मपर्यायस्योद्गसेत्संत्रसेत्संत्रासमापद्येदधिमानिकः स भैषज्यराज श्रावकयानिकः पुद्गलो वेदितव्यः ॥

यः कश्चिद्भैषज्यराज बोधिसत्त्वो महासत्त्वस्तथागतस्य परिनिर्वृतस्य पश्चिमे काले पश्चिमे समय इमं धर्मपर्यायं चतसृणां पर्षदां संप्रकाशयेत्तेन भैषज्यराज बोधिसत्त्वेन महासत्त्वेन तथागतलयनं प्रविश्य तथागतचीवरं प्रावृत्य[2] तथागतस्यासने निषद्यायं धर्मपर्यायश्चतसृणां पर्षदां संप्रकाशयितव्यः । कतमच्च[3] भैषज्यराज तथागतलयनम् । सर्वसत्त्वमैत्रीविकारः[4] खलु पुनर्भैषज्यराज तथागतलयनं । तत्र तेन कुलपुत्रेण प्रवेष्टव्यम् । कतमच्च[5] भैषज्यराज तथागतचीवरम्[6] । महात्नात्तिसौरित्यं[7] खलु पुनर्भैषज्यराज तथागतचीवरं । तत्तेन कुलपुत्रेण वा कुलदुहित्रा वा प्रावरितव्यम् । कतमच्च[8] भैषज्यराज तथागतस्य धर्मासनम् । सर्वधर्मशून्यताप्रवेशः खलु पुनर्भैषज्यराज तथागतस्य धर्मासनं । तत्र तेन कुलपुत्रेण निषत्तव्यं निषद्य[9] चायं धर्मपर्यायश्चतसृणां पर्षदां संप्रकाशयितव्यः । अनवलीनचित्तेन[10] बोधिसत्त्वेन[11] पुरस्ताद्बोधिसत्त्वगणस्य[12] बोधिसत्त्वयानसंप्रस्थितानां[13] चतसृणां पर्षदां संप्रका-

1) यानिक इति O.

2) प्रावरित्वा Cb. O.; more original.

3) च in all MSS. barring that O. has मं च; the more original reading.

4) मैत्राविकारिता O.

5) च A. B. K. W. च्च Ca. Cb. च्च O.

6) A. K. W. put चीवर after आसन.

7) All भ्यं. Cp. Pāli *soracca*.

8) च A. B. K. W. च्च Ca. Cb. च्च O.

9) निसीत्तव्यं निषीदित्वा A. W. निषत्तव्यं निषद्य B. निषतव्यः निषीदित्वा Ca. निसीदितव्यम् । निसीदित्वा K. निषीदितव्यं निषीदित्वा O.

10) नेन B. O.

11) Cb. adds महासत्त्वेन.

12) गणस्य बोधिसत्त्व left out in A. W.

13) B. adds भिक्षु.

शयितव्यः । अन्यलोकधातुस्थितश्चाहं भैषज्यराज तस्य कुलपुत्रस्य निर्मितैः पर्षदः समावर्तयिष्यामि । निर्मितांश्च भिक्षुभिक्षुण्युपासकोपासिकाः संप्रेषयिष्यामि[1] धर्मश्रवणाय । ते तस्य धर्मभाणकस्य भाषितं न प्रतिबाधिष्यन्ति[2] न प्रतिक्षेप्स्यन्ति । सचेत्खलु पुनरारण्यगतो भविष्यति तत्राप्यहमस्य[3] बक्षुदेवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगान्संप्रेषयिष्यामि धर्मश्रवणाय । अन्यलोकधातुस्थितश्चाहं भैषज्यराज तस्य कुलपुत्रस्य[4] मुखमुपदर्शयिष्यामि । यानि चास्यास्माद्धर्मपर्यायात्पदव्यञ्जनानि परिभ्रष्टानि भविष्यन्ति तानि तस्य स्वाध्यायतः[5] प्रत्युच्चारयिष्यामि[6] ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

लीयनां सर्व वर्जित्वा शृणुयात्सूत्रमीदृशम् ।
दुर्लभो वै अवो क्षस्य[7] अधिमुक्ती पि दुर्लभा ॥ १६ ॥
उदकार्थी यथा कश्चित्खानयेत्कूप जङ्गले ।
शुष्कं च पांसु पश्येत खान्यमाने पुनः पुनः ॥ १७ ॥
सो दृष्ट्वा चित्तयेत्तत्र दूरे वारि इतो भवेत् ।
इदं निमित्तं दूरे स्यात् शुष्कपांसुरितोच्कृतः ॥ १८ ॥
तदा तु आर्द्रं पश्येत पांसुं स्निग्धं पुनः पुनः ।
निष्ठा तस्य भवेत्तत्र नास्ति दूरे जलं इह ॥ १९ ॥

1) K. adds पर्षदां O. परिषदः wanting in the others; from धर्म till संप्रेषयिष्यामि left out in Cb.

2) All but O. वादि.

3) बक्षुं K.

4) K. adds मं. In O. मुखदर्शनं करिष्यामि.

5) तस्य वास्य (?) घटत्तस्य व्यायमत्तस्य स्वाध्यायं कर्त्तस्य (r. करोत्तस्य) O.

6) इति added in all but B., O. Added in O. अनुप्रबुद्धा चास्येमं धर्मपर्यायमनुप्रदास्यामि.

7) क्षोप Cb.

एवमेव तु ते दूरे बुद्धज्ञानस्य तादृशाः।
अशृण्वन्त इदं सूत्रमभाविता पुनः पुनः ॥ २० ॥
यदा तु गम्भीरमिदं श्रावकाणां विनिश्चयम्।
सूत्रराजं श्रुणिष्यन्ति चिन्तयिष्यन्ति वासकृत् ॥ २१ ॥
ते भोन्ति संनिकृष्टा वै बुद्धज्ञानस्य पण्डिताः।
यथैव चोक्षं[1] पांसुस्मिन्[2] आसन्नं जलमुच्यते ॥ २२ ॥
जिनस्य लेनं[3] प्रविशित्वा[4] प्रावरित्वा[5] मि चीवरम्।
ममासने निषीदित्वा अधीतो भाषि पण्डितः[6] ॥ २३ ॥
मैत्रीबलं[7] च लयनं क्षान्तिसौरत्य चीवरम्।
शून्यता चासनं मह्यमत्र स्थित्वा हि[8] देशयेत् ॥ २४ ॥
लोष्टं दण्डं वाथ शक्रो[9] आक्रोशतर्जनाथ वा।
भाषन्तस्य भवेत्तत्र स्मरतो मम ता सकेत्[10] ॥ २५ ॥
क्षेत्रकोटीसहस्रेषु आत्मभावो दृढो मम।
देशेमि धर्मं सत्त्वानां कल्पकोटीरचिन्तियाः ॥ २६ ॥

1) आद्रो K.
2) स्वेक्ष A. B. Cb. K. W. स्वेव Ca. सुस्मिन्नासन्ने वारिमुच्यते O.
3) All but O. लयनं.
4) प्राचं A. प्रविमित्वा B. Cb. W. प्राविस्य Ca. प्रविशित्वा K. O.
5) मि A. B. K. W. Cb. O. न Ca.
6) सूत्रमेतत् A. श्रेतिमं B. सूत्रिमं Ca. Cb. K. अत्रिमं W. पण्डितः O.
7) Ca. K. W. add मे. मैत्राबलं मम लीन (r. लेनं) O.
8) च B. K.
9) All but O. शक्तिंवा. Quite differently in O. ये लेणुदण्डशस्त्रेभि.
10) भवेत् A. क्षमेत् B. सकेत् Ca. Cb. K. O. समेत् W. ता our conjecture for तं in O., तां in the other MSS.

अर्कं पि तस्य वीरस्य यो मह्यं[1] परिनिर्वृते।
इदं सूत्रं प्रकाशेया प्रेषेष्ये बकुनिर्मितान्[2] ॥ २७ ॥
भिक्षवो भिक्षुणीया च[3] उपासका उपासिकाः।
तस्य पूजां करिष्यन्ति पर्षदश्च समा अपि ॥ २८ ॥
लोष्टं दण्डांस्तथाक्रोशांस्तर्जनां परिभाषणाम्।[4]
ये चापि तस्य दास्यन्ति धारिष्यन्ति[5] स्य निर्मिताः ॥ २९ ॥
यद्यपि चैको विकुरन्स्वाध्यायत्तो भविष्यति।
नरैर्विरहिते देशे अटव्यां पर्वतेषु वा ॥ ३० ॥
ततो ऽस्य अर्कं दर्शिष्ये[7] आत्मभाव प्रभास्वरम्।
स्खलितं चास्य स्वाध्यायमुद्धारिष्ये पुनः पुनः ॥ ३१ ॥
तत्किं च मे[8] विकुरतो एकस्य वनचारिणः।
देवान्यक्षांश्च प्रेषिष्ये सहायांस्तस्य नैकशः ॥ ३२ ॥
एतादृशास्तस्य गुणा भवन्ति चतुर्ण पर्षाणां[9] प्रकाशकस्य[10]।
एको विकारी वनकन्दरेषु[11] स्वाध्याय कुर्वन्तु ममा हि पश्येत् ॥ ३३ ॥

1) मह्यम् K. मम O.
2) इदम्प्रकाशेया प्रेष्येया प्रेष्यं बकुविनिर्मितं K.
3) Rather यो च, Prākr. = Skr. एयश्च. In O. णिकाश्चैव.
4) लेडुदण्डेण आ O.
5) धारयंति च A. W. धारिष्यन्ति च B. Ca. Cb. K. धारिष्यन्ते स्य O.
6 निष्पुरुषशब्द गत्वान अटवीं O.
7) Sic O.; तस्याहं दर्शयिष्ये the rest, against the metre.
8) च विकुरन्तस्य O. च सो विकुरतो the rest; सो points to मे, Skr. अस्य The r. of O. seems preferable.
9) चतुर्णां पर्षदां A. W. चतसृ पर्ष B. चतसृणां पर्षण Ca. चतसृणां पर्षणे Cb. चतस्र पर्षाण K. चतुर्ण परिषाण O.
10) Conjectural; MSS. प्रकाशतो ऽस्य and प्रकाशयन्तः.
11) वरं स एको A. चरं स एको W. एको हि विस्तरे B. एको विकरे Ca. Cb. एको हि विकरेद्वन K. एको विकारे O.

प्रतिभान[1] तस्य भवती अमङ्ग निरुक्ति[2]र्धर्माण बह्व प्रजानति।
तोषेति सो प्राणिसकल्पकोट्यः यथापि बुद्धे[3]न अधिष्ठितत्वात्॥ ३४॥
ये चापि तस्याश्रित भोन्ति सत्त्वास्ते बोधिसत्त्वा लघु भोन्ति सर्वे।
तत्संगतिं चापि निषेवमाणाः पश्यन्ति बुद्धान्यथ गङ्गवालिकाः॥ ३५॥

इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये धर्मभाणकपरिवर्तो नाम दशमः॥

1) नु A. Ca. Cb. न W. O. ण B. K.
2) विभक्ति O.
3) बुद्धेभिर् O. All but O. स्तथापि.

XI.

अथ खलु भगवतः पुरस्तात्ततः पृथिवीप्रदेशात्पर्षन्मध्यात्सप्तरत्नमयः[2] स्तूपो अभ्युद्गतः पञ्चयोजनशतान्युच्चैस्त्वेन[3] तदनुरूपेण च परिणाहेन[4]। अभ्युद्गम्य वैहायसमन्तरीक्षे समवातिष्ठ[5]च्चित्रो दर्शनीयः पञ्चभिः पुष्पग्रहणीयवेदिकासकलैः[6] स्वभ्यलंकृतो बहुतोरणसकलैः[7] प्रतिमण्डितः पताकाविजयन्तीसकलाभिः[8] प्रलम्बितो रत्नदामसकलाभिः[9] प्रलम्बितः षट्घण्टासकलप्रलम्बितस्तमालपत्रचन्दनगन्धं प्रमुञ्चमानस्तेन च गन्धेन सर्वावतीयं[10] लोकधातुः संमूर्छिताभूत्[11]। कूटावली चास्य यावच्चातुर्महाराजकायिकदेवभवनानि समुच्छ्रिताभूत्[12] सप्तरत्नमयी। तद्यथा सुवर्णस्य रूप्यस्य वैडूर्यस्य[13] मुसारगल्वस्याश्मगर्भस्य

1) Better in O. परिषन्मण्डलमध्ये.
2) ये A. य B. W. यः Cb. K. In O. स्तूप throughout of neuter g.
3) स्तेन K.
4) B. K. adds सिंहासन.
5) स्थासीत् O.
6) य left out in B. K. W. O.
भ्य left out in K. O.
8) स्र Cb. O.
9) का K. क the rest.
10) स्रालङ्कृतो (for भिः प्रलंबितो) K. शतसकलेभिरलंकृतं रत्न O.
11) भि K. रत्न° till तः left out in Cb. दामशतसकलेभिश्चमी (r. स) क्लेभिः O.
12) सर्वावत्तो O.
13) तगन्धेन स्फुटो बभूव O
14) चकूत्र A. B. K. कूत्र Cb.
15) तो भूत् A. B. K. W. तानि। Cb. अनुप्राप्ता O.
16) A. W. add स्फटिकस्य.

लोहितमुक्तेः कर्केतनस्य[1] । तस्मिंश्च स्तूपे त्रायस्त्रिंशत्कायिका देवपुत्रा दिव्यैर्मान्दारवम-
[2]
क्तामान्दारवैः पुष्पैस्तं [3]रत्नस्तूपमवकिरत्यध्यवकिरत्यभिप्रकिरन्ति[4] । तस्माच्च रत्नस्तूपादे-
वंरूपः शब्दो निश्चरति स्म । साधु साधु भगवञ्शाक्यमुने । सुभाषितस्ते ऽयं सद्धर्मपुण्डरी-
को धर्मपर्यायः । एवमेतद्भगवन्नेवमेतत्सुगत ॥

अथ खलु ताश्चतस्रः पर्षदस्तं महान्तं रत्नस्तूपं दृष्ट्वा वैहायसमन्तरीक्षे स्थितं संजा-
[5]
तहर्षाः प्रीतिप्रामोद्यप्रसादप्राप्ताः । तस्यां वेलायामुत्थायासनेभ्यो [6]ऽञ्जलिं प्रगृह्यावस्थि-
[7]
ताः । अथ खलु तस्यां वेलायां महाप्रतिभानो नाम बोधिसत्वो महासत्वः सदेवमानुषासुरं
लोकं कौतूहलप्राप्तं विदित्वा भगवन्तमेतदवोचत् । को भगवन्हेतुः कः प्रत्ययो ऽस्यैवंरू-
पस्य महारत्नस्तूपस्य लोके प्रादुर्भावाय । को वा[8] भगवन्नस्मान्महारत्नस्तूपादेवंरूपं शब्दं
निश्चारयति । एवमुक्ते भगवान्महाप्रतिभानं बोधिसत्वं महासत्वमेतदवोचत् । अस्मिन्म-
हाप्रतिभान महारत्नस्तूपे तथागतस्यात्मभावस्तिष्ठत्येकघनस्तस्यैष स्तूपः । स एष
शब्दं निश्चारयति । अस्ति महाप्रतिभानाधस्तायां दिश्यसंख्येयानि लोकधातुकोटीनयुत-
शतसहस्राण्यतिक्रम्य रत्नविशुद्धा नाम लोकधातुः । तस्यां [9]प्रभूतरत्नो नाम तथागतो
ऽर्हन्सम्यक्संबुद्धो ऽभूत् । तस्यैतद्भगवतः पूर्वप्रणिधानमभूत् । अर्हं खलु [10]पूर्वं [11]बोधिसत्व-

---

1) A. W. add पद्मरागस्य; B. K. add सप्तमस्य.

2) त्रयस्त्रिंशा दे O.

3) रत्नमयं W.

4) अभिप्रकिरन्ति left out in K. In O. follows a long description of other acts of worship to the Stūpa.

5) प्रीतिप्रसादप्रतिलब्धाः प्रामोद्यप्राप्ताः B. K. W. प्रीतिस्फुटाः प्रामोद्यजाता O.

6) लो B. Cb. K. लि W.

7) नाम left out in B. Cb. K.

8) वायं W.

9) तत्र विशुद्धरत्नायां लोकधातौ O.

10) पुनः added in A. W.

11) Sic O.; पूर्व, r. पूर्वं the rest.

चर्यां चरमाणो न तावन्निर्यातो[1] ऽनुत्तरायां सम्यक्संबोधौ यावन्मयायं सद्धर्मपुण्डरीको
धर्मपर्यायो बोधिसत्वाववादो न श्रुतो ऽभूत् । यदा तु मयायं सद्धर्मपुण्डरीको धर्मपर्यायः
श्रुतस्तदा[2] पश्चादहं परिनिष्पन्नो ऽभूवमनुत्तरायां सम्यक्संबोधौ । तेन खलु पुनर्महाप्र-
तिभान भगवता प्रभूतरत्नेन तथागतेनार्हता सम्यक्संबुद्धेन परिनिर्वाणकालसमये सदे-
वकस्य लोकस्य समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः पुरस्तादेवमा- 5
रोचितम् । मम खलु भिक्षवः परिनिर्वृतस्यास्य[3] तथागतात्मभावविग्रहस्यैको महारत्न-
[4]
स्तूपः कर्तव्यः । शेषाः पुनः स्तूपा ममोद्दिश्य कर्तव्याः । तस्य खलु पुनर्महाप्रतिभान
भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यैतदधिष्ठानमभूत् । अयं मम स्तूपो
दशसु दिक्षु सर्वलोकधातुषु येषु बुद्धक्षेत्रेष्वयं सद्धर्मपुण्डरीको धर्मपर्यायः संप्रकाश्येत तेषु
तेष्वयं ममात्मभावविग्रहस्तूपः समभ्युद्गच्छेत् । तैस्तैर्बुद्धैर्भगवद्भिरस्मिन्सद्धर्मपुण्डरीके 10
धर्मपर्याये भाष्यमाणे पर्यन्मण्डलस्योपरिवैहायसं[5] तिष्ठेत् । तेषां च बुद्धानां भगवतामिमं
सद्धर्मपुण्डरीकं[6] धर्मपर्यायं भाषमाणानामयं ममात्मभावविग्रहस्तूपः साधुकारं दद्यात् ।
तदयं महाप्रतिभान तस्य भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य शरी-
रस्तूपो ऽस्यां सभायां लोकधातावस्मिन्सद्धर्मपुण्डरीके धर्मपर्याये मया भाष्यमाणे ऽस्मा-
त्पर्षन्मण्डलमध्यादभ्युद्गम्योपर्यन्तरीक्षे वैहायसं[7] स्थित्वा साधुकारं ददाति स्म[8] ॥ 15

---

1) त्परिनिष्पन्नो O.

2) ततः O.

3) अस्य left out in K. इमस्य O.

4) तस्यात्म K. O.

5) सं A. Cb. W. स्ये B. स K. से न्तरीक्षे O. Cp. Pāli *vehāyasa ṭhito.*

6) A. adds नाम.

7) All से.

8) स्म left out in Cb. K. O.

अथ खलु महाप्रतिभानो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। पश्याम[1] वयं भगवन्नेतं[2] तथागतार्विग्रहं भगवतो ऽनुभावेन। एवमुक्ते भगवान्महाप्रतिभानं बोधिसत्त्वं महासत्त्वमेतदवोचत्। तस्य खलु पुनर्महाप्रतिभान भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य प्रणिधानं गुरुकमभूत्[3]। एतदस्य प्रणिधानम्। यदा खल्वन्येषु बुद्धक्षेत्रेषु बुद्धा भगवन्त इमं[4] सद्धर्मपुण्डरीकं धर्मपर्यायं भाषेयुस्तदायं ममात्मभावविग्रहस्तूपो ऽस्य सद्धर्मपुण्डरीकस्य धर्मपर्यायस्य श्रवणाय[6] गच्छेत्तथागतानामन्तिकम्[7]। यदा पुनस्ते बुद्धा भगवन्तो ममात्मभावविग्रहमुद्घाट्य दर्शयितुकामा[8] भवेयुश्चतसृणां पर्षदाम् अथ तैस्तथागतैर्दशसु दिक्ष्वन्योन्येषु बुद्धक्षेत्रेषु ये आत्मभावनिर्मितास्तथागतविग्रहा अन्योन्यनामधेयास्तेषु तेषु बुद्धक्षेत्रेषु सत्त्वानां धर्मं देशयन्ति तान्सर्वान्[9]सन्निपात्य तैरात्मभावनिर्मितैस्तथागतविग्रहैः सार्धं पश्चादयं ममात्मभावविग्रहस्तूपः समुद्घाट्योपदर्शयितव्यश्चतसृणां पर्षदाम्। तन्मयापि महाप्रतिभान बहवस्तथागतविग्रहा निर्मिता ये दशसु दिक्ष्वन्योन्येषु बुद्धक्षेत्रेषु लोकधातुसहस्रेषु सत्त्वानां धर्मं देशयन्ति ते सर्वे खल्विहानयितव्या भविष्यन्ति[12]॥

1) Conjectural for मो; in O. द्रष्टुकामा.
2) इमं O.; एवं the rest.
3) गुरुकं प्रणिधानं कृतं बभूव O.
4) Sic O.; दं the rest.
5) षेरन्स्त B. K.
6) श्रुणनाय O.
7) के K.
8) श्च in Cb. In O. the singular throughout.
9) सत्त्वान् K.
10) उप left out in A. W.
11) क्षागताः A. W.
12) All but O. add इति.

अथ खलु महाप्रतिभानो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। तानपि तावद्भगवंस्तथागतात्मभावांस्तथागतनिर्मितान्सर्वान्[1]वन्दामहे[2]॥

अथ खलु भगवांस्तस्यां वेलायामूर्णाकोशाद्रश्मिं प्रामुञ्चत्[3]। यया रश्म्या समनन्तरप्रमुक्तया पूर्वस्यां दिशि पञ्चाशत्सु गङ्गानदीवालुकासमेषु[4] लोकधातुकोटीनयुतशतसहस्रेषु ये[5] बुद्धा भगवन्तो विहरन्ति स्म ते सर्वे संदृश्यन्ते स्म। तानि च बुद्धक्षेत्राणि स्फटिकमयानि संदृश्यन्ते स्म रत्नवृक्षैश्च चित्राणि संदृश्यन्ते स्म दूष्यपटोद्दामसमलंकृतानि बहुबोधिसत्त्वशतसहस्रपरिपूर्णानि वितानवितानानि सप्तरत्नकेमज्जालप्रतिच्छन्नानि। तेषु तेषु[6] बुद्धा भगवन्तो मधुरेण वल्गुना स्वरेण सत्त्वानां धर्मं देशयमानाः संदृश्यन्ते स्म। बोधिसत्त्वशतसहस्रैश्च परिपूर्णानि तानि बुद्धक्षेत्राणि संदृश्यन्ते स्म। एवं पूर्वदक्षिणस्यां दिशि। एवं दक्षिणस्यां[7] दिशि। एवं दक्षिणपश्चिमायां दिशि। एवं पश्चिमायां[8] दिशि। एवं पश्चिमोत्तरायां[9] दिशि। एवमुत्तरायां दिशि। एवमुत्तरपूर्वस्यां[10] दिशि। एवमधस्तायां[11] दिशि। एवमूर्ध्वायां दिशि। एवं समन्ताद्दशसु दिक्ष्वेकैकस्यां दिशि बहूनि गङ्गानदीवालु-

1) द्रक्ष्याम सर्वान्वन्देम O.
2) Conjectural for मके.
3) प्रमुमोच K. प्रमुञ्चयामास O.
4) कासमेषु A. Ca. Cb. W. O. कोपमेषु B. K.
5) ये left out in K.
6) च B. K. W.
7) दक्षिणायां A. W.
8) पश्चिमस्यां A.
9) रस्यां B. K.
10) पूर्वायां A. W. O.
11) क्षेष्टिमायां O.

कोपमानि[1] बुद्धक्षेत्रकोटीनयुतशतसहस्राणि[2][3] बह्वीषु गङ्गानदीवालुकोपमेषु[4] लोकधातुकोटीनयुतशतसहस्रेषु ये बुद्धा भगवन्तस्तिष्ठन्ति ते सर्वे संदृश्यन्ते स्म ॥

अथ खलु ते दशसु दिक्षु तथागता अर्हन्तः सम्यक्संबुद्धाः स्वान्स्वान्बोधिसत्त्वगणानामन्त्रयन्ति स्म। गन्तव्यं खलु पुनः कुलपुत्रा भविष्यत्यस्माभिः सहां लोकधातुं भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक्संबुद्धस्यान्तिकं प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य शरीरस्तूपवन्दनायै[5]। अथ खलु ते बुद्धा भगवन्तः स्वैः स्वैरुपस्थायकैः सार्धमात्मद्वितीया[6] आत्मतृतीया[6] इमां सहां लोकधातुमागच्छन्ति स्म। इति हि तस्मिन्समय इयं सर्वावती लोकधातू रत्नवृक्षप्रतिमण्डिताभूद्वैडूर्यमयी सप्तरत्नकेमज्जालसंछन्ना महारत्नगन्धधूपनधूपिता[7] मान्दारवमहामान्दारवपुष्पसंस्तीर्णा[8] किङ्किणीजालालंकृता सुवर्णसूत्राष्टापदविनद्धापगतग्रामनगरनिगमजानपदराष्ट्रराजधान्यपगतकालपर्वतापगतमुचिलिन्दमहामुचिलिन्दपर्वतापगतचक्रवाडमहाचक्रवाडपर्वतापगतसुमेरुपर्वतापगततदन्यमहापर्वतापगतमहासमुद्रापगतनदीमहानदीपरिसंस्थिताभूद्[9][10][11] पगतदेवमनुष्यासुरकायापगतनिरयतिर्यग्योनियमलोका। इति हि तस्मिन्समये ये ऽस्यां सहायां लोकधातौ षड्कत्युपपन्नाः सन्तास्ते सर्वे ऽन्येषु लोकधातुषूपनिक्षिप्ता अभूवन्स्थापयित्वा ये तस्यां

1) कासमा A. W.

2) क्षेत्राणि K.

3) नियुत K. नयुत O., and left out in the other MSS.

4) वालिकस O.

5) Sic O., पं दर्शनाय वन्दनायै the others.

6) या A. B. K. W. O. यं Cb.

7) धूपेण A. W.

8) संकीर्णा A.

9) Sic O.; the other MSS. have दभिनद्धा; elsewhere दनिबद्ध.

10) B. Cb. put here सुमेरुपर्वता; K. reads मेरुपर्वत. Wholly different in O.

11) परिसंस्थापयत्य Cb. °स्थितो भूद् B. °स्थिताभूद् A. K. W. °स्थापयामास O. Cf. p. 246 below.

पर्षदि सैनिपतिता अभूवन्। अथ खलु ते बुद्धा भगवन्त उपस्थायकद्वितीया[1] उपस्थायकतृतीया[1] इमां सहां लोकधातुमागच्छन्ति स्म। आगतागताश्च ते तथागता रत्नवृक्षमूले सिंहासनमुपनिश्रित्य विहरन्ति स्म। एकैकश्च रत्नवृक्षः पञ्चयोजनशतान्युच्चैस्त्वेनाभूदनुपूर्वशाखापत्रपलाशपरिणाहः[2][3] पुष्पफलप्रतिमण्डितः। एकैकस्मिंश्च रत्नवृक्षमूले सिंहासनं प्रज्ञप्तमभूत्पञ्चयोजनशतान्युच्चैस्त्वेन महारत्नप्रतिमण्डितम्[4]। तस्मिन्नेकैकस्तथागतः पर्यङ्कं बद्ध्वा[5] निषण्ण अभूत्। अनेन पर्यायेण सर्वस्यां त्रिसाहस्रमहासाहस्रायां[6][7] लोकधातौ सर्वरत्नवृक्षमूलेषु[8] तथागताः पर्यङ्कं बद्ध्वा[5] निषण्णा अभूवन्॥

तेन खलु पुनः समयेनेयं त्रिसाहस्रमहासाहस्री[9] लोकधातुस्तथागतपरिपूर्णाभूत्[10] तावद्भगवतः शाक्यमुनेस्तथागतस्यात्मभावनिर्मिता एकस्मादपि दिग्भागात्सर्व आगता अभूवन्[11]। अथ खलु पुनर्भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तेषां तथागतविग्रहाणामागतागतानामवकाशं निर्मिमीते स्म। समन्तादष्टभ्यो दिग्भ्यो विंशतिबुद्धक्षेत्रकोटीनयुतशतसहस्राणि सर्वाणि वैडूर्यमयानि सप्तरत्नकेमज्जालसंछन्नानि किङ्किणीजा-

1) प K.

2) लेषु (r. पू) प O.

3) °भूत् अर्धयोजनपरिमाणत्तकेनानुपूर्व B. °भूदर्धे योजनपरिमाणत्ततेनानुपूर्वे K.

4) शत left out in B. K.

5) आबद्ध्वा O.

6) सर्वे K. सर्वत्र O.

7) स्रे B. O.

8) In K. only added सिंहासनेषु.

9) नायं तृसाहस्रमहासाहस्रो O.; cp. note 7 above.

10) B. K. add च.

11) In the following the text in O. much amplified.

12) 2-nd गता in Cb. only.

लालंकृतानि मान्दारवमहामान्दारवपुष्पसंस्तीर्णानि[1] दिव्यवितानवितानानि दिव्यपुष्पदामाभिप्रलम्बितानि दिव्यगन्धधूपनधूपितानि[2][3]। सर्वाणि च तानि विंशतिबुद्धक्षेत्रकोटीनयुतशतसहस्राण्यपगतग्रामनगरनिगमजनपदराष्ट्रराजधानीन्यपगतकालपर्वतान्यपगतमुचिलिन्दमहामुचिलिन्दपर्वतान्यपगतचक्रवाडमहाचक्रवाडपर्वतान्यपगतसुमेरुपर्वतान्यपगतदन्यमहापर्वतान्यपगतमहासमुद्राण्यपगतनदीमहानदीनि परिसंस्थापयत्यपगतदेवमनुष्यासुरकायान्यपगतनिरयतिर्यग्योनियमलोकानि[4][5][6]। तानि च सर्वाणि बुद्धबुद्धक्षेत्राण्येकमेव बुद्धक्षेत्रमेकमेव पृथिवीप्रदेशं परिसंस्थापयामास समं रमणीयं[7] सप्तरत्नमयैश्च वृक्षैश्चित्रितं तेषां च रत्नवृक्षाणां पञ्चयोजनशतान्यारोहपरिणाहो[8] अनुपूर्वशाखापत्रपुष्पफलोपेतः। सर्वस्मिंश्च[9] रत्नवृक्षमूले पञ्चयोजनशतान्यारोहपरिणाहं[10] दिव्यरत्नमयं विचित्रं दर्शनीयं सिंहासनं प्रज्ञप्तमभूत्[11][12]। तेषु[13] रत्नवृक्षमूलेष्वागतागतास्तथागताः सिंहासनेषु पर्यङ्कं बद्ध्वा[14] निषीदन्ति स्म। अनेन पर्यायेण पुनरपराणि विंशतिलोकधातुकोटीनयुतशत-

1) को A. Cb. W. स्तो B. K. O.
2) मा B. K.
3) धूपन in Cb. O. only. परिधूपि O.
4) K. O. add समुद्र.
5) परिसंस्थापयति अपगत B. O. °स्थाप्य W. Cp. p. 244 above.
6) A. W. add च.
7) परिस्था Cb. परिसंस्था K. O. Without परि the rest.
8) B. K. add प्रासादिकं.
9) रत्न only in O.
10) र्वे A.
11) रत्न in O. B. K. only.
12) शत left out in K. O.
13) तस्मिंश्च A. Cb. K. O. W. तेषु B.
14) मूले आगता A. Cb. O. K. W. मूलषु आ° B. Rather to r. मूल आ° and °सने.
15) आबद्ध्वा O., as above.

सहस्राण्येकैकस्यां दिशि शाक्यमुनिस्तथागतः परिशोधयति स्म। तेषां[1] तथागतानामागतागतानामवकाशार्थं[2] तान्यपि विंशतिलोकधातुकोटीनयुतशतसहस्राण्येकैकस्यां दिश्यपगतग्रामनगरनिगमजनपदराष्ट्रराजधानीन्यपगतकालपर्वतान्यपगतमुचिलिन्दमहामुचिलिन्दपर्वतान्यपगतचक्रवाडमहाचक्रवाडपर्वतान्यपगतसुमेरुपर्वतान्यपगतदन्यमहापर्वतान्यपगतमहा[3]समुद्राण्यपगतनदीमहानदीनि परिसंस्थापयत्यपगतदेवमनुष्यासुरकायान्यपगतनिरयतिर्यग्योनियमलोकानि। ते च सर्वसत्त्वा अन्येषु[4] लोकधातुषूपनिक्षिप्ताः। तान्यपि[5] बुद्धक्षेत्राणि वैडूर्यमयानि सप्तरत्नकेसरजालप्रतिच्छन्नानि किङ्किणीजालालंकृतानि मान्दारवमहामान्दारवपुष्पसंस्तीर्णानि[6] दिव्यवितानवितानानि दिव्यपुष्पदामाभिप्रलम्बितानि[7] दिव्यगन्धधूपनधूपितानि[8] रत्नवृक्षोपशोभितानि। सर्वे च ते रत्नवृक्षाः पञ्चयोजनशतप्रमाणाः[9] पञ्चयोजनप्रमाणानि[10] च सिंहासनान्यभिनिर्मितानि[11]। ततस्ते तथागता निषीदन्ति स्म पृथक्पृथक्सिंहासनेषु रत्नवृक्षमूलेषु[12] पर्यङ्कं बद्ध्वा॥

तेन खलु पुनः समयेन भगवता शाक्यमुनिना[13] ये निर्मितास्तथागताः पूर्वस्यां दिशि सत्त्वानां धर्मं देशयन्ति स्म[14] गङ्गानदीवालुकोपमेषु[15] बुद्धक्षेत्रकोटीनयुतशतसहस्रेषु

1) ये Cb.
2) 2-nd गता in Cb. O. only.
3) K. O. add समुद्र.
4) न्यलो O. The reading न्येषु in the other MSS. is inconsistent.
5) न्यान्ये पि Cb. न्यान्यपि K.
6) को A. B. Cb. स्तो K. W. O.
7) All but O. have भिप्रति; but see above p. 246, l. 2.
8) परिधू O.
9) शत left out in B. सहस्र W.
10) W. adds शत.
11) प्रज्ञप्तानि निर्मिणोति। तत्र O.
12) मूले O.
13) B. adds तथागतेनार्हता. K. adds तथागतेन.
14) स्म left out in Cb. K. O.
15) कसमेषु (r. का°) O.

ते सर्वे समागता दशभ्यो दिग्भ्यस्ते चागता अष्टासु दिक्षु निषण्णा अभूवन्। तेन खलु पुनः समयेनैकैकस्यां दिशि त्रिंशल्लोकधातुकोटीशतसहस्राण्यष्टभ्यो दिग्भ्यः समन्तात्तेस्तथागतैराक्रान्ता अभूवन्। अथ खलु ते तथागताः स्वेषु स्वेषु सिंहासनेषूपविष्टाः स्वान्स्वानुपस्थापकान्संप्रेषयन्ति[1] स्म भगवतः शाक्यमुनेरन्तिकं[2] रत्नपुष्पपुटान्[3] दत्त्वैवं वदन्ति स्म। गच्छत यूयं गृध्रकूटं पर्वतं गत्वा च पुनस्तस्मिंस्तं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं वन्दित्वास्मद्वचनादल्पाबाधतां मन्दग्लानतां च बलं च स्पर्शविहारतां[4] च[5] परिपृच्छध्वं सार्धं बोधिसत्त्वगणेन श्रावकगणेन। अनेन च रत्नराशिनाभ्यवकिरध्वमेवं च वदध्वम्[6]। दृश्यति खलु पुनर्भगवांस्तथागतश्छन्दस्य महारत्नस्तूपस्य समुद्घाटने। एवं ते[7] तथागताः सर्वे स्वान्स्वानुपस्थापकान्संप्रेषयामासुः॥

अथ खलु भगवाञ्शाक्यमुनिस्तथागतस्तस्यां वेलायां स्वाभिर्निर्मितानशेषतः समागतान्विदित्वा पृथक्पृथक्सिंहासनेषु निषण्णांश्च विदित्वा तांश्चोपस्थापकांस्तेषां तथागतानामर्हतां सम्यक्संबुद्धानामागतान्विदित्वा छन्दं च तैस्तथागतैरर्हद्भिः सम्यक्संबुद्धैरारोचितं विदित्वा तस्यां वेलायां स्वकाद्धर्मासनाद्उत्थाय वैकायसमन्तरोन्ते अतिष्ठत्। अथ खलु भगवांस्तं महान्तं रत्नस्तूपं वैकायसं[8] स्थितं दक्षिणया कुस्ताङ्गुल्या मध्ये समुद्घाटयति स्म समुद्घाट्य च द्वे भित्ती[1] प्रविसारयति[2] स्म। तद्यथापि नाम महानगरद्वारेषु[3] महाकपाटसंपुटावर्गलाविमुक्तौ प्रविसार्येते[4][5]। एवमेव भगवांस्तं महान्तं रत्नस्तूपं वैकायसं स्थितं दक्षिणया कुस्ताङ्गुल्या मध्ये समुद्घाट्यापावृणोति[6] स्म। समनन्तरविवृतस्य खलु पुनस्तस्य महारत्नस्तूपस्य अथ खलु भगवान्प्रभूतरत्नस्तथागतस्तथागतोऽर्हन्सम्यक्संबुद्धः सिंहासनोपविष्टः पर्यङ्कं बद्ध्वा[7] परिशुष्कगात्रः संघटितकायो यथा समाधिसमापन्नस्तथा संदृश्यते स्म। एवं च वाचमभाषत[8]। साधु साधु भगवञ्शाक्यमुने। सुभाषितस्ते अयं सद्धर्मपुण्डरीको धर्मपर्यायः। साधु खलु पुनस्त्वं भगवञ्शाक्यमुने यस्त्वमिमं सद्धर्मपुण्डरीकं धर्मपर्यायं पर्षन्मध्ये भाषसे। अस्यैवाहं भगवन्सद्धर्मपुण्डरीकस्य धर्मपर्यायस्य श्रवणायेहागतः॥

अथ खलु ताश्चतस्रः पर्षदस्तं भगवन्तं प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं[10] बहुकल्पकोटीनयुतशतसहस्रपरिनिर्वृतं तथा भाषमाणं दृष्ट्वाश्चर्यप्राप्ता अद्भुतप्राप्ता अभूवन्। तस्यां वेलायां तं भगवन्तं प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं तं च भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं दिव्यमानुष्यकैः[11] रत्नराशिभिरभ्यवकिरन्ति स्म। अथ खलु

1) ते B. Cb. K. न्ति A. W. O.

2) A. W. add वैकायसं स्थितं.

3) कृत्वा A.

4) च B. O. left out in Cb. K.

5) All but O. संस्पर्श.

6) अभ्यवकिरथ एवं च वदथ O. The others वि for अभि, but see p. 249, l. below.

7) तेन A. Cb. W. ते B. K. O.

8) सं A. Cb. W. सि B. से K. O.

1) द्वौ भित्तौ Cb.

2) प्रविचारयति A. प्रतिसारयति B. K. प्रसारयति Cb. प्रविचारयते W. प्रविसारयामास O.

3) षु left out in B.

4) चगति A. वर्गच B. वर्गड Cb. K. चर्गति च W. कवाटसमूकृता अर्गलप्रमुक्ता O.

5) अपावृणवन्ति O. प्रतिसार्यते the others.

6) व्याप्रावृ A. W. व्यापावृ B. व्यावव्रृ Cb. व्य प्रावृ K. समुत्पाडयित्वा द्वे द्वे भित्ती विसारयति स्म O.

7) पर्यङ्केन बन्धेन O.

8) भाषते स्म Cb. K. भाषति O.

9) भगवतः शाक्यमुनेः K.

10) A. Cb. W. add भगवन्तं च शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं.

11) ष्यै K. ष्यकेभि पुष्पेभिः रत्नपुष्पा O.

भगवान्प्रभूतरत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धो भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक्संबुद्धस्य तस्मिन्नेव सिंहासने ऽर्धासनमदासीत्तस्यैव महारत्नस्तूपाभ्यन्तर एवं च वदति। इहैव भगवाञ्शाक्यमुनिस्तथागतो निषीदतु। अथ खलु भगवाञ्शाक्यमुनिस्तथागतस्तस्मिन्नर्धासने निषसाद तेनैव तथागतेन सार्धमुभौ च तौ तथागतौ तस्य महारत्नस्तूपस्य मध्ये सिंहासनोपविष्टौ वैकायसमत्तरोत्तस्थौ[1] संदृश्येते[2]॥

अथ खलु तासां चतसृणां पर्षदामेतदभवत्। दूरस्था वयमाभ्यां तथागताभ्यां। यन्नून वयमपि तथागतानुभावेन वैकायसमभ्युद्गच्छेम इति। अथ खलु भगवाञ्शाक्यमुनिस्तथागतस्तासां चतसृणां पर्षदां चेतसैव चेतः परिवितर्कमाज्ञाय तस्यां वेलायामृद्धिबलेन ताश्चतस्रः पर्षदो वैकायसमुपर्यन्तरीक्षे प्रतिष्ठापयति स्म। अथ खलु भगवाञ्शाक्यमुनिस्तथागतस्तस्यां वेलायां ताश्चतस्रः पर्षद आमन्त्रयते स्म। को भिक्षवो युष्माकमुत्सहते तस्यां सहायां लोकधाताविमं सद्धर्मपुण्डरीकं धर्मपर्यायं संप्रकाशयितुम्। अयं स कालो ऽयं स समयः संमुखीभूतस्तथागतः परिनिर्वापयितुकामो भिक्षवस्तथागत इमं सद्धर्मपुण्डरीकं धर्मपर्यायमुपनिक्षिप्य॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

अयमागतो निर्वृतको महर्षी रत्नामयं स्तूप प्रविश्य नायकः।
अवणार्थ धर्मस्य इमस्य भिक्षवः को धर्महेतोर्न जनेत वीर्यम्॥ १॥
बहुकल्पकोटीपरिनिर्वृतो ऽपि सो नाम अद्यापि शृणोति धर्मम्।
तत्किं तत्किं गच्छति धर्महेतोः सुदुर्लभो धर्म यमेवद्रूपः॥ २॥

1) क्षे A. K.
2) दृश्यते A. संदृश्यते B. संदृश्यंते Cb. संदृश्येते K. दृश्यन्ते W. दृश्यत O.
3) तः A. Cb. ता B. K. तं W. तम् Cb. O.
4) वापयि in all but B. K. which have वा for वापि.
5) क्षिपित्वा Cb.
6) रत्नामयां A. रत्नामयं B. K. रतनामयं Cb. रत्नमयं W.
7) तोर्न जनेत B. O. तो न जने Cb. तो न जयेत W. तोर्जनयेत A. Ca.

प्रणिधानमेतस्य विनायकस्य निषेवितं पूर्वभवे यदासीत्।
परिनिर्वृतोपि[1] इमु सर्वलोकं पर्येषती[2] सर्वदशदिशासु[3]॥ ३॥
इमे च सर्वे मम चात्मभावाः सकल्पकोट्यो यथ गङ्गवालिकाः।
ते धर्मकृत्यस्य कृतेन आगताः परिनिर्वृतं च[4] इमु द्रष्टु नाथम्॥ ४॥
क्षोरित्व नेत्राणि स्वकास्वकानि तथ श्रावकान्नरमरुतश्च[5] सर्वान्।
सद्धर्मसंरक्षणहेतु सर्वे यथा चिरं तिष्ठिय[7] धर्मनेत्री[8]॥ ५॥
एतेष बुद्धान निषीदनार्थं बहुलोकधातून सकल्पकोट्यः।
संक्रामिता मे तथ सर्वसत्त्वा ऋद्धीबलेन[9] परिशोधिताश्च॥ ६॥
एतादृशी उत्सुकता[10] इयं मे कथं प्रकाशेदिय[11] धर्मनेत्री[12]।
इमे च बुद्धा स्थित अप्रमेया द्रुमाण मूले यथ पद्मराशिः[13]॥ ७॥
द्रुममूलकोटीय अनल्पकायो[14] सिंहासनस्थेकि विनायकेकि।
शोभन्ति तिष्ठन्ति च[15] नित्यकालं द्रुताशनेनेव यथान्धकारम्॥ ८॥

1) पि B. Cb. W. O. पी the rest.
2) पर्यास्यतो B. पर्यएठते O.
3) दि A. W. O. दि B. Cb. K.
4) चो B. द्रष्टुमिमं विनायकम् O.
5) कनरमरुतांश्च A. का नरमरुतश्च B. K. कानान्नरमरुश्च Cb. का नरमरुतांश्च W. कान्नरमरुणश्च सर्वे O.
6) All but O. कथं.
7) तिष्ठेयु A. Cb. W. तिष्ठय B. तिष्ठयु K. तिष्ठिय O.
8) त्रों K. W.
9) वज्रेन A. K. W. बलो सो B. बलं च Cb.
10) उत्सकृता A.
11) य A. Cb. K. W. म B. O.
12) त्रो A. B. W. O. त्रों Cb. K.
13) सि A. Cb. W. शिं B. शिः K.
14) कानि A. W. काय B. कायो Cb. K. अनल्पकानि O.
15) All but O. न.

गन्धो मनोज्ञो दशसू[1] दिशासु प्रवायते लोकविनायकानाम्।
येना[2] इमे मूर्छित सर्वसत्त्वा वाते प्रवाते इह नित्यकालम्॥ ९॥
मयि निर्वृते[3] यो इतं धर्मपर्यायु धारयेत्।
क्षिप्रं व्याकृरतां वाचं लोकनाथान संमुखम्॥ १०॥
परिनिर्वृतो हि संबुद्धः प्रभूतरतनो[4] मुनिः।
सिंहनादं श्रुणे[5] तस्य व्यवसायं करोति यः॥ ११॥
अहं द्वितीयो बहवो इमे च ये कोटियो आगत नायकानाम्।
व्यवसाय[6] श्रोष्यामि जिनस्य पुत्रात्[7] यो उत्सहेद्धर्ममिमं प्रकाशितुम्॥ १२॥
अहं च तेन[8] भवि पूजितः सदा प्रभूतरत्नश्च जिनः स्वयंभूः।
यो गच्छते दिशविदिशासु[9] नित्यं श्रवणाय धर्मं इममेवरूपम्॥ १३॥
इमे च ये आगत लोकनाथा विचित्रिता यैरिय शोभिता भूः।
तेषां पि पूजा विपुला अनल्पका कृता भवेत्सूत्रप्रकाशनेन[10]॥ १४॥
अहं च दृष्टो इह आसनस्मिन्[11]भगवांश्च यो ज्यं स्थितु स्तूपमध्ये।
इमे च अन्ये बहुलोकनाथा ये आगताः क्षेत्रसहस्रकोटिभिः[12]॥ १५॥

1) सु in all MSS.
2) येन A. W. O. येनो B. K. येना Cb.
3) मम निर्वृतस्य A. Cb. W. मयि निर्वृते B. मयि निर्वृत K.
4) रत्नो A. W. तना B. Cb. तनो K. O.
5) शृणव A. श्रुतें B. स्रुणी Cb. श्रुणे K. O. शृणवन् W.
6) व्यवलोकय A. W.
7) पुत्रा B. जिनात्मजानां O.
8) तेन A. K. W. O. तेनो B. ते Cb.
9) दिशि A. B. K. W. देश Cb. दिश O.
10) प्रकाशनेन B. Cb. K. O. प्रकाशितेन the others.
11) ने W.
12) क्षेत्रसहस्रकोटिभिः B. O., an erroneous Sanskritisation of a Prākṛt Ablat. c. pl. in भि or हि. Wholly wrong in the other MSS. क्षेत्रशतैरनेकैः.

चित्तेथ[1] कुलपुत्राहो[2] सर्वसत्त्वानुकम्पया।
सुदुष्करमिदं स्थानमुत्सहेत्ति विनायकाः[3]॥ १६॥
बहुसूत्रसहस्राणि यथा गङ्गाय वालिकाः।
तानि कश्चित्प्रकाशेत न तद्भवति दुष्करम्॥ १७॥
सुमेरुं यश्च हस्तेन अध्यालम्बित्व मुष्टिना।
क्षिपेत क्षेत्रकोटीयो न तद्भवति दुष्करम्॥ १८॥
यश्च इमां[5] त्रिसाहस्रों[6] पादाङ्गुष्ठेन कम्पयेत्।
क्षिपेत क्षेत्रकोटीयो न तद्भवति दुष्करम्॥ १९॥
भवाग्रे यश्च तिष्ठित्वा[7] धर्मं भाषेन्नरो इह।
अन्यसूत्रसहस्राणि न तद्भवति दुष्करम्॥ २०॥
निर्वृतस्मिन्तु[8] लोकेन्द्रे पश्चात्काले मुदारुणे।
य इदं धारयेत्सूत्रं भाषेद्वा तत्सुदुष्करम्॥ २१॥
आकाशधातुं यः सर्वामेकमुष्टिंतु[9] निक्षिपत्।
प्रक्षिपित्वा च गच्छेत न तद्भवति दुष्करम्॥ २२॥
यस्तु ईदृशकं सूत्रं निर्वृतस्मिंस्तदा मयि।
पश्चात्काले लिखेच्चापि इदं भवति दुष्करम्॥ २३॥

1) MSS. except O. add यूयं.
2) All but O. कुलपुत्राः
3) Sic O.; कृति स नायकः the rest.
4) लु in all MSS. but O.
5) यश्चेमां A. B. W. O. यश्च इमं Cb. K.
6) स्रां A. W. स्रिं B. स्रीं Cb. K. O.
7) यश्च भवाग्रे स्थित्वा A. Cb. W. °तिष्ठित्वा K. भवाग्रे यश्च तिष्ठत्वा B.
8) All ते ऽस्मि. Many lines wanting in O.
9) सुक्षि A. सुप्रक्षि W. तु निक्षि Cb. K.

पृथिवीधातुं च यः सर्वां नखाग्रे संप्रवेशयेत् ।
प्रतिपित्वा च गच्छेत ब्रह्मलोकं पि आकृक्रेन् ॥ २४ ॥
न दुष्करं हि सो [1]कुर्यान्न च वीर्य स्य तत्तकम् ।
तं [2]दुष्करं करित्वान सर्वलोकस्यिकाग्रतः [3]॥ २५ ॥
अतो ऽपि दुष्करतरं [4]निर्वृतस्य तदा मम ।
पश्चात्काले [5]इदं मूत्रं वदेया यो मुहूर्तकम् ॥ २६ ॥
न दुष्करमिदं लोके कल्पदाकृस्मि यो नरः ।
मध्ये गच्छेत दाक्षेत्तस्तृणभारं वकेत च [6]॥ २७ ॥
अतो ऽपि दुष्करतरं निर्वृतस्य तदा मम ।
धारयित्वा इदं [7]मूत्रमेकसत्वं पि आवयेत् ॥ २८ ॥
धर्मस्कन्धसकस्राणि चतुरशीतिं पि [8]धारयेत् ।
सोपदेशान्यथाप्रोक्तान्देशयेत्प्राणिकोटिनाम् ॥ २९ ॥
न क्षेतं [9]दुष्करं भोति तस्मिन्कालस्मि [10]भिनुणाम् ।
विनयेच्छ्रावकान्मक्षं पञ्चाभिज्ञासु स्थापयेत् ॥ ३० ॥

1) सत्क A. सत्कु B. W. सः कु Cb. सो कु K.
2) Prākṛt for तद्.
3) स्मिकाग्रतो A. W. मिकाग्रतो Cb. स्मिकागतः B. K. Our r. conjectural.
4) All MSS. add कुर्यान् but see vs. 28 below.
5) ले in all MSS.
6) दाक्षेत्तो A. दृक्षत्तो B. Cb. K. W., the more original reading.
7) इमं Cb. K.
8) शीतिं पि B. K. The other MSS. have ति धा, omitting पि; metrically wrong.
9) क्षेतं A. W. एतं B. Cb. एत K. Skr. एतद्.
10) कालेद्य K. कालेस्मि Cb.

तस्येदं दुष्करतरं इदं मूत्रं च धारयेत् [1]।
अद्धेदधिमुच्येद्वा भाषेद्वापि पुनः पुनः ॥ ३१ ॥
कोटीसकस्रान्वकृवः [2]अर्कृत्वे यो ऽपि स्थापयेत् ।
षडभिज्ञान्महाभागान्यथा गङ्गाय वालिकाः ॥ ३२ ॥
अतो वकुतरं [3]कर्म कारोति स नरोत्तमः ।
निर्वृतस्य हि यो मक्षं मूत्रं धारयते वरम् ॥ ३३ ॥
लोकधातुसकस्रेषु बकु मे धर्म भाषिताः ।
अद्यापि चाहं भाषामि बुद्धज्ञानस्य कारणात् ॥ ३४ ॥
इदं तु सर्वसूत्रेषु सूत्रमग्रं प्रवुच्यते [4]।
धारेति यो इदं मूत्रं स धारे जिनविग्रकृम् ॥ ३५ ॥
भाषधं कुलपुत्राकृो [5]संमुखं वस्तद्यागतः ।
य उत्सकृति वः कश्चित्पश्चात्काल[6]स्मि धारणाम् [7]॥ ३६ ॥
सकृत्प्रियं [8]कृतं भोति लोकनाथान सर्वशः ।
डराधारमिदं मूत्रं धारयेद्यो मुहूर्तकम् ॥ ३७ ॥
संवर्णितश्च सो भाति लोकनाथेकिं [9]सर्वदा ।
शूरः शौटीर्यवांश्चापि [10]क्षिप्राभिज्ञश्च बोधये ॥ ३८ ॥

1) य इदं सूत्र धा O.
2) स्रां बकृवः A. W. स्रबकृवः B. स्राबकृव Cb. K. O.
3) दुष्करतरं Cb.
4) प्रबुच्चति A. Cb. W. प्रवुद्धति B. प्रबुध्यते K. The original r. पवुच्चति.
5) कृे A. कृो B. Cb. K. कृं W.
6) ले W.
7) णां A.
8) सकृत्प्रियं Cb. K. सकाप्रियं the rest.
9) धेन K. धान Cb.
10) सौटीरवांश्चापि A. सौटीरवं चैव B. सौटीर्यवांश्चैपिव Cb. सौटीरवांश्चैव K. सौटीरकांश्चापि W.

धुरावाकृश्च सो भोति लोकनाथान ग्रौरसः।
दत्तभूमिमनुप्राप्तः सूत्रं धारेति यो इदम्[1]॥ ३९॥
चतुभूतश्च सो भोति लोके सामरमानुषे।
इदं[3] सूत्रं प्रकाशित्वा निर्वृते नरनायके॥ ४०॥
वन्दनीयश्च सो भोति सर्वसत्त्वान पण्डितः।
पश्चिमे कालि यो भाषेत्सूत्रमेकं[4] मुहूर्तकम्[5]॥ ४१॥

ग्रथ खलु भगवान्कृत्स्नं बोधिसत्त्वगणं ससुरासुरं च लोकमामन्त्र्येतद्वोचत्। भूतपूर्वं भिक्षवो ऽतीति ऽध्वन्यकृमप्रमेयासंख्येयान्कल्पान्सद्धर्मपुण्डरीकं[6] सूत्रं पर्येषितवानखिन्नो ऽविग्रान्तः। पूर्वं चाकृमनेकान्कल्पाननेकानि कल्पशतसकृस्राणि राजाभूवम्। ग्रनुत्तरायां सम्यक्संबोधौ कृतप्राणिधानो[8] न च मे चित्तव्यावृत्तिरभूत्। षण्णां च पारमितानां परिपूर्या[9] उद्युक्तो ऽभूवमप्रमेयदानप्रदः सुवर्णमणिमुक्तावैडूर्यशङ्खशिलाप्रवाडज्ञातद्रूपरजताश्मगर्भमुसारगल्वलोहितमुक्ताश्मानगरनिगमजनपदराष्ट्रराजधानीभार्यापुत्रदुहितृदासोदासकर्मकरपौरुषेयकस्त्यश्वरथपावदात्मशरीरपरित्यागी करचरणशि-

1) इमं in all MSS.

2) कृ Cb., which is admissible, provided one r. समकृ.

3) इमं B. K.

4) मेतत्सु A. K. W. मेतं B. मेकं सु Cb. MSS. add इति.

5) Hereafter Kumārajīva makes the 12th chapter entitled Devadatta-parivarta; so does Dharmarakṣa sometimes under the title of Brahmacāriparivarta. The whole up to the beginning of Ch. XII is a clumsy interpolation.

6) Cb. adds धर्मपर्यायं.

7) शत left out in B. Cb. But K. reads कल्पशतानि ग्रनेकानि कल्पसकृस्राणि.

8) ने B.

9) परिपूर्य A. °र्ये B. °र्यै Cb. K. W.

10) कर्म°षेय in B. K. only.

रोत्तमाङ्गप्रत्यङ्गजीवितदातां[1]। न च मे कदाचिदाग्रहश्चित्तमुत्पन्नम्[2][3]। तेन च समयेनायं लोको दीर्घायुरभूदनेकवर्षशतसहस्रजीवितेन चाहं कालेन धर्मार्थं[4] राज्यं कारितवान्न विषयार्थम्। सो ऽहं ज्येष्ठं कुमारं राज्ये ऽभिषिच्य चतुर्दिशं ज्येष्ठधर्मगवेषणायोद्युक्तो ऽभूवमेवं घण्टया घोषापयितवान्। यो मे ज्येष्ठं धर्ममनुप्रदास्यत्यर्थं चाध्यास्यति तस्याहं दासो भूयासम्[5]। तेन च कालेनर्षिरभूत् स मामेतद्वोचत्। ग्रस्ति महाराज सद्धर्मपुण्डरीकं नाम सूत्रं[6] ज्येष्ठधर्मनिर्देशकम्। तच्चदि दास्यमभ्युपगच्छसि ततस्ते ऽहं तं धर्मं श्रावयिष्यामि। सो ऽहं श्रुत्वा तस्यर्षेर्वचनं हृष्टस्तुष्ट उदग्र ग्रात्तमनाः[8] प्रीतिसौमनस्यजातो येन स ऋषिस्तेनोपेयिवानुपेत्यावोचत्[10][11][12]। यत्ते दासेन कर्म करणीयं तत्करोमि। सो ऽहं तस्यर्षेर्दासभावमभ्युपेत्य तृणकाष्ठपानोदकन्दमूलफलादीनि प्रेष्यकर्माणि कृतवान्यावद्बाह्याध्यत्तो ऽभ्यहमासम्। दिवसं[13] चैवंविधं कर्म कृत्वा रात्रौ शयानस्य मञ्चके पादान्धारयामि। न च मे कायक्लमो न चेतसि क्लमो ऽभूत्। एवं च मे कुर्वतः परिपूर्णं वर्षसहस्रं गतम्॥

1) दात्रा K.

2) कृ left out in Cb.

3) चित्त in all MSS.

4) र्थ A. B. Cb. W. र्थं K.

5) भूयात् A. W. भूतयं B. भूयां Cb. O. भूया K.

6) MSS. but Cb. add धर्मपर्यायं

7) Sic O.; दास्यत्व the rest.

8) All but Cb. add प्रमुदित.

9) In B. K. O. only.

10) A. W. read महा ऋषि.

11) नोपयिवा A. W. नोपेतयिवा B. नोपयितवा Cb. नोपसंपेयिवा K. नोपक्रामि O.

12) Badly for चम्. O. has correctly उवाच.

13) दिवसं is put after कर्म in K.

14) नं A. W. न K. शय्यानस्य B. शयानस्य Cb. O. शय्यासनमञ्चके the rest.

15) K. adds कः.

अथ खलु भगवांस्तस्यां वेलायामेतमेवार्थं परिद्योतयन्निमा गाथा अभाषत ॥

कल्पानतीतान्समनुस्मरामि यदाकुमासं[1] धर्मिको धर्मराजा ।
राज्यं च मे धर्मकेतोः[3] कृतं तन्न[4] च कामकेतोर्ज्येष्ठधर्मकेतोः[5] ॥ ४२ ॥
चतुर्दिशं मे कृत घोषणो ऽयं धर्मं वचेयस्तस्य दास्यं व्रजेयम् ।
आसीदृषिस्तेन कालेन धीमान्सूत्रस्य सद्धर्मनाम्नः प्रवक्ता ॥ ४३ ॥
स मामवोचद्यदि ते धर्मकाङ्क्षा उपेक्षि दास्यं धर्म ततः प्रवक्ष्ये ।
तुष्टश्चाहं वचनं तं निशाम्य कर्माकरोद्दासमयोग्यं तदा यत्[6][7] ॥ ४४ ॥
न कायचित्तक्लमथो स्पृशेन्मां सद्धर्मकेतोर्दासमागतस्य ।
प्रणिधिस्तदा मे भवि[8] सत्त्वकेतोर्नात्मानमुद्दिश्य न कामकेतोः ॥ ४५ ॥
स राज आसीत्तदालब्धवीर्यो अनन्यकर्माणि दशादिशासु[10][11] ।
परिपूर्णकल्पान सकृत्र खिन्नो यावत्सूत्रं लब्धवान्धर्मनाम[12] ॥ ४६ ॥

तत्किं मन्यध्वे भिक्षवो ऽन्यः स तेन कालेन तेन समयेन राजाभूत् । न खलु पुनरेवं द्रष्टव्यम् । तत्कस्य हेतोः । अर्हं स तेन कालेन तेन समयेन राजाभूवम्[13] । स्यात्खलु पुन-

1) मो Cb.

2) धा A. B. Cb. W. ध K. «The text of these verses is one mass of corruption, as is proved by the repeated offences against the metre». — Prof. Kern's note on his version, p. 245.

3) धर्मस्य K.

4) तन् in B. K. only.

5) धर्मस्य A. B. W. धर्मार्थस्य Cb. धर्मार्थ K.

6) कर्माकर्षदास्य A. W. कर्माकरोदास B. कर्मकरोद्यस Cb. कर्मकार्षं दास K.

7) तदायं A. Cb. तदायत B. K. तदायत् W. यत, Skr. यतः.

8) B. Cb. K. W. add. ता. To read दासतां गतस्य.

9) भव A. W.

10) राज्ञासी A. B. K. W. राज आसी Cb.

11) दि A. The foregoing कर्माणि impossible.

12) नामां A. नाम B. Cb. नामं K. नामस W.

13) भूत् A. W.

र्भिक्षवो ऽन्यः स तेन कालेन तेन समयेनर्षिरभूत् । न खलु पुनरेवं द्रष्टव्यम् । अयमेव स तेन कालेन तेन समयेन देवदत्तो भिक्षुर्ऋषिरभूत् । देवदत्तो हि भिक्षवो मम कल्याणमित्रम् । देवदत्तमेव चागम्य[1] मया षट्पारमिताः परिपूरिता महामैत्री महाकरुणा महामुदिता महोपेक्षा द्वात्रिंशन्महापुरुषलक्षणान्यशीत्यनुव्यञ्जनानि[2] सुवर्णवर्णच्छविता दशबलानि चत्वारि वैशारद्यानि चत्वारि संग्रहवस्तून्यष्टादशावेणिकबुद्धधर्मा महर्द्धिबलता[3] दशदिक्सत्त्वनिस्तारणता[4] सर्वमेतद्देवदत्तमागम्य । आरोचयामि वो भिक्षवः प्रतिवेदयाम्येष देवदत्तो भिक्षुरनागते ऽध्वन्यप्रमेयैः कल्पैरसंख्येयैर्देवराजो[5] नाम तथागतो ऽर्हन्सम्यक्संबुद्धो भविष्यति[6] विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च भगवान्देवमोपानायां लोकधातौ । देवराजस्य खलु पुनर्भिक्षवस्तथागतस्य[7] विंशत्यन्तरकल्पानायुष्प्रमाणं भविष्यति । विस्तरेण च धर्मं देशयिष्यति । गङ्गानदीवालुकासमांश्च[8] सत्त्वाः सर्वक्लेशप्रक्षाणादर्हत्त्वं साक्षात्करिष्यन्ति । अनेके च सत्त्वाः प्रत्येकबोधौ चित्तमुत्पादयिष्यन्ति । गङ्गानदीवालुकासमांश्च[9] सत्त्वा अनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादयिष्यत्यवैवर्तिकत्वात्प्रतिलब्धाश्च भविष्यन्ति । देवराजस्य खलु पुनर्भिक्षवस्तथागतस्य परिनिर्वृतस्य विंशत्यन्तरकल्पान्सद्धर्मः स्थास्यति । न च शरीरं धातुभेदेन भेत्स्यते[10] । एकघनं चास्य शरीरं भविष्यति सप्तरत्नस्तूपं प्रविष्टम् । स च स्तूपः

1) त्तं त्वागम्य A. W. त्तमेव चागम्य B. K. त्तं चागम्य Cb.

2) A. W. add व्योमप्रभावता, B. adds व्यामप्रता, K. adds व्योमप्रभता. But Cb. and the two Chinese versions leave it out.

3) बला K.

4) वा added in all but K. W.

5) B. K. add तर after असंख्येय.

6) लोके is added here in Cb. K.

7) B. K. add अर्हतः सम्यक्संबुद्धस्य.

8) कास Cb. K. W. कोप B.

9) कास A. Cb. K. W. कोप B.

10) संदृश्यते A. W. भोत्स्यते B. K. भेस्यते Cb.

षष्टियोजनशतान्युच्चैस्त्वेन[1] भविष्यति चत्वारिंशद्योजनान्यायामेन। सर्वे च तत्र देवमनुष्याः पूजां करिष्यन्ति पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाभिर्गाथाभिर्गीतेन चाभिष्टोष्यन्ति। ये च तं स्तूपं प्रदक्षिणं करिष्यन्ति प्रणामं वा तेषां केचिदग्रफलमर्हत्वं साक्षात्करिष्यन्ति केचित्प्रत्येकबोधिमनुप्राप्स्यन्ति[2]। अचिन्त्याश्चाप्रमेया देवमनुष्या अनुत्तरायां सम्यक्संबोधौ चित्तान्युत्पाद्याविनिवर्तनीया भविष्यन्ति॥

अथ खलु भगवान्पुनरेव भिक्षुसंघमामन्त्रयते स्म। यः कश्चिद्भिक्षवो ऽनागते ऽध्वनि कुलपुत्रो वा कुलदुहिता वेदं[3] सद्धर्मपुण्डरीकं सूत्रपरिपरिवर्तं श्रोष्यति श्रुत्वा च न काङ्क्षिष्यति न[4] विचिकित्सिष्यति[4] विप्रुद्धिचित्तश्चाधिमोक्ष्यते। तेन तिरश्चां दुर्गतीनां द्वारं पिधितं भविष्यति। नरकतिर्यग्योनियमलोकोपपत्तिषु न पतिष्यति। दशदिग्बुद्धक्षेत्रोपपन्नश्चेदमेव सूत्रं जन्मनि जन्मनि श्रोष्यति। देवमनुष्यलोकोपपन्नस्य चास्य विशिष्टस्थानप्राप्तिर्भविष्यति। यस्मिंश्च बुद्धक्षेत्र उपपत्स्यते तस्मिन्नौपपादुके सप्तरत्नमये पद्म उपपत्स्यते तथागतस्य संमुखम्[7]॥

अथ खलु तस्यां वेलायामधस्तादिशः प्रभूतरत्नस्य तथागतस्य बुद्धक्षेत्रादागतः प्रज्ञाकूटो नाम बोधिसत्त्वः[9]। स तं प्रभूतरत्नं तथागतमेतदवोचत्। गच्छामो भगवन्स्वकं बुद्धक्षेत्रम्। अथ खलु भगवाञ्शाक्यमुनिस्तथागतः प्रज्ञाकूटं बोधिसत्त्वमेतदवोचत्। मुहूर्तं तावत्कुलपुत्रागमयस्व यावन्मदीयेन बोधिसत्त्वेन मञ्जुश्रिया कुमारभूतेन सार्धं[10] कंचिदेव

1) शत left out in B. Cb. K.
2) B. adds नाग.
3) वा एतत् Cb. K.
4) Left out in A.
5) दशसु दिक्षु B.
6) उत्पत्स्यते A.
7) संमुखीभूतः Cb. K.
8) K. adds भगवतः leaving out तथागतस्य.
9) B. K. add महासत्त्वः.
10) कश्चि Cb. K. किंचि the rest.

धर्मविनिश्चयं कृत्वा पश्चात्स्वकं बुद्धक्षेत्रं गामिष्यसि। अथ खलु तस्यां वेलायां मञ्जुश्रीः कुमारभूतः सहस्रपत्रे पद्मे शकटचक्रप्रमाणमात्रे निषण्णो ऽनेकबोधिसत्त्वपरिवृतः पुरस्कृतः[1] समुद्रमध्यात्सागरनागराजभवनाद्भ्युद्गम्योर्ध्वं[2] वैहायसं खगपथेन गृध्रकूटे पर्वते भगवतो ऽन्तिकमुपसंक्रान्तः। अथ[3] मञ्जुश्रीः कुमारभूतः पद्मादवतीर्य भगवतः[4] शाक्यमुनेः प्रभूतरत्नस्य च तथागतस्य पादौ शिरसाभिवन्द्य येन प्रज्ञाकूटो बोधिसत्त्वस्तेनोपसंक्रान्त उपसंक्रम्य प्रज्ञाकूटेन बोधिसत्त्वेन सार्धं संमुखं संमोदनीं संरञ्जनीं विविधां कथामुपसंगृह्य एकान्ते न्यषीदत्। अथ खलु प्रज्ञाकूटो बोधिसत्त्वो मञ्जुश्रियं कुमारभूतमेतदवोचत्। समुद्रमध्यगतेन[5] त्वया मञ्जुश्रीः कियान्सत्त्वधातुर्विनीतः। मञ्जुश्रीराह। अनेकान्यप्रमेयाण्यसंख्येयानि सत्त्वानि विनीतानि। तावदप्रमेयाण्यसंख्येयानि यावद्वाचा[6] न[7] शक्यं विज्ञापयितुं[7] चित्तेन वा चेतयितुम्। मुहूर्तं तावत्कुलपुत्रागमयस्व यावत्पूर्वनिमित्तं द्रक्ष्यसि। समनन्तरभाषिता चेयं मञ्जुश्रिया कुमारभूतेन वाक्। तस्यां वेलायामनेकानि पद्मसहस्राणि समुद्रमध्याद्भ्युद्गतान्युपरि वैहायसं तेषु च[8] पद्मेष्वनेकानि बोधिसत्त्वसहस्राणि संनिषण्णानि। अथ ते बोधिसत्त्वास्तेनैव खगपथेन येन गृध्रकूटः पर्वतस्तेनोपसंक्रान्ता उपसंक्रम्य ततश्चोपरि वैहायसं स्थिताः संदृश्यन्ते स्म। सर्वे च ते मञ्जुश्रिया कुमारभूतेन विनीता अनुत्तरायां सम्यक्संबोधौ। तत्र ये बोधिसत्त्वा[9] महायानसंप्रस्थिताः पूर्वमभूवंस्ते महाया-

1) Left out in Cb.
2) म्य उपरि B.
3) Cb. adds च.
4) Left out in B. Cb. K.
5) मध्य left out in B. Cb. K.
6) असंख्येयानि left out in Cb.
7) Left out in Cb. Then follows in the rest न शक्यमभिपालयितुं, a mistake for °लापयितुं, which ought to be °लपितुं.
8) Left out in Cb. K.
9) Cb. adds महासत्त्वा.

नगुणान्षट्पारमिताः संवर्णयन्ति । ये श्रावकपूर्वा[1] बोधिसत्त्वास्ते श्रावकयानमेव संवर्णयन्ति । सर्वे च ते सर्वधर्माञ्शून्यानिति संजानन्ति स्म[2][3] महायानगुणांश्च । अथ खलु मञ्जुश्रीः कुमारभूतः प्रज्ञाकूटं बोधिसत्त्वमेतदवोचत् । सर्वो ऽयं कुलपुत्र मया समुद्रमध्यगतेन सत्त्वविनयः[4] कृतः स चायं संदृश्यते । अथ खलु प्रज्ञाकूटो बोधिसत्त्वो मञ्जुश्रियं कुमारभूतं गाथाभिर्गीतेन परिपृच्छति स्म[5] ॥

महाभद्र प्रज्ञया सूरनामत्रसंख्येया[6] ये विनीतास्त्वया[7] च ।
सत्त्वा अमी कस्य चायं प्रभावस्तद्बूहि पृष्टो नरदेव त्वमेतत् ॥ ४७ ॥
[8]कं वा धर्मं देशितवानसि त्वं किं[9] वा सूत्रं बोधिमार्गोपदेशम्[10] ।
यच्छ्रुत्वामी[11] बोधये ज्ञातचित्ताः सर्वज्ञत्वे निश्चितं लब्धगाधाः[12] ॥ ४८ ॥

मञ्जुश्रीराह । समुद्रमध्ये सद्धर्मपुण्डरीकं सूत्रं[13] भाषितवान्न चान्यत् । प्रज्ञाकूट

1) आवकपूर्व A. W. आवकापूर्वा B. आवकपूर्वा Cb. K.
2) सर्वान् B. K.
3) Left out in O.
4) MSS. but O. संवि°.
5) पर्यपृच्छत Cb. पर्यपृच्छत् K. परिपृच्छत् O.
6) ख्य K. W.
7) The whole verse very different in O. महासमुद्र महाप्रज्ञ महाशूर महाबल । असंख्येया विनीता . . . It is hardly necessary to read शूर for सूर, and to leave out तम् before एतत्.
8) किं A. B. K. W. कं Cb.
9) The short syllable against the metre. The original reading probably तावी.
10) MSS. देशेयम्.
11) यच् in B. only.
12) लब्धगा A. लब्धलाभाः B. लब्धगाभाः Cb. लब्धगाथा K. W. Corrected by us.
13) Left out in B. Cb. K.

आह । इदं सूत्रं गम्भीरं सूक्ष्मं दुर्दृशं[1] न चानेन सूत्रेण किंचिदन्यत्सूत्रं सममस्ति । अस्ति कश्चित्सत्त्वो य इदं सूत्ररत्नं[2] सत्कुर्यादवबोद्धुमनुत्तरां सम्यक्संबोधिमभिसंबोद्धुम् । मञ्जुश्रीराह । अस्ति कुलपुत्र सागरस्य नागराज्ञो दुःखितास्त्रयो दुहितरो ज्ञात्वा महाप्रज्ञा तीक्ष्णेन्द्रिया ज्ञानपूर्वंगमेन कायवाङ्मनस्कर्मणा समन्वागता सर्वतथागतभाषितव्यञ्जनार्थोद्गहणे धारणीप्रतिलब्धा सर्वधर्मसत्त्वसमाधानसमाधिसहस्रैकलक्षणप्रतिलाभिनी । बोधिचित्तावि-
वर्तिनी[3] विस्तीर्णप्रणिधाना सर्वसत्त्वेष्वात्मप्रेमानुगता गुणोत्पादने[4] च समर्था न च तेभ्यः परिक्षीयते । स्मितमुखी परमया शुभवर्णपुष्करतया समन्वागता मैत्रचित्ता करुणां च वाचं भाषते । सा सम्यक्संबोधिमभिसंबोद्धुं समर्था । प्रज्ञाकूटो बोधिसत्त्व आह । दृष्टो मया भगवाञ्शाक्यमुनिस्तथागतो बोधाय घटमानो बोधिसत्त्वभूतो ऽनेकानि पुण्यानि कृतवाननेकानि च कल्पसहस्राणि[5] न कदाचिद्वोर्यं संसितवान् । त्रिसाहस्रमहासाहस्रायां लोकधातौ नास्ति कश्चिदग्रशः सर्षपमात्रो ऽपि पृथिवीप्रदेशो यत्रानेन शरीरं न निक्षिप्तं सत्त्वहितहेतोः । पश्चाद्बोधिमभिसंबुद्धः । क एवं श्रद्दध्याद्यदनया[6][7] शक्यं मुहूर्तेनानुत्तरां सम्यक्संबोधिमभिसंबोद्धुम् ॥

अथ खलु तस्यां वेलायां सागरनागराजदुहितायतः स्थिता संदृश्यते[8] स्म । सा भगवतः पादौ शिरसाभिवन्द्यैकान्ते ऽस्थात्तस्यां वेलायामिमा गाथा अभाषत[9] ॥

1) दर्शनं A. दुर्दृशनं W.
2) रत्नसूत्रं B. K.
3) र्तनोय B.
4) नेन B. K.
5) B. adds च.
6) एनं B. K. एतां W. एतं O.
7) श्रद्दध्यापंदनया A. श्रद्धास्यति यत्तया B. श्रद्दधात् । यदा ऽन्यया Cb. श्रद्धध्यात् । यत्तया K. श्रद्दध्याद्यदिनया W. श्रद्दधास्यति यः O.
8) Left out in A. W. O.
9) सा वन्दित्वा A. W. सा वन्द्ये O.

पुण्यं पुण्यं गम्भीरं च दिशः स्फुरति सर्वशः।
मूर्द्धं शरीरं द्वात्रिंशल्लक्षणैः समलंकृतम्॥ ४९॥
अनुव्यञ्जनयुक्तं च सर्वसत्त्वनमस्कृतम्।
सर्वसत्त्वाभिगम्यं च अक्षयापणवद्यथा॥ ५०॥
यथेच्छया मे संबोधिः साक्षो मे ऽत्र तथागतः।
विस्तीर्णं देशयिष्यामि धर्मं दुःखप्रमोचनम्॥ ५१॥

अथ खलु तस्यां वेलायामायुष्माञ्शारिपुत्रस्तां सागरनागराजडुक्तितरमेतदवोचत्। केवलं कुलपुत्रि[1] बोधाय चित्तुमत्पन्नमविवर्त्याप्रमेयप्रज्ञा चासि सम्यक्संबुद्धत्वं तु दुर्लभम्। अस्ति कुलपुत्रि स्त्रो न च वीर्यं स्रंसयत्यनेकानि च कल्पशतान्यनेकानि च कल्पसहस्राणि पुण्यानि करोति षट्पारमिताः परिपूरयति न चाद्यापि बुद्धत्वं प्राप्नोति। किंकारणं। पञ्च स्थानानि स्त्र्यद्यापि न प्राप्नोति। कतमानि पञ्च। प्रथमं ब्रह्मस्थानं द्वितीयं शक्रस्थानं तृतीयं महाराजस्थानं चतुर्थं चक्रवर्तिस्थानं पञ्चममविवर्तिकबोधिसत्त्वस्थानम्॥

अथ खलु तस्यां वेलायां सागरनागराजडुक्तितुरेको मणिरत्नस्ति यः कृत्स्नां त्रिसाहस्रां महासाहस्रां लोकधातुं मूल्यं क्षमते। स च मणिस्तया सागरनागराजडुक्तित्रा भगवते दत्तः। स भगवता चानुकम्पामुपादाय प्रतिगृहीतः। अथ सागरनागराजडुक्तिता प्रज्ञाकूटं बोधिसत्त्वं स्थविरं च शारिपुत्रमेतदवोचत्। यो ऽयं मणिर्मया भगवतो दत्तः स च

1) ते कुलपुत्रि B. Cb. K. कुलडुक्ति O. भगिनि the others.
2) संमयति B. K. ज्ञनयति Cb. प्रशयति W. स्रंसयति O.
3) Left out in O.
4) राज्ञिक Cb.
5) कमणिरत्नम B. K. कं मणिरत्नम् O.
6) क्षपयति K. क्षमति O.

भगवता शीघ्रं प्रतिगृहीतो नेति। स्थविर आह। त्वया च शीघ्रं दत्तो भगवता च शीघ्रं प्रतिगृहीतः। सागरनागराजडुक्तिताह। यद्यहं भदन्त शारिपुत्र मर्द्धिको स्यां शीघ्रतरं सम्यक्संबोधिमभिसंबुध्येयं न चास्य मणेः प्रतिग्राहकः स्यात्॥

अथ तस्यां वेलायां सागरनागराजडुक्तिता सर्वलोकप्रत्यक्षं स्थविरस्य च शारिपुत्रस्य प्रत्यक्षं तत्स्त्रीन्द्रियमन्तर्हितं पुरुषेन्द्रियं च प्रादुर्भूतं बोधिसत्त्वभूतं चात्मानं संदर्शयति। तस्यां वेलायां दक्षिणां दिशं प्रक्रान्तः। अथ दक्षिणस्यां दिशि विमला नाम लोकधातुस्तत्र सप्तरत्नमये बोधिवृक्षमूले निषण्णमभिसंबुद्धमात्मानं संदर्शयति स्म द्वात्रिंशल्लक्षणधरं सर्वानुव्यञ्जनरूपं प्रभया च दशदिशं स्फुरित्वा धर्मदेशनां कुर्वाणम्। ये च सहायां लोकधातौ सत्त्वास्ते सर्वे तं तथागतं पश्यन्ति स्म सर्वैश्च देवनागयक्षगन्धर्वासुरगरुडकिंनरमनुष्यामनुष्यैर्नमस्यमानं धर्मदेशनां च कुर्वन्तम्। ये च सत्त्वास्तस्य तथागतस्य धर्मदेशनां शृण्वन्ति सर्वे ते ऽविनिवर्तनीया भवन्त्यनुत्तरायां सम्यक्संबोधौ। सा च विमला लोकधातुरियं च सहा लोकधातुः षड्विकारं प्राकम्पत्। भगवतश्च शाक्यमुनेः पर्ष-

1) अनु °य कम्पामुपादाय added in B.
2) क्षीत A. °त उत B. °तो नेति Cb. °तो उत्तेति K. °त उतरेति W. तो नेति स्थविर आह O. न is here «or not». The reading in B. W. points to उत नेति.
3) तरेण Cb.
4) ता B. K.
5) बोधि left out in B. K.
6) Left out in K.
7) भगवन्तं A. W.
8) In B. only.
9) नमस्कारं Cb.
10) कुर्वाणं B.
11) अवैवर्तिका Cb.
12) भविष्यन्ति A. K. W.

न्मण्डलानां त्रयाणां प्राणिसहस्राणामनुत्पत्तिकधर्मक्षान्तिप्रतिलाभो ऽभूत्। त्रयाणां च प्राणि(1)शतसहस्राणामनुत्तरायां सम्यक्संबोधौ व्याकरणप्रतिलाभो ऽभूत्॥

अथ प्रज्ञाकूटो बोधिसत्त्वो महासत्त्वः(2) स्थविरश्च शारिपुत्रस्तूष्णीमभूताम्॥

॥ इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये स्तूपसंदर्शनपरिवर्तो नामैकादशमः(3)॥

---

1) शत added in Cb. only.

2) Left out in A. W.

3) दशः Cb.

XII.

अथ खलु भैषज्यराजो बोधिसत्त्वो महासत्त्वो महाप्रतिभानश्च(1) बोधिसत्त्वो महासत्त्वो विंशतिबोधिसत्त्वशतसहस्रपरिवारो भगवतः संमुखमिमां वाचमभाषेताम्(2)। अत्पोत्सुको भगवान्भवत्वस्मिन्नर्थे। वयमिमं भगवन्धर्मपर्यायं तथागतस्य परिनिर्वृतस्य सत्त्वानां देश(3)यिष्यामः संप्रकाशयिष्यामः(4)। किं चापि भगवन् शठकाः सत्त्वास्तस्मिन्काले भविष्यन्ति परीत्तकुशलमूला अधिमा(5)निका लाभसत्कारसंनिश्रिता अकुशलमूलप्रतिपन्ना दुर्दमा अधिमुक्तिविरहिता अनाधिमुक्तिबन्धलाः। अपि तु खलु पुनर्वयं भगवन्क्षान्तिबलमुपद(6)र्शयित्वा तस्मिन्काल इदं सूत्रमुद्दे(7)ष्यामो धारयिष्या(8)मो देशयिष्यामो लिखिष्यामः सत्करिष्यामो गुरुकरिष्यामो मानयिष्यामः पूजयिष्यामः कायजीवितं च वयं भगवन्तुत्सृज्येदं सूत्रं प्रकाशयिष्यामः। अत्पोत्सुको भगवान्भवत्विति॥

अथ खलु तस्यां पर्षदि शैक्षाशैक्षाणां भिक्षूणां पञ्चमात्राणि भिक्षुशतानि भगवन्तमे- तद्(9)वोचुः। वयमपि भगवन्नुत्सहामहे इमं धर्मपर्यायं संप्रकाशयितुमपि तु खलु पुनर्भगवन्न्यासु(10) लोकधातुष्विति। अथ खलु यावत्तस्ते भगवतः श्रावकाः शैक्षाशैक्षा(11) भगवता व्या-

---

1) ण K.

2) मभाषत A. Cb. W. मभाषेतां B. K.

3) A. B. K. add धर्म.

4) In A. W. only.

5) अभि K.

6) पदर्श्य K. पदर्शयेति स्म W.

7) मुपदे Cb.

8) Left out in Cb.

9) दवोचत् A. B. K. W. डुचुः Cb.

10) न्ये Cb. K.

11) ये ते added in A. W.

कृता अनुत्तरायां सम्यक्संबोधावष्टौ भिक्षुसहस्राणि सर्वाणि तानि येन भगवांस्तेनाञ्जलिं प्रणामय्य[1] भगवन्तमेतदूचुः[2]। अल्पोत्सुको भगवान्भवतु वयमपीमं धर्मपर्यायं संप्रकाशयिष्यामस्तथागतस्य परिनिर्वृतस्य पश्चिमे काले पश्चिमे समये ऽपि ह्यन्यासु[3] लोकधातुषु। तत्कस्य हेतोः। अस्यां[4] भगवन्सहायां[5] लोकधातावधिमानिकाः सत्त्वा अल्पकुशलमूला नित्यं व्यापन्नचित्ताः शठा वङ्कजातीयाः[6]॥

अथ खलु महाप्रजापती गौतमी भगवतो मातृभगिनी[7] षड्भिर्भिक्षुणीसहस्रैः सार्धं शैक्षाशैक्षाभिर्भिक्षुणीभिरुत्थायासनाभ्येन भगवांस्तेनाञ्जलिं प्रणामय्य[8] भगवन्तमूर्ध्वलोकयन्ती स्थिताभूत्। अथ खलु भगवांस्तस्यां वेलायां महाप्रजापतीं गौतमीमामन्त्रयामास। किं त्वं गौतमि दुर्मनस्विनी[9] स्थिता तथागतं व्यवलोकयसि। नाहं परिकीर्तिता व्याकृता चानुत्तरायां सम्यक्संबोधौ। अपि तु खलु पुनर्गौतमि सर्वपर्षद्व्याकरणेन व्याकृतासि। अपि तु खलु पुनस्त्वं गौतमि इत उपादायाष्टात्रिंशतां बुद्धकोटीनयुतशतसहस्राणामत्ययेन [सत्कारं गुरुकारं माननां पूजनामर्चनामपचायनां कृत्वा] बोधिसत्त्वो [महासत्त्वो][12] धर्मभाणको भविष्यसि। इमान्यपि षड्भिक्षुणीसहस्राणि शैक्षाशैक्षाणां भिक्षुणीनां त्वयैव सार्धं तेषां तथागतानामर्हतां सम्यक्संबुद्धानामत्ययेन बोधिसत्त्वा धर्मभाणका भविष्यन्ति। ततः

1) प्रणामय्य A. W. प्रणम्य the rest.

2) दवोचत् A. B. Cb. W. दूचुः K.

3) न्ये A. K. W.

4) अस्मिन् K.

5) यां left out in K.

6) वङ्क K. वञ्चक the rest.

7) मातृस्वसा added in K. सा in A. B. Cb. W.

8) प्रणामय्य A. प्रणम्य the others.

9) ङु A. W. द्वौ the others; reading of O. unknown.

10) तस्त्वं च्युता समाना अनुपूर्वेण सपरिवारा इस्त्रिभावं विवर्तयित्वा अष्टात्रिं O.

11) The words between brackets wanting in O. See Engl. transl. p. 257, note 1.

12) Wanting in O.

परेण परतरेण[1] बोधिसत्त्वचर्यां परिपूर्य[2] सर्वसत्त्वप्रियदर्शनो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यसि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। स च गौतमि सर्वसत्त्वप्रियदर्शनस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तानि षड्बोधिसत्त्वसहस्राणि परंपराव्याकरणेन व्याकरिष्यत्यनुत्तरायां सम्यक्संबोधौ॥

अथ खलु राहुलमातुर्यशोधरायाः भिक्षुण्या[3] एतदभवत्। न मे भगवता नामधेयं परिकीर्तितम्। अथ खलु भगवान्यशोधरायां[4] भिक्षुण्याश्चेतसैव चेतः परिवितर्कमाज्ञाय यशोधरां भिक्षुणीमेतदवोचत्। आरोचयामि ते यशोधरे प्रतिवेदयामि ते। त्वमपि दशानां बुद्धकोटीसहस्राणामत्ययेन[5] [सत्कारं गुरुकारं माननां पूजनामर्चनामपचायनां[6] कृत्वा] बोधिसत्त्वो धर्मभाणको भविष्यसि। बोधिसत्त्वचर्यां चानुपूर्वेण परिपूर्य[7] रश्मिशतसहस्रपरिपूर्णध्वजो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके[8] भविष्यसि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्भद्रायां लोकधातौ। अपरिमितं च तस्य भगवतो रश्मिशतसहस्रपरिपूर्णध्वजस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यायुष्प्रमाणं भविष्यति॥

अथ खलु महाप्रजापती[9] गौतमी भिक्षुणी षड्भिक्षुणीसहस्रपरिवारा यशोधरा च

1) A. Cb. W. O. add ते.

2) पूरयित्वा A. Cb. W. O.

3) भिक्षुण्या is put before यशोधरायाः except in K.

4) यां K.

5) इतश्चयित्वा स्त्रीभावं विवर्तयित्वा यशोधरे बुद्धकोटिनयुतशतसहस्राणां सात्तिके O.

6) See above.

7) पूरयित्वा A. Cb. W. O. In O. added पश्चिमे समुच्छ्रये.

8) लोके omitted in A. Ca.

9) प्रजा left out in K.

भिक्षुणी[1] चतुर्भिक्षुणीसहस्रपरिवारा भगवतो ऽन्तिकात्स्वकं व्याकरणं श्रुत्वानुत्तरायां सम्यक्संबोधावाश्वर्यप्राप्ता अद्भुतप्राप्ताश्च[2] तस्यां वेलायामिमां गाथामभाषत[3] ॥

भगवन्विनेतासि विनायको ऽसि शास्तासि लोकस्य सदेवकस्य।
आश्वासदाता नरदेवपूजितो[4] वयम्पि[5] सेतोषित अद्य नाथ ॥ १ ॥

अथ खलु ता भिक्षुण्य इमां गाथां भाषित्वा भगवन्तमेतदूचुः। वयमपि भगवन्समु[6]त्सहामहे इमं धर्मपर्यायं संप्रकाशयितुं[7] पश्चिमे काले पश्चिमे समये ऽपि खल्वासु[8] लोकधातुष्विति ॥

अथ खलु भगवान्येन तान्यशीतिबोधिसत्त्वकोटीनयुतशतसहस्राणि धारणीप्रतिलब्धानां बोधिसत्त्वानामवैवर्तिकधर्मचक्रप्रवर्तकानां तेनावलोकयामास। अथ खलु ते बोधिसत्त्वा महासत्त्वाः समनन्तरावलोकिता[9] भगवता उत्थायासनेभ्यो येन भगवांस्तेनाञ्जलिं प्रणाम्यैवं[10] चित्तयामासुः। अस्माकम्भगवानध्येषत्यस्य[11] धर्मपर्यायस्य संप्रकाशनतायै[12][13]। ते खल्वेवमनुविचित्य संप्रकम्पिताः परस्परमूचुः। कथं वयं कुलपुत्राः[14][15] करिष्यामो

1) Left out in K.

2) स्राश्च त A. B. Cb. W. स्राश्च त K. The whole passage amplified in O.

3) षत A. B. षंत Cb. K. षतः W. षिंसु O.

4) ता A. Cb. W. तो K.

5) वयमपि A. B. W. वयम्पि Cb. K. वयंति O.

6) सम् Left out in B. Cb. K. O.

7) कासितुं K.

8) न्येषु in all MSS., but see above.

9) All but O. ते.

10) प्रणाम्यैवं A. W. प्रणाम्यैवं B. Cb. प्रणाम्यैवं K. प्रणामयित्वा O.

11) स्मान्भ Cb. W.

12) Sic K. ष्यति O. The others have षयति.

13) नायेति A. W. नतायै Cb. K. नाय B. नताय O.

14) पर्यंप B.

15) त्राक्षो O.

यद्भगवानध्येषत्यस्य[1] धर्मपर्यायस्यानागते ऽध्वनि संप्रकाशनतायै[2] ॥ अथ खलु ते कुलपुत्रा भगवतो गौरवेणात्मनश्च पूर्वचर्याप्रणिधानेन भगवतो ऽभिमुखं सिंहनादं नदन्ते स्म। वयं भगवन्ननागते ऽध्वनीमं धर्मपर्यायं तवागते परिनिर्वृते दशसु दिक्षु गत्वा सर्वसत्त्वाँल्लेखयिष्यामः[3] पाठयिष्यामश्चित्तापयिष्यामः प्रकाशयिष्यामो भगवत एवानुभावेन। भगवांश्चास्माकमन्यलोकधातुस्थितो[4] रत्नावरणगुप्तिं करिष्यति ॥

अथ खलु ते बोधिसत्त्वा महासत्त्वाः समं संगीत्या[5] भगवन्तमाभिर्गाथाभिरध्यभाषन्त[6] ॥

अत्योत्सुकस्त्वं भगवन्भवस्व वयं तदा ते[7] परिनिर्वृतस्य।
[8]अपश्चिमे काले[9] सुभैरवस्मिन्प्रकाशयिष्यामिदं[10] सूत्रमुत्तमम् ॥ २ ॥
आक्रोशांस्तर्जनाश्चैव दण्डउदूषणानि[11] च।
बालानां संसहिष्यामो ऽधिवासिष्याम नायक ॥ ३ ॥

1) अयं भगवानस्माकमध्ये O.

2) नतायै A. W. नायेति B. K. नायति Cb. नताय O.

3) लिखापयिष्याम वाचापयिष्याम स्वाध्यापयिष्याम चि° O.

4) धातुस्थे K. धातुस्थो B.

5) समसंगोत्या एकस्वरेण भ° O.

6) षंते स्म A. B. K. षंते Cb. षते स्म W. षिंसु O.

7) वयंति सूत्रं O.

8) K. adds स्वं. O. has तयात्ति सुभैरवकालि पश्चिमे. अप° our conjecture for प°.

9) ले W.

10) मोमं A. W. म्यम B. मि। मम Cb. मिम K. सूत्रमिदं विस्तरत प्रकाशयेत् O.

11) मु A. W. शताटना भोदम दण्डानि मुद्गराणि च O. गू for गो in the other MSS. our conjecture.

दुर्बुद्धिनश्च वङ्काश्च शठा बालाधिमानिनः।
अप्राप्ते प्राप्तसंज्ञी च घोरे कालस्मि[2] पश्चिमे ॥ ४ ॥
अरण्यवृत्तकाश्चैव[3] कन्थां[4] प्रावरियाण च।
संलेखचरिता अस्मे एवं वक्ष्यन्ति दुर्मती[6] ॥ ५ ॥
रसेषु गृद्ध सक्ताश्च गृहीणां धर्म देशयो[7]।
सत्कृताश्च भविष्यन्ति षडभिज्ञा[8] यथा तथा ॥ ६ ॥
रौद्रचित्ताश्च दुष्टाश्च गृहचित्ताविचित्तकाः।
अरण्यगुप्तिं प्रविशित्वा अस्माकं परिवादका[9]ः ॥ ७ ॥
अस्माकं चैव वक्ष्यन्ति लाभसत्कारनिश्रिताः।
तीर्थिका[10] वतिमे भिनू[11] स्वानि काव्यानि[12] देशयुः ॥ ८ ॥
स्वयं सूत्राणि ग्रन्थित्वा लाभसत्कारहेतवः।
पर्षाय[13] मध्ये भाषन्ते[14] अस्माकमनुकुट्टका[15]ः ॥ ९ ॥

1) धि A. W. भि B. Cb. K. दुर्बुद्धीनां च वङ्कानां चण्डा बालाधिमानिनाम् O.
2) संज्ञीनां भिनूणां कालि O.
3) Sic O.; चित्त the rest.
4) कन्थां left out in K. कस्थां A. कन्था B. O. कथं Cb. काच्छां W.
5) Sic O. वृत्तिं करिष्याम A. W. वृत्ति धारस्यं B. वृत्त चारिस्य Cb. वृत्त चरिष्याम K.
6) ती A. B. K. तीः Cb. तीम् W.
7) शनां A. W.
8) षड्भिज्ञाश्च Cb.
9) वार् A. Cb. वादि B. वाद् K. W. कुट्टकाः O.
10) ति Cb. °के वादि O. त the others. वत for बत, cf. Pāli.
11) नु A. W. नूं B. Cb. नू K.
12) कर्या A. W. वाक्या B. Cb. K. काव्यानि Ca. O.
13) पर्याय A. W. पर्षाय B. Cb. K. परिषाय O.
14) भाष्यन्ति O.
15) क परि O.

राज्ञेषु राजपुत्रेषु राज्ञामात्येषु वा तथा।
विप्राणां गृहपतीनां च अन्येषां चापि भिनुणाम् ॥ १० ॥
वक्ष्यत्यवर्णमस्माकं तीर्थ्यवादं च चारयो[1]।
सर्वे वयं क्षमिष्यामो गौरवेण महर्षिणाम् ॥ ११ ॥
ये चास्मान्कुत्सयिष्यन्ति तस्मिन्कालस्मि दुर्मतो।
इमे बुद्धा भविष्यन्ति क्षमिष्यामथ[2] सर्वशः ॥ १२ ॥
कल्पसंक्षोभभीष्मास्मिन्दारुणस्मि[3] महाभये।
यक्षरूपा बहू भिनू अस्माकं परिभाषकाः ॥ १३ ॥
गौरवेणेह[4] लोकेन्द्रे उत्सक्षाम सुदुष्करम्।
क्षान्तीय कथ्यां बन्धित्वा[5] सूत्रमेतं प्रकाशये ॥ १४ ॥
अनर्थिका स्म कायेन जीवितेन च नायकं[6]।
अर्थिकाश्च स्म बोधाय[8] तव निक्षेपधारकाः ॥ १५ ॥
भगवानेव जानीते यादृशाः पापभिक्षवः।
पश्चिमे कालि भेष्यन्ति संघाभाष्यमज्ञानकाः ॥ १६ ॥

1) पि B. K. तीर्थिका वाच चारयी O.
2) बुद्धा ति वक्ष्यन्ति अधिवासिष्याम O. क्षमयिष्यामथ the rest.
3) स्मे A. Cb. W. ष्म B. ष्मे K. त O., meant द्म. Perhaps to r. क्षोभि (= क्षोभे).
4) ण हि Cb. K. णाति O.
5) बन्धत्ता O.
6) This line is left out in Cb.
7) श्चा in all MSS. O. excepted, which has का वयं.
8) All बोधाय.

भृकुटी[1] सर्व सोढव्या अप्रज्ञप्तिः पुनः पुनः ।
निष्कासनं[2] विकारेभ्यो बक्रकुटी[3] बहुविधा ॥ १७ ॥
आज्ञप्तिं[4] लोकनाथस्य स्मरन्तो[5] कालि पश्चिमे ।
भाषिष्याम इदं सूत्रं पर्षन्मध्ये विशारदाः[6] ॥ १८ ॥
नगरेषु च ग्रामेषु ये भेष्यन्ति इहार्थिकाः[7] ।
गत्वा गत्वास्य दास्यामो निन्नेपं तुभ्यं[8] नायक ॥ १९ ॥
प्रेषणं तव लोकेन्द्र करिष्यामो महामुने ।
अत्योत्सुको भव त्वं किं[9] शान्तिप्राप्तो[10] मुनिर्वृतः ॥ २० ॥
सर्वे च लोकप्रद्योता आगता ये दिशो दश[11] ।
सत्यां वाचं प्रभाषामो[12] अधिमुक्तिं विज्ञानसि ॥ २१ ॥

॥ इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याय उत्साहपरिवर्तो[13] नाम द्वादशमः[14] ॥

---

1) टी A. W. टिः B. टै Cb. टीस्मर्त्व K. टी तीव्र O.
2) निष्कालना O.
3) उपक्रोशा O.
4) अप्राज्ञप्तिं B. अप्राप्तिं Cb.
5) ता A. B. K. W. तो Cb. त O.
6) दा W.
7) चे A. भविष्यन्ति अर्थि O.
8) Sic O.; तं च (a misread तव?) the rest.
9) भवाकि त्वं O.
10) All but O. ति for सु.
11) दश दिशा A. B. दश दिसाः Cb. दश दिशाः K. दिशो दशः W. दशो दिश O.
12) षामो A. W. ष्याम B. Cb. K. षाम O.
13) कृन O.
14) त्रयोद् O.

XIII.

अथ खलु मञ्जुश्रीः कुमारभूतो भगवन्तमेतदवोचत् । दुष्करं भगवन्परमदुष्करमेभिर्बोधिसत्त्वैर्महासत्त्वैरुत्साहो[2] भगवतो गौरवेण । कथं भगवन्नेभिर्बोधिसत्त्वैर्महासत्त्वैरयं धर्मपर्यायः पश्चिमे काले पश्चिमे समये संप्रकाशयितव्यः । एवमुक्ते भगवान्मञ्जुश्रियं कुमारभूतमेतदवोचत् । चतुर्षु मञ्जुश्रीर्धर्मेषु प्रतिष्ठितेन बोधिसत्त्वेन महासत्त्वेनायं धर्मपर्यायः पश्चिमे काले पश्चिमे समये संप्रकाशयितव्यः । कतमेषु चतुर्षु । इह मञ्जुश्रीर्बोधिसत्त्वेन महासत्त्वेनाचारगोचरप्रतिष्ठितेनायं धर्मपर्यायः [पश्चिमे काले पश्चिमे समये] संप्रकाशयितव्यः । कथं च मञ्जुश्रीर्बोधिसत्त्वो महासत्त्व आचारगोचरप्रतिष्ठितो भवति । यदा [च] मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वः दान्तो भवति दान्तो दान्तभूमिमनुप्राप्तो ऽनुत्त्र[स्तासंत्र]स्तमनो अनभ्यमूयको यदा च मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वो न कस्मिंश्चिद्धर्मे रज्यति यथाभूतं च धर्माणां स्वलक्षणं व्यवलोकयति । यो खल्वेषु धर्मेष्वविचारणाविकल्पना अयमुच्यते मञ्जुश्रीर्बोधिसत्त्वस्य महासत्त्वस्याचारः । कतमश्च मञ्जुश्रीर्बोधिसत्त्वस्य महासत्त्वस्य गो-

---

1) A. B. W. add पश्चिमे काले पश्चिमे समये.
2) त्सोढुं A. W. त्सूढं B. त्सहां Cb. त्सोढं K. त्सीढं O.
3) गौरवेण B. गोचरे W.
4) The words between brackets wanting in O.
5) रे A. W.
6) दान्तो Cb. O. दान्तो the others.
7) अनुत्त्रस्तमानस O.
8) क्वचिद्धर्मेषभिरज्यति न क्वचिद्धर्माणां स्वभावलक्षणं व्य O.
9) यः A. स B. या Cb. K. याः W.
10) Left out in Cb. O.
11) णा अवि in all MSS.
12) ना अय A. B. Cb. K. नाय W. नता अविपरिकल्पनता अय O

चरः। यदा [च] मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वो न राज्ञानं संसेवते न राजपुत्रान्[1] राजमहामात्रान्न राजपुरुषान्संसेवते न भजते न पर्युपास्ते [नोपसंक्रामति] नान्यतीर्थ्यांश्चरकपरिव्राजकाजीवकनिर्ग्रन्थान्न काव्यशास्त्रप्रसृतान्सत्त्वान्संसेवते न भजते न पर्युपास्ते। न च लोकायतमल्लधारकान्न लोकायतिकान्सेवते न[3] भजते न[4] पर्युपास्ते न च तैः सार्धं संस्तवं करोति। न चण्डालान्न मौष्टिकान्न सौकरिकान्न कौक्कुटिकान्[5] मृगलुब्धकान्न मांसिकान्[6] नटनर्त्तकान्[7] क्लाक्लान्[8] मल्लान्नान्यानि परेषां रतिक्रीडास्थानानि तानि नोपसंक्रामति। न च तैः सार्धं संस्तवं करोत्यन्यत्रोपसंक्रान्तानां कालेन कालं धर्मं भाषते तं चानिश्रितो भाषते। श्रावकयानीयांश्च भिक्षुभिक्षुण्युपासकोपासिका न सेवते न भजते न पर्युपास्ते न च तैः सार्धं संस्तवं करोति। न च तैः सकृ समत्रधानगोचरो भवति चङ्क्रमे[11] वा विकारे[12] वान्यत्रोपसंक्रान्तानां चैषां[13] कालेन कालं धर्मं भाषते तं चानिश्रितो भाषते। अयं मञ्जुश्रीर्बोधिसत्त्वस्य महासत्त्वस्य[14] गोचरः॥

1) राजमात्रान् Cb., which is added after पुत्रान्न in K. Likewise राजामात्यान् in O.

2) तीर्थिकान्सेवति न च चरकान्न प O.

3) न in O. only.

4) न सौनिकान्नौरभ्रिकान्न O.

5) न शाकुनिकान्न जालग्राहकान्सत्त्वान्सेव° etc. O.

6) नर्त्त K. नाटकान्न नृत्यका O.

7) ग्यल्लान्न A. W. मल्लान्न B. सल्लान्न Cb. ग्रल्लान्न K. ज्ञल्लान्न O.

8) Cb. adds पन O. has षामसंवृतानां क्रीडाहास्यरतिस्था.

9) र K.

10) Cb. adds माला (?)

11) A. W. add मालविकारे without वा; in O. महाविकारे वा.

12) Left out in Cb.; and it is put in after कालं in B. K.

13) तां A. W.

14) प्रथमो added in O. It is in fact the first गोचरः, but in vs. 15 is called the first what in O. is the second.

पुनरपरं मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वो न मातृग्रामस्यान्यतरान्यतरं[1] रमनुनयनिमित्तं गृह्णाभीक्ष्णं[2] धर्मं देशयति न च मातृग्रामस्याभीक्ष्णं दर्शनकामो भवति। न च कुलान्युपसंक्रमति न च दारिकां वा कन्यां वा वधुकां वाभीक्ष्णमाभाषितव्यां मन्यते न प्रतिसंमोदयति।[3] न च पण्डकस्य धर्मं देशयति न च तेन सार्धं संस्तवं करोति न च प्रतिसंमोदयति। न चैकाकी[4] भिक्षार्थमन्तर्गृहं[5] प्रविशत्यन्यत्र तथागतानुस्मृतिं भावयमानः। सचेत्पुनर्मातृग्रामस्य धर्मं देशयति स नात्तशो धर्मसंरागेणापि धर्मं देशयति कः पुनर्वादः स्त्रीसंरागेण।[6] नात्तशो दन्तावलीमप्युपदर्शयति कः पुनर्वाद् औदारिकमुखविकारम्। न च श्रामणेरं न च श्रामणेरीं न भिक्षुं न भिक्षुणीं न कुमारकं न कुमारिकां सादीयति[7] न च तैः सार्धं संस्तवं करोति न च संलापं करोति न च प्रतिसंलापं[8] गुरुको भवति न चाभीक्ष्णं प्रतिसंलपनं[9] सेवते। अयमुच्यते मञ्जुश्रीर्बोधिसत्त्वस्य महासत्त्वस्य प्रथमो[10] गोचरः॥

पुनरपरं मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वः सर्वधर्मानभ्रून्यान्[11]व्यवलोकयति यथावत्प्रतिष्ठितान्धर्मानविपरीतस्थायिनो[12] यथाभूतस्थितान्[13]चलानकम्प्यानविवर्त्यानपरावर्तान्स-

1) रान्यत left out in B. Cb. W.

2) All but O. यं निमित्तमुद्गृह्य.

3) मोदितव्यामुच्यते A. W. मोदितव्यां मन्यते O. मोदनीति Cb.

4) चैको हि Cb.

5) भैक्षार्थं K. Cp. below vs. 14. भिक्षुरेकपण्डक अन्तर्गृहं प्र O.

6) All but O. add सार्धं देशयति.

7) सादीयति O. Cp. Pāli *sādiyati* and स्वादीयति Mahāvastu II, 145.

8) लपन K.

9) MSS. लापनं.

10) द्वितीयो O. See remark above p. 276.

11) धर्मभ्रून्यं Cb.

12) मानसारानवि A. W. तांनुमारानवि B. तानां सागराणां संस्तवं करोति। नवी Cb. मान्सारानवि K. असारान् wanting in O.

13) A. K. W. add भावा.

14) भूतस्थितान A. B. K. W. भूतान् Cb.

मादाय[1] यथाभूतंस्थितानाकाशस्वभावान्निरुक्तिव्यवहारं[3] विवर्जितानज्ञातानभूतान्[4] संस्कृतान्नासंस्कृतान्न सतो नासतो ऽनभिलापप्रव्याकृतानसंगस्थानस्थितान्[6] संज्ञाविपर्यासप्राडुर्भूतान्। एवं हि मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वो ऽभीक्ष्णं सर्वधर्मान्व्यवलोकयन्विहरति। अनेन विहारेण विहरन्बोधिसत्त्वो महासत्त्वो गोचरे स्थितो भवति। अयं मञ्जुश्रीर्बोधिसत्त्वस्य[8] द्वितीयो गोचरः॥

अथ खलु भगवानेतमेवार्थं भूयस्या मात्रया संदर्शयमानस्तस्यां वेलायामिमा गाथा अभाषत॥

यो बोधिसत्त्व[9] इच्छेया[10] पश्चात्काले सुदारुणे।
इदं सूत्रं प्रकाशेतुं[11][12] अनोलोनो विशारदः॥ १॥
आचारगोचरं रक्षेदसंसृष्टः शुचिर्भवेत्[13]।
वर्जयेत्संस्तवं नित्यं राजपुत्रेहि राजभिः॥ २॥

---

1) वर्त्ता समादाय A. वर्त्ता न समादाय B. वर्त्ता सदा Cb. वर्तान्सदा O. वर्तान्समादाय K. वर्त्ता समादापय W.

2) ते Cb.

3) रं Cb.

4) °तानसंस्कृतानसंस्कृतानसंष्यातान्नमतो O.

5) प्य Ca. Another var. r. mentioned in Engl. translation p. 264.

6) नसंगच्छातस्थितां A. नसंगच्छानस्थितान B. नसंस्थान Cb. नसंस्थानस्थितान K. नसंस्थानस्थितां W. नसत्तानसंगस्थानस्थितानभावानस्वभावा O. असंग an old error for असंत, Skr. असत्?

7) श्च बो Cb.

8) तृ for त्रि O.

9) त्रो A. B. K. त्र Cb. O. त्रा W.

10) इच्छेत पश्चाकालेस्मि भैरव O.

11) शयितुं A. W.

12) अनो A. K. W. O. अनोन B. अना W.

13) असंक्लिष्टो भवे शुचि O.

ये चापि राजपुरुषाः[1] कुर्यात्तेहि न संस्तवम्।
चण्डालमुष्टिकैः शौण्डैस्तीर्थिकैश्चापि सर्वशः॥ ३॥
अधिमानीन्न सेवेत विनयेदागमस्थितान्[3]।
अर्हत्सममताम्भिक्षून्दुःशीलांश्चैव वर्जयेत्॥ ४॥
भिक्षुणीं वर्जयेन्नित्यं स्त्रीस्यसंलापगोचराम्[4]।
उपासिकाश्च वर्जेत[5] प्राकटा या अवस्थिताः[6]॥ ५॥
या निर्वृतिं गवेषन्ति दृष्टे धर्मे उपासिकाः।
वर्जयेत्संस्तवं ताभिः[7] आचारो अयमुच्यते॥ ६॥
यश्चैनमुपसंक्रम्य धर्मं पृच्छे ऽग्रबोधये।
तस्य भाषेत्सदा धीरो अनोलीनो अनिश्रितः॥ ७॥
स्त्रो पण्डकाश्च ये सक्ताः संस्तवं तैर्विवर्जयेत्।
कुलेषु चापि वधुकां[9] कुमार्यश्च विवर्जयेत्॥ ८॥

---

1) षां K. राज्ञः पुरुषा ये भोन्ति O.

2) भि A. B. K. W. धि Cb. O.

3) विनयेनागम A. B. W. विनयेदागमे Cb. विनयेनागमे K. आगमे विनये स्थित्वा (intended स्थितः?) O.

4) एयो and रा (Skr. राः) O., preferable.

5) All but O. वर्जयेत्.

6) तान् Cb. तां K. न वस्थिताः O

7) भि A. B. K. W. भिः। Cb. O.

8) व Cb.

9) वधुकाश्चापि O

न ताः संमोदयेज्ज्ञातु कौशल्यं[1] साधु[2] पृच्छितुम् ।
संस्तवं तेहि[3] वर्जेत[4] सौकरौरभिकैः[5] सह ॥ ९ ॥
ये चापि विविधान्प्राणीन्हिंसेयुर्भोगकारणात्[6] ।
मांसं सूनाय विक्रीत्त संस्तवं तैर्विवर्जयेत् ॥ १० ॥
स्त्रोपोषकाश्च ये सत्त्वा वर्जयेत्तेहि संस्तवम् ।
नटेभिर्कल्लमल्लेभिर्[7] ये चान्ये तादृशा भवेत् ॥ ११ ॥
वारमुख्यां[8] न सेवेत ये चान्ये भोगवृत्तिनः[9] ।
प्रतिसंमोदनं तेभिः[10] सर्वशः परिवर्जयेत् ॥ १२ ॥
यदा च[11] धर्मं देशेया मातृग्रामस्य पण्डितः ।
न चैकः[12] प्रविशेत्तत्र नापि ह्यस्यस्थितो भवेत् ॥ १३ ॥
यदापि प्रविशेद्धामं भोजनार्थं पुनः पुनः ।
द्वितीयम्भिक्षु मार्गेत बुद्धं वा समनुस्मरेत् ॥ १४ ॥

1) कुशलं B. ह्यस्य कौशल्य O.
2) साधु A. K. W. (= Skr. सार्धं?). ह्यासु B. ज्ञातु Cb. वर्जयेत् O. यो A. W. या B. K.
3) तेभि O., च वि the rest.
4) ज्ञयो A. W. ज्ञया B. K. ज्ञयेत् Cb.
5) स्मि A. क्ति B. भि K. क्ति W. रौत्रकैहि वरु Cb. सौनिकौरभ्रिकेन च O.
6) सयेयु A. W. सेयु B. K. सयु Cb. हंसन्ति O.
7) All but O. टै for टेभि. ह्म K.
8) मूच्यं A. मुखं W. मुख्यां B. Cb. K. मुख्या O.
9) वृत्तये A. W. वृत्तिका O.
10) तेषां O.
11) र्म B. देशयेद्धर्मं O.
12) कं A. W. तः B. कः Cb. K. O.
13) यभि A. B. Cb. W. यम्भि K. यं भि O.

आचारगोचरो ह्येष प्रथमो मे निदर्शितः ।
विकरोत्ति येन सत्प्रज्ञा धारेत्ता[1] सूत्रमोदृशम् ॥ १५ ॥
यदा न चरते[2] धर्मं ह्योन उत्कृष्टमध्यमे ।
संस्कृतासंस्कृते चापि भूताभूते च सर्वशः ॥ १६ ॥
स्त्रोति नाचरते धोरो पुरुषेति न कल्पयेत्[3] ।
सर्वधर्म अज्ञातत्वा[4] गवेषन्तो न पश्यति ॥ १७ ॥
आचारो हि अयं उक्तो बोधिसत्त्वान सर्वशः ।
गोचरो यादृशस्तेषां तं शृणोथ प्रकाशतः ॥ १८ ॥
अमत्तका[5] धर्म इमे प्रकाशिता अप्रा[6]भूताश्च अज्ञातकाश्च[7] ।
शून्या निरीका[8] स्थित नित्यकालं[9] अयं[10] गोचरो उच्यति पण्डितानाम् ॥ १९ ॥
विपरीतसंज्ञीहि इमे विकल्पिता अमत्तमत्ता हि अभूतभूततः ।
अनुस्थिताश्चापि अज्ञातधर्मा ज्ञाता अभूता विपरीतकल्पिताः ॥ २० ॥
एकाग्रचित्तो हि समाहितः सदा सुमेरुकूटो यथ सुस्थितश्च ।
एवं स्थितश्चापि हि तान्निरीक्षेदाकाशभूतानिम सर्वधर्मान्[11] ॥ २१ ॥

1) धारेत्ता B. धारयेत् Cb. धारिता W. धारेत्ति O.
2) र्मं K. O. But the following consists of three words. One would expect ह्योनमु.
3) All but O. यी.
4) त्वाद् O.
5) तता A.
6) दुर्भूता O. दुर्भावा the others.
7) अज्ञाते सर्वे Cb. अज्ञात सर्वे O.
8) विकारो A. W.
9) सर्व B. Cb. K.
10) अयं A. Cb. W. अय B. O. अयु K.
11) O. has एकाग्रचित्तः सुसमाहितः सदा सुमेरुकूटेवसुसंस्थितात्मा । एवं स्थितो चित्त (r. चापि) निरीक्षयेयमाकाशभूता इमे धर्मा. We propose to r. इमि for इम.

सदा पि[1] आकाशसमा न सारिका[2] अनिञ्जिता मन्यनवर्जिताश्च[3]।
स्थिता हि धर्मा इमि नित्यकालं अणु गोचरो उच्यति पण्डितानाम्॥ २२॥
ईर्यापथं यो मम रक्षमाणो भवेत भिक्षू[5] मम निर्वृतस्य।
प्रकाशयेत्सूत्रमिदं हि लोके न चापि संलीयन तस्य काचित्[6]॥ २३॥
कालेन चो चित्तयमात्तु पण्डितः प्रविश्य लेनं[7] तथ घट्टयित्वा[8]।
विपश्य धर्मं इमु सर्व योनिशो उत्थाय देशेत अलीनचित्तः॥ २४॥
राजान तस्येक्ष करोति[9] रक्षां ये राजपुत्राश्च शृणोन्ति[10] धर्मम्।
अन्ये ऽपि चो गृक्षपति ब्राह्मणाश्च परिवार्य सर्वे स्य स्थिता भवन्ति॥ २५॥

पुनरपरं मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वस्तथागतस्य परिनिर्वृतस्य पश्चिमे काले पश्चिमे समये पश्चिमायां[11] पञ्चाशत्यां[11] सद्धर्मविप्रलोपे वर्तमान इमं धर्मपर्यायं संप्रकाशयितुकामः सुखस्थितो भवति स सुखस्थितश्च धर्मं भाषते कायगतं वा पुस्तकगतं वा। परेषां च देशयमानो नाधिमात्रमुपालम्भज्ञातीयो[13] भवति न चान्यान्धर्मभाणकान्भिक्षून्पर्यवदति न चावर्णं भाषते न चावर्णं निश्चारयति न चान्येषां श्रावकयानीयानां[14] भिक्षूणां नाम गृह्णी-

1) य A. W.
2) क्षसारका.
3) All but O. सत्येन विव, metrically impossible.
4) यं A. B. Cb. W. यु K. य O.
5) O. has भिक्षुर्म. The original r. certainly *bhikkhū*.
6) कश्चित् A. न च लीनचित्तो भवि यः कदाचित् O. कार्चित् suspect.
7) All but O. लपनं.
8) द्वार खट्टयेत् O.
9) रोति Cb. K. O.
10) णोति Cb. O.
11) Omitted in O.
12) ति Cb. O.
13) रम्भज्ञातिको O. Cp. Pāli *jātika*
14) निकानां O.

त्वावर्णं भाषते न चावर्णं चारयति न च तेषामन्तिके प्रत्यर्थिकसंज्ञो भवति। तत्कस्य हेतोः। यथापीदं सुखस्थानस्थितत्वात्। स आगतागतानां धर्मश्रावणिकानामनुपरिग्राहिका अनभ्यमूषया[2] धर्मं देशयति। अविवदमानो न च प्रश्नं पृष्टः श्रावकयानेन विसर्जयति। अपि तु खलु पुनस्तथा विसर्जयति यथा बुद्धज्ञानमभिसंबुध्यते॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

सुखस्थितो भोति सदा विचक्षणः सुखं निषण्णस्तथ धर्मु[3] भाषते।
उदार प्रज्ञप्त कारित्व आसनं चीवरं मनोज्ञे पृथिवीप्रदेशे॥ २६॥
चीवरं च सो चीवर प्रावरित्वा सुरक्तरङ्गं[4] सुप्रशस्तरङ्गैः।
आसेवकं[5] कृष्णा तथा दृढित्वा महाप्रमाणं च निवासयित्वा॥ २७॥
सपादपीठस्मि निषद्य आसने विचित्रदूष्येक्हि सुसंस्तृतस्मिन्।
सुधौतपादश्च उपारुहित्वा स्निग्धेन शीर्षेण मुखेन चापि॥ २८॥
धर्मासने चात्र[7] निषोदयान[8] एकाग्रसत्त्वेषु समागतेषु
उपसंक्रमेच्चित्रकथा बहूंश्च भिक्षूण चा भिक्षुणियान चैव[10]॥ २९॥
उपासकानां च उपासिकानां राज्ञां तथा राजसुतान चैव।
विचित्रितार्थां मधुरां कथेया अनभ्यमूयत्तु[11] सदा स पण्डितः॥ ३०॥

1) All but O. धर्मश्रव.
2) क्षनभ्यमूषिकया O. अनन्यमूचनया the rest. Our r. conjectural.
3) षा तथ धर्मु A. षां तथ धर्म B. षो तथ धर्म Cb. W. षस्तथ धर्म K. O.
4) ङ्गा Cb. ङ्गं K.
5) कां A. K. W. कं B. का O. Doubtful. Have we to r. आसेचनं?
6) स A. B. Cb. W. सु K.
7) तत्र B. Cb. K. W. चात्र A.
8) यानमेक A. यान एक B. K. W. याने एक Cb. यित्वा O.
9) कथां बहुंविधां O. कथान्बहूंश्च the others.
10) काणश्चैव A. काणा चैव W. O.
11) All but O. अनन्य.

पृष्टो ऽपि चासौ तद प्रश्नं[1] तेकि अनुलोममर्थं पुनर्निर्दिशेय[2]।
तथा च देशेय तमर्थज्ञातं यथ श्रुत्व बोधोय[3] भवेषु लाभिनः ॥ ३१ ॥
किलासितां चापि विवर्जयेत[4] न चापि उत्पादयि खेदसंज्ञाम्[5]।
अरतिं च सर्वां विनकेत पण्डितो मैत्रीबलं च परिषाय भावयेत् ॥ ३२ ॥
भाषेच्च[6] रात्रिंदिवमग्रधर्मं दृष्टान्तकोटीनयुतैः स पण्डितः।
संहर्षयेत्पर्षं तथैव तोषयेन्न चापि किंचित्तु[7] ज्ञातु प्रार्थयेत् ॥ ३३ ॥
खाद्यं च भोज्यं च तथान्नपानं वस्त्राणि शय्यासनचीवरं वा।
गिलानभैषज्य न चिन्तयेत न विज्ञपेया[9] परिषाय किंचित् ॥ ३४ ॥
अन्यत्र चित्तेय सदा विचक्षणो भवेय बुद्धो ऽकमिमे च सत्त्वाः।
एवं[10] ममसत्त्वमुखोपधानं सद्धर्म आवेमि हिताय लोके ॥ ३५ ॥
यश्चापि[11] भिक्षू मम निर्वृतस्य अनीर्षुको एवं[12] प्रकाशयेया।
न तस्य दुःखं न च अन्तरायो शोकोपयासा न भवेत्कदाचित्[13] ॥ ३६ ॥

1) स्तू A. स्त्र B. स्तू Cb. स्तु K. W. प्रश्न O.
2) निपुणं निर्दर्शयेत् O., which is at least metrically correct.
3) All बोधाय.
4) यित्वा in all but O.
5) संज्ञाः O. संज्ञा the rest.
6) यु A. W. च B. K. O. य्य Cb.
7) किंचि तु न A. किंचा तु न W. किञ्चित्तनु K. किंचित्तु O.
8) All but O. शयना.
9) विज्ञापयाये Cb. विज्ञपेता O.
10) MSS. have एवं or एतत् ममसर्व. Perhaps to r. एवं इमे.
11) ये चापि A. K.
12) एष K.
13) आयासु सोको च न तस्य केचित् B. आयासु सोके न च तस्य केचित् K. आयासु लोके न च तस्य केचित् W. शोकं च ओक्राश न ज्ञातु तस्य O.

न तस्य संत्रासन कश्चि कुर्यान्न[1] ताडनां नापि अवर्णं भाषेत्।
न चापि निष्कासन[2] ज्ञातु तस्य[3] तथा हि सो क्षान्तिबले प्रतिष्ठितः ॥ ३७ ॥
सुखस्थितस्य[4] तद पण्डितस्य एवं स्थितस्य यथ भाषितं मया।
गुणान कोटीशत भोक्त्यनेके न शक्यते कल्पशतैरपि[5] वक्तुम्[6] ॥ ३८ ॥

पुनरपरं मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वस्तथागतस्य परिनिर्वृतस्य सद्धर्मन्तर्धानात्तकाले वर्तमान इदं सूत्रं धारयमाणो[7] बोधिसत्त्वो महासत्त्वो ऽनीर्षुको भवत्यशठो ऽमायावी न चान्येषां बोधिसत्त्वयानीयानां पुद्गलानामवर्णं भाषते नापवदति नावसादयति। न चान्येषां भिक्षुभिक्षुणीयुपासकोपासिकानां श्रावकयानीयानां[8] वा प्रत्येकबुद्धयानीयानां वा बोधिसत्त्वयानीयानां[9] वा कौकृत्यमुपसंकरति। दूरे यूयं कुलपुत्रा अनुत्तरायाः सम्यक्संबोधेर्न तस्यां[10] यूयं संदृश्यध्वे[11]। अत्यन्तप्रमादविकारिणो[12] यूयं। न प्रतिबलास्तं ज्ञानमभिसंबोद्धुमित्येवं न कस्यचिद्बोधिसत्त्वयानीयस्य कौकृत्यमुपसंकरति। न च धर्मविवादाभिरतो भवति न च धर्मविवादं करोति सर्वसत्त्वानां चात्तिके मैत्रीबलं न विजहाति। सर्वतथागतानां

1) कश्चित्कु Cb.
2) निष्कालन O.
3) तस्यो K.
4) स्यो B.
5) ति K. तिर्कि A. तेभि O.
6) All but O. add इति.
7) प्रकाशय B. K.
8) निकानां B. Cb. K. O. नीयानां A. W.
9) का B.
10) निका B.
11) बोधि° वा left out in W.
12) तस्या A. B. तस्यां Cb. K. तस्य W.
13) धे A. W. ध Ca. थ B. Cb. K. शथ O.
14) माद् A. Cb. K. W. मत्त O.
15) मैत्र्य K. मैत्रा O. Cp. Pāli *mettā*.

चात्तिके पितृसंज्ञामुत्पादयति सर्वबोधिसत्त्वानां चात्तिके शास्तृसंज्ञामुत्पादयति । ये च दशसु दिक्षु लोके बोधिसत्त्वा महासत्त्वास्तानभीक्ष्णमध्याशयेन गौरवेण च नमस्कुरुते । धर्मं च देशयमानो ऽनूनमनधिकं धर्मं देशयति समेन धर्मप्रेम्णा[1] न च कस्यचिदुत्तशो धर्मप्रेम्णाप्यधिकतरमनुग्रहं करोतीमं धर्मपर्यायं संप्रकाशयमानः ॥

अनेन मञ्जुश्रीस्तृतीयेन धर्मेण समन्वागतो बोधिसत्त्वो महासत्त्वस्तथागतस्य परिनिर्वृतस्य सद्धर्मपरिक्षयात्तकाले वर्तमान इमं धर्मपर्यायं संप्रकाशयमानः सुखस्पर्शं[2] विक्रीत्यविक्रेठितश्चेमं धर्मपर्यायं संप्रकाशयति । भवन्ति चास्य धर्मसंगीत्यां सहायका उत्पत्स्यन्ते[3] चास्य धार्मश्रावणिका ये ऽस्येमं धर्मपर्यायं श्रोष्यन्ति[4] श्रद्धास्यन्ति प्रतीयिष्यन्ति[5] धारयिष्यन्ति[6] पर्यवाप्स्यन्ति लिखिष्यन्ति लेखापयिष्यन्ति[7] पुस्तकगतं[8] च[9] कृत्वा सत्करिष्यन्ति गुरुकरिष्यन्ति मानयिष्यन्ति पूजयिष्यन्ति ॥

इदमवोचद्भगवानिदं वदित्वा[10] सुगतो ऽथापरमेतदुवाच शास्ता ॥

शाठ्यं च मानं तथ कूटनां च अशेषतो उज्झिय धर्मभाणकः ।
ईर्ष्यां न कुर्यात्तथ ज्ञातु पण्डितो य इच्छते सूत्रमिदं प्रकाशितुम् ॥ ३९ ॥

1) प्रेमेण O.
2) B. K. add सं.
3) उत् Cb. K. O. उप the rest.
4) शृणवन्ति श्रद्दधन्ति etc. Pres. T.; श्रद्धास्यन्ति the other MSS.
5) Left out in B. K.
6) MSS. but Cb. O. add वाचयिष्यन्ति.
7) Some MSS. add लिखित्वा.
8) तं Cb.
9) च is put in before पुस्त° in B. K.
10) विदि A. वन्दि K.

अत्रर्णा[1] ज्ञातु न वदेय कस्यचिद्दृष्टीविवादं च न ज्ञातु कुर्यात् ।
कौकृत्यस्थानं च न ज्ञातु कुर्यान्न[2] लप्स्यसे ज्ञानमनुत्तरं त्वम् ॥ ४० ॥
सदा च सो श्रार्जवु मार्दवश्च क्षान्तश्च[3] भोती सुगतस्य पुत्रः ।
धर्मं प्रकाशेतु[4] पुनः पुनश्चिमं न तस्य खेदो भवती कदाचित् ॥ ४१ ॥
ये बोधिसत्त्वा दशसु दिशासु सत्त्वानुकम्पाय चरन्ति लोके ।
ते सर्वि शास्तार[5] भवन्ति सर्वे गुरुगौरवं तेषु जनेत[6] पण्डितः ॥ ४२ ॥
स्मरित्व बुद्धान्द्विपदानमुत्तमार्ज्जनेषु नित्यं पितृसंज्ञं[7] कुर्यात् ।
अधिमानसंज्ञां[8] च विहाय सर्वां न तस्य भोती तद अन्तरायः ॥ ४३ ॥
शृणित्व धर्मं इममेवरूपं स रक्षितव्यस्तद पण्डितेन[9] ।
सुखं विहाराय समाकृतश्च सुरक्षितो भोति च प्राणिकोटिभिः[10] ॥ ४४ ॥

पुनरपरं मञ्जुश्रीर्बोधिसत्त्वो महासत्त्वस्तथागतस्य परिनिर्वृतस्य सद्धर्मप्रतिक्षयात्[11]तकाले वर्तमान इमं धर्मपर्यायं धारयितुकामस्तेन भिक्षुणा गृहस्थप्रव्रजितानामन्तिकादूरेण दूरं विवर्तव्यं मैत्रीविहारेण[12] च विहर्तव्यम्[13] । ये च सत्त्वा बोधाय संप्रस्थिता

1) All but O. add सो before ज्ञातु.
2) कुर्यान् स A. W. °न्न B. °न Cb. °न संलप्स्यते K. All °प्स्यते.
3) क्षमी च B. K.
4) शतु A. Cb. शेक्षु B. K. शतुं W. शेत O.
5) रु Cb.
6) जनित्व Cb.
7) ज्ञा च Cb.
8) भि B. K.
9) पण्डितस्य Cb.
10) A. B. Ca. Cb. add इति.
11) क्षेप Cb. W. O. प्रतिक्षय probably an erroneous Sanskritisation of a Prāk. पडिक्खय, i. e. परिक्षय.
12) मैत्र्या A. W. मैत्रा O
13) B. adds अपि तु खल्वहं एताननुत्तरां सम्यक्संबोधिं, leaving out ये च °तेषां.

भवन्ति तेषां सर्वेषामत्तिके स्पृहोत्पादयितव्या।एवं चानेन चित्तमुत्पादयितव्यम्। महाद्युष्प्रज्ञजातीया बतेमे सत्त्वा ये तथागतस्योपायकौशल्यं संधाभाषितं न शृण्वन्ति न जानन्ति न बुध्यन्ते न पृच्छन्ति न श्रद्दधन्ति नाधिमुच्यन्ते। किंचाप्येते सत्त्वा इमं धर्मपर्यायं नावतरन्ति न बुध्यन्ते। अपि तु खलु पुनरहमेतामनुत्तरां सम्यक्संबोधिमभिसंबुध्य यो यस्मिन्स्थितो भविष्यति तं तस्मिन्नेवर्द्धबलेनावर्जयिष्यामि पत्तीयापयिष्याम्यवतारयिष्यामि परिपाचयिष्यामि॥

अनेनापि मञ्जुश्रीश्चतुर्थेन धर्मेण समन्वागतो बोधिसत्त्वो महासत्त्वस्तथागतस्य परिनिर्वृतस्येमं धर्मपर्यायं संप्रकाशयमानो ऽव्यावाधो भवति सत्कृतो गुरुकृतो मानितः पूजितो भिक्षुभिक्षुण्युपासकोपासिकानां राज्ञां राजपुत्राणां राजामात्यानां राजमहामात्राणां नैगमजानपदानां ब्राह्मणगृहपतीनामन्तरीक्षावचराश्चास्य देवताः श्राद्धाः पृष्ठतो ऽनुबद्धा भविष्यन्ति धर्मश्रवणाय देवपुत्राश्चास्य सदानुबद्धा भविष्यन्त्यारभ्यापि ग्रामगतस्य वा विहारगतस्य वोपसंक्रमिष्यन्ति रात्रिंदिवं धर्मं परिपृच्छकास्तस्य च व्याकरणेन तुष्टा उदग्रा आत्तमनस्का भविष्यन्ति। तत्कस्य हेतोः। सर्वबुद्धाधिष्ठितो ऽयं मञ्जुश्रीर्धर्मपर्यायः। अतीतानागतप्रत्युत्पन्नैर्मञ्जुश्रीस्तथागतैरर्हद्भिः सम्यक्संबुद्धैरयं धर्मपर्यायो

1) कृपो O.

2) न्ति A. B. Cb. W. न्ते K. O.

3) न्ति A. B. Cb. W. नावबुध्यन्ते K. नाधिमुच्यन्ति O.

4) संताप B. प्रत्ययाच K. पत्तोयापयामि O. The whole word is left out in Cb.

5) वार् (for पाच) A.

6) अपि left out in B. K. O.

7) संश्रावय B. K.

8) अव्यावद्धो A. W. °वध्यो B. Cb. °वाधा K. °वाध्यो O. (r. °ध्यो). Cp. अव्यावध्य Mahāvastu, II, 259, but also Pāli *avyāpajjha* and *vyābādha*.

9) B. K. add अर्जितो (r. अर्चितो) ऽपचायितो.

10) In B. added नगरगतस्य वा.

नित्याधिष्ठितः। दुर्लभो ऽस्य मञ्जुश्रीर्धर्मपर्यायस्य बकुषु लोकधातुषु शब्दो वा घोषो वा नामश्रवो वा॥

तद्यथापि नाम मञ्जुश्रो राजा भवति बलचक्रवर्ती बलेन तं स्वकं राज्यं निर्जिनाति। ततो ऽस्य प्रत्यर्थिकाः प्रत्यमित्राः प्रतिराजानस्तेन सार्धं विग्रहमापन्ना भवन्ति। अथ तस्य राज्ञो बलचक्रवर्तिनो विविधा योधा भवन्ति। ते तैः शत्रुभिः सार्धं युध्यन्ते। अथ स राजा तान्योधान्युध्यमानान्दृष्ट्वा तेषां योधानां प्रीतो भवत्यात्तमनस्कः। स प्रीतात्तमनाः समानस्तेषां योधानां विविधानि दानानि ददाति। तद्यथा ग्रामं वा ग्रामक्षेत्राणि वा ददाति नगरं नगरक्षेत्राणि वा ददाति वस्त्राणि ददाति वेष्टनानि कुस्ताभरणानि पादाभरणानि कण्ठाभरणानि कर्णाभरणानि सौवर्णसूत्राणि हारार्धहाराणि हिरण्यसुवर्णमणिमुक्तावैडूर्यशङ्खशिलाप्रवाडान्यपि ददाति कुत्स्यश्वरथपत्तिदासीदासानपि ददाति यानानि शिविकाश्च ददाति। न पुनः कस्यचिच्चूडामणिं ददाति। तत्कस्य हेतोः। एक एव हि स चूडामणी राज्ञो मूर्धस्थायी। यदा पुनर्मञ्जुश्रो राजा तमपि चूडामणिं ददाति तदा स सर्वो राजशत्रुरङ्गबलकाय आश्चर्यप्राप्तो भवत्यद्भुतप्राप्तः। एवमेव मञ्जुश्रीस्तथागतो ऽप्यर्हन्सम्यक्संबुद्धो धर्मस्वामी धर्मराजः स्वेन बाहुबलनिर्जितेन पुण्यबलनिर्जितेन त्रैधातुके धर्मेण धर्मराज्यं कारयति। तस्य मारः पापीयांस्त्रैधातुकमाक्राम-

1) Left out in Cb. O. The word is, in fact, superfluous.

2) All but O. add विवादम्.

3) न्ति A. Cb. W. O. न्ते B. K.

4) In A. W. only. अपि for वा O.

5) In A. only.

6) Left out in Cb.

7) Left out in B. Cb.

8) This word is put in after सौ° in B. Cb. K. O.

9) पत्ती A. B. K. W. पत्ति Cb.

10) णिं A. णि B. Cb. O. णी K. णिः W.

11) पापीमां O. more original. Cp. Mahāvastu I, 42; III, 28 पापीमां; Pāli *pāpimā*.

ति। अथ खलु[1] तथागतस्याप्यार्या योधा मारेण[2] सार्धं युध्यन्ते[3]। अथ खलु मञ्जुश्रीस्तथागतो ऽर्हन्सम्यक्संबुद्धो धर्मस्वामी धर्मराजा[4] तेषामार्याणां योधानां युध्यतां दृष्ट्वा विविधानि सूत्रशतसहस्राणि[5] भाषते स्म चतसृणां पर्षदां संहर्षणार्थम्[6]। निर्वाणनगरं चैषां महाधर्मनगरं ददाति निर्वृत्या चैनान्प्रलोभयति स्म न पुनरिममेवंरूपं धर्मपर्यायं भाषते स्म॥[7] तत्र मञ्जुश्रीर्यथा स राजा बलचक्रवर्ती तेषां योधानां युध्यतां महता पुरुषकारेण विस्मापितः[8] समानः पश्चात्तं सर्वस्वभूतं पश्चिमं चूडामणिं ददाति सर्वलोकाश्रद्धेयं विस्मयभूतं[9]। यथा मञ्जुश्रीस्तस्य राज्ञः स चूडामणिश्चिररक्षितो मूर्धस्थायी। एवमेव मञ्जुश्रीस्तथागतो ऽर्हन्सम्यक्संबुद्धस्त्रैधातुके धर्मराजो[10] धर्मेण राज्यं कारयमाणो यस्मिन्समये पश्यति श्रावकांश्च बोधिसत्त्वांश्च स्कन्धमारेण वा क्लेशमारेण वा सार्धं युध्यमानान् तेश्च सार्धं युध्यमानैर्यदा रागद्वेषमोहक्षयः सर्वत्रैधातुकान्निःसरणं[11] सर्वमारनिर्घातनं[12] महापुरुषकारः कृतो भवति। तदा तथागतो ऽर्हन्सम्यक्संबुद्धो ऽभ्याराधितः[13] समानस्तेषामार्याणां योधानामिममेवंरूपं सर्वलोकविप्रत्यनीकं सर्वलोकाश्रद्धेयमभाषितपूर्वमनिर्दिष्टपूर्वं धर्मपर्यायं भा-

1) Left out in Cb. B. K.

2) O. adds पापीमता. Cp. Mahāvastu I, 270.

3) त्ति A. Cb. W. न्ते B. K. युद्धन्ति O.

4) Sic O.; राज्ञः the rest.

5) सूत्राणि K. सूत्रान्त O.

6) संप्रहर्ष K.

7) ततो A. ततः W.

8) विस्मितो भवति O.

9) विस्मयनीयं तथथा O.

10) राजा O. more original.

11) B. K. add ति. कारापयमाणो O.

12) Sic O. निःशरणः and °तनो the rest. We suppose the original reading to have been °णो and °ने.

13) आराधितो भवति। आराधितः समा° O.

षते स्म। सर्वेषां सर्वज्ञताकारं[1] महाचूडामणिप्रख्यं तथागतः श्रावकेभ्यो ऽनुप्रयच्छति स्म[2]। एषा हि मञ्जुश्रीस्तथागतानां परमा धर्मदेशनायं पश्चिमस्तथागतानां धर्मपर्यायः सर्वेषां धर्मपर्यायाणामयं धर्मपर्यायः सर्वगम्भीरः सर्वलोकविप्रत्यनीकः[3]। यो ऽयं मञ्जुश्रीस्तथागतेनाद्य तेनैव राज्ञा बलचक्रवर्तिना चिरपरिरक्षितश्चूडामणिरवमुच्य योधेभ्यो दत्तः। एवमेव मञ्जुश्रीस्तथागतो ऽपीमं[4] धर्मगुह्यं[5] चिरानुरक्षितं सर्वधर्मपर्यायाणां मूर्धस्थापि तथागतविज्ञेयं तदिदं तथागतेनाद्य संप्रकाशितमिति[6]॥

अथ खलु भगवानेतमेवार्थं भूयस्या मात्रया संदर्शयमानस्तस्यां वेलायामिमा गाथा अभाषत॥

मैत्रीबलं च सद् दर्शयन्तैः[7] कृपायमाणाः सद् सर्वसत्त्वान्।
प्रकाशयेद्धर्ममिमेवंरूपं[8] सूत्रं विशिष्टं सुगतेर्हि वर्णितम्॥ ४५॥
गृहस्थ ये प्रव्रजिताश्च ये स्युरथ बोधिसत्त्वास्तद् काले पश्चिमे।
सर्वेषु मैत्रीबल सो हि दर्शयी मा कैव क्षेप्स्यन्ति शृणित्व[9] धर्मम्॥ ४६॥
अहं तु बोधिमनुप्राप्तुणित्वा यदा स्थितो भोष्यि तथागतत्वे।
ततो उपानेष्यि उपायपित्वा[10] सत्त्वावषिष्ये इममग्रबोधिम्॥ ४७॥

1) भा A. Cb.

2) स्म in Cb. O. only.

3) यः Cb. °प्रत्ययनीयः O.

4) In B..O. only.

5) A. W. add धर्मपर्यायं; इमं Prākṛticism for इदं.

6) धर्मनिष्कूटं धर्मगुह्यस्थानं O.

7) इति wanting in O.

8) यन्ति A.

9) मिममे A. मिमे Cb. O. मिनमे W. इमे B. K.

10) मो क्षेत्तु क्षीणा शृणुत्त O.

11) उपयिस्थित्वा A. K. उपस्थित्वा Cb. उपायस्थित्वा B. उपायिस्थित्वा W. उपायकोटिभिः O. All पने for पाने. One would expect उपानयित्वा.

यथापि राजा बलचक्रवर्ती योधान दृश्याद्विविधं किरणयम् ।
कुस्तोंश्च अश्वांश्च रथान्पदातीन्नगराणि ग्रामांश्च[2] ददाति तुष्टः ॥ ४८ ॥
केषांचि कुस्ताभरणानि प्रीतो ददाति वृप्यं च सुवर्णसूत्रम् ।
मुक्तामणिं शङ्खशिलाप्रवाडं विविधांश्च दासान्स ददाति प्रीतः[3] ॥ ४९ ॥
यदा तु सो उत्तमसाकुसेन विस्मापितो केनचि तत्र भोति ।
विज्ञाय आश्चर्यमिदं कृतं ति मुकुटं स मुञ्चित्व मणिं ददाति ॥ ५० ॥
तथैव बुद्धो अकु धर्मराजा क्षान्तोबलः प्रज्ञप्रभूतकोशः[4] ।
धर्मेण शासामिमु सर्वलोकं कृितानुकम्पो करुणायमानः ॥ ५१ ॥
सत्वांश्च[5] दृष्ट्वाथ विकुन्यमानान्भाषामि सूत्रान्तसकुसकोट्यः ।
पराक्रमं ज्ञानिय तेष प्राणिनां ये शुद्धसत्वा इह क्लेशघातिनः ॥ ५२ ॥
अथ धर्मराजापि[6] महाभिषट्टः पर्यायकोटीशत भाषमाणः ।
ज्ञात्वा च सत्वान्बलवत्तु ज्ञानी चूडामणिं[7] व इम सूत्र देशयी ॥ ५३ ॥
इमु पश्चिमु लोकि वदामि सूत्रं सूत्राण[8] सर्वेष[9] ममाग्रभूतम् ।
संरक्षितं मे न च ज्ञातु प्रोक्तं तं आवयाम्यश्च शृणोथ सर्वे ॥ ५४ ॥
चत्वारि धर्मा इमि एवरूपा मयि निर्वृते ये च निषेवितव्याः ।
ये चार्थिका उत्तमअग्रबोधौ व्यापारणं[10] ये च करोन्ति मह्यम् ॥ ५५ ॥

1) तं A. Cb. तीन् B. तों K. तिम् W. पत्तिपीठकान् O.
2) राष्ट्राणि B. राष्ट्रांश्च K. ग्रामं च O. but राष्ट्रं for तुष्टः.
3) प्रीतिं A. W. प्रीति B. प्रीतः Cb. K. O.
4) ज्ञान O.
5) सर्वा A. W.
6) All but O. राजो ऽपि.
7) णिं A. W. णी the rest.
8) णि A. W.
9) सर्वेस्विम O. सर्वेऽपि the others.
10) क Cb. व्याकरणं तेष अहं करोमि O.

न तस्य शोको न पि चात्तरायो दौवर्णिकं[1] नापि गिलानकत्वम् ।
न च दुःखो कृष्णिक[2] तस्य भोति न चापि क्षीने नगरस्मि वासः ॥ ५६ ॥
प्रियदर्शनो ऽसौ[3] सततं मनुष्यो तथागतो वा यथ पूज्य भोति ।
उपस्थायकास्तस्य भवन्ति नित्यं ये देवपुत्रा दरुरा भवन्ति ॥ ५७ ॥
न तस्य शस्त्रं न विषं कदाचित्कापे क्रमे नापि च दण्डलोष्टम् ।
संमीलितं तस्य मुखं भवेय[4] यो तस्य आक्रोशमपि वदेया[5] ॥ ५८ ॥
सो बन्धुभूतो भवतीह प्राणिनामालोकजातो विचरत्तु मेदिनीं ।
तिमिरं करित्तो बहुप्राणकोटिनां यो मूत्र धारे इमु[7] निर्वृते मयि ॥ ५९ ॥
सुपिनांश्च[8] सो पश्यति बुद्धरूपं भिक्षूंश्च[10] सो पश्यति भिक्षुणीश्च[11] ।
सिंहासनस्थं च[12] तथात्मभावं[13] धर्मं[14] प्रकाशेन्तु[15] बहुप्रकारम् ॥ ६० ॥

1) दौवर्त्तिकं A. Cb. दौवर्षिकं B. दौवर्षिकन् K. दौवर्णिकं W. O.
2) ष्णा K.
3) सो Cb.
4) Reading conjectural; मुचिद्व सो यस्तस्य O. भवेद्यो तस्य the others.
5) आक्रोशमपीह दृश्यात् A. W. वदेत कश्चित् O.
6) यः O.
7) मम Cb. इम O.
8) To r. सुपिने च?
9) पां A. Cb. K. W. पं B.
10) क्षुंश्च A. क्षूंश्च B. O. क्षूश्च Cb. K. क्षु W.
11) णी च A. णींश्च B. W. णीश्च Cb. K. णी च O.
12) स्थंश्च A. W.
13) तदा Cb.
14) भावां A. भावान् W.
15) सेत Cb. O. शेत्त K.

देवांश्च यक्षान्यथ गङ्गवालिका[1] असुरांश्च नागांश्च बकुप्रकारान्।
तेषां च सो भाषति अग्रधर्मं सुपिनस्मि[2][3] सर्वेष कृताञ्जलीनाम्॥ ६१॥
तथागतं सो सुपिनस्मि पश्यति देशेत्त धर्मं बकुप्राणिकोटिनाम्।
रश्मीसहस्राणि प्रमुञ्चमानं वल्गुस्वरं काञ्चनवर्णनाथम्॥ ६२॥
सो चा तर्ही[4] भोति कृताञ्जलि[5] स्थितो अभिष्टवन्तो द्विपदुत्तमं मुनिम्।
सो चा जिनो[6] भाषति अग्रधर्मं चतुर्ण[7] पर्षाण महाभिषट्टः॥ ६३॥
सो च प्रहृष्टो भवती श्रुणित्वा प्रामोद्यजातश्च करोति पूजाम्।
सुपिने च सो धारणि प्रापुणोति अविवर्तियं ज्ञान स्पृशित्व क्षिप्रम्॥ ६४॥
ज्ञात्वा च सो आशयु लोकनाथस्तं व्याकरोती पुरुषर्षभत्वे।
कुलपुत्र त्वं पीहु अनुत्तरं शिवं स्पृशिष्यसि[8] ज्ञानमनागते ऽधनि॥ ६५॥
तवापि क्षेत्रं विपुलं भविष्यति पर्षाश्च चत्वारि यथैव मह्यम्।
श्रोष्यन्ति धर्मं विपुलं अनास्रवं[10] सगौरवा भूत्व कृताञ्जली च॥ ६६॥
पुनश्च सो पश्यति[11] आत्मभावं भावेत्त[12] धर्मं गिरिकन्दरेषु।
भावित्व[13] धर्मं च स्पृशित्व धर्मतां समाधि सो लब्धु जिनं च पश्यति॥ ६७॥

1) का A. B. Cb. W. O. कान् K.
2) र्मान् K.
3) तस्मिंश्च B. स्वप्नस्मि O.
4) चतर्ही A. Cb. W. चतुर्णां B. चा तर्ही K. स चे तर्हि O.
5) ली K. better.
6) ञ्जिनो Cb. चञ्जिनो K.
7) All but O. चतस्रणां. Cf. पर्षाश्चत्वारि vs. 66.
8) से B. Cb. K.
9) पर्याप्त च A. पर्याय W.
10) अ for स्र in all but O.
11) भाष Cb.
12) त्त A. B. K. त्व Cb. त्त W.
13) For भावेत्वा.

सुवर्णवर्णं शतपुण्यलक्षणं सुपिनस्मि दृष्ट्वा च शृणोति धर्मम्।
श्रुत्वा च तं पर्षदि संप्रकाशयी सुपिनो खु तस्यो अयमेवरूपः[1]॥ ६८॥
स्वप्ने ऽपि[2] सर्वं प्रजहित्व राज्यमन्तःपुरं ज्ञातिगणं तथैव।
अभिनिष्क्रमी सर्व जहित्व कामानुपसंक्रमी येन च बोधिमण्डम्॥ ६९॥
सिंहासने तत्र निषीदियानो द्रुमस्य मूले तहि बोधि अर्थिकः।
दिवसान सप्तान तथात्ययेन अनुप्राप्स्यते ज्ञानु[3] तथागतानाम्॥ ७०॥
बोधिं च प्राप्तस्ततु व्युत्थहित्वा प्रवर्तयी चक्रमनास्रवं हि[4]।
चतुर्ण[5] पर्षाण[6] स धर्म देशयी अचिन्तिया कल्पसहस्रकोट्यः॥ ७१॥
प्रकाशयित्वा तहि धर्म नास्रवं[7] निर्वापयित्वा बकुप्राणिकोट्यः[8]।
निर्वापयति[9] केतुक्षये व दीपः सुपिनो अयं सो भवतेवरूपः[10]॥ ७२॥

1) पं A. B. पः Cb. K. पो W.
2) स्वप्नति A. W. स्वप्ने हि B. K. स्वप्ने पि Cb.
3) न Cb. K. W.
4) चक्रमनुत्तरं शिवं B. K.
5) चतसृणां A. चतस्राण B. चतसृण Cb. चतसृ K. चतसृतीणां W. The reading of O. unknown.
6) परिषाण W.
7) धममनास्रवं हि A. W. धर्मणास्रवं B. धर्ममनास्रवं शिवं Cb. K.
8) B. adds सहस्र.
9) निर्वापयी केतुक्षये Cb. निर्वापयति केतुक्षयोप K.
10) च A. W.

बक्क अनुशंसाश्च अनन्तकाश्च ये मञ्जुघोषा[1] सद् तस्य भोन्ति[2]।
यो पश्चिमे कालि इमग्रधर्मं[3] सूत्रं प्रकाशेय मया[4] सुदेशितम्[5] ॥ ७३ ॥

॥ इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये सुखविहारपरिवर्तो नाम त्रयोदशमः[6] ॥

1) षो B.
2) सांति Cb. भोति K.
3) इममग्रधर्मं A. W. इमग्रबोधिं B. इम ग्रधर्मं K. ममाग्रधर्मं Cb.
4) Left out in Cb.
5) MSS. add इति.
6) चतुर्दशमः O.

XIV.

अथ खल्वन्यलोकधात्वागतानां बोधिसत्त्वानां महासत्त्वानामष्टौ गङ्गानदीवालुकासमा[1] बोधिसत्त्वा महासत्त्वास्[2] तस्मिन्समये ततः पर्षन्मण्डलादभ्युत्थिता अभूवन्[3]। ते ऽञ्जलिं प्रगृह्य भगवतो ऽभिमुखा भगवन्तं[4] नमस्यमाना भगवन्तमेतदूचुः। सचेद्भगवानस्माकमनुज्ञा[5]नीयाद्वयमपि भगवन्निमं धर्मपर्यायं तथागतस्य परिनिर्वृतस्य तस्यां सहायां लोकधातौ संप्रकाशयेम वाचयेम लेखयेम[6] पूजयेम अस्मिंश्च धर्मपर्याये योगमापद्येमहि। तत्साधु भगवानस्माकमपीमं धर्मपर्यायमनुज्ञानातु। अथ खलु भगवांस्तान्बोधिसत्त्वानेतदवोचत्। अलं कुलपुत्राः किं युष्माकमनेन कृत्येन। सन्ति[7] कुलपुत्रा इह ममैवास्यां सहायां लोकधातौ षष्टिगङ्गानदीवालुकासमानि[1] बोधिसत्त्वसहस्राण्येकस्य बोधिसत्त्वस्य परिवारः। एवंरूपाणां च बोधिसत्त्वानां षष्ट्येव[9] गङ्गानदीवालुकासमानि[1] बोधिसत्त्वसहस्राणि येषामेकैकस्य बोधिसत्त्वस्येयानेव[10] परिवारो ये मम परिनिर्वृतस्य पश्चिमे काले पश्चिमे समय इमं धर्मपर्यायं धारयिष्यन्ति वाचयिष्यन्ति संप्रकाशयिष्यन्ति ॥

समनन्तरभाषिता चेयं भगवता वाग्येयं सहालोकधातुः समन्तात्स्फुटिता विस्फु-

1) कास B. K. वालिकास O. कोप the rest.
2) O. adds गणनावीतिवृत्तास्ते.
3) ली A. B. W. लीं K. दृशनखाञ्जलिं O.
4) खाङ्ग K.
5) स्माननु A. W.
6) लिखेमः K. B. Cb.
7) कुलपुत्रा only in O.
1) कास K. वालिकास O. कोप the rest. The reading of K. O. preferable.
8) B. K. add कोटीनियुतशत; O. कोटिनयुतशत.
9) षष्टि च W.
10) इयन्त एव Cb. स्यैत्तकमेव O., r. °क एव; cp. Pāli *ettaka*.

ष्ठिताभूत्तेभ्यश्च स्फोटान्तरेभ्यो बहूनि बोधिसत्त्वकोटीनयुतशतसहस्राणयुत्तिष्ठन्ते स्म सुवर्णवर्णैः कायैर्द्वात्रिंशद्भिर्महापुरुषलक्षणैः समन्वागताः। ये ऽस्यां महापृथिव्यामधः आकाशधातौ विक्रमन्ति स्मेमामेव सहां लोकधातुं निश्रित्य ते खल्विममेवंरूपं भगवतः शब्दं श्रुत्वा पृथिव्या अधः समुत्थिताः। येषामेकैको बोधिसत्त्वः षष्टिगङ्गानदीवालुकोपमबोधिसत्त्वपरिवारो गणी महागणी गणाचार्यः। तादृशानां बोधिसत्त्वानां महासत्त्वानां गणीनां महागणीनां गणाचार्याणां षष्टिगङ्गानदीवालुकोपमानि बोधिसत्त्वकोटीनयुतशतसहस्राणि य इतः सहायां लोकधातोर्धरणीविवरेभ्यः समुन्मज्जन्ते स्म। कः पुनर्वादः पञ्चाशद्गङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादश्चत्वारिंशद्गङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादस्त्रिंशद्गङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादो विंशतिबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पनर्वादो दशगङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादः पञ्चचतुस्त्रिद्विगङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वाद एकगङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादो ऽर्धगङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः

1) K. W. have स्फुटेभ्यो विस्फो.

2) टके A.

3) त्ति A. Cb. W. O. has उत्कसत्ति; it leaves out स्म also in the sequel.

4) केष्टमाका O.

5) केष्टिमं भूमितले निर्भिन्दित्वा O.

6) वालिकासमा O. वालुकोपम the rest.

7) गणीनां Prākṛtic for गणिनां.

8) लिकास K. O. लुकोप The rest.

9) या left out in B. K. W. The whole passags from य to स्म runs thus in O.: भूमितले निर्भिन्दित्वा उत्कसत्ति.

10) In a fragment of O. विंशद्गङ्गानदीवालुकासमानां बोधिसत्त्वसहस्रप. So too in the following clauses.

पुनर्वादश्चतुर्भागषड्भागाष्टभागदशभागविंशतिभागत्रिंशद्भागचत्वारिंशद्भागपञ्चाशद्भागशतभागसहस्रभागशतसहस्रभागकोटीभागकोटीशतभागकोटीसहस्रभागकोटीशतसहस्रभागकोटीनयुतशतसहस्रभागगङ्गानदीवालुकोपमबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादो बहुबोधिसत्त्वकोटीनयुतशतसहस्रपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादः कोटीपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादः शतसहस्रपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादः सहस्रपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पनर्वादः पञ्चशतपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादश्चतुःशतत्रिशतद्विशतपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वाद एकशतपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादः पञ्चाशद्बोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानां। पेयालम्। कः पुनर्वादश्चत्वारिंशत्त्रिंशद्विंशतिदशपञ्चचतुस्त्रिद्विबोधिसत्त्वपरिवाराणां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वाद आत्मद्वितीयानां बोधिसत्त्वानां महासत्त्वानाम्। कः पुनर्वादो ऽपरिवाराणामेकविहारिणां बोधिसत्त्वानां महासत्त्वानाम्। न तेषां संख्या वा गणना वोपमा वोपनिषद्वोपलभ्यते य इह सहायां लोकधातौ धरणीविवरेभ्यो बोधिसत्त्वा महासत्त्वाः समुन्मज्जन्ते स्म। ते चोन्मज्ज्योन्मज्ज्य येन स महारत्नस्तूपो वैहायसमन्तरीक्षे स्थितो यस्मिन्स भगवान्प्रभूतरत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धः परिनिर्वृतो भगवता शाक्यमुनिना तथागतेनार्हता सम्यक्संबुद्धेन सार्धं सिंहासने निषण्णस्तेनोपसंक्रामन्ति स्म। उपसंक्रम्य चोभयोस्तथागतयोरर्हतोः सम्यक्संबुद्धयोः पादौ शिरोभिर्वन्दित्वा सर्वांश्च तान्भगवतः शाक्यमुनेस्तथागतस्यात्मीयान्निर्मितांस्तथागतविग्रहान्ये ते समन्ततो दशसु दिक्ष्वन्योन्यासु लोकधातुषु संनिपतिता ना-

1) O. has ठिभागो गङ्गानदीवालुकसमानां बोधिसत्त्वसहस्रपरिवाराणां बोधिसत्त्वानां. Throughout सम for उपम.

2) K. adds सहस्र.

3) In Cb. added वोपम्यो.

4) इतः A. K. W. इह B. Cb.

नारत्नवृक्षमूलेषु सिंहासनोपविष्टाः । तान्सर्वानभिवन्द्य नमस्कृत्य चानेकशतसहस्रकृत्वस्तांस्तथागतानर्हतः सम्यक्संबुद्धान्प्रदक्षिणीकृत्य नानाप्रकारैर्बोधिसत्त्वस्तवैरभिष्टुत्येकान्ते तस्थुरञ्जलिं प्रगृह्य भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं भगवन्तं च प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धमभिसंमुखं नमस्कुर्वान्त स्म ॥

तेन खलु पुनः समयेन तेषां बोधिसत्त्वानां महासत्त्वानां पृथिवीविवरेभ्य उन्मज्जतां[1] तथागतांश्च वन्दमानानां नानाप्रकारैर्बोधिसत्त्वस्तवैरभिष्टुवतां परिपूर्णाः पञ्चाशदन्तरकल्पा गच्छन्ति स्म । तांश्च पञ्चाशदन्तरकल्पान्स भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तूष्णीमभूत्ताश्चतस्रः पर्षदस्तानेव पञ्चाशदन्तरकल्पांस्तूष्णीभावेनावस्थिता अभूवन् । अथ खलु भगवांस्तथारूपमृद्ध्यभिसंस्कारमकरोत्यथारूपेणर्द्ध्यभिसंस्कारेणाभिसंस्कृतेन ताश्चतस्रः पर्षदस्तमेवैकं पश्यन्ति[2] संजानन्ति स्मेमां च सहां लोकधातुं शतसहस्राकाशपरिगृहीतां बोधिसत्त्वपरिपूर्णामद्राक्षुः । तस्य खलु पुनर्महतो बोधिसत्त्वगणस्य महतो बोधिसत्त्वराशेश्चत्वारो बोधिसत्त्वा महासत्त्वा[3] ये प्रमुखा अभूवन् । तद्यथा विशिष्टचारित्रश्च नाम बोधिसत्त्वो महासत्त्वो ऽनन्तचारित्रश्च नाम बोधिसत्त्वो महासत्त्वो विशुद्धचारित्रश्च नाम बोधिसत्त्वो महासत्त्वः सुप्रतिष्ठितचारित्रश्च[4] नाम बोधिसत्त्वो महासत्त्वः । इमे चत्वारो बोधिसत्त्वा महासत्त्वास्तस्य महतो बोधिसत्त्वगणस्य महतो बोधिसत्त्वराशेः प्रमुखा अभूवन् । अथ खलु चत्वारो[5] बोधिसत्त्वा महासत्त्वास्तस्य महतो बोधिसत्त्वगणस्य महतो बोधिसत्त्वराशेरुत्थायासनात्[6] स्थित्वा भगवतो ऽभिमुखमञ्जलिं[7] प्रगृह्य भगवन्तमेतदूचुः । कच्चिद्भगवतो[8]

1) उत्सर्ज्जतां A. Cb. W. उत्सर्ज्जतानां B. K. उत्पज्जंतानां O.

2) र् B.

3) Left out in K. The following ये wanting in O.

4) सु wanting in O.

5) ते instead of चत्वारो in Cb. O.

6) ता Cb.

7) मुखा भगवन्तमवलोकयमाना दर्शनखमञ्ज° O.

8) कश्चि A. B. Cb. कच्चि K. W. काचि O.

ऽल्पाबाधता मन्दग्लानता सुखसंस्पर्शविहारता[1] च । कच्चिद्भगवन्सत्त्वाः[2] स्वाकाराः सुविज्ञापकाः[3] सुविनेयाः[4] सुविशोधका मा खेदमुत्पादयन्ति ॥

अथ खलु ते[5] चत्वारो बोधिसत्त्वा महासत्त्वा भगवन्तमभ्यां गाथाभ्यामध्यभाषन्त ॥

कच्चित्सुखं विहरसि[6] लोकनाथ प्रभंकर[7] ।
आबाधविप्रमुक्तो ऽसि स्पर्शः[8] काये तवानघ ॥ १ ॥
स्वाकाराश्चैव ते सत्त्वाः सुविनेयाः सुशोधकाः ।
मा खेदं जनयन्ति[9] लोकनाथस्य भाषतः[10] ॥ २ ॥

अथ खलु भगवांस्तस्य महतो बोधिसत्त्वगणस्य महतो बोधिसत्त्वराशेः प्रमुखांश्चतुरो बोधिसत्त्वान्महासत्त्वान्[11] एतदवोचत् । एवमेतत्कुलपुत्रा एवमेतत् । सुखसंस्पर्शविहारो ऽल्पाबाधो मन्दग्लानः स्वाकाराश्च ममैव ते सत्त्वाः सुविज्ञापकाः[12] सुविनेयाः[13] सुविशोधका न च मे खेदं जनयन्ति विशोध्यमानाः । तत्कस्य हेतोः । ममैव हेते कुलपुत्राः सत्त्वाः पौर्वकेषु सम्यक्संबुद्धेषु कृतपरिकर्माणो दर्शनादेव हि कुलपुत्राः श्रवणाच्च ममाधिमु-

1) सं omitted in O.

2) कश्चिद्भगवां A. K. °गवन् B. O. °गवतो Cb. कच्चिद्भगवान् W.

3) सुविज्ञपकाराः A. K. W. सुविज्ञपका O.

4) वेनेयाः; O. cp. Pāli *veneyya*.

5) In B. O. only.

6) से O. ति the rest.

7) All रः.

8) र्श O. र्श the rest.

9) Thus all, evidently corrupt. We propose to r. जनयेत्, the singular being used for the plural.

10) MSS. add इति.

11) महासत्त्वान् in B. only.

12) ज्ञ A. K. W. O.

13) वैनेयाः O.

व्यन्ते बुद्धज्ञानमवतरत्यवगाहन्ते। यत्र ये ऽपि[1] श्रावकभूमौ वा[2] प्रत्येकबुद्धभूमौ वा कृतपरिचर्या अभूवंस्ते ऽपि मयैवेतर्हि बुद्धधर्मज्ञानमवतारिता संश्राविताश्च परमार्थम्॥

अथ खलु ते बोधिसत्त्वा महासत्त्वास्तस्यां वेलायामिमे गाथे[2] ऽभाषन्त॥

साधु साधु महावीर अनुमोदामहे वयम्।
स्वाकारा येन ते सत्त्वाः सुविनेयाः सुशोधकाः॥ ३॥
ये चेदं ज्ञान गम्भीरं शृण्वन्ति तव नायक।
श्रुत्वा च अधिमुच्यन्ते उत्तरन्ति[3] च[4] नायक[5]॥ ४॥

एवमुक्ते भगवांस्तस्य महतो बोधिसत्त्वगणस्य महतो बोधिसत्त्वराशेः प्रमुखेभ्यश्चतुर्भ्यो बोधिसत्त्वेभ्यो महासत्त्वेभ्यः साधुकारमदात्। साधु साधु कुलपुत्रा ये यूयं तथागतमभिनन्दथेति॥

तेन खलु पुनः समयेन मैत्रेयस्य बोधिसत्त्वस्य महासत्त्वस्यान्येषां चाष्टानां गङ्गानदीवालुकोपमानां[6] बोधिसत्त्वकोटीनयुतशतसहस्राणामेतदभवत्। अदृष्टपूर्वो ऽयमस्माभिर्महाबोधिसत्त्वगणो महाबोधिसत्त्वराशिरश्रुतपूर्वश्च यो ऽयं पृथिवीविवरेभ्यः समुन्मज्ज्य[7] भगवतः पुरतः स्थित्वा भगवन्तं सत्कुर्वन्ति गुरुकुर्वन्ति मानयन्ति पूजयन्ति भगवन्तं च प्रतिसंमोदन्ते। कुतः खल्वियमे बोधिसत्त्वा महासत्त्वा आगता इति॥

अथ खलु मैत्रेयो बोधिसत्त्वो महासत्त्व आत्मना विचिकित्सां कथंकथां विदित्वा

---

1) Left out in K.
2) A grammatical error for अभाषत्त; O. has गाथा अभाषु॥.
3) श्रोत B. rightly.
4) वि B.
5) Some MSS. add इति.
6) कस O.
7) समुत्पञ्ज्ञत्वा O. समुत्सर्ज्य the rest; both readings wrong.

तेषां गङ्गानदीवालुकोपमानां[1] बोधिसत्त्वकोटीनयुतशतसहस्राणां चेतसैव चेतः परिवितर्कमाज्ञाय तस्यां वेलायामञ्जलिं[2] प्रगृह्य भगवन्तं गाथाभिर्गीतेनैतमेवार्थं परिपृच्छति स्म॥

बुद्धसहस्रा नयुताः कोटीयो च अनन्तकाः।
अपूर्वा बोधिसत्त्वानामाख्याहि द्विपदोत्तम॥ ५॥
कुतो इमे कथं वापि आगच्छन्ति महर्द्धिकाः।
महात्मभावा रूपेण कुत एतेष[3] आगमः[4]॥ ६॥
धृतिमन्ताश्चिमे सर्वे स्मृतिमन्तो महर्षयः।
प्रियदर्शनाश्च रूपेण कुत एतेष[5] आगमः॥ ७॥
एकैकस्य च लोकेन्द्र बोधिसत्त्वस्य विज्ञिनः।
अप्रमेयपरिवारो यथा गङ्गाय वालिकाः[6]॥ ८॥
गङ्गावालिकसमा[7] षष्टि परिपूर्णा यशस्विनः।
परिवारो बोधिसत्त्वस्य सर्वे बोधाय प्रस्थिताः॥ ९॥
एवंरूपाण वीराणां पर्षवन्तान तायिनाम्।
षष्टिरेव प्रमाणेन गङ्गावालिकया[8] इमे[9]॥ १०॥

---

1) कास A. K. W. O.
2) लीं in all MSS. but O., which has लि.
3) All but O. एतेषु.
4) All गताः.
5) Sic O.; एतेषु आगताः the rest.
6) का A. B. K. W. काः Cb.
7) क A. Cb. K. W. का B.
8) का A. W.
9) Read समा. Differently in O. षष्टिमेव परिवारो प्रमाणं गङ्गवालिका.

अतो बक्कतराश्चान्ये[1] परिवारैरनन्तकैः ।
पञ्चाशतीय गङ्गाय चत्वारिंशच्च त्रिंशति[2] ॥ ११ ॥
समो विंशतिगङ्गाया परिवारः समन्ततः[3] ।
अतो बक्कतराश्चान्ये येषां दश च पञ्च च ॥ १२ ॥
एकैकस्य परीवारो बुद्धपुत्रस्य तायिनः ।
कुतो ऽयमीदृशी पर्षदागताऽथ[4] विनायक ॥ १३ ॥
चत्वारि त्रीणि द्वे चापि गङ्गावालिकया समाः[5] ।
एकैकस्य परीवारा ये ऽनुशिष्टासहायकाः[6] ॥ १४ ॥
अतो बक्कतराश्चान्ये[7] गणना येष तत्तिका[8] ।
कल्पकोटीसहस्रेषु[9] उपमेतुं न शक्नुयात्[10] ॥ १५ ॥
अर्धगङ्गा त्रिभागश्च दशविंशतिभागिकः[11] ।
परिवारो ऽथ वीराणां बोधिसत्त्वान तायिनाम् ॥ १६ ॥

---

1) न्यो A. K. W. ये च O.
2) All but O. त्रिंशच्च; r. °श च.
3) समंततो A. W. षतात्तको B. Cb. समन्तको K. वारो येष एतकाः O.
4) पर्षदागता ये A. पर्षा आगताऽथ B. पर्षो आगताऽथे Cb. पर्षागता ये K. W. तादृशा वीरा आगच्छन्ति O.
5) समे A. समाः B. Cb. समा K. W. Differently in O.
6) अनुशिष्टाः O. येनशिष्टा (?) the rest.
7) तरो चान्ये A. K. W. तरश्चान्ये B. Cb. But see vr. 17 below.
8) तातिकाः O.
9) भि A. O. षु B. Cb. द्धि K. W. preferable.
10) न शक्यं सर्वि पणिउतुम् O.
11) काः A. कः B. K. W. नः Cb.

अतो बक्कतराश्चान्ये[1] प्रमाणैषां[2] न विद्यते ।
एकैकं गणयन्तेन कल्पकोटीशतैरपि ॥ १७ ॥
अतो बक्कतराश्चान्ये परिवारैरनन्तकैः[4] ।
कोटी कोटी च कोटी च अर्धकोटी तथैव च ॥ १८ ॥
गणनाव्यतिवृत्ताश्च[5] अन्ये भूयो महर्षिणाम् । 5
बोधिसत्त्वा महाप्रज्ञाः स्थिताः सर्वे सगौरवाः ॥ १९ ॥
परिवारसहस्रं च शतपञ्चाशदेव च ।
गणना नास्ति एतेषां कल्पकोटीशतैरपि ॥ २० ॥
विंशतिर्दश[6] पञ्चाथ[7] चत्वारि त्रीणि द्वे तथा ।
परिवारो ऽथ वीराणां गणनैषां[8] न विद्यते ॥ २१ ॥ 10
चरन्त्येकात्मका ये[9] च शान्तिं विदन्ति चैककाः ।
गणना तेष[10] नैवास्ति ये इहाद्य समागताः[11] ॥ २२ ॥
गङ्गावालिकासमान्कल्पान्गणयेत यदी नरः[12] ।
शलाकां गृह्य कृत्स्नेन[13] पर्यन्तं नैव सो लभेत् ॥ २३ ॥

---

1) रा चान्ये A. W. राश्चान्ये B. रश्चान्ये Cb. रो चान्ये K.
2) णो Cb.
3) राश्चान्ये A. B. W. रश्चान्ये Cb. रो चान्ये K.
4) नल्प B. Cb.
5) ता च Cb.
6) All but O. तिदश.
7) पञ्चषट् A. K. W. पंचासच् B. पंचास Cb. Our reading conjectural.
8) ने K.
9) का अन्ये O. better.
10) स्ते A. K. W. ते B. Cb. All but O. चेहाद्य.
11) ताः Cb. O. ता A. B. K. W.
12) लु B.
13) कृत्स्ति गृह्लित्वा O.

महात्मनां च सर्वेषां वीर्यवत्तान तायिनाम्।
बोधिसत्त्वान वीराणां कुत एतेष संभवः ॥ २४ ॥
केनैषां देशितो धर्मः केन बोधीय[1] स्थापिताः।
रोचन्ति शासनं कस्य कस्य[2] शासनधारकाः ॥ २५ ॥
भित्त्वा हि पृथिवीं सर्वां समन्तेन चतुर्दिशम्।
उत्मज्जन्ति महाप्रज्ञा ऋद्धिमन्तो विचक्षणाः ॥ २६ ॥
नरनरा लोकधात्वेयं समन्तेन कृता मुने।
उन्मज्जमानैरेतैर्हि[4] बोधिसत्त्वैर्विशारदैः ॥ २७ ॥
न क्वेते ज्ञातु अस्माभिर्दृष्टपूर्वाः कदाचन।
आख्याहि नो तस्य नाम लोकधातोर्विनायक[5] ॥ २८ ॥
दिशादिशा हि अस्माभिरन्विताये पुनः[6] पुनः।
न च दृष्टा इमे ऽस्माभिर्बोधिसत्त्वाः कदाचन ॥ २९ ॥
दृष्टो न ज्ञातुरस्माभिरेको ऽपि तनयस्तव।
इमे ऽद्य सकसा दृष्टा[8] आख्याहि चरितं मुने ॥ ३० ॥
बोधिसत्त्वसकन्याणि शतानि नयुतानि च।
सर्वे कौतूकलप्राप्ताः पश्यन्ति द्विपदोत्तमम् ॥ ३१ ॥

1) All बोधाय.
2) कस्ये म A. W. कस्य स B. कस्येमे K.
3) त्वे in all MSS.
4) O. has उत्पज्जतेभिरेतेभिर्.
5) नामं क्षत्रस्य लोकवि K. नो omitted in O.; further तस्य क्षेत्रस्प नाम लोकवि.
6) दिसे दिशा यो B. दिशो दशो अस्माभिरन्चिताये Cb. O. has दिशदिशासु हि अस्मे अणियता (r. अणिवता or अणिठता) स्म.
7) तरपस्तव K. In O. a break.
8) दृष्ट्वा K.

व्याकुरुष महावीर अप्रमेय निरोपधे[1]।
कुत एति इमे शूरा बोधिसत्त्वा विशारदा[2]ः ॥ ३२ ॥

तेन खलु पुनः समयेन ये ते तथागता अर्हन्तः सम्यक्संबुद्धा अन्येभ्यो लोकधातुकोटीनयुतशतसकन्नेभ्यो ऽभ्यागता भगवतः शाक्यमुनेस्तथागतस्य निर्मिता ये ऽन्येषु[3] लोकधातुषु सत्त्वानां धर्मं देशयन्ति स्म ये भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक्संबुद्धस्य समन्तादष्टभ्यो दिग्भ्यो[4] रत्नवृक्षमूलेषु महारत्नसिंहासनेषूपविष्टाः पर्यङ्कबद्धाः[5]। तेषां तथागतानामर्हतां सम्यक्संबुद्धानां ये स्वकस्वका उपस्थायकास्ते ऽपि तं महान्तं बोधिसत्त्वगणं बोधिसत्त्वराशिं दृष्ट्वा समन्तात्पृथिवीविवरेभ्य उत्मज्जन्तमाकाशधातुप्रतिष्ठितं ते ऽप्याश्चर्यप्राप्तास्तान्स्वान्स्वांस्तथागतानेतदूचुः। कुतो भगवन्निमे बोधिसत्त्वा महासत्त्वा आगच्छन्त्यप्रमेया असंख्येयाः। एवमुक्तास्ते तथागता अर्हन्तः सम्यक्संबुद्धास्तान्स्वान्स्वानुपस्थायकानेतदूचुः। आगमयध्वं यूयं कुलपुत्रा मुहूर्तम्। एष मैत्रेयो नाम बोधिसत्त्वो महासत्त्वो भगवतः शाक्यमुनेरनन्तरं व्याकृतो ऽनुत्तरायां सम्यक्संबोधौ। स एतं[10] भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धमेतमर्थं परिपृच्छ्यैष च भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धो व्याकरिष्यति। ततो यूयं श्रोष्यथेति[12] ॥

1) निरोपधेः K. निरापधेः A. निरापधे B. निरोपधे Cb. W. O. More usual is अनूपधि.
2) All but O. add इति.
3) अन्यासु O., but inconsistently °धातुकोटिनयुतशतसकन्नेषु.
4) ष्टादिन्तु Cb.
5) पर्यङ्केन O. पर्यङ्कबध्वाः in the other MSS.
6) उत्मज्जत आ° O.
7) इमे एतका O.
8) O. adds अतुल्या अगण्यनोयाः Cp. below p. 309, l. 3.
9) Left out in K.
10) एवं A. एतं B. Cb. W. एवं तं K.
11) तथागतमेतमर्थं K.
12) तं शृणुथ O.

अथ खलु भगवान्मैत्रेयं बोधिसत्त्वं महासत्त्वमामन्त्रयते स्म। साधु साधजित। उदारमेतदजित स्थानं यत्त्वं मां परिपृच्छसि। अथ खलु भगवान्सर्वावन्तं बोधिसत्त्वगणमामन्त्रयते स्म। तेन हि कुलपुत्राः सर्व एव प्रयता भवध्वं सुसंनद्धा दृढस्थामाश्च भवध्वं सर्वश्चायं बोधिसत्त्वगणः। तथागतज्ञानदर्शनं कुलपुत्रास्तथागतो ऽर्हन्सम्यक्संबुद्धः सांप्रतं संप्रकाशयति तथागतवृषभितं[2] तथागतकर्म तथागतविक्रीडितं तथागतविजृम्भितं तथागतपराक्रममिति॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

प्रयता भवध्वं कुलपुत्र सर्वे इमां प्रमुञ्चामि गिरामनन्यथाम्।
मा खू विषादं[3] कुरुथेक्क पण्डिता अचित्तियं ज्ञानु[4] तथागतानाम्॥ ३३॥
धृतिमन्त भूत्वा स्मृतिमन्त सर्वे समाहिताः सर्वि स्थिता भवध्वम्।
अपूर्वधर्मा श्रुणितव्यु[6] अद्य आश्चर्यभूतो हि तथागतानाम्॥ ३४॥
विचिकित्स मा ज्ञातु कुरुध सर्वे अक्कं हि पुष्मान्परिसंस्थपेमि।
अनन्यथावादिरक्कं विनायको ज्ञानं च मे यस्य न काचि संख्या॥ ३५॥
गम्भीरधर्माः सुगतेन बुद्धा अतर्किया येष प्रमाणु नास्ति।
तानद्य[8] क्कं[9] धर्मं प्रकाशयिष्ये शृणोथ मे यादृशका यथा च ते॥ ३६॥

1) यथा O. यस्त्वं the rest.
2) MSS. give भितां and भितं.
3) विषादं A. W. O. विसादं B. विवादं Cb. रिष्यदं K.
4) न B. Cb. W. O.
5) र्म A. K. W. Better, because the lengthening is not necessary.
6) व्य A. B. वा W. व्यमश्च O. with *m* to avoid hiatus.
7) यूयं A. B. W. युष्मां Cb. K.
8) येषामक्कं A. K. O. तामक्कं W.
9) Rather धर्मि (Skr. धर्मान्) or to r. with O. तेषामक्कं.

अथ खलु भगवानिमा गाथा भाषित्वा तस्यां[1] वेलायां[1] मैत्रेयं बोधिसत्त्वं महासत्त्वमामन्त्रयते स्म। आरोचयामि ते ऽजित प्रतिवेदयामि। य इमे ऽजित बोधिसत्त्वा अप्रमेया असंख्येया अचिन्त्या अतुल्या अगणनीया ये युष्माभिरदृष्टपूर्वा य एतर्हि पृथिवीविवरेभ्यो निष्क्रान्ताः। मयैते[2] ऽजित सर्वे बोधिसत्त्वा महासत्त्वा अस्यां सक्रायां[3] लोकधातावनुत्तरां सम्यक्संबोधिमभिसंबुध्य समादापिताः समुत्तेजिताः संप्रकर्षिता अनुत्तरायां सम्यक्संबोधौ परिणामिताः। मया चैते कुलपुत्रा अस्मिन्बोधिसत्त्वधर्मे परिपाचिताः प्रतिष्ठापिता निवेशिताः परिसंस्थापिता अवतारिताः[4] परिबोधिताः[5] परिशोधिताः। एते चाजित बोधिसत्त्वा महासत्त्वा अस्यां सक्रायां लोकधाता अधस्तादाकाशधातुपरिग्रहं[6] प्रतिवसन्ति। स्वाध्यायोद्देशचित्ता योनिशो मनसिकारप्रवृत्ता[7] एते कुलपुत्रा असङ्गविहारामा असंसर्गाभिरता अनिद्रानिद्धुरा आरब्धवीर्याः। एते ऽजित कुलपुत्रा विवेकारामा विवेकाभिरताः। नैते कुलपुत्रा देवमनुष्यानुपनिश्राय विक्रीड्यसंसर्गचर्याभिरताः। एते कुलपुत्रा धर्मारामाभिरता बुद्धज्ञाने ऽभियुक्ताः॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

ये बोधिसत्त्वा इमि अप्रमेया अचित्तिया येष प्रमाणु[10] नास्ति।
श्रद्धोय प्रज्ञाय श्रुतेनुपेता बकुकल्पकोटीचरिताश्च ज्ञाने॥ ३७॥

1) Left out in K. O.
2) Cb. K. W. add व.
3) O has generally the masc. form सक्र; here इक्र सक्रे.
4) In Cb. O. only.
5) Left out in B. Cb.
6) केष्टिमा O.
7) प्रयत्ता O.
8) All but O. वि.
9) देवानां मनुष्यानां वा.
10) ण O.

परिपाचिताः सर्वि मयेति बोधये ममैव क्षेत्रस्मि वसन्ति चैते ।
परिपाचिताः सर्वि मयैव एते ममैव पुत्राश्मिमि बोधिसत्त्वाः ॥ ३८ ॥
सर्वे ति आरण्यधुताभियुक्ताः[1] संसर्गभूमिं सद वर्जयन्ति ।
असङ्गचारो च ममेति पुत्रा ममोत्तमां चर्यनुशिक्षमाणाः ॥ ३९ ॥
वसन्ति आकाशपरियन्तस्मिन्क्षेत्रस्य केष्टापरिभागि[2][3] वीराः ।
समुद्गनयत्ता इममग्रबोधिं उद्युक्त रात्रिं दिवमप्रमत्ताः ॥ ४० ॥
आरब्धवीर्या स्मृतिमन्त सर्वे प्रज्ञाबलस्मिन्स्थित अप्रमेये ।
विशारदा धर्मु कथेन्ति चैते प्रभास्वरा पुत्र ममेति सर्वे ॥ ४१ ॥
मया च प्राप्य[4] इममग्रबोधिं नगरे गयायां द्रुममूलि तत्र ।
अनुत्तरं वर्तिय धर्मचक्रं परिपाचिता[5]ः सर्वि इहाग्रबोधौ ॥ ४२ ॥
अनास्रवा भूत इयं मि वाचा शृणित्व सर्वे मम अद्यधर्म्[6][7] ।
एवं चिरं प्राप्त मयाग्रबोधि परिपाचिताश्चेति मयैव सर्वे ॥ ४३ ॥

अथ खलु मैत्रेयो बोधिसत्त्वो महासत्त्वस्तानि च संबहुलानि बोधिसत्त्वकोटीनयुतशतसहस्राण्याश्चर्यप्राप्तान्यभूतप्राप्तानि[8] विस्मयप्राप्तानि । कथं नाम भगवतानेन ज्ञानविकुर्वणाल्पेन[9][10] कालान्तरेणामी एतावन्तो बोधिसत्त्वा महासत्त्वा असंख्येयाः समादापिताः परिपाचिताश्चानुत्तरायां सम्यक्संबोधौ ॥ अथ खलु मैत्रेयो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । कथमिदानीं भगवंस्तथागतेन कुमारभूतेन कपिलवस्तुनः शाक्य[1]नगरान्निष्क्रम्य गयानगरान्नातिदूरे[2] बोधिमण्डवराग्रगतेनानुत्तरा सम्यक्संबोधिरभिसंबुद्धा[3][4] । तस्याश्च भगवन्कालस्य सातिरेकाणि चत्वारिंशद्वर्षाणि । तत्कथं भगवंस्तथागतेनेयता कालान्तरेणेदमपरिमितं तथागतकृत्यं कृतं तथागतेन तथागतवृषभिता[5] तथागतपराक्रमः कृतः । यो ऽयं बोधिसत्त्वगणो बोधिसत्त्वराशिरियता भगवन्कालान्तरेणानुत्तरायां सम्यक्संबोधौ समादापितः[6] परिपाचितश्चास्य भगवन्बोधिसत्त्वगणस्य बोधिसत्त्वराशेर्गण्यमानस्य कल्पकोटीनयुतशतसहस्रैरप्यन्तो नोपलभ्यते[7] । एवमप्रमेया भगवन्निमे बोधिसत्त्वा महासत्त्वा एवमसंख्येयाश्चिरचरितब्रह्मचर्या बहुबुद्धशतसहस्रावरोपितकुशलमूला बहुकल्पशतसहस्रपरिनिष्पन्नाः ॥

तद्यथापि नाम भगवन्कश्चिदेव पुरुषो नवो दहरः शिशुः कृष्णकेशः[8] प्रथमेन वयसा समन्वागतः पञ्चविंशतिवर्षो जात्या भवेत् । स वर्षशतिकान्पुत्रानादर्शयेदेवं च वदेत् । एते कुलपुत्रा मम पुत्रा इति । ते च वर्षशतिकाः पुरुषा एवं च वदेयुः । एषो ऽस्माकं पिता जनक इति । तस्य च पुरुषस्य भगवंस्तद्वचनमश्रद्धेयं भवेल्लोकस्य दुःश्रद्धेयम् । एवमेव भगवन्नचिराभिसंबुद्धो[9][10] ऽनुत्तरां सम्यक्संबोधिमिमे च बोधिसत्त्वा महासत्त्वा बहू[11]प्रमेया

1) धिमुक्ताः O.
2) केष्टे A. W. क्षेष्ठ B. क्षष्टे Cb. K. केष्ठे W. केष्टिन O.
3) गु A. B. Cb. W. ग K. गि our conjecture. Differently in O. इमस्य पणिडताः.
4) प्रध्या A. अध्या B. प्राध्या Cb. प्राप्य B. W. प्राप्तेनिम O.
5) णामिताः O.
6) इमा O. इमं A. B. K. इयं Ca. Cb. इये W.
7) पत्तियाथ O.
8) अद्भुतप्राप्तानि left out in K. O.
9) वीति for वि O, certainly the original reading; cp. Mahāvastu III, 425, 16.
10) रेणाल्पेन K. A. W. रेणानेन B. Cb. रेण एवपरित्तेन (i. e. एवंपरीत्तेन) O.

1) शाक्यानां न O.
2) नगरस्य ना A. K. W. नगरे अति O.
3) All रां and धिम.
4) द्धा O. द्धस्त the others.
5) भितं O. भिता the rest.
6) ताश्च A. B. K. W. ताः Cb. दृपितः O.
7) भ्यंते A. B. K. W. भ्यते Cb. न लभ्यते O.
8) दहरस्तरुणः काउ O.
9) पुत्रां दर्श A. K.
10) B. Cb. have द्धस्तथागतो ऽर्कत्सम्यक्संबुद्धो
11) Rather बहुत्रो.

बक्रुकल्पकोटीनयुतशतसहस्रचोर्णचरितब्रह्मचर्या[1] दीर्घरात्रं किं कृतनिश्चया बुद्धज्ञाने समाधिमुखशतसहस्रसमापद्यनव्युत्थानकुशला महाभिज्ञापरिकर्मनिर्याता महाभिज्ञाकृतपरिकर्माणः पण्डिता बुद्धभूमौ संगीतिकुशलास्तथागतधर्माणामाश्चर्याद्भुता लोकस्य महावीर्यबलस्थामप्राप्ताः। तांश्च भगवानेवं वदति। मयैत आदित एव समादापिताः समुत्तेजिताः परिपाचिताः परिणामिताश्चास्यां बोधिसत्त्वभूमाविति। अनुत्तरां सम्यक्संबोधिमभिसंबुद्धेन मयैष सर्ववीर्यपराक्रमः कृत इति। किं चापि वयं भगवंस्तथागतस्य वचनं श्रद्धया गमिष्यामः। अनन्यथावादी तथागत इति। तथागत एवैतमर्थं जानीयात्। नवयानसंप्रस्थिताः खलु पुनर्भगवन्बोधिसत्त्वा महासत्त्वा विचिकित्सामापद्यन्ते। अत्र स्थाने परिनिर्वृते तथागत इमं धर्मपर्यायं श्रुत्वा न पत्तीयिष्यन्ति न श्रद्धास्यन्ति[5] नाधिमोक्ष्यन्ति। ततस्ते भगवन्धर्मव्यसनसंवर्तनीयेन कर्माभिसंस्कारेण समन्वागता भविष्यन्ति। तत्साधु भगवन्नेतमेवार्थं देशय[6] यद्वयं निःसंशया अस्मिन्धर्मे[7] भवेम अनागते ऽध्वनि बोधिसत्त्वयानीयाः कुलपुत्रा वा कुलदुहितरो वा श्रुत्वा न विचिकित्सामापद्येरन्निति[8]॥

अथ खलु मैत्रेयो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायां भगवत्तमाभिर्गाथाभिरध्यभाषत॥

यदासि ज्ञातो कपिलाह्वयस्मिञ्शाक्याधिवासे अभिनिष्क्रमित्वा।
प्राप्तो ऽसि बोधिं नगरे गयाह्वये कालो ऽयमल्पो ऽत्र तु[9] लोकनाथ॥ ४३॥

---

1) चरित, Cb. चरिता redundant. Some lines illegible in O.
2) Some words wanting in O.
3) A various reading adds ज्ञान.
4) प्रश्नेषु for धर्माणाम् O.
5) अदधास्यन्ति O.
6) देशेहि यथा O.
7) Left out in K. अत्र धर्मेषु O.
8) इति wanting in O.
9) कालेन स्वल्पेन तु K. कालो ऽयमल्पको O.

इमे च ते आर्यविशारदा बह्व ये कल्पकोटीचरिता महागणी।
ऋद्धीबले च स्थित अप्रकम्पिता[1] सुशिक्षिताः प्रज्ञबले गतिंगताः॥ ४५॥
अनूपलिप्ताः पद्मं व वारिणा भित्वा महीं ये इह अद्य आगताः।
कृताञ्जली सर्वि स्थिताः सगौरवाः स्मृतिमन्त लोकाधिपतिस्य पुत्राः॥ ४६॥
कथं इमं अद्भुतमीदृशं ते तं अद्धिष्यन्तिमा बोधिसत्त्वाः।
विचिकित्सनिर्घातनकेतु भाष तं[2] त्वं चैव देशेहि यथैव अर्थं[3]॥ ४७॥
यथा हि[4] पुरुषो इह कश्चिदेव दहरो भवेया शिशु कृष्णकेशः।
ज्ञात्या च सो विंशतिरुत्तरे वा दर्शेति पुत्राञ्शतवर्षजातान्॥ ४८॥
वलीहि पलितेहि च ते उपेता एषो च नो देहकरो ति ब्रूयुः।
दुःश्रद्धं तद्भवि लोकनाथ दहरस्य पुत्रा इमि एवद्रूपाः॥ ४९॥
एमेव[5] भगवंश्च न बोधयेम इमे च विज्ञा बक्रुबोधिसत्त्वाः।
स्मृतिमन्त प्रज्ञाय विशारदाश्च सुशिक्षिताः कल्पसहस्रकोटिषु॥ ५०॥
धृतिमन्त प्रज्ञाय विचक्षणाश्च प्रसादिका दर्शनियाश्च सर्वे।
विशारदा धर्मविनिश्चयेषु परिसंस्तुता लोकविनायकेहि[6]॥ ५१॥
असङ्गचारीव वने वसन्ति आकाशधातौ सततं अनिश्रिताः।
जानन्ति वीर्यं सुगतस्य पुत्राः पर्येषमाणा इम बुद्धभूमिम्[7]॥ ५२॥

---

1) कंपिये B. K. मेये O.
2) भाष A. B. K. भाषत Cb. भाषते W. तं for तत्.
3) अर्थो A. Ca. W. अथे B. अर्था Cb. आर्थो W. अर्थः O.
4) All but O. पि.
5) All but O. एवमेव.
6) न A. B. K. W. हि Cb. O.
7) बोधिं A. B. K. W. O. भूमिं Cb.

कथं नु श्रद्धेयमिदं भवेया[1] परिनिर्वृते लोकविनायकस्मिन्।
विचिकित्स अस्माक न[2] काचिदस्ति शृणोमथा[3] संमुख लोकनाथ[4] ॥ ५३ ॥
विचिकित्स कृत्वान इमस्मि स्थाने गच्छेयु मा दुर्गति बोधिसत्त्वाः।
[5]त्वं व्याकुरुष्व भगवन्यथावत्कथं[6] बोधिसत्त्वाः परिपाचिता इमे ॥ ५४ ॥

॥ इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये बोधिसत्त्वपृथिवीविवरसमुद्गमपरिवर्तो नाम चतुर्दशमः[7] ॥

---

1) भवेत O.
2) अस्माकं कदा A. B. K. अस्माक न का Cb. अस्माक कदा W. O.
3) शृणवानथा A. शृणोमथा B. शृणोम यं O. शृणामथा Cb. शृणवानमथा K शिश्रानथा W.
4) था A. K. थः B. थ Cb. W. यकस्य O.
5) तद् B. Cb. तं O.
6) थं A. K. W.
7) पृथिवीसमुद्गतबोधिसत्त्वप° — पञ्चदशमः O.

XV.

अथ खलु भगवान्सर्वावन्तं बोधिसत्त्वगणमामन्त्रयते स्म[1]। अवकल्पयध्वं मे कुलपुत्रा अभिश्रद्दधध्वं तथागतस्य भूतां वाचं व्याकृरुतः। द्वितीयकमपि[2] भगवांस्तान्बोधिसत्त्वानामन्त्रयते स्म[3]। अवकल्पयध्वं मे कुलपुत्रा अभिश्रद्दधध्वं तथागतस्य भूतां वाचं व्याकृरुतः[4]। तृतीयकमपि भगवांस्तान्बोधिसत्त्वानामन्त्रयते स्म। अवकल्पयध्वं मे कुलपुत्रा अभिश्रद्दधध्वं तथागतस्य भूतां वाचं व्याकृरुतः। अथ खलु[5] स सर्वावान्बोधिसत्त्वगणो मैत्रेयं बोधिसत्त्वं महासत्त्वमग्रतः स्थापयित्वाञ्जलिं प्रगृह्य[6][7] भगवन्तमेतदवोचत्। भाषतु भगवानेतमेवार्थं भाषतु सुगतो वयं तथागतस्य भाषितमभिश्रद्धास्यामः। द्वितीयकमपि[8] स सर्वावान्बोधिसत्त्वगणो भगवन्तमेतदवोचत्[9]। भाषतु भगवानेतमेवार्थं भाषतु सुगतो वयं तथागतस्य भाषितमभिश्रद्धास्यामः। तृतीयकमपि[10] स सर्वावान्बोधिसत्त्वगणो भगवन्तमेतदवोचत्[9]। भाषतु भगवानेतमेवार्थं भाषतु सुगतो वयं तथागतस्य भाषितमभिश्रद्धास्याम इति ॥

अथ खलु भगवांस्तेषां बोधिसत्त्वानां यावत्तृतीयकमप्यध्येषणां विदित्वा[11] तान्बो-

---

1) यामास A. K. W. यति स्म O.
2) द्वितीयकमपि यावत्तृतीयकमपि K. A. W.
3) यामास A. Cb. यति स्म O. K. W.
4) The whole paragraph is left out in K. W. A.
5) Left out in B. K.
6) स्थाप्या Ca. Cb.
7) प्रणम्य Ca. Cb.
8) द्वै A. K.
9) तद्वचुः A. K. W. तदवोचुः O.
10) त्रै A. Cb. K. W.
11) त्रै A. Cb.

धिसत्त्वानामत्त्वयते[1] स्म। तेन हि कुलपुत्राः शृणुध्वमिदमेवंरूपं ममाधिष्ठानबलाधानं यदेयं[2] कुलपुत्राः सदेवमानुषासुरो लोक एवं संजानीते। सांप्रतं भगवता शाक्यमुनिना[3] तथागतेन[4] शाक्यकुलादभिनिष्क्रम्य गयाङ्गये महानगरे बोधिमण्डवराग्रगतेनानुत्तरां सम्यक्संबोधिमभिसंबुद्ध[5][6][7] इति। नैवं द्रष्टव्यम्। अपि तु खलु पुनः कुलपुत्रा बह्वनि मम कल्पकोटीनयुतशतसहस्राण्यनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य। तद्यथापि नाम कुलपुत्राः पञ्चाशत्सु लोकधातुकोटीनयुतशतसहस्रेषु ये पृथिवीधातुपरमाणवः। अथ खलु कश्चिदेव पुरुष उत्पद्यते स एकं परमाणुरजः[8] गृहीत्वा पूर्वस्यां दिशि पञ्चाशल्लोकधात्वसंख्येयशतसहस्राण्यतिक्रम्य तदेकं परमाणुरजः समुपनिक्षिपेत्[9]। अनेन पर्यायेण कल्पकोटीनयुतशतसहस्राणि स पुरुषः सर्वांस्ताँल्लोकधातून्व्यवगतपृथिवीधातून्[10][11]कुर्यात्सर्वाणि च तानि पृथिवीधातुपरमाणुरजांस्यनेन पर्यायेणानेन च लक्षनिक्षेपेण पूर्वस्यां दिश्युपनिक्षिपेत्। तत्किं मन्यध्वे कुलपुत्राः शक्यं ते लोकधातवः केनचिच्चिन्तयितुं वा गणयितुं वा तुलयितुं वोपलक्षयितुं वा। एवमुक्ते मैत्रेयो बोधिसत्वो महासत्त्वः स च सर्वावान्बोधिसत्त्वगणो बोधिसत्त्वराशिर्भगवन्तमेतदवोचत्। असंख्येयास्ते[12] भगवँल्लोकधातवो ऽगणनीयाश्चित्तभूमिसमतिक्रान्ताः। सर्वश्रावकप्रत्येकबुद्धैरपि भगवन्नार्येण ज्ञानेन न शक्यं चिन्तयितुं वा गणयितुं वा तुलयितुं वोपलक्षयितुं वा। अस्माकमपि तावद्भगवन्नवैवर्त्यभूमि[1]स्थितानां बोधिसत्त्वानां महासत्त्वानामस्मिन्स्थाने चित्तगोचरो न प्रवर्तते। तावद्प्रमेया भगवंस्ते लोकधातवो भवेयुरिति[2]॥

एवमुक्ते भगवांस्तान्बोधिसत्त्वान्महासत्त्वानेतदवोचत्। आरोचयामि वः कुलपुत्राः प्रतिवेदयामि वो यावन्तः कुलपुत्रास्ते लोकधातवो येषु तेन पुरुषेण तानि परमाणुरजांस्युपनिक्षिप्तानि येषु च[3] नोपनिक्षिप्तानि सर्वेषु[4] तेषु कुलपुत्रा लोकधातुकोटीनयुतशतसहस्रेषु न तावन्ति परमाणुरजांसि संविद्यन्ते यावन्ति मम कल्पकोटीनयुतशतसहस्राण्यनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य। यतः प्रभृत्यहं[5] कुलपुत्रा अस्यां सहायां लोकधातौ सत्त्वानां धर्मं देशयाम्यन्येषु च लोकधातुकोटीनयुतशतसहस्रेषु ये च मया कुलपुत्रा अत्रान्तरा[6] तथागता अर्हन्तः सम्यक्संबुद्धाः परिकीर्तिता दीपंकरतथागतप्रभृतयस्तेषां च तथागतानामर्हतां सम्यक्संबुद्धानां परिनिर्वाणाय[7] मयैव तानि कुलपुत्रा उपायकौशल्यधर्मदेशनाभिनिर्हारनिर्मितानि। अपि तु खलु पुनः कुलपुत्रास्तथागत आगतागतानां[8][9] सत्त्वानामिन्द्रियपरापरज्ञतां वीर्यारब्धिमात्रतां व्यवलोक्य[10] तस्मिन्नात्मनो नाम व्याकरति[11] तस्मिंस्तस्मिंश्चात्मनः परिनिर्वाणं व्याकरति तथा तथा च सत्त्वान्परितोषयति

1) यामास A. Cb. K. W. पति स्म O.

2) All but O. यो ऽयं.

3) शाक्याभिराजेन O.

4) In B. Cb. only.

5) Left out in K.

6) गजायां नगरे O.

7) The construction shows a confusion between the instrumental and the nominative case. But perhaps to r. °रा °धिरभिसंबुद्धेति.

8) This Prākṛticism in all MSS. and उद्गृह्य O.

9) रजमुप O. the more original reading.

10) व्यपगत B. K. अपगत O. व्यपग the rest.

11) वीपरमाणुरजं A. वीपरमाणुं K. W. वीधातुं O.

12) A. K. W. read तावद् for ते.

1) वर्तिकबोधिसत्वभूमौ O.

2) इति wanting in O.

3) वा B. Cb.

4) B. Cb. add च.

5) प्रतिभ्यहं A. प्रभृतयः Cb.

6) रे K. O.

7) णानि K. णा O.

8) रार्थमभिनि O.

9) गता left out in B.

10) लोकयित्वा A. K. W. O. लोक Cb. लोक्य B.

11) A. adds स्म. नामानि करोति O.

नानाविधैर्धर्मपर्यायैः। तत्र कुलपुत्रास्तथागतो नानाधिमुक्तानां सत्त्वानामल्पकुशलमूलानां बह्वपक्लेशानामेवं वदति[1]। दहरो ऽहमस्मि भिक्षवो ज्ञात्याभिनिष्क्रान्तो ऽचिराभिसंबुद्धो ऽस्मि भिक्षवो ऽनुत्तरां सम्यक्संबोधिम्। यत्खलु पुनः कुलपुत्रास्तथागत एवं चिराभिसंबुद्ध एवं व्याकृत्यचिराभिसंबुद्धो ऽहमस्मीति नान्यत्र सत्त्वानां परिपाचनार्थमवतारणार्थमेते धर्मपर्याया भाषिताः। सर्वे च ते कुलपुत्रा धर्मपर्यायास्तथागतेन सत्त्वानां विनयार्थाय भाषिताः। यां[2] च कुलपुत्रास्तथागतः सत्त्वानां विनयार्थवाचं[3] भाषते[4] ग्रात्मोपदर्शनेन वा ग्रात्माग्रम्बणेन वापराग्रम्बणेन वा यत्किंचित्तथागतो व्याकृरति सर्वे ते धर्मपर्यायाः सत्यास्तथागतेन भाषिता नास्त्यत्र तथागतस्य मृषावादः। तत्कस्य हेतोः। दृष्टं हि तथागतेन त्रैधातुकं यथाभूतं न ज्ञायते न म्रियते न च्यवते नापपद्यते न संसरति न परिनिर्वाति[5] न भूतं नाभूतं न सत्तं नासत्तं न तथा नान्यथा न वितथा नाविताथा नान्यथा[6] न तथा। त्रैधातुकं तथागतेन दृष्टं यथा बालपृथग्जना न पश्यन्ति[7] प्रत्यक्षधर्मा तथागतः खल्वस्मिन्स्थाने ऽसंप्रमोषधर्मा[8]। तत्र तथागतो यां कांचिद्वाचं व्याकृरति सर्वं तत्सत्यं न मृषा नान्यथा। ग्रपि तु खलु पुनः सत्त्वानां नानाचरितानां नानाभिप्रायाणां संज्ञाविकल्पचरितानां कुशलमूलसंजननार्थं[9] विविधान्धर्मपर्यायान्विविधैरात्मग्राहैर्व्याकृरति। यद्धि कुलपुत्रास्तथागतेन कर्तव्यं तत्तथागतः करोति। तावच्चिराभिसंबुद्धो ऽपरिमितायुष्प्रमाणं तथागतः सदा स्थितः। ग्रपरिनिर्वृतस्तथागतः परिनिर्वाणमादर्शयति वैनेयवशेन[1]। न च तावन्मे कुलपुत्रा ग्रद्यापि पौर्विकी[2] बोधिसत्त्वचर्यापरिनिष्पादितायुष्प्रमाणमप्यपरिपूर्णम्। ग्रपि तु खलु पुनः कुलपुत्रा ग्रद्यापि तद्द्विगुणेन मे कल्पकोटीनयुतशतसहस्राणि भविष्यन्त्यायुष्प्रमाणस्या परिपूर्णत्वात्[3]। इदानीं खलु पुनरहं कुलपुत्रा ग्रपरिनिर्वायमाण एव परिनिर्वाणमारोचयामि। तत्कस्य हेतोः। सत्त्वानहं कुलपुत्रा ग्रनेन पर्यायेण परिपाचयामि मा क्वैव मे[4] ऽतिचिरं तिष्ठतो ऽभीक्ष्णदर्शनेनाकृतकुशलमूलाः सत्त्वाः पुण्यविरहिता दरिद्रभूताः कामलोलुपा[5] ग्रन्धा दृष्टिजालसंछन्नास्तिष्ठति तथागत इति विदित्वा किलीकृतसंज्ञा[6] भवेयुर्न[7] च[8] तथागते दुर्लभसंज्ञामुत्पादयेयुरासन्ना वयं तथागतस्येति वीर्यं नारभेयुस्त्रैधातुकान्निःसरणार्थं न च तथागते दुर्लभसंज्ञामुत्पादयेयुः। ततः कुलपुत्रास्तथागत उपायकौशल्येन तेषां सत्त्वानां दुर्लभप्रादुर्भावो[9] भिक्षवस्तथागत इति वाचं व्याकृरति स्म। तत्कस्य हेतोः। तथा हि तेषां सत्त्वानां बह्वभिः कल्पकोटीनयुतशतसहस्रैरपि तथागतदर्शनं भवति वा न वा। ततः खल्वहं कुलपुत्रास्तदारम्बणं कृत्वैवं वदामि। दुर्लभप्रादुर्भावा हि भिक्षवस्तथागता इति। ते भूयस्या मात्रया दुर्लभ-

1) A. K. W. add स्म.

2) याः A. W. यां B. K. ये Cb. यां यामेव O.

3) ताः A. K. W. ता B. तः Cb. त्ते B. K. त्य O.

4) त्ते B. K. त्य O.

5) वायति O. वपयति K.

6) From न वितथा till नान्यथा left out in B. Cb. न सत्यं नासत्यं added in O.

7) त्ति A. B. Cb. K. O. ति W.

8) All र्मात्त.

9) र्मास्तथागतो O. र्माः the rest.

10) ज्ञनार्थं Cb.

1) सात् Cb. K. O.

2) पूर्विकी B. पूर्वकी Cb. पूर्विका O.

3) स्य परिपूर्णता K. स्य परिपूरणतायाः O.

4) Left out in Cb. O.

5) लुपाया A. B. लुपा K. लुपा W. लुपा सत्त्वदृष्टि Cb. लुपा ग्रात्माध्यवसिता O.

6) गाढी O.

7) ग्रभूवन् न A. W.

8) त A. ते W. from ते till युर् left out in Cb., while K. reads भवेयुः। त्रैधातुकान्निस्सरणार्थन्न च तथागते.

9) From त till °येयुः left out in O.

10) भाः Cb.

प्रादुर्भावांस्तथागतान्विदित्वाश्चर्यसंज्ञामुत्पादयिष्यन्ति[1] शोकसंज्ञामुत्पादयिष्यन्ति[2] अपश्यन्तश्च तथागतानर्हतः सम्यक्संबुद्धान् तृषिता भविष्यन्ति[3] तथागतदर्शनाय[4]। तेषां तानि तथागतास्म्बणमनस्कारकुशलमूलानि दीर्घरात्रमर्थाय हिताय सुखाय च भविष्यन्त्येतमर्थं विदित्वा तथागतो ऽपरिनिर्वायन्नेव[6] परिनिर्वाणमारोचयति सत्त्वानां वैनेयवशमुपादाय। तथागतस्यैष कुलपुत्रा देशनापर्यायो[7]c यदेवं व्याकृति नास्त्यत्र तथागतस्य मृषावादः॥

तद्यथापि नाम कुलपुत्राः कश्चिदेव वैद्यपुरुषो[8] भवेत्पण्डितो व्यक्तो मेधावी सुकुशलः सर्वव्याधिप्रशमनाय। तस्य च पुरुषस्य बहवः पुत्रा भवेयुर्दश वा विंशतिर्वा त्रिंशद्वा चत्वारिंशद्वा पञ्चाशद्वा शतं[9] वा। स च वैद्यः प्रवासगतो भवेत् ते चास्य सर्वे पुत्रा गरपीडा वा विषपीडा वा भवेयुः। तेन गरेण वा विषेण वा दुःखाभिर्वेदनाभिरभितूर्णा[10]r भवेयुः। ते तेन गरेण वा विषेण वा दह्यमानाः[11] पृथिव्यां प्रपतेयुः[12]। अथ स तेषां वैद्यः[13] पिता प्रवासादागच्छेत् ते चास्य पुत्रास्तेन गरेण वा विषेण वा दुःखाभिर्वेदनाभिरार्ताः। केचिद्विपरीतसंज्ञिनो भवेयुः केचिद्विपरीतसंज्ञिनो भवेयुः[14]। सर्वे च ते तेनैव दुःखेनार्तास्तं

1) सोभन Cb.

2) In Cb. K. O. only.

3) A. B. K. W. add सदेवके लोके.

4) ये A. B. Cb.

5) ष्यन्तीति। एत K.

6) वायमाणश्चैव O. वापयन्नेव K. left out in W.

7) धर्मपर्यायो A. K. W. O.

8) वैद्यः K. left out in Cb.

9) All but K. O. have शतसहस्रं वा.

10) Sic O. °ज्ञाता A. B. अविज्ञाता W. अभिरीर्णा Cb. °भिस्तुता K. Cp. Pāṇini VI, 4, 21.

11) दह्यंतः A. B. K. W.

12) प्रवेष्टेयुः K.

13) वैद्यपिता A. B. W.

14) Left out in Cb. K.

पितरं दृष्ट्वाभिनन्देयुरेवं चैनं वदेयुः। दिष्ट्यासि तात नेमस्वस्तिभ्यामागतः[1]। तदस्मादात्मनो ऽपरोधाद्गराद्वा विषाद्वा परिमोचयस्व ददस्व नस्तात जीवितमिति। अथ खलु स वैद्यस्तान्पुत्रान्दुःखार्तान्दृष्ट्वा वेदनाभिभूतान्दह्यतः[2][3] पृथिव्यां परिचेष्टमानान् ततो महाभैषज्यं समुद्गनयित्वा वर्णसंपन्नं गन्धसंपन्नं रससंपन्नं च शिलायां पिष्ट्वा[4] तेषां पुत्राणां पानाय दद्यादेवं चैनान्वदेत्। पिबथ पुत्रा इदं महाभैषज्यं वर्णसंपन्नं गन्धसंपन्नं रससंपन्नम्। इदं[5] यूयं पुत्रा महाभैषज्यं पीत्वा क्षिप्रमेवास्माद्गराद्वा विषाद्वा परिमोक्ष्यध्वे[6] स्वस्था भविष्यथारोगाश्च। तत्र ये तस्य वैद्यस्य पुत्रा अविपरीतसंज्ञिनस्ते भैषज्यस्य वर्णं च दृष्ट्वा गन्धं चाघ्राय रसं चास्वाद्य क्षिप्रमेवाभ्यवहरेयुः। ते चाभ्यवहृत्तस्तस्मादाबाधात्सर्वेण सर्वं विमुक्ता[7][8] भवेयुः। ये पुनस्तस्य पुत्रा विपरीतसंज्ञिनस्ते तं पितरमभिनन्देयुरेवं चैनं वदेयुः। दिष्ट्यासि[9] तात नेमस्वस्तिभ्यामागतो यस्त्वमस्माकं चिकित्सकः[10] इति। ते चैवं वाचं भाषेरन्[11] तच्च भैषज्यमुपनामितं न पिबेयुः। तत्कस्य हेतोः। तथा हि तेषां तया विपरीतसंज्ञया तद्भैषज्यमुपनामितं[12] वर्णेनापि न रोचते गन्धेनापि रसेनापि न रोचते। अथ खलु स वैद्यपुरुष एवं चिन्तयेत्। इमे मम पुत्रा अनेन गरेण वा विषेण वा विपरीतसंज्ञिनः। ते

1) Cb. adds ऽसीति, K. adds इति.

2) भितूर्णा O. Cp. above, p. 320, l. 9.

3) Left out in Cb. K. O.

4) पोषापयित्वा O.

5) K. adds हि.

6) स्व Cb. थ K. O.

7) चाभ्यवहृत्तम् in Cb. तं महाभैषज्यमभ्यवहृत्य O. चावह° the rest.

8) Cb. K. add प्र. O. has परिमुच्येयुः.

9) दृष्ट्वा A. B. W. दृष्टो Cb.

10) चिकित्सित A. B. विचिकित्सक Cb. चिकित्सिक K. W.

11) भाषेरन् A. W. भाषेयुः K. O. भाषन्ते the others. भाषेयुः the more original reading.

12) Left out in Cb. K. W.

खल्विदं मकृभैषज्यं न पिबन्ति मां चाभिनन्दन्ति[2]। पन्वकृमिमान्पुत्रानुपायकौशल्येनेदं भैषज्यं पाययेयमिति[3]। अथ खलु स वैद्यस्तान्पुत्रानुपायकौशल्येन तद्भैषज्यं पाययितुकाम एवं वदेत्। जीर्णो ऽकृमस्मि कुलपुत्रा वृद्धो मकृद्वयः कालक्रिया च मे प्रत्युपस्थिता। मा च यूयं पुत्रा शोचिष्ट मा च क्लाभमापद्यध्वम्[4]। इदं वो मया मकृभैषज्यमुपनीतं। सचेद्या काङ्क्षथ तदेव[6] भैषज्यं पिबध्वम्[7]। स एवं तान्पुत्रानुपायकौशल्येनानुशिष्यान्यतरं जनपदप्रदेशं प्रक्रान्तः। तत्र गत्वा कालगतमात्मानं तेषां ग्लानानां पुत्राणामारोचयेत्। ते तस्मिन्समये ऽतीव शोचेयुरतीव परिदेवेयुः। यो ऽस्माकं पिता नाथो जनको ऽनुकम्पकः सो ऽपि नामैकः कालगतस्ते ऽद्य वयमनाथाः संवृत्ताः। ते खल्वनाथभूतमात्मानं समनुपश्यन्तो ऽशरणमात्मानं समनुपश्यन्तो ऽभीक्ष्णं शोकार्ता भवेयुस्तेषां च तथाभीक्ष्णं शोकार्तानां विपरीतसंज्ञाविपरीतसंज्ञा[8] भवेत्। यच्च तद्भैषज्यं वर्णगन्धरसोपेतं तद्वर्णगन्धरसोपेतमेव[9] संजानीयुः[10]। ततस्तस्मिन्समये तद्भैषज्यमभ्यवहरेयुस्ते चाभ्यवहरन्तस्तस्माद्बाधात्परिमुक्ता भवेयुः[11]। अथ खलु स वैद्यस्तान्पुत्रानाबाधविमुक्तान्विदित्वा पुनरेवात्मानमुपदर्शयेत्। तत्किं मन्यध्वे कुलपुत्रा मा कैव तस्य वैद्यस्य तदुपायकौशल्यं कुर्वतः

1) मकृ in Cb. W. O. only.
2) Sic O. च नाभिनन्दन्ति the other MSS. contrary to what is said above.
3) पिवापयेत् O. and पिवापयेतु.
4) क्लेश A. B. W. क्लमा Cb. क्लम K. O.
5) Left ont in Cb. K.
6) तद् A. B. W. तदेव Cb. तदेतद् K.
7) थ Cb. पिवेयात O.
8) अविपरीतसंज्ञा left out in Cb. K.
9) तद्वर्णगन्धरसोपेतम् left out in Cb.
10) नीरन् A. W.
11) इति added in most MSS.

कश्चिन्मृषावादेन[1] संचोदयेत्। व्याकृः[2]। नो क्वेदं भगवन्नो क्वेदं सुगत। व्याकृ। एवमेव कुलपुत्रा अकृमप्यप्रमेयासंख्येयकल्पकोटीनयुतशतसहस्राभिसंबुद्ध[4] इमामनुत्तरां सम्यक्संबोधिमपि तु खलु पुनः कुलपुत्रा अकृमत्तरात्तरमेवंरूपाण्युपायकौशल्यानि सत्त्वानामुपदर्शयामि विनयार्थं न च मे कश्चिदत्र स्थाने मृषावादो भवति॥

अथ खलु भगवानिमामेवार्थगतिं भूयस्या मात्रया संदर्शयमानस्तस्यां वेलायामिमा गाथा अभाषत॥

अचित्तिया कल्पसहस्रकोट्यो यासां प्रमाणं न कदाचि विद्यते।
प्राप्ता मया एष[6] तदाग्रबोधिर्धर्मं[7] च देशेम्यकु नित्यकालम्॥ १॥
समादपेमी[8] बकुबोधिसत्त्वान्बोधस्मि ज्ञानस्मि स्थपेमि चैव।
सत्त्वान कोटीनयुतानने[9]कान्परिपाचयामी बकुकल्पकोट्यः॥ २॥
निर्वाणभूमिं चुपदर्शयामि विनयार्थ सत्त्वान वदाम्युपायम्।
न चापि निर्वाम्यकु तस्मि काले इहैव धो धर्मु प्रकाशयामि॥ ३॥
तत्रापि चात्मानमधिष्ठहामि[10] सर्वांश्च सत्त्वान तथैव व्याकृम्।
विपरीतबुद्धी च नरा विमूढाः तत्रैव तिष्ठन्तु न पश्यिषू[12] माम्॥ ४॥

1) सं left out in A. W.
2) कृ K.
3) प्य left out in K.
4) स्राणि सं A. W. स्राभिसं Cb. K.
5) रा A. Cb. W. र K.
6) एषा मया प्राप्त K.
7) धिं धर्मं A. Cb. W. धिः धर्मं K.
8) The lengthening of मि not necessary.
9) युतान नित्यं A. W.
10) धिष्ठिहामि Cb. K.
11) सर्वात्तथैव K.
12) तिष्ठन्न च पश्यषू K.

परिनिर्वृतं दृष्ट्वा[1] ममात्मभावं धातूषु पूजां विविधां करोन्ति ।
मां चापश्यन्ति[2] जनेन्ति तृष्णां[3] ततोऽर्जुकं चित्त प्रभोति[4] तेषाम् ॥ ५ ॥
सत्त्वा यदा ते मृदु मार्दवाश्च उत्सृष्टकामाश्च भवन्ति सत्त्वाः ।
ततो ऽहं श्रावकसंघ कृत्वा आत्मानं[5] दर्शेम्यङ्ग गृधकूटे ॥ ६ ॥
एवं च कं तेष वदामि पश्चात् इहैव नाहं तद आसि निर्वृतः[6] ।
उपायकौशल्य ममेति भिक्षवः पुनः पुनो भोम्यङ्ग जीवलोके ॥ ७ ॥
अन्येहि सत्त्वेहि पुरस्कृतो ऽहं तेषां प्रकाशेमि ममाग्रबोधिम् ।
यूयं च शब्दं न शृणोथ मह्यं अन्यत्र सो निर्वृतु लोकनाथः ॥ ८ ॥
पश्याम्यहं सत्त्व विकृन्यमानां न चाङ्ग दर्शेमि तदात्मभावम् ।
स्पृहेत्तु तावन्मम दर्शनस्य तृषितानं[8] सद्धर्मु प्रकाशयिष्ये ॥ ९ ॥
सदाधिष्ठानं मम एतदीदृशं अचिन्तिया कल्पसहस्रकोट्यः ।
न च च्यवामी इतु गृधकूटात् अन्यासु शय्यासनकोटिभिश्च[9] ॥ १० ॥
यदापि सत्त्वा इम लोकधातुं पश्यन्ति कल्पेन्ति च दह्यमानम्[10] ।
तदापि चेदं मम बुद्धक्षेत्रं परिपूर्ण भोती[11][12] मनुष्यानुषाणाम्[13] ॥ ११ ॥

1) दृष्ट्वा A. W. दृष्ट Cb. K.
2) च A. K. W. सा Cb. We conjecture चा अपश्यन्त (Nom. pl.).
3) तत्रो in all but K. W.
4) प्रभोत्ति A. W.
5) न A. B. Cb. W. नु K.
6) This quarter in left out in Cb.
7) र्णा Cb.
8) नु A. B. W. म Cb. न K.
9) कोटिषू च Cb.
10) नां A. नं Cb. ना K. W.
11) The lengthening not necessary.
12) नरु A. Cb. K. नर् W.
13) षाणां Cb. K. षाभिः the rest, meant षेभिः.

क्रीडा रती तेष विचित्र भोति उद्यानप्रासादविमानकोट्यः ।
प्रतिमण्डितं रत्नमयैश्च पर्वतैः द्रुमैस्तथा पुष्पफलैरुपेतैः[1] ॥ १२ ॥
उपरिं[2] च देवा अभिहनन्ति तूर्यान् मन्दारवर्षं[3] च विसर्जयन्ति ।
ममैव अभ्योकिरि श्रावकांश्च ये चान्य बोधाविह प्रस्थिता विद्वां[4] ॥ १३ ॥
एवं च मे क्षेत्रमिदं सदा स्थितं अन्ये च कल्पेन्तिमं[5] दह्यमानम् ।
सुभैरवं पश्यिषु लोकधातुं उपद्रुतं[6] शोकशताभिकीर्णम्[7] ॥ १४ ॥
न चापि मे नामं[8] शृणोन्ति ज्ञातु तथागतानां बकुकल्पकोटिभिः ।
धर्मस्य वा मह्य गणस्य चापि पापस्य कर्मस्य फलेवंरूपम्[9] ॥ १५ ॥
यदा तु सत्त्वा मृदु मार्दवाश्च उत्पन्न[10] भोन्तीह मनुष्यलोके ।
उत्पन्नमात्राश्च शुभेन कर्मणा पश्यन्ति मां धर्मु प्रकाशयन्तम् ॥ १६ ॥
न चाङ्ग भाषामि कदाचि तेषां इमां क्रियामीदृशिकीमनन्ताम् ।
तेनो[11] अहं दृष्ट चिरस्य भोमि ततो पि[12] भाषामि सुदुर्लभा जिनाः ॥ १७ ॥

1) लैरुपेता A. W. लोपमेयैः Cb. लोपेतैः K.
2) रि W.
3) मा A. W.
4) द्रु A.
5) मम A. W. च Cb. म K. i. e. Skr. कल्पयन्ति + इदं.
6) तां Cb. ता K.
7) र्णा K.
8) न चान्य ने स्मि A. न चान्ये न स्मि W. न चापि नामं Cb. न चापि नामं पि K.
9) सहे A. फले W. फले Cb. K.
10) उपपन्न A. W.
11) तेन W.
12) ऽस्य Cb. K.

एतादृशं ज्ञानबलं ममेदं प्रभास्वरं यस्य न कश्चिदन्तः।
आयुश्च मे दीर्घमनल्पकल्पं[1] समुपार्जितं पूर्वं चरित्र चर्याम्॥ १८॥
मा संशयं अत्र कुरुध्व पण्डिता विचिकित्सितं च प्रहाथ अशेषम्।
भूतां प्रभाषाम्यकुमेत[2] वाचं मृषा मम नैव कदाचि वाग्भवेत्॥ १९॥
यथा हि[3] सो वैद्य उपायशिक्षितो विपरीतसंज्ञीन सुतान केतोः।
जीवन्तमात्मान मृतेति ब्रूयात् तं वैद्युं[4] विज्ञो न मृषेण चोदयेत्॥ २०॥
एमेव[5] कं लोकपिता स्वयंभूः चिकित्सकः सर्वप्रजान नाथः।
विपरीतमूढांश्च विदित्व बालान् अनिर्वृतो निर्वृत दर्शयामि॥ २१॥
किंकारणं मह्यमभीक्ष्णदर्शनात् विग्रह्य भोत्ती अबुधा अज्ञानकाः।
विश्वस्त कामेषु प्रमत्त भोत्ती प्रमादहेतोः[6] प्रपतन्ति दुर्गतिम्॥ २२॥
चरिं चरिं ज्ञानिय नित्यकालं वदामि सत्त्वान तथा तथाकम्[7]।
कथं नु बोधावुपनामयेयं कथं[8] बुद्धधर्माण भवेयु लाभिनः॥ २३॥

॥ इत्यार्यसद्धर्मपुण्डरीके धर्मपर्याये तथागतायुष्प्रमाणपरिवर्तो नाम पञ्चदशमः[9] ॥

1) कल्पान् Cb. कल्पा K.
2) तं A. W. त Cb. तः K.
3) कु A. Cb. W. कृ K.
4) ममो A. W. ममा Cb. मम K.
5) पि Cb.
6) ष्य A. K. ष्यु W.
7) एमेवाकं A. Cb. एवमेवाकं W.
8) The lengthening not necessary.
9) तथागतो कं A. W.
10) कथं A. Cb. W. कथ K.
11) MSS add इति.
12) षोडशमः Cb.

XVI.

अस्मिन्खलु पुनस्तथागतायुष्प्रमाणनिर्देशे निर्दिश्यमाने ऽप्रमेयाणामसंख्येयानां सत्त्वानामर्थः कृतो ऽभूत्। अथ खलु भगवान्मैत्रेयं बोधिसत्त्वं महासत्त्वमामन्त्रयते स्म। अस्मिन्खलु पुनरजित तथागतायुष्प्रमाणनिर्देशधर्मपर्याये[1] निर्दिश्यमाने ऽष्टषष्टिगङ्गा-नदीवालुकासमानां[2] बोधिसत्त्वकोटीनयुतशतसहस्राणामनुत्पत्तिकधर्मक्षान्तिरुत्पन्ना[3]। एभ्यः सहस्रगुणेन[4] येषां बोधिसत्त्वानां महासत्त्वानां धारणीप्रतिलम्भो ऽभूत्। अन्येषां च सा-हस्रिकलोकधातुपरमाणुरजःसमानां बोधिसत्त्वानां महासत्त्वानामिमं धर्मपर्यायं श्रुत्वासङ्ग-प्रतिभानताप्रतिलम्भो[5] ऽभूत्। अन्येषां च द्विसाहस्रिकलोकधातुपरमाणुरजःसमानां[6] बो-धिसत्त्वानां महासत्त्वानां कोटीनयुतशतसहस्रपरिवर्तानां[7] धारण्याः[8] प्रतिलम्भो[9] ऽभूत्। अन्ये च त्रिसाहस्रिकलोकधातुपरमाणुरजःसमा बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं श्रुत्वाविवर्त्यधर्मचक्रं प्रवर्तयामासुः। अन्ये च मध्यमलोकधातुपरमाणुरजःसमा बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं श्रुत्वा विमलनिर्भासचक्रं प्रवर्तयामासुः। अन्ये च क्षुद्रकलोकधा-[10]

1) यो A. °ये Cb. K. °य W.
2) षष्टीनां K.
2) कोपमा A. W.
3) मुत्पन्ना A. रुत्पन्नः Cb. रुत्पन्ना W. ति उत्पन्नाः K.
4) स्र left out in A. W.
5) ता left out in K.
6) द्विसाहस्रिक in K. only, that agrees with Kumārajīva's version.
7) A. adds परिवार.
8) वर्तया W. वर्ताया K.
9) रण्या K.
10) खडिका A. Cb. W. डुक K. r. खुडुक.

तुपरमाणुरजःसमा बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं श्रुत्वाष्टज्ञातिबद्धा अभूवन्ननुत्तरायां सम्यक्संबोधौ । अन्ये चतुर्द्वीपकलोकधातुपरमाणुरजःसमा बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं श्रुत्वा चतुर्ज्ञातिप्रतिबद्धा अभूवन्ननुत्तरायां सम्यक्संबोधौ । अन्ये च त्रिचतुर्द्वीपकलोकधातुपरमाणुरजःसमा बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं श्रुत्वा त्रिज्ञातिप्रतिबद्धा अभूवन्ननुत्तरायां सम्यक्संबोधौ । अन्ये च द्विचतुर्द्वीपकलोकधातुपरमाणुरजःसमा बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं श्रुत्वा द्विज्ञातिप्रतिबद्धा अभूवन्ननुत्तरायां सम्यक्संबोधौ । अन्ये चैकचतुर्द्वीपकलोकधातुपरमाणुरजःसमा बोधिसत्त्वा महासत्त्वा इमं धर्मपर्यायं श्रुत्वैकज्ञातिप्रतिबद्धा अभूवन्ननुत्तरायां सम्यक्संबोधौ । षष्टित्रिसाकल्पमहासाकल्पलोकधातुपरमाणुरजःसमेश्च बोधिसत्त्वैर्महासत्त्वैरिमं धर्मपर्यायं श्रुत्वानुत्तरायां सम्यक्संबोधौ चित्तान्युत्पादितानि ॥

अथ समनन्तरनिर्दिष्टे भगवतैषां बोधिसत्त्वानां महासत्त्वानां धर्माभिसमये प्रतिष्ठाने अथ तावदेवोपरिवैकायसादुत्तरीत्तान्मान्दारवमहामान्दारवाणां पुष्पाणां पुष्पवर्षमभिप्रवृष्टं तेषु च लोकधातुकोटीनयुतशतसहस्रेषु यानि तानि बुद्धकोटीनयुतशतसहस्राणयागत्य रत्नवृक्षमूलेषु सिंहासनोपविष्टानि तानि सर्वाणि चावकिरन्ति स्माभ्यवकिरन्ति स्माभिप्रकिरन्ति स्म । भगवन्तं च शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं तं च भगवन्तं प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं परिनिर्वृतं सिंहासनोपविष्टमवकिरन्ति स्माभ्यवकिरन्ति स्माभिप्रकिरन्ति स्म । तं च सर्वावन्तं बोधिसत्त्वगणं तामग्रतः पर्षदो ज्व-

1) त्रि for अष्ट in A. W.
2) चा A. W.
3) पि K.
4) K. adds खलु.
5) इमेषां Cb.
6) गत्वा Cb.
7) Left out in Cb.

किरन्ति स्माभ्यवकिरन्ति स्माभिप्रकिरन्ति स्म । दिव्यानि चन्दनागरुचूर्णान्युत्तरीत्तात्प्रवर्षन्ति स्मोपरिष्टाच्चोत्तरीत्ते वैकायसे महाडुन्डुभयो ऽघट्टिताः प्रणेदुर्मनोज्ञमधुरगम्भीरनिर्घोषाः । दिव्यानि च दूष्ययुगशतसहस्राण्युपरिष्टादुत्तरीत्तात्प्रपतन्ति स्म । कार्षापणहिरण्यसुवर्णरजतमणिरत्नमहारत्नानि चोपरिष्टाद्वैकायसमत्तरीत्ते समन्तात्सर्वासु दिक्षु प्रलम्बन्ति स्म । समन्ताच्चानर्घप्राप्तस्य धूपस्य घटिकासहस्राणि रत्नमयानि स्वयमेव प्रविचरन्ति स्म । एकैकस्य च तथागतस्य रत्नमयीं कृत्वावलीं यावद्ब्रह्मलोकाडुपरिवैकायसमत्तरीत्ते बोधिसत्त्वा महासत्त्वा धारयामासुः । अनेन पर्यायेण सर्वेषां तेषामप्रमेयाणामसंख्येयानां बुद्धकोटीनयुतशतसहस्राणां ते बोधिसत्त्वा महासत्त्वा रत्नमयीं कृत्वावलीं यावद्ब्रह्मलोकाडुपरिवैकायसमत्तरीत्ते धारयामासुः । पृथक्पृथग्गाथाभिर्निर्हरिर्भूतैर्बुद्धस्तवैस्तांस्तथागतानभिष्टुवन्ति स्म ॥

अथ खलु मैत्रेयो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायामिमा गाथा अभाषत ॥

आश्चर्यं धर्मः सुगतेन आवितो न ज्ञातु अस्माभिः श्रुतेष पूर्वम् ।
महात्मता यादृशि नायकानां आयुष्प्रमाणं च यथा अनन्तम् ॥ १ ॥

1) Left out in Cb. K.
2) MSS °मे.
3) नर्घयं प्राप्तस्य A. W. नर्घेप्राप्तस्य Cb. नर्घेयं प्राप्तस्य K.
4) यी ली Cb.
5) तेषां असंख्येयानां left out in A. W.
6) From रत्न° till °रीत्ते left out in Cb. K.
7) थक्रैर्गा K.
8) भिसंस्तवन्ति K.
9) आश्चर्यप्राप्तो A.
10) देशितो Cb.

एवं च धर्मं शृणियान अन्य विभज्यमाने सुगतेन संमुखम् ।
प्रीतिस्फुटाः[1] प्राणसकृन्नकोट्यो य श्रीरसा लोकविनायकस्य ॥ २ ॥
अविवर्तियां[3] केचि स्थिताग्रबोधौ केचि स्थिता धारणिये धरायाम् ।
असङ्गप्रतिभाणि स्थिता केचित्[4] कोटीसकृन्नाय च धारणीये ॥ ३ ॥
परमाणु क्षेत्रस्य तथैव चान्ये ये प्रस्थिता उत्तमबुद्धज्ञाने ।
केचिच्च ज्ञातीभि तथैव चाष्टभि जिना भविष्यन्ति अनन्तदर्शिनः ॥ ४ ॥
केचित्तु चत्वारि अतिक्रमित्वा केचित्त्रिभिश्चैव द्विभिश्च अन्ये ।
लप्स्यन्ति बोधिं परमार्थदर्शिनः शृणित्व धर्मं इमु[5] नायकस्य ॥ ५ ॥
केचापि[6] एकाय स्थित्वित्व ज्ञात्या सर्वज्ञ भोष्यन्ति भवान्तरेण ।
शृणित्व आयु इमु[7] नायकस्य एतादृशं लब्धु[8] फलं अनाम्रवम् ॥ ६ ॥
अष्टान क्षेत्राण यथा रजो भवेत् एवाप्रमाणा गणनाय तत्तकाः[9] ।
याः[10] सन्त्यकोट्यो हि शृणित्व धर्मं उत्पादयित्वा वरबोधिचित्तम् ॥ ७ ॥
एतादृशं कर्म कृतं महर्षिणा प्रकाशयन्तेनिम बुद्धभूमिम्[11] ।
अनन्तकं यस्य[12] प्रमाणु नास्ति आकाशधातू च यथा ऽप्रमेयः ॥ ८ ॥

1) स्थुयुः A.
2) प्राण K. प्राणि the rest.
3) या in K. only.
4) This *pāda* wholly corrupt. We propose to read स्थिता असङ्गप्रतिभानि (Loc. sing.) केचित्.
5) इम K.
6) चात्र Cb. K.
7) आयु इमु A. धर्म इम Cb. आयु इमि K. आयुं इमु W.
8) लब्धु A. i. e. लब्धा; लब्ध the rest.
9) तान्तथाः A. तातकाः W.
10) या in all MSS.
11) निममग्रबोधिं A. W. निम बुद्धभूमिं Cb. मिम बुद्धभूमिं K.
12) अनन्तकल्पस्य A. W.

मान्दारवाणां च प्रवर्षि वर्षं बकुदेवपुत्राण सकृन्नकोट्यः ।
शक्राश्च ब्रह्मा यथ गङ्गवालिका ये[2] आगता क्षेत्रसकृन्नकोटिभिः ॥ ९ ॥
सुगन्धचूर्णानि च चन्दनस्य अगरुस्य चूर्णानि च मुञ्चमानाः[3] ।
चरन्ति आकाशि यथैव पत्ती अभ्योकिरन्ता विधिवज्जिनेन्द्रान् ॥ १० ॥
उपरिं[4] च वैकायसु[5] दुन्दुभीयो निनादयन्तो मधुरा अघट्टिताः ।
दिव्यान तूर्याण[6] सकृन्नकोट्यः क्षिपन्ति[7] धामेन्ति च नायकानाम् ॥ ११ ॥
अनर्घमूल्यस्य च धूपनस्य रत्नामयी घटिकसकृन्नकोट्यः ।
स्वयं समन्तेन विचेरु तत्र पूजार्थ लोकाधिपतिस्य तायिनः ॥ १२ ॥
उच्चान्सकन्तान्[8] रतनामयांश्च[9] छत्राण कोटीनयुताननन्तान्[10] ।
धारन्ति मे पण्डित बोधिसत्त्वाः अवतंसकान्यावत ब्रह्मलोकात् ॥ १३ ॥
सवैजयन्तांश्च सुदर्शनीयान् ध्वजांश्च श्रेष्ठापयि नायकानाम्[11] ।
गाथासकृन्नैश्च अभिष्टुवन्ति[12] प्रहृष्टचित्ताः सुगतस्य पुत्राः ॥ १४ ॥

1) म K.
2) ये in all MSS.
3) ना A. W.
4) उपरि च A. W. उपरि Cb. उपरिंश्च K.
5) स A. W. सु Cb. सि K.
6) पष्पाण Cb.
7) म्य A. म Cb. मे K. ने W.
8) MSS. महान्ता.
9) यान्तं A.
10) तां A. तान् Cb. K. W.
11) ध्वजस्य आरोपित नायकेभ्यः Cb.
12) अभिस्तवन्ति K. more original.

एतादृशाश्चर्यविशिष्ट अद्भुता विचित्र दृश्यात्तमि अद्य नायकाः[1]।
आयुष्प्रमाणस्य निदर्शनेन प्रामोद्यलब्धा इमि सर्वसत्त्वाः[2]॥ १५॥
विपुलो ऽद्य अर्थो दशसू दिशासु घोषश्च अभ्युद्गतु नायकानाम्।
संतर्पिताः प्राणिसकल्पकोट्यः[3] कुशलेन बोधाय समन्विताश्च[4]॥ १६॥
अथ खलु भगवान्मैत्रेयं बोधिसत्त्वं महासत्त्वमामन्त्रयते स्म।

येरञ्जितास्मिंस्तथागतायुष्प्रमाणनिर्देशधर्मपर्याये[5] निर्दिश्यमाने[6] सत्त्वैरेकचित्तोत्पादिकाप्यधिमुक्तिरुत्पादिताभिश्रद्धानता[7] वा[8] कृता कियत्ते कुलपुत्रा वा कुलदुहितरो वा पुण्यं प्रसवन्तीति[9]। तच्छृणु साधु च सुष्ठु च मनसिकुरु। भाषिष्ये[10] ऽहं यावत्पुण्यं[11] प्रसवन्तीति। तद्यथापि नामाजित कश्चिदेव कुलपुत्रो वा कुलदुहिता वानुत्तरां सम्यक्संबोधिमभिकाङ्क्षमाणः पञ्चसु पारमितास्वष्टौ कल्पकोटीनयुतशतसकल्पाणि चरेत्। तद्यथा दानपारमितायां शीलपारमितायां क्षान्तिपारमितायां वीर्यपारमितायां ध्यानपार-

1) का K.
2) बोधिसत्त्वाः Cb.
3) प्राणा K. प्राणि the other.
4) MSS. add इति.
5) शे Cb. K.
6) भाष्यमाने Cb.
7) सर्वै A. W.
8) दिताप्य A. दिकीव्य Cb. दकोप्य K. दिकाप्य W.
9) ता वा left out in Cb.
10) प्रशविष्यन्तीति K.
11) भाषिष्ये ऽहं in Cb. only.
12) यावंत A यावत् Cb. यावत्तत् K. यावं W. Here the break in O. at an end.

मितायां विरचितः[1] प्रज्ञापारमितया[2]। येन चोद्गत[3] कुलपुत्रेण वा कुलदुहित्रा वेमं तथागतायुष्प्रमाणनिर्देशं धर्मपर्यायं श्रुत्वैकचित्तोत्पादिकाप्यधिमुक्तिरुत्पादिताभिश्रद्धानता[4] वा कृता। अस्य पुण्याभिसंस्कारस्य कुशलाभिसंस्कारस्यासौ पौर्वकः[5] पुण्याभिसंस्कारः कुशलाभिसंस्कारः पञ्चपारमिताप्रतिसंयुक्तो ऽष्टकल्पकोटीनयुतशतसकल्पपरिनिष्पन्नः शततमीमपि[6] कलां नोपयाति[7] सकलतमीमपि[8] शतसकलतमीमपि[9] कोटीशतसकलतमीमपि[8] कोटीनयुतसकलतमीमपि[10] कोटीनयुतशतसकलतमीमपि[11] कलां नोपयाति संख्यामपि[12] कलामपि[13] गणनामप्युपमामप्युपनिषामपि[14] न क्षमते। एवंरूपेणाजित पुण्याभिसंस्कारेण समन्वागतः कुलपुत्रो वा कुलदुहिता वा विवर्तते ऽनुत्तरायाः सम्यक्संबोधेरिति नैतत्स्थानं विद्यते॥

1) यामभिरक्षितः Cb.
2) तायां A. Cb. W. तया K.
3) च left out in K.
4) ताय वा इ O.
5) दकना O.
6) मा K. रिमा O.
7) पू K. O.
8) मा K. रिमा O.
9) नोपैति Cb. K. O.
10) From शत° till नोपयाति left out in Cb. and from कोटी till नोयाति in O.
11) नयुत left out in W.
12) This compound left out in K.
13) In K. W. only.
14) कलान्नोपैति O. left out in W.
15) उपनिशमपि K. left out in Cb. उपनिषामपि नोपैति O. Other MSS उपनिषद्मपि. One MSS. has उपनिसामपि उपनिषद्मपि.

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

यश्च पारमिता[1]ः पञ्च समादायेक वर्तते ।
[2]इदं ज्ञानं गवेषन्तो बुद्धज्ञानमनुत्तरम् ॥ १७ ॥
कल्पकोटी[3]सहस्राणि अष्टौ पूर्णानि युज्यते ।
दानं ददन्तो बुद्धेभ्यः श्रावकेभ्यः पुनः पुनः ॥ १८ ॥
प्रत्येकबुद्धांस्तर्पयन्तो बोधिसत्त्वान कोटियः ।
खाद्यभोज्यान्नपानेकि[4] वस्त्रशय्यासनेकि[4] च ॥ १९ ॥
प्रतिश्रयान्विहारांश्च वन्द्नस्येक कारणात् ।
आरामान्रमणीयांश्च चङ्क्रमस्थानशोभितान् ॥ २० ॥
[6]एतादृशं [7]ददित्वान दानं चित्रं बहुविधम् ।
कल्पकोटी[8]सहस्राणि दत्त्वा बोधाय नामयेत् ॥ २१ ॥
पुनश्च शीलं रक्षेत शुद्धं संबुद्धवर्णितम् ।
अखण्डं संस्तुतं विज्ञै[9]र्बुद्धज्ञानस्य कारणात्[10] ॥ २२ ॥
पुनश्च क्षान्तिं भावेत[11] दान्तभूमौ प्रतिष्ठितः ।
धृतिमान्स्मृतिमांश्चैव परिभाषाः क्षमे बहूः ॥ २३ ॥

1) ता A. W.
2) मैं Cb. K.
3) टि K.
4) नेन Cb. K. O.
5) All चन्द्.
6) The 21-st and 22-nd verses are left out in A.
7) क्रेक W.
8) टि W. O.
9) विज्ञे K. W. विज्ञै Cb. विज्ञैर्बु O.
10) कारणम् W. O.
11) वेया O.

ये चोपलम्भिकाः सत्त्वा अधिमाने प्रतिष्ठिताः ।
कृत्सनं च सक्लेशेषां बुद्धज्ञानस्य कारणात्[1] ॥ २४ ॥
नित्योद्युक्तश्च वीर्यस्मिन् अभियुक्तो दृढस्मृतिः ।
अनन्यमनसंकल्पो[2] भवेया कल्पकोटियः[3] ॥ २५ ॥
अरण्यवासि[4] तिष्ठन्तो[5] चङ्क्रमे अभिरूह्य च ।
स्त्यान[6] मिद्धं च वर्जित्वा कल्पकोट्यो कि[7] यश्चरेत् ॥ २६ ॥
यश्च ध्यायी महाध्यायी ध्यानारामः[8] समाहितः ।
कल्पकोट्यः स्थितो ध्यायेत्सहस्राण्यष्टनूनकाः[8] ॥ २७ ॥
तेन ध्यानेन सो वीरः[9] प्रार्थयेद्बोधिमुत्तमाम् ।
अहं स्यामिति सर्वज्ञो[10] ध्यानपारमितां[11] गतः ॥ २८ ॥
यच्च पुण्यं भवेत्तेषां निषेवित्वा[12] इमां क्रियाम् ।
कल्पकोटीसहस्राणि ये पूर्वं परिकीर्तिताः ॥ २९ ॥

1) कारणम् O.
2) त्पा A. त्पो Cb. K. W.
3) यो A. Cb. यः K. या W. भिः O.
4) से Cb. K. O.
5) न्तु O.
6) स्तीन O.
7) टीय O.
8) All but O. स्नान and कान्.
9) वीरो A. K. W. धीरो Cb.
10) सर्वज्ञो क्षिप्र सो अस्या O.
11) ता A. Cb. W. तां K.
12) All but O. निश्रयि.

आयुं च मम यो श्रुत्वा[1] स्त्री वापि पुरुषो ऽपि वा।
एकक्षणं पि श्रद्धाति[2] इदं पुण्यमनन्तकम्॥ ३०॥
विचिकित्सां च वर्जित्वा इञ्जिता मन्यितानि[3] च।
अधिमुच्येन्मुहूर्तं पि फलं तस्येदमीदृशम्॥ ३१॥
बोधिसत्त्वाश्च ये भोत्ति चरिताः कल्पकोटियः।
न ते त्रसत्ति श्रुत्वेदं[4] मम आयुरचित्तियम्[5]॥ ३२॥
मूर्धेन च नमस्यत्ति अक्षमप्येदृशो भवेत्।
अनागतस्मिन्नध्वानि[6] तारेयं प्राणकोटियः[7]॥ ३३॥
यथा शाक्यमुनिर्नाथः शाक्यसिंहो महामुनिः[8]।
बोधिमण्डे निषीदित्वा सिंहनादमिदं[9] नदेत्॥ ३४॥
अक्षमप्यनागते अध्वानि सत्कृतः सर्वदेक्षिनाम्।
बोधिमण्डे निषीदित्वा[12] [13]आयुं देशेष्यमीदृशम्[14]॥ ३५॥

1) आयुं च श्रुत्वा च मे A. आयुषं गत्वा मम Cb. आयुश्च मम यो श्रुत्वा K. आयुश्च श्रुत्वा W.
2) कि A. W.
3) इञ्जीतानिपितानि A. इंञ्जितामन्यितानि Cb. इञ्जितान्मन्यितानि K. इञ्जितान्पपितानि W.
4) श्रुत्वेदं A. W. त्रत्वेमं Cb. O. श्रुत्वेमां K.
5) आयुम A. K. W. आयुर Cb.
6) °स्मि अध्वाने O.
7) All but O. तारयेत्.
8) नरोत्तमः Cb.
9) सी Cb. W.
10) Rather इमं. O. has दं नदी इमम् preferable, नदी is appropriate, नदेत् is not.
11) ने Cb. K.
12) सी A. Cb. W.
13) यु A. Cb. W. O. युं K.
14) निर्देशयमो O.

अध्याशयेन संपन्नाः श्रुताधाराश्च ये नराः।
संधाभाष्यं विज्ञानन्ति काङ्क्षा[1] तेषां न विद्यते॥ ३६॥

पुनरपरमजित य[2] इमं तथागतायुष्प्रमाणनिर्देशं धर्मपर्यायं श्रुत्वावतरे[3]दधिमुच्येता[4]वगाहेतावबुध्येत सो ऽस्माद्प्रमेयतरं पुण्याभिसंस्कारं प्रसवेद्बुद्धज्ञानसंवर्तनीयम्। कः पुनर्वादो य इममेवंरूपं धर्मपर्यायं शृणुयाच्छ्रावयेद्वाचयेद्धारयेद्वा[5] लिखेद्वा लिखापयेद्वा[6] पुस्तकगतं वा सत्कुर्याद्गुरुकुर्यान्मानयेत्पूजयेत्सत्कारयेद्वा[7] पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकाभिस्तैलप्रदीपैर्वा[8] घृतप्रदीपैर्वा[8] गन्धतैलप्रदीपैर्वा[9] बहुतरं पुण्याभिसंस्कारं प्रसवेद्बुद्धज्ञानसंवर्तनीयम्॥

यदा चाजित स कुलपुत्रो वा कुलदुहिता वेमं तथागतायुष्प्रमाणनिर्देशं धर्मपर्यायं श्रुत्वाध्याशयेनाधिमुच्यते[10] तदा तस्येदमध्याशयलक्षणं वेदितव्यं यदुत[11] गृध्रकूटपर्वतगतं मां धर्मं निर्देशयन्तं[12] द्रक्ष्यति बोधिसत्त्वगणपरिवृतं बोधिसत्त्वगणपुरस्कृतं श्रावकसंघमध्यगतम्। इदं च मे बुद्धक्षेत्रं सहा लोकधातुं वैडूर्यमयीं समप्रस्तरां द्रक्ष्यति सुवर्णसूत्राष्टापदविनद्धां रत्नवृक्षैर्विचित्रिताम्। कूटागारपरिभोगेषु[13] चात्र बोधिसत्त्वान्निवसतो द्रक्ष्यति।

1) कांक्षां A. कांक्षं Cb. काङ्क्ष O. कांक्षा K. कांक्षान् W.
2) Left out in K.
3) अवतरेत् left out in A.
4) अधिमुच्येत left out in K. O.
5) द्धारये left out in K. Added धारापयेद्वा in O.
6) Left out in Cb.
7) O. has सत्कारापयेद्वा.
8) प्रद्योते Cb.
9) प्रदीपेभिर्वा O. left out in Cb.
10) धिमोक्षते Cb. धिमोक्ष्यते K. धिमुच्यति O.
11) यदिदं Cb. K. O.
12) पर्वत left out in A. W.
13) Sic O. मानं the others.
14) भोगेषु Cb. K. O. चात्र left out in Cb. K. but चेक्ष सहे लोकधातौ O.

इदमज्ञिताध्याशयेनाधिमुक्तस्य कुलपुत्रस्य वा कुलदुहितुर्वाध्याशयलक्षणं वेदितव्यम्[1]। अपि तु खलु पुनरज्ञित तानप्यहमध्याशयाधिमुक्तान्कुलपुत्रान्वक्ष्यामि ये[2] तथागतस्य परिनिर्वृतस्येमं धर्मपर्यायं श्रुत्वा न प्रतिक्षेप्स्यत्युत्तरि चाभ्यनुमोदयिष्यन्ति[3]। कः पुनर्वादो ये धारयिष्यन्ति वाचयिष्यन्ति[4][5]। ततस्तथागतं सो ऽसेन परिकरति[6] य इमं धर्मपर्यायं पुस्तकगतं कृत्वासेन परिकरति[6]। न मे तेनाज्ञित कुलपुत्रेण वा कुलदुहित्रा वा स्तूपाः कर्तव्या न विकाराः कर्तव्या न भिक्षुसंघाय ग्लानप्रत्ययभैषज्यपरिष्कारास्तेनानुप्रदेयो[7] भवन्ति। तत्कस्य हेतोः[8]। कृता मे तेनाज्ञित[9] कुलपुत्रेण वा कुलदुहित्रा वा[10] शरीरेषु शरीरपूजा सप्तरत्नमयाश्च स्तूपाः कारिता यावद्ब्रह्मलोकमुच्चैस्त्वेनानुपूर्वपरिणाहेन सच्छत्रपरिग्रहाः सवैजयन्तीका घण्टासमुद्गानुरुताः[11] तेषां च शरीरस्तूपानां विविधाः सत्काराः कृता नानाविधैर्दिव्यैर्मानुष्यकैः[12] पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावैजयन्तीभिर्विविधमुदारमनोज्ञपटुपटहकुडुन्डुभिमहाडुन्डुभिर्[13]वाद्यताडनिनादनिर्घोषशब्दैर्नानाविधैश्च गीतनृत्यलास्यप्रकारैर्बहुभिरपरिमितैर्बहूनि प्रमेयाणि कल्पकोटीनयुतशतसहस्राणि सत्कारः कृतो भवति। इमं धर्मपर्यायं मम परिनिर्वृतस्य धारयित्वा वाचयित्वा

1) संज्ञानीयात् K. संज्ञानेयासि O.
2) यस्त K.
3) प्रतिनिक्षिपेदुत्तरि चाभ्यनुमोदेत् K.
4) यो धारयेद्वाचयेद्वा K.
5) From तत° till कृत्वा left out in Cb., leaving तथागतं.
6) परिवहति K.
7) A. W. add सत्कारार्थं.
8) From तत्कस्य till सत्कारा left out in A. W.
9) अज्ञित तेन K.
10) All but O. रे. The text in O. here more prolix.
11) O. has छत्रध्वजपताकावैजयन्तीशतसहस्रैभिः समलंकृता सघंटासमुद्गरणिता-नि. A verb अनुरणति occurs Mahāvastu II, 272.
12) विधिभिर्दि A. W. विधेभिर्दि O.
13) महाडुन्डुभि left out in A. Cb. The reading in O. very different.

लिखित्वा प्रकाशयित्वा विकारा अपि तेनाज्ञित कृता भवन्ति विपुला विस्तीर्णाः[1] प्रगृहीताश्च लोकस्तूपचन्द्रनमया द्वात्रिंशत्प्रासादा अष्टतला भिक्षुसहस्रावासा आरामपुष्पोपशोभिताश्चङ्क्रमवनोपेताः शयनासनोपस्तब्धाः खाद्यभोज्यान्नपानग्लानप्रत्ययभैषज्यपरिष्कारपरिपूर्णाः सर्वसुखोपधानप्रतिमण्डिताः। ते च बहवः प्रमेया यदुत[3] शतं वा सहस्रं वा शतसहस्रं वा कोटी वा[4] कोटीशतं वा कोटीसहस्रं वा कोटीशतसहस्रं वा कोटीनयुतशतसहस्रं वा[4]। ते च[5] मम संमुखं श्रावकसंघस्य निर्यातितास्ते च मया परिभुक्ता वेदितव्याः। य इमं धर्मपर्यायं तथागतस्य परिनिर्वृतस्य धारयेद्वा वाचयेद्वा देशयेद्वा लिखेद्वा लेखयेद्वा तदनेनाहमज्ञित पर्यायेणैवं वदामि। न मे तेन परिनिर्वृतस्य धातुस्तूपाः कारयितव्या न संघपूजा। कः पुनर्वादो ऽज्ञित य इमं धर्मपर्यायं धारयन्दानेन वा संपादयेच्छीलेन वा क्षान्त्या वा वीर्येण वा ध्यानेन वा प्रज्ञया वा संपादयेद्बहुतरं पुण्याभिसंस्कारं स कुलपुत्रो वा कुलदुहिता वा प्रसवेद्बहुज्ञानसंवर्तनीयमप्रमेयमसंख्येयमपर्यन्तम्। तद्यथापि नामाज्ञिताकाशधातुरपर्यन्तः पूर्वदक्षिणपश्चिमोत्तराधरोर्ध्वासु दिक्षु विदिक्ष्वेवमप्रमेयासंख्येयान्स कुलपुत्रो वा कुलदुहिता वा पुण्याभिसंस्कारान्प्रसवेद्बहुज्ञानसंवर्तनीयान्य इमं धर्मपर्यायं धारयेद्वा वाचयेद्वा देशयेद्वा[6] लिखेद्वा लिखापयेद्वा। तथागतचैत्यसत्कारार्थं चाभियुक्तो भवेत्तथागतश्रावकाणां च वर्णं भाषेत[7] बोधिसत्त्वानां च महासत्त्वानां गुणकोटीनयुतशतसहस्राणि परिकीर्तयेत्परेषां च संप्रकाशयेत्क्षान्त्या च संपादयेच्छीलवांश्च भवेत्कल्याणधर्मः सुखसंवासः क्षान्तश्च भवेद्दान्तश्च भवेदनभ्यसूयकश्चापगतक्रोधमनस्कारो ऽव्यापन्नम-

1) प्रति A. W.
2) शय्या O.
3) Left out in Cb. O.
4) कोटीर्वा Cb. कोटिर्वा K. कोट्यो वा O., with the other numbers also in plural.
5) O. adds विकारा.
6) Left out in Cb. K.
7) भाषेद्वो K.

नस्कारः स्मृतिमांश्च स्यामवांश्च भवेद्दोर्यवांश्च[1] नित्याभियुक्तश्च भवेद्बुद्धधर्मपर्येष्टा[2] ध्यायी च भवेत्प्रतिसंलयनगुरुकः[3] प्रतिसंलयनबकुलश्च[4] प्रश्नप्रभेदकुशलश्च भवेत्प्रश्नकोटीनयुतशतसहस्राणां विसर्जयिता । यस्य कस्यचिद्जित बोधिसत्त्वस्य महासत्त्वस्येमं धर्मपर्यायं तथागतस्य परिनिर्वृतस्य धारयत इमं[5] एवंरूपा गुणा भवेयुर्ये मया परिकीर्तिताः । सो ऽजित कुलपुत्रो वा कुलदुहिता वैवं वेदितव्यो बोधिमण्डसंप्रस्थितो ऽयं कुलपुत्रो वा कुलदुहिता वा बोधिमभिसंबोद्धुं[6] बोधिवृक्षमूलं गच्छति । यत्र चाजित स कुलपुत्रो वा कुलदुहिता वा तिष्ठेद्वा निषीदेद्वा चङ्क्रमेद्वा तत्राजित तथागतमुद्दिश्य चैत्यं कर्तव्यं तथागतस्तूपो ऽयमिति च[7] सं वक्तव्यः सदेवकेन लोकेनेति ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

पुण्यस्कन्धो अपर्यन्तो वर्णितो मे पुनः पुनः ।
य[8] इदं धारयेत्सूत्रं निर्वृते नरनायके ॥ ३७ ॥
पूजाश्च मे कृतास्तेन धातुस्तूपाश्च कारिताः ।
रत्नामया[10] विचित्राश्च दर्शनीयाः सुशोभनाः ॥ ३८ ॥
ब्रह्मलोकसमा उच्चा[11] छत्रावडिभिरन्विताः[12] ।
परिणाहवन्तः श्रीमन्तो वेदयन्तोसमन्विताः[13] ॥ ३९ ॥

1) K. adds भवेत्.
2) ष्टां A. Cb. ष्टा K. ष्टां W.
3) संलयन Cb. Other MSS have संलीन; the reading of O. unknown.
4) संलीन K.
5) इमेवंरूपा A. Cb. W. इमेवंरूपा K.
6) संबुध्यनाय Cb. संबुध्यमानाय K. The reading of Cb. preferable.
7) सं K.
8) मं Cb. K.
9) तू K.
10) त्न A. W.
11) For उच्चाः.
12) वडि A. W. मंडि Cb. वडिसमन्विताः K.
13) त्ति Cb. K.

पटुघण्टारणान्तश्च[1] पटहामोपशोभिताः ।
वातेरितास्तथा घण्टा शोभन्ति[2] जिनधातुषु ॥ ४० ॥
पूजा च विपुला तेषां पुष्पगन्धविलेपनैः ।
कृता वाद्यैश्च वस्त्रैश्च दुन्दुभीभिः पुनः पुनः ॥ ४१ ॥
मधुरा वाद्यभाण्डा च वादिता तेषु धातुषु ।
गन्धतैलप्रदीपाश्च[3] दत्तास्ते पि[4] समन्ततः ॥ ४२ ॥
य[5] इदं धारयेत्सूत्रं नयकालिं[6] च देशयेत् ।
ईदृशी मे कृता तेन विविधा पूजनत्तिका[7] ॥ ४३ ॥
अया विकारकोट्यो पि[8] बकुलश्चन्दनाकारिताः[9] ।
द्वात्रिंशती च प्रासादा उच्चैस्त्वेनाष्टवत्तलाः ॥ ४४ ॥
शय्यासनैरुपस्तब्धाः खाद्यभोज्यैः समन्विताः ।
प्रवेणी[11] प्रणीत प्रज्ञप्ता[11] आवासाश्च सहस्रशः ॥ ४५ ॥
आरामाश्चङ्क्रमा दत्ताः पुष्पारामोपशोभिताः ।
बकुलोच्छ्रयकाश्चैव[12] बकुलरूपविचित्रिताः[13] ॥ ४६ ॥

1) रणान्तर A. रणातश्च Cb. रणान्तो च K. W.
2) न्ते Cb.
3) पैश्च Cb.
4) MSS. क्वि.
5) मं A. K. W. मां Cb.
6) ल Cb. ले K.
7) ज्ञा Cb.
8) MSS. क्वि.
9) Corrupt; probably to r. चन्दनामयाः or चन्दनाकृताः.
10) MSS. शयना. प्रज्ञ A.
11) अवणा A. W. पवना Cb. K.
12) का A.
13) बकुवोच्छ्रेदका A. W. बकुलउच्छ्रेदना Cb.

संघस्य विविधा पूजा कृता मे तेन[1] समुखम्।
य[2] इदं धारयेत्सूत्रं निर्वृतस्मिन्विनायके[3] ॥ ४७ ॥
अधिमुक्तिसारो यो स्यादतो बकुतरं हि मः।
पुण्यं लभेत यो एतत्[4] सूत्रं वाचेच्छिखेत वा ॥ ४८ ॥
लिखापयेन्नरः[5] कश्चित्सुनिरुक्तं च पुस्तके।
पुस्तकं पूजयेत्तच्च[6] गन्धमाल्यविलेपनैः ॥ ४९ ॥
दीपं च दद्याद्यो नित्यं गन्धैतलस्य पूरितम्[7]।
ज्ञात्युत्पलातिमुक्तैश्च प्रकीर्यात्मकस्य च ॥ ५० ॥
कुर्यादेतादृशीं[8] पूजां पुस्तकेषु च यो नरः[9]।
बकु प्रसवते पुण्यं प्रमाणं यस्य नो भवेत् ॥ ५१ ॥
यथैवाकाशधातो हि प्रमाणं नोपलभ्यते।
दिशासु दशसू[10] नित्यं पुण्यस्कन्धो ह्यमीदृशः ॥ ५२ ॥

1) MSS. तेहि.
2) मं A. K. W. See vs. 56 and 57. मां Cb.
3) स्मि वि A. Cb. W. स्मिन्वि K.
4) यः स्यादत्तो A. यो च स्यात् अत्तो Cb. यो चा स्यादतो K.
5) एतत् Cb. एतं the rest.
6) लेखयेद्वा नरः A. W.
7) पूजयेतं च A. W. °येत्तच्च Cb. °येत्तच्च K.
8) दीपं च नित्यं यो दद्या A. W. °यो दद्याङ्ग° K.
9) तां A. W.
10) त्पलैश्च मु° A. K. W. त्पलातमु° Cb.
11) कुर्याच्च एता Cb.
12) यो ततः A. Cb.
13) सु A. W.

कः पुनर्वादो यश्च स्यात्तत्तो दान्तः समाहितः।
शीलवांश्चैव ध्यायी च प्रतिसंलानगोचरः[1] ॥ ५३ ॥
अक्रोधनो अपिशुनश्चैत्यस्मिन्गौरवे[2] स्थितः।
भिक्षूणां प्रणतो नित्यं नाधिमानी न चालसः ॥ ५४ ॥
प्रज्ञावांश्चैव धीरश्च प्रश्नं पृष्टो न कुप्यति।
अनुलोमं[3] च देशेति कृपाबुद्धी[4] च प्राणिषु[5] ॥ ५५ ॥
य[6]ईदृशो भवेत्कश्चिच्चः सूत्रं धारयेदिदम्[7]।
न तस्य पुण्यस्कन्धस्य प्रमाणमुपलभ्यते ॥ ५६ ॥
यदि कश्चिन्नरः पश्येदीदृशं धर्मभाणकम्।
धारयन्तमिदं सूत्रं कुर्याद्वितस्य सत्क्रियाम्[8] ॥ ५७ ॥
दिव्यैश्च पुष्पैस्तथ अवकिरेत दिव्यैश्च वस्त्रैरभिच्छादयेत।
मूर्धेन वन्दित्व च तस्य पादौ तथागतो ज्यं जनयेत संज्ञाम् ॥ ५८ ॥
दृष्ट्वा च तं चित्तयि तस्मिं[9] काले गमिष्यते[10] एष द्रुमस्य मूलम्[11]।
बुध्यिष्यते[12] बोधिमनुत्तरां शिवां क्षिताय लोकस्य सदेवकस्य ॥ ५९ ॥

1) MSS. लो. Cp. Pāli *patisallāna.*
2) नश्चैत्येस्मिं A. Cb. W. नो चैत्यस्मिं K.
3) मश्च K.
4) कृपा A. K. W. कृता Cb.
5) प्री A. Cb. W. प्रा K.
6) यदी Cb. K. W.
7) दिदं A. Cb. W. दिमं K.
8) सं क्रि A. Cb. सन्क्रि K. स क्रि W.
9) तस्मिं K.
10) तो Cb. Better ति.
11) लं Cb. ले the others.
12) बुद्धिस्य A. W.

यस्मिंश्च सो चङ्क्रमि तादृशो विद्वः[1] तिष्ठेत वा यत्र निषीदेद्वा।
शय्यां च कल्पेय कांक्षंचि धीरो भाषेत्तु गाथां पि तु एक सूत्रात्[3]॥ ६०॥
यस्मिंश्च स्तूपं[4] पुरुषोत्तमस्य कारापयेच्चित्र सुदर्शनीयम्।
उद्दिश्य बुद्धं भगवन्त नायकं पूजां च चित्रां तस्मि कारयेत्तथा॥ ६१॥
मया स भुक्तः पृथिवीप्रदेशो मया स्वयं चङ्क्रमितं च तत्र।
तत्रोपविष्टो अहमेव चास्यां[5] यत्र स्थितः सो भवि[6] बुद्धपुत्रः[7]॥ ६१॥

॥ इति श्रीसद्धर्मपुण्डरीके धर्मपर्याये पुण्यपर्यायपरिवर्तो नाम षोडशमः[8]॥

1) द्वू A. K. W. द्वुः Cb.
2) थं K.
3) सूत्रां A. W. सूत्रं K.
4) तस्मिंश्च स्तूपां A. K. W.
5) च स्यां A. W. चास्य Cb. च स्याद् K.
6) वे A. W.
7) °त्र इति MSS.
8) सप्तशमः Cb.

XVII.

अथ खलु मैत्रेयो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। यो भगवन्निमं धर्मपर्यायं देश्यमानं श्रुत्वानुमोदेत्[1] कुलपुत्रो वा कुलदुहिता वा कियत्तं[2] स भगवन्कुलपुत्रो वा कुलदुहिता वा पुण्यं प्रसवेदिति[3]॥

अथ खलु मैत्रेयो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायामिमां गाथामभाषत॥

यो निर्वृते महावीरे शृणुयात्सूत्रमीदृशम्।
श्रुत्वा चाप्यनुमोदेया कियत्तं कुशलं भवेत्[5]॥ १॥

अथ खलु भगवान्मैत्रेयं बोधिसत्त्वं महासत्त्वमेतदवोचत्। यः कश्चिदजित कुलपुत्रो वा कुलदुहिता वा तथागतस्य परिनिर्वृतस्येमं धर्मपर्यायं देश्यमानं संप्रकाश्यमानं शृणुयाद्विज्ञुर्वा भिज्ञुणी वोपासको वोपासिका वा विज्ञपुरुषो वा कुमारको वा कुमारिका वा श्रुत्वा चाप्यनुमोदेत्[6]। सचेत्ततो[7] धर्मश्रवणादुत्थाय प्रक्रामेत्स च विहारगतो वा गृहगतो वारण्यगतो वा वीथीगतो वा ग्रामगतो वा ज्ञनपदगतो वा तान्हेतूंस्तानि कारणानि तं धर्मं यथाश्रुतं[8] यथोद्दिष्टं यथाबलमपरस्य सत्त्वस्याचक्षीत[10] मातुर्वा पितुर्वा

1) मोदयेत Cb.
2) Erroneously for कियत्.
3) प्रसवतीति Cb प्रसविष्यतीति K.
4) MSS. देयात्.
5) भवेदिति Cb. K.
6) मोदयेत् Cb. मोदेत् K.
7) स च ततो Cb. K.
8) Left out in Cb.
9) MSS. but K. श्रुत.
10) क्षेत् K.

ज्ञातेर्वा संमोदितस्य[1] वान्यस्य वा संस्तुतस्य[2] कस्यचित्सो ऽपि यदि श्रुत्वानुमोदेत्[3] अनुमोद्य च पुनरन्यस्मै[4] आचक्षीत[5]। सो ऽपि यदि[6] श्रुत्वानुमोदेत अनुमोद्य च सो ऽप्यपरस्मै[4] आचक्षीत[5]। सो ऽपि तं श्रुत्वानुमोदेत्[8]। इत्यनेन पर्यायेण यावत्पञ्चाशत्परंपरया। अथ खल्वयित यो ऽसौ पञ्चाशत्तमः पुरुषो भवेत्परंपरा स चानुमोदकस्तस्यापि तावदकुशलित कुलपुत्रस्य वा कुलदुहितुर्वानुमोदनासकृगतं[10] पुण्याभिसंस्कारमभिनिर्देक्ष्यामि। तं शृणु साधु च सुष्ठु च मनसिकुरु। भाषिष्ये ऽहं ते॥

तद्यथापि नामाशित चतुर्षु लोकधातुष्वसंख्येयशतसहस्रेषु ये सत्त्वाः सत्तः[11] संविद्यमानाः षट्सु गतिषूपपन्ना अण्डजा वा जरायुजा वा संस्वेदजा वौपपादुका वा रूपिणो वारूपिणो वा संज्ञिनो वासंज्ञिनो वो नैव संज्ञिनो वा नासंज्ञिनो वापदा वा द्विपदा वा चतुष्पदा वा बहुपदा वा यावदेव सत्त्वाः सत्त्वधातौ संग्रहसमवसरणं गच्छन्ति[12]। अथ[13] कश्चिदेव पुरुषः समुत्पद्येत[14] पुण्यकामो कृतकामस्तस्य सत्त्वकायस्य सर्वकामक्रीडारति-[15]

1) कस्य Cb. K.
2) MSS. add वासंस्तुतस्य.
3) देत्। अनु K. The others have देता.
4) स्मै A. Cb. K. W.
5) त् K.
6) पि तं A. K.
7) देत् A. W. देदनु K.
8) देत A. देत् K. W. दयेत् Cb.
9) भवेत् परं वा ऽनु Cb.
10) वा अन्यतमा अनु A. W.
11) समत्तः W.
12) सत्त्वसंग्रहं Cb.
13) K. adds खलु.
14) द्यतः A. W. द्येत् K.
15) कामः। यस्य तस्य सत्त्वस्य काम Cb. कामो यस्तस्य °काम K.

परिभोगानिष्टान्कान्तान्प्रियान्मनापान्[1]दद्यात्। एकैकस्य[2] सत्त्वस्य जम्बुद्वीपं परिपूर्णं दद्यात्कामक्रीडारतिपरिभोगाय हिरण्यसुवर्णाद्रूप्यमणिमुक्तावैडूर्यशङ्खशिलाप्रवाडानश्वरथगो-[3]रथकरिस्तरथान्दद्यात्प्रासादान्कूटागारान्[4]। अनेन पर्यायेणाशित स पुरुषो दानपतिर्महादानपतिः परिपूर्णान्यशीतिं वर्षाणि दानं दद्यात्। अथ खल्वशित स पुरुषो दानपतिर्महादानपतिरेवं चित्तयेत्। इमे खलु सत्त्वाः सर्वे मया क्रीडापिता रमापिताः[5] सुखं जीवापिताः[6]। इमे च ते भवन्तः सत्त्वा वलिनाः पलितशिरसो जीर्णवृद्धा महल्लका अशीतिवर्षिका[7] ज्ञात्याभ्याशीभूताश्चैते कालक्रियायाः। यन्वहमेतांस्तथागतप्रवेदिते धर्मविनये ऽवतारयेयमनुशासयेयम्। अथ खल्वशित स पुरुषस्तान्सर्वसत्त्वान्समादापयेत्समादापयित्वा[8] च तथागतप्रवेदिते[9] धर्मविनये ऽवतारयेद्वाकुर्यात्। तस्य ते सत्त्वास्तं च धर्मं शृणुयुः श्रुत्वा चैकक्षणेनैकमुहूर्तेनैकलवेन[10] सर्वे स्रोतआपन्नाः स्युः सकृदागामिनो ऽनागामिनो ऽनागामिफलं प्राप्नुयुर्यावदर्हत्वो भवेयुः त्रीणाम्नत्रा ध्यायिनो महाध्यायिनो ऽष्टविमोक्षध्यायिनः। तत्किं मन्यसे ऽशित अपि नु[12] स पुरुषो दानपतिर्महादानपतिस्ततोनिदानं बहुं[13] पुण्यं प्रसवेदप्रमेयमसंख्येयम्[14]। एवमुक्ते मैत्रेयो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। एव-

1) मनापादं Cb.
2) Cb. adds च.
3) द्रूप्य left out in Cb. K.
4) गोणारथ K. left out in W.
5) All but K. क्रीडिता रमिताः.
6) जीविता.
7) र्ष Cb. K.
8) Left out in K.
9) त A. W.
10) Cb. K. put लव before मुहूर्त, while A. leaves out एकक्षण.
11) Left out in Cb. K.
12) बहु instead of अपि नु in Cb. K.
13) Left out in Cb. K., while W. reads बहुतरं.
14) इति added in all but Cb. K.

मेतद्भगवन्नेवमेतत्सुगत। अनेनैव तावद्भगवन्कारणेन स पुरुषो दानपतिर्महादानपतिर्बहु पुण्यं प्रसवेद्यस्तावतां सत्त्वानां सर्वसुखोपधानं दद्यात्कः पुनर्वादो यदुत्तर्यकरत्वे[2] प्रतिष्ठापयेत्॥

एवमुक्ते भगवानाह बोधिसत्त्वं महासत्त्वमेतदवोचत्। आरोचयामि ते ऽजित प्रतिवेदयामि यश्च स दानपतिर्महादानपतिः पुरुषश्चतुर्षु लोकधातुष्वसंख्येयशतसहस्रेषु सर्वसत्त्वानां सर्वसुखोपधानैः परिपूर्यार्यकरत्वे प्रतिष्ठाप्य पुण्यं प्रसवेत् यश्च पञ्चाशत्तमः पुरुषः परंपराश्रवानुगतः श्रवणेनेतो धर्मपर्यायादेकामपि गाथामेकपदमपि श्रुत्वानुमोदेत। यच्चैतस्य पुरुषस्यानुमोदनासहगतं पुण्यक्रियावस्तु यच्च तस्य पुरुषस्य दानपतेर्महादानपतेर्दानसहगतमार्यकरत्वं प्रतिष्ठापनासहगतपुण्यक्रियावस्त्विदमेव ततो बहुतरं यो ऽयं पुरुषः पञ्चाशत्तमस्ततः पुरुषः परंपरात इतो धर्मपर्यायादेकामपि गाथामेकपदमपि श्रुत्वानुमोदेत्। अस्यानुमोदनासहगतस्याजित पुण्याभिसंस्कारस्य कुशलमूलाभिसंस्कारस्यानुमोदनासहगतस्याग्रतः असौ पौर्विको दानसहगतश्चार्यकरत्वप्रतिष्ठापनासहगतश्च पुण्याभिसंस्कारः

1) धानानि Cb.

2) त्तर श्रर्कत्वे A. त्तर्यकरत्वे Cb. K. त्तरे श्रर्कत्वे W. Perhaps the true reading is य उत्तर्यकरत्वे.

3) च K.

4) प्रसवति Cb. K

5) यच्च A. W.

6) शतिमः Cb. K.

7) दृयेत् Cb. द्येत् K.

8) यश्चै Cb.

9) यश्च Cb.

10) महादानपतेर् and महगतमर्कत्वं प्रतिष्ठापना left out in Cb. K.

11) दृयेत् Cb.

12) भ्या W.

13) ष्ठाप्य Cb.

शततमीमपि कलां नोपयाति सहस्रतमीमपि शतसहस्रतमीमपि कोटीतमीमपि कोटीशततमीमपि कोटीसहस्रतमीमपि कोटीशतसहस्रतमीमपि कोटीनयुतशतसहस्रतमीमपि कलां नोपयाति संख्यामपि कलनामपि गणनामप्युपमामप्युपनिषदमपि न क्षमते। एवमप्रमेयमसंख्येयमजित सो ऽपि तावत्पञ्चाशत्तमः परंपराश्रवेण पुरुष इतो धर्मपर्यायादेकगाथामप्येकपदमप्यनुमोद्य च पुण्यं प्रसवति। कः पुनर्वादो ऽजित यो ऽयं मम संमुखमिमं धर्मपर्यायं शृणुयाच्छ्रुत्वा चाभ्यनुमोदेत्। अप्रमेयतरमसंख्येयतरं तस्याहमजित तं पुण्याभिसंस्कारं वदामि॥

यः खलु पुनरजितास्य धर्मपर्यायस्य श्रवणार्थं कुलपुत्रो वा कुलदुहिता वा स्वगृहान्निष्क्रम्य विहारं गच्छेत्। स च गत्वा तस्मिन्निमं धर्मपर्यायं मुहूर्तकमपि शृणुयात्तिस्थतो वा निषण्णो वा स सत्त्वस्तन्मात्रेण पुण्याभिसंस्कारेण कृतेनोपचितेन ज्ञातिविनिवृत्तो द्वितीये समुच्छ्रये द्वितीय आत्मभावप्रतिलम्भे गोरथानां लाभी भविष्यत्यश्वरथानां हस्तिरथानां शिविकानां गोयानानामृषभयानानां दिव्यानां च विमानानां लाभी भविष्यति। सचेत्पुनस्तत्र धर्मश्रवणे मुहूर्तमात्रमपि निषद्येमं धर्मपर्यायं शृणुयात्परं वा निषादयेदासनसंविभागं वा कुर्यादपरस्य सत्त्वस्य तेन स पुण्याभिसंस्कारेण लाभी भवि-

1) मा K. the same in similar words below.

2) नोपैति Cb.

3) पयेति Cb.

4) Cp. p. 333, footnote 15.

5) उपनिषाम् etc. From पञ्चा till श्रवेण left out in K. Preferable.

6) प्रसूयते A. W.

7) Left out in K.

8) दृयेत् Cb.

9) प्रतिसंलोभे गोणरथानां K.

10) Cb. adds लाभी भविष्यति.

11) शिविक्कानां यानानां नावां यानानाम् A. शिविकायानानां गोयानानां Cb. शिविकायानानां नौयनानां K. शिविक्कानां यानानां नावानां W.

12) निषोदापयेत् आसन K. a more original reading.

(1)ष्यति शक्रासनानां ब्रह्मासनानां चक्रवर्तिसिंहासनानाम्। सचेत्पुनरयं कश्चिदेव कुलपुत्रो वा कुलदुहिता वापरं पुरुषमेवं वदेदागच्छ त्वं भोः पुरुष सद्धर्मपुण्डरीकं नाम धर्मपर्यायं शृणुष्व स च पुरुषस्तस्य तां प्रोत्साहनामागम्य यदि मुहूर्तमात्रमपि शृणुयात्स सत्त्वस्तेन प्रोत्साहेन कुशलमूलेनाभिसंस्कृतेन धारणीप्रतिलब्धैर्बोधिसत्त्वैः सार्धं समवधानं प्रतिलभते। अनडश्च भवति तीक्ष्णेन्द्रियः प्रज्ञावान्न तस्य ज्ञातिशतमकृत्रिमैरपि पूतिमुखं भवति न दुर्गन्धि। नाप्यस्य जिह्वारोगो भवति न मुखरोगो भवति। न च श्यामदन्तो भवति न विषमदन्तो भवति न पोतदन्तो भवति न दुःसंस्थितदन्तो न खण्डदन्तो न पतितदन्तो न वक्रदन्तो न लम्बोष्ठो भवति नाभ्यत्तरोष्ठो(3) न प्रसारितोष्ठो न खण्डोष्ठो न वङ्कोष्ठो न कृष्णोष्ठो न बीभत्सोष्ठो भवति। न चिपिटनासो भवति न वक्रनासो भवति। न दीर्घमुखो भवति न वङ्कमुखो भवति न कृष्णमुखो भवति नाप्रियदर्शनमुखः। अपि तु खल्वजित मूढमसुजातजिह्वादन्तोष्ठो भवत्यायतनासः प्रणीतमुखमण्डलः(4) मधुरसुपरिनिष्पन्नललाटो भवति। सुपरिपूर्णपुरुषव्यञ्जनप्रतिलाभी च भवति। तथागतं चाववादानुशासकं(5) प्रतिलभते क्षिप्रं च बुद्धैर्भगवद्भिः सकृ समवधानं(6) प्रतिलभते। पश्याजितैकसत्त्वमपि नामोत्साहयित्वेयत्पुण्यं(7) प्रसवति। किं पुनर्वादो यः सत्कृत्य शृणुयात्सत्कृत्य वाचयेत्सत्कृत्य देशयेत्सत्कृत्य प्रकाशयेदिति॥(8)

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

---

1) भवति K.
2) त्य A. Cb. K. W. भ्य B.
3) प्रतिसारित K.
4) प्रोणित K. var. readings are प्रणीत, and प्रोण. The true r. doubtful.
5) तथा Cb.
6) यास्या A. Cb. W. पश्या K.
7) इयत् K. इयत्तं (a Prākṛt form) the rest.
8) प्रसूयते B.

(1)पश्चाशिमो यश्च परंपरायां(2) सूत्रस्यिमस्य(3) शृणुतेकगाथाम्।
अनुमोदयित्वा(4) च प्रसन्नचित्तः(5) शृणुष्व पुण्यं भवि(6) यत्तकं तत्॥ २॥
स चैव पुरुषो भवि दानदाता सत्त्वान कोटीनयुतेषु नित्यम्।
ये पूर्वमौपम्यकृता मया वै तान्सर्वि तर्पेय अशीतिवर्षान्(7)॥ ३॥
सो दृष्ट्व तेषां च जरामुपस्थितां वली च खल्ली(8) च शिरश्च पाण्डुम्।
क्लेशाधिमुच्यन्ति हि(9) सर्वसत्त्वा यन्नून धर्मेण कु श्रोवदेयम्॥ ४॥
सो तेष धर्मं वदतीकु पश्चान्निर्वाणभूमिं च प्रकाशयेत।
सर्वे भवाः फेनमरीचिकल्पा निर्विन्द्यथा सर्वभवेषु(10) क्षिप्रम्॥ ५॥
ते सर्वसत्त्वाश्च(11) शृणित्व धर्मं तस्यैव दातुः पुरुषस्य अन्तिकात्।
अकृत्तभूता भवि एककाले तीणात्रया अन्तिमदेहधारिणः॥ ६॥
पुण्यं(12) ततो बकुतरु तस्य हि स्यात्परंपरातः(13) शृणि(14) एकगाथाम्।
अनुमोदि वा यत्तकु तस्य पुण्यं कलं(15) पुण्यस्कन्धः पुरिमो न भोति॥ ७॥

---

1) सि A. B. Cb. W. शि K.
2) यं K.
3) सूत्रश्यिमस्य K. सूत्राणि तस्य W.
4) अनुमोदि श्रुत्वा B. Cb. K.
5) त्तोः A. त्तः C. त्ताः Cb. त्तो K.
6) भत्र या B. भविष्य K.
7) वर्षे A. W.
8) MSS. खली.
9) धिमुच्यन्ति मि K.
10) सर्वि A. W.
11) सर्वि A. Cb. W. सर्व B. K.
12) अतो K. W.
13) पराग्यो A. W.
14) Read शृणियेक?
15) कलां A. W.

एवं बकु तस्य भवेत पुण्यं अनन्तकं यस्य प्रमाणु नास्ति।
गाथां पि श्रुत्वेक परंपरांय किं वा पुनः संमुख यो शृणेया ॥ ८ ॥
यश्चैकसत्त्वं पि वदेय तत्र प्रोत्साहये गच्छ शृणुष्व धर्मम्।
सुदुर्लभं सूत्रमिदं हि भोति कल्पान कोटीनयुतैरनेकैः ॥ ९ ॥
स चापि प्रोत्साहितु तेन सत्त्वः शृणोय सूत्रेमं[1] मुहूर्तकं पि।
तस्यापि धर्मस्य फलं शृणोहि मुखरोग तस्य[2] न कदाचि भोति ॥ १० ॥
जिह्वापि तस्य[3] न कदाचि दुःखति[4] न तस्य दन्ता पतिता भवन्ति।
श्यामाथ पीता विषमा च ज्ञातुं बीभत्सितोष्ठो न च ज्ञातु भोति ॥ ११ ॥
कुटिलं च शुष्कं च न ज्ञातु दीर्घं मुखं न क्रुधं स्य[5] कदाचि भोति।
सुसंस्थिता नास तथा ललाटं दन्ता च ओष्ठो मुखमण्डलच ॥ १२ ॥
प्रियदर्शनो भोति सदा नराणां पूतिं च वक्त्रं न कदाचि भोति।
यथोत्पलस्येक्र सदा सुगन्धिः प्रवायते[6] तस्य मुखस्य[7] गन्धः ॥ १३ ॥
गृहाद्विहारं हि व्रजित्व धीरो गच्छेत सूत्रं श्रवणाय एतत्।
गत्वा च सो तत्र शृणोन्मुहूर्तं[8] प्रसन्नचित्तस्य फलं शृणोथ ॥ १४ ॥

---

1) तु A. W. य B. षु Cb. म K. (i. e. सत्रूमिमं).
2) तस्ये A. तस्यो B. तस्या Cb. तस्य K. W.
3) तस्यो B.
4) ते K. तः W.
5) चक्रुवं स A. चिक्रुधं स्य B. चिक्रुवति Cb. चिक्रुधं सि K. चिक्रुत स्य W. We cannot guess what is meant.
6) प्रवाय A. K. प्रवयते B. प्रवायते Cb. प्रदाय W.
7) वदनस्य A. K. W. मुखस्य B. Cb.
8) शृणो मु A. शृणोन्मु B. शृणोत्र म Cb. शृणोत्मु K. शृणोत मु W.

मुगीरु तस्य[1] भवतेत्मभावः परियाति[2] च[3] अश्वरथेहि धीरः।
कृस्तोरथांश्च अभिरुह्य उच्चावचतनेहि चित्राननुचङ्क्रमेया[4] ॥ १५ ॥
विभूषितां सो शिविकां लभेत नरैरनेकैरिह वाह्यमानाम्।
गत्वापि धर्मं श्रवणाय तस्य फलं शुभं भोति च एवद्रूपम् ॥ १६ ॥
निषद्य चासौ परिषाय तत्र शुक्लेन कर्मेण कृतेन तेन।
शक्रासनानां भवते स लाभो ब्रह्मासनानां च नृपासनानाम्[5] ॥ १७ ॥

॥ इति श्रीसद्धर्मपुण्डरीके धर्मपर्याये ऽनुमोदनापुण्यनिर्देशपरिवर्तो नाम सप्तदशमः[6] ॥

---

1) तस्यो A. B. W.
2) त्म for त्मात्म.
3) चो A. W.
4) तु A. B. Cb. W. नु K.
5) MSS. add इति.
6) वर्तो ऽष्टादशमः Cb.

XVIII.

अथ खलु भगवान्सततसमिताभियुक्तं बोधिसत्त्वं महासत्त्वमामन्त्रयामास[1]। यः कश्चित्कुलपुत्र इमं[2] धर्मपर्यायं धारयिष्यति वाचयिष्यति वा[3] देशयिष्यति वा लिखिष्यति वा। स कुलपुत्रो वा कुलदुहिता वा[4] अष्टौ चक्षुर्गुणशतानि प्रतिलप्स्यते द्वादश श्रोत्रगुणशतानि प्रतिलप्स्यते अष्टौ घ्राणगुणशतानि प्रतिलप्स्यते द्वादश जिह्वागुणशतानि प्रतिलप्स्यते अष्टौ कायगुणशतानि प्रतिलप्स्यते द्वादश मनोगुणशतानि प्रतिलप्स्यते। तस्यैभिर्बलशतैः षडिन्द्रियग्रामः परिशुद्धः सुपरिशुद्धो भविष्यति[5]। स एवं परिशुद्धेन चक्षुरिन्द्रियेण प्राकृतेन मांसचक्षुषा मातापितृसंभवेन त्रिसाहस्रमहासाहस्रां[6] लोकधातुं सात्तर्बहिः सशैलवनषण्डामधो[7] यावदवीचिं महानिरयमुपादायोपरि च यावद्भवाग्रम्। तत्सर्वं द्रक्ष्यति प्राकृतेन मांसचक्षुषा ये[8] च तस्मिन्सत्त्वा उपपन्नास्तान्सर्वान्द्रक्ष्यति कर्मविपाकं च तेषां ज्ञास्यतीति॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

य इमं सूत्र भाषेत पर्षासु च विशारदः।
अनोलीनः प्रकाशेया गुणांस्तस्य[10] शृणुष्व मे॥ १॥

1) यामास A. Ca. Cb. K. यते स्म B. W.
2) त्रो Cb.
3) Left out in Cb.
4) कुलदुहिता वा left out in B. Cb. वा कुल° वा left out in K.
5) भवति Cb.
6) स्रां A. W. स्रं B. Cb. स्रों K.
7) षण्डां अधः K. षण्डम the others.
8) B. adds स.
9) सा A. B. Ca. W. षा Cb. शा K.
10) गुणास्तस्य A. B. Ca. Cb. W. गुणास्तस्य K.

अष्टौ गुणशतास्तस्य चक्षुषो भोक्ति सर्वशः।
येनास्य विमलं[1] भोति शुद्धं चक्षुरनाविलम्॥ २॥
स मांसचक्षुषा तेन मातापितृकसंभुना।
पश्यते लोकधात्वेमां सशैलवनकाननाम्[2]॥ ३॥
मेरुं सुमेरुं[3] सर्वां[4] च चक्रवाडा स पश्यति।
ये चान्ये पर्वताः षण्डाः[5] समुद्रांश्चापि पश्यति॥ ४॥
यावानवीचि केष्टेन भवाग्रं चोपरिष्टतः[6]।
सर्वं स पश्यते वीरो मांसचक्षुस्य[8] ईदृशम्॥ ५॥
न तावद्दिव्यचक्षुस्य[9] भोति नो चापि ज्ञायते[10]।
विषयो मांसचक्षुष्य[11] भवेत्तस्यायमीदृशः[12]॥ ६॥

पुनरपरं सततसमिताभियुक्त स कुलपुत्रो वा कुलदुहिता वेमं धर्मपर्यायं संप्रकाशयमानः परेषां च संश्रावयमानस्तैर्[13]द्वादशभिः श्रोत्रगुणशतैः समन्वागतः। ये त्रिसाहस्रम-

1) विमतिं A. विमलं B. K. W. विमान Cb.
2) सर्वान्सात्तरवाहिरां K.
3) सुमेरुं A. .B. Cb. W. सुमेरुं मेरु K.
4) सर्वाश्च in all MSS. but चक्रवाल is of the neuter gender.
5) पुष्टाः B. पर्वताघुष्णाः K.
6) ष्ठितां A. B. ष्ठितम् the rest.
7) धी B.
8) स्य Cb. K.
9) स्य A. Cb. K. W.
10) स्य A. B. W. ज्ञानति K.
11) स्य A. K.
12) शम् Cb. All add इति.
13) वयन् ते B. K.

कासाकल्पायां[1] लोकधातौ विविधाः शब्दा निश्चरन्ति यावदवीचिर्मकानिरयो यावच्च भवाग्रं सात्त्वर्बहिः। तद्यथा कुस्तिशब्दा[2] १ वाद्यशब्दा २ वोष्ट्रशब्दा[3][4] ३ वा गोशब्दा ४ वाजशब्दा[5] ५ वा जनपदशब्दा[6] ६ वा[6] रथशब्दा ७ वा रुदितशब्दा[7] ८ वा शोकशब्दा ९ वा भैरवशब्दा १० वा शङ्खशब्दा[8] ११ वा[8] घण्टाशब्दा १२ वा पटकशब्दा[9] १३ वा[9] भेरीशब्दा १४ वा क्रीडाशब्दा १५ वा गीतशब्दा १६ वा नृत्यशब्दा[10] १७ वा तूर्यशब्दा[11] १८ वा[11] वाद्यशब्दा १९ वा स्त्रीशब्दा २० वा पुरुषशब्दा २१ वा दारकशब्दा २२ वा दारिकाशब्दा २३ वा धर्मशब्दा २४ वाधर्मशब्दा २५ वा सुखशब्दा २६ वा दुःखशब्दा[12] २७ वा[12] बालशब्दा[13] २८ वार्यशब्दा २९ वा मनोज्ञशब्दा ३० वामनोज्ञशब्दा[14] ३१ वा[14] देवशब्दा ३२ वा नागशब्दा ३३ वा यक्षशब्दा ३४ वा गान्धर्वशब्दा[15] ३५ वा[15] गन्धर्वशब्दा ३६ वासुरशब्दा ३७ वा गरुडशब्दा ३८ वा किंनरशब्दा ३९ वा महोरगशब्दा ४० वा मनुष्यशब्दा ४१ वामनुष्यशब्दा ४२

1) त्रे B. Cb.

2) Left out in B. Cb.

3) वा कुस्ति instead of वोष्ट्र in B. Cb.

4) Left out in K.

5) Put after जन° in B.

6) Left out in Cb. W. षट् left out in K.

7) दि left out in Cb.

8) Left out in K.

9) In B. Cb. K.

10) उष्ट्र B. Cb. K.

11) Left out in B. Cb. K.

12) Left out in Cb.

13) वान Cb.

14) Left out in Cb. W.

15) B. Cb. K. W.

वाग्निशब्दा[1] ४३ वा वायुशब्दा[2] ४४ वोदकशब्दा ४५ वा[3] ग्रामशब्दा ४६ वा नगरशब्दा ४७ वा भिक्षुशब्दा[4] ४८ वा श्रावकशब्दा ४९ वा प्रत्येकबुद्धशब्दा ५० वा बोधिसत्त्वशब्दा ५१ वा तथागतशब्दा ५२ वा। यावत्तः केचित्त्रिसाहस्रमहासाहस्रायां[5] लोकधातौ सात्त्वर्बहिः शब्दा निश्चरन्ति। तान्शब्दांस्तेन[6] प्राकृतेन परिशुद्धेन[7] श्रोत्रेन्द्रियेण शृणोति। न च तावद्दिव्यं श्रोत्रमभिनिर्हरति तेषां तेषां च[8] सत्त्वानां रुतान्यवबुध्यते[9] विभावयति विभावयति तेन च प्राकृतेन श्रोत्रेन्द्रियेण तेषां तेषां च[10] सत्त्वानां रुतानि शृण्वतस्तस्य[11] तैः सर्वशब्दैः श्रोत्रेन्द्रियं नाभिभूयते। एवंरूपः सततसमिताभियुक्त तस्य बोधिसत्त्वस्य महासत्त्वस्य श्रोत्रेन्द्रियप्रतिलम्भो[12] भवति न च तावद्दिव्यं श्रोत्रमभिनिर्हरति॥

इदमवोचद्भगवानिदं[13] वादित्वा सुगतो ऽथापरमेतदुवाच शास्ता॥

श्रोत्रेन्द्रियं तस्य विशुद्ध भोति अनाविलं प्राकृतकं च तावत्।
विविधान्हि[14] शृणोति[15] शब्दानिह लोकधातौ हि अशेषतो ये॥ ७॥

1) अग्नि Cb.

2) वायु is put after उदक in B. Cb. K.

3) महासमुद्रवेशशब्दा वा ग्रा O.

4) जनपदशब्दा वा उपासिकाशब्दा वा श्रा° O.

5) त्रे B. त्र Cb.

6) तां सर्वान्तेन K. O.

7) Left out in B. Cb. K.

8) K. adds च, Cb. leaves तेषां out.

9) K. adds तेषाञ्च तेषाञ्च सत्त्वानां रुतानि.

10) तेषां च left out in K.

11) शृण्वंति॥ तस्य A. शृण्वंतस्तस्य B. शृण्वंतेस्तस्य Cb. शृण्वतिः तस्य W. शृण्वतो न तस्य O.

12) सं for प्रति in K.

13) वि A. W.

14) धां हि A. B. K. W. धा हि Cb.

15) शृणो A. शृणोथ K. The verse faultive; by reading नानाविधान्हि स शृणोति one may restore the metre, but such a reading is but a makeshift. O. has,

कस्तोन ग्रथान शृणोति[1] शब्दान्ग्रथान गीणान[2] ग्रन्नेडकानाम[3]।
भेरीमृदङ्गान सुघोषकानां वीणान वेणून्थ वल्लकीनाम् ॥ ८ ॥
गीतं मनोज्ञं मधुरं शृणोति न चापि सो सज्जति तत्र धीरः।
मनुष्यकोटोन शृणोति शब्दान्भाषन्ति यं यं च यदिं यदिं ते ॥ ९ ॥
देवान चो नित्य शृणोति शब्दान्गीतस्वरं च[4] मधुरं मनोज्ञम्।
पुरुषाण स्त्रीण रुतानि चापि तथ दारकाणामथ दारिकाणाम् ॥ १० ॥
ये पर्वतेष्वेव गुहानिवासो कलविङ्का कोकिलबर्हिणाश्च[5]।
पक्षीण ये जीवकजीवका हि तेषां च वल्गू शृणुते हि शब्दान् ॥ ११ ॥
नरकेषु ये वेदन वेदयन्ति सुदारुणांश्चापि करोन्ति शब्दान्[6]।
आक्रारडःखैरवपीडितानां यान्प्रेत कुर्वन्ति तथैव शब्दान् ॥ १२ ॥
असुराश्च ये सागरमध्यवासिनो मुञ्चन्ति[7] घोषांस्तथ चान्यमन्यान्।
सर्वानिहस्थो स हि धर्मभाणकः शृणोति शब्दान्न च श्रोतरीयति[8] ॥ १३ ॥
तिर्याण योनीषु रुतानि यानि अन्योन्यसंभाषणतां[9] करोन्ति।
इह स्थितस्तानपि सो शृणोति विविधानि शब्दानि बहुविधानि ॥ १४ ॥

---

equally faultive विविधं च येन शृणोताह (original text सुणोतीह) शब्दानिह लोकधातूय हि अशेषतो य (r. ये).

1) ना W.
2) ग्रन्नेड A. B. Cb. ग्रन्नड W. गन्नड K.
3) चो A. W.
4) क्रोञ्चमोराः O.
5) न B. Cb. K.
6) शृणोति A. W.
7) Read मुञ्चन्ति.
8) A mistake for श्रोत्थरीयति.
9) Read तः or तो, Abl. c.

ये ब्रह्मलोके निवसन्ति देवा अकनिष्ठ आभास्वर ये च देवाः[1]।
ये चान्यमन्यस्य करोन्ति घोषान् शृणोति तत्सर्वमशेषतो ऽसौ ॥ १५ ॥
स्वाध्याय कुर्वन्तिह ये च भिक्षवः सुगतानिह शासनि प्रव्रजित्वा।
पर्षासु[2] ये देशयते च[3] धर्मं तेषां पि[4] शब्दं शृणुते स नित्यम् ॥ १६ ॥
ये बोधिसत्त्वाश्चिह लोकधातौ स्वाध्याय कुर्वन्ति परस्परेण।
संगीति धर्मेषु[5] च ये करोन्ति शृणोति शब्दान्विविधांश्च तेषाम् ॥ १७ ॥
भगवान्पि बुद्धो नरदम्यसारथिः पर्षासु धर्मं ब्रुवते यमग्यम्[6]।
तं चापि सो शृणुयति[7] एककाले यो बोधिसत्त्वो इमु सूत्र धारयेत्[8] ॥ १८ ॥
सर्वे त्रिसाहस्रि इमस्मि क्षेत्रे ये सत्त्व कुर्वन्ति बहूं पि शब्दान्।
अभ्यन्तरेणापि च[9] बाह्यिरेण अवीचिपर्यन्त भवाग्रमूर्धम् ॥ १९ ॥
सर्वेष सत्त्वान शृणोति शब्दान्न चापि श्रोत्रं उपहन्यते अस्य।
षडिन्द्रियो जानति[10] स्थानस्थानं श्रोतेन्द्रियं प्राकृतकं[11] हि तावत् ॥ २० ॥
न च ताव दिव्यस्मि करोति यत्नं प्रकृत्य[12] तिष्ठति श्रोत्रमेतत्।
सूत्रं हि यो धारयते विशारदो गुणा स्य एतादृशका भवन्ति[13] ॥ २१ ॥

---

1) This quarter is left out in A.
2) पार्षासयं K. पर्षासु others.
3) Left out in K.
4) पि K. च the rest.
5) चा यो Cb.
6) द् K.
7) णो A.
8) ब्रूयात् K.
9) ध K.
10) य Cb. K.
11) ति A. Cb.
12) ति A.
13) MSS. add इति.

पुनरपरं सततसमिताभियुक्तास्य[1] बोधिसत्त्वस्य महासत्त्वस्येमं धर्मपर्यायं धारयतः प्रकाशयतः स्वाध्यायतो लिखतो ऽष्टाभिर्गुणशतैः[2] समन्वागतं घ्राणेन्द्रियं परिशुद्धं भवति। स तेन परिशुद्धेन घ्राणेन्द्रियेण ये त्रिसाहस्रमहासाहस्रायां[3] लोकधातौ सान्तर्बहिर्विविधगन्धाः संविद्यन्ते। तद्यथा पूतिगन्धा वा मनोज्ञगन्धा वा नानाप्रकाराणां सुमनसां गन्धाः। तद्यथा जातिकमल्लिकाचम्पकपाटलगन्धास्तान्गन्धान्घ्रायति। जलजानामपि पुष्पाणां विविधान्गन्धान्घ्रायति। तद्यथोत्पलपद्मकुमुदपुण्डरीकाणां[5] गन्धान्घ्रायति। विविधानां पुष्पफलवृक्षाणां पुष्पफलगन्धान्घ्रायति। तद्यथा चन्दनतमालपत्रतगरागरुसुरभिगन्धान्घ्रायति। नानाविकाराणि गन्धविकृतिशतसहस्राणि यान्येकस्थानस्थितः सर्वाणि घ्रायति[6]। सत्त्वानामपि विविधान्गन्धान्घ्रायति। तद्यथा कुस्त्यश्वगवेडकपशुगन्धान्घ्रायति[7]। विविधानां च[8] तिर्यग्योनिगतानां प्राणिनामात्मभावगन्धान्घ्रायति। स्त्रीपुरुषात्मभावगन्धान्घ्रायति। दारकदारिकात्मभावगन्धान्घ्रायति। दूरस्थानामपि तृणगुल्मौषधिवनस्पतीनां गन्धान्घ्रायति। भूतान्गन्धान्विन्दति[9] न च तैर्गन्धैः संक्रियते न संमुह्यति। स इह स्थित एवं देवानामपि गन्धान्घ्रायति। तद्यथा पारिभाद्रतकस्य[10] कोविदारस्य[11] मान्दारवमहामान्दारवमञ्जूषकमहामञ्जूषकाणां[12] दिव्यानां पुष्पाणां

1) क्कास्य A. क्कस्य B. Cb. W. क्क तस्य K.
2) ष्ट K.
3) स्रे Cb.
4) ज्ञानिमालिका K. ज्ञातीमालिका B.
5) A. W. add सौगन्धिक.
6) All but O. add सर्वाणि च विन्दति.
7) गवाज्ञ A. K. W. गवेडक B. Cb.
8) Left out in K.
9) A. W. add सतां गंधां विंदति.
10) पारिपात्र A. W.
11) B. Cb. adds गंधान्घ्रायति.
12) म Cb. K.

गन्धान्घ्रायति। दिव्यानामगरुचूर्णचन्दनचूर्णानां गन्धान्घ्रायति। दिव्यानां च नानाविधानां पुष्पविकृतिशतसहस्राणां[1] गन्धान्घ्रायति। नामानि चैषां[2] संजानीते। देवपुत्रात्मभावगन्धान्घ्रायति[3]। तद्यथा शक्रस्य देवानामिन्द्रस्यात्मभावगन्धं घ्रायति। तं च जानीते यदि वा वैजयन्ते प्रासादे क्रीडन्तं रममाणं[4] परिचारयन्तं यदि वा सुधर्मायां देवसभायां देवानां त्रायस्त्रिंशानां[5] धर्मं देशयन्तं यदि वोद्यानभूमौ निर्यान्तं क्रीडनाय। अन्येषां च देवपुत्राणां पृथक्पृथगात्मभावगन्धान्घ्रायति। देवकन्यानामपि देववधूनामप्यात्मभावगन्धान्घ्रायति। देवकुमाराणामप्यात्मभावगन्धान्घ्रायति। देवकुमारिकाणामप्यात्मभावगन्धान्घ्रायति[6]। न च तैर्गन्धैः संक्रियते। अनेन पर्यायेण यावद्भवाग्रोपपन्नानामपि सत्त्वानामात्मभावगन्धान्घ्रायति। ब्रह्मकायिकानामपि देवपुत्राणां महाब्रह्मणामपि[8] चात्मभावगन्धान्घ्रायति। अनेन पर्यायेण सर्वदेवनिकायानामप्यात्मभावगन्धान्घ्रायति[9]। श्रावकप्रत्येकबुद्धबोधिसत्त्वतथागतात्मभावगन्धान्घ्रायति। तथागतानामपि गन्धान्घ्रायति। यस्मिंश्च (स्थाने) ते तथागता अर्हन्तः सम्यक्संबुद्धा विहरन्ति तच्च प्रजानाति। न चास्य तद्घ्राणेन्द्रियं[10] तैस्तैर्विविधैर्गन्धैः प्रतिहन्यते नोपहन्यते न संपीड्यत आकाङ्क्षमाणश्च तांस्तान्गन्धान्परेषामपि व्याकरोति न चास्य स्मृतिरुपहन्यते॥

1) पुष्पाणां K.
2) नामापि तेषां Cb.
3) देवपुत्रस्या A. W.
4) रममाणं B. Cb. W.
5) त्र Cb. K. W.
6) कुमारीणा K.
7) This sentence in left out in A. W.*
8) ह्मा K.
9) द्य in K. only.
10) तं घ्रा A. Cb. K. W. तत्र घ्रा B.

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

घ्राणेन्द्रियं तस्य विशुद्ध भोति विविधांश्च गन्धान्वकु घ्रायते ऽसौ ।
ये लोकधातौ हि इमस्मि सर्वे सुगन्धदुर्गन्ध भवन्ति केचित् ॥ २२ ॥
ज्ञातीय गन्धो अथ मल्लिकाया[1] तमालपत्रस्य च चन्दनस्य ।
तगरस्य गन्धो अगरूण्य[2] चापि विविधान पुष्पाण फलान चापि ॥ २३ ॥
सत्त्वान गन्धान्पि तथैव ज्ञानति नराण नारीण च दूरत स्थितः ।
कुमारकाणां च कुमारिकाणां गन्धेन सो ज्ञानति तेष स्थानं ॥ २४ ॥
राज्ञां पि सो ज्ञानति चक्रवर्तिनां बलचक्रवर्तीनथ[3] मण्डलीनाम् ।
कुमारकामात्य तथैव तेषां गन्धेन चान्तःपुर सर्व ज्ञानति ॥ २५ ॥
परिभोगरत्नानि बहुविधानि कुप्यानि भूमौ निक्षितानि[4] यानि ।
स्त्रीरत्नभूतानि[5] भवन्ति यापि गन्धेन सो ज्ञानति बोधिसत्त्वः ॥ २६ ॥
तेषां च या[6] आभरणा भवन्ति कार्यास्मि आमुक्त[6] विचित्ररूपा[6] ।
वस्त्रं च माल्यं च विलेपनं च गन्धेन सो ज्ञानति बोधिसत्त्वः ॥ २७ ॥
स्थितां निषण्णां शयितां तथैव क्रीडारतिं ऋद्धिबलं च सर्वम् ।
सो ज्ञानती[7] घ्राणबलेन धीरो यो धारयेत्सूत्रमिदं वरिष्ठम् ॥ २८ ॥

---

1) मालि B. K.

2) स्य A.

3) Skr. र्तिनामत्र.

4) हि स्थितानि C. A. गतानि भूमोय स्थितानि O.

5) हि B. K. W. अन्ये रतनभ्रेन चापि O. ये हि for यापि is the reading of the other MSS.

6) ये क्षा and आवद्ध O. ये घा, and आमुक्ति and पा: the rest.

7) ति A. ते O. The lengthening not necessary.

सुगन्धतैलान तथैव गन्धान्नानाविधान्पुष्पफलान गन्धान् ।
सकृत्स्थितो ज्ञानति घ्रायते च अमुकस्मि देशस्मि इमस्मि गन्धान्[1] ॥ २९ ॥
ये पर्वतानां विवरान्तरेषु बहु चन्दना पुष्पित तत्र सन्ति ।
ये चापि तस्मिन्निवसन्ति सत्त्वाः सर्वेष गन्धेन विदुर्विजानति[3] ॥ ३० ॥
ये चक्रवाडस्य भवन्ति पार्श्वे ये सागरस्य निवसन्ति मध्ये ।
पृथिवीय ये मध्ये[4] वसन्ति सत्त्वाः सर्वान्स गन्धेन विदुर्विजानति[3] ॥ ३१ ॥
सुरांश्च जानाति तथासुरांश्च अथासुराणा कन्याश्च विजानते ऽसौ[5] ।
अथासुराणा क्रीडाश्च रतिं च जानति[3] घ्राणस्य तस्येदृशकं बलं हि ॥ ३२ ॥
अटवीषु ये केचि चतुष्पदास्ति सिंहाश्च व्याघ्रास्तथ हस्तिनागाः ।
महिषा गवा ये गवयश्च तत्र[6] घ्राणेन सो ज्ञानति तेष वासम् ॥ ३३ ॥
स्त्रियश्च या गुर्विणका भवन्ति कुमारकां वापि कुमारिकां वा ।
धारेन्ति कुक्षौ हि[7] किलान्तकाया गन्धेन सो ज्ञानति यं तहिं स्यात् ॥ ३४ ॥
आपन्नसत्त्वां[8][9] पि विजानते ऽसौ विनाशधर्मां पि विजानते ऽसौ ।
इयं पि नारी व्यपनीतदुःखा प्रसविष्यते पुण्यमयं[10] कुमारम् ॥ ३५ ॥

---

1) बुद्धाः for गन्धान् in K.

2) तत्र B. Ca. K.

3) ते B. Ca. K.

4) मध्ये च K.

5) तथा प्रजानति O.

6) महिषाश्च गावस्तथ वत्सकाश्च O.

7) कुक्षौ O.

8) स A. B. W. प Ca. K.

9) त्वा A. B. Ca. W. त्वां K. त्वा न O.

10) बलं K. फलं O.

पुरुषाणभिप्रायु बकुं विज्ञानते अभिप्रायगन्धं च तथैव घ्रायते ।
रक्तान दुष्टान तथैव मक्षिणां उपशान्तचित्तान च गन्ध घ्रायते ॥ ३६ ॥
पृथिवीय ये चापि निधान सन्ति धनं हिरण्यं च सुवर्णरूप्यम्[1] ।
मञ्जूष लोकी च तथा सुवर्णा[2] गन्धेन सो घ्रायति बोधिसत्त्वः ॥ ३७ ॥
कारार्धकारान्मणिमुक्तिकाश्च अनर्घप्राप्ता विविधा च रत्ना[3] ।
गन्धेन सो जानति तानि सर्वा[4] अनर्घनामं द्युतिसंस्थितं च ॥ ३८ ॥
उपरिं च देवेषु तथैव पुष्पा मन्दारवश्चिव मञ्जूषकांश्च ।
या पारिजातस्य[5] च सन्ति पुष्पा इह स्थितो घ्रायति ता स धीरः[6] ॥ ३९ ॥
विमान ये यादृशकाश्च यस्य उदारकीनास्तथ मध्यमाश्च ।
विचित्ररूपाश्च भवन्ति यत्र इह स्थिता घ्राणबलेन घ्रायति ॥ ४० ॥
उद्यानभूमिं च तथा प्रजानते सुधर्मधर्माण स वेदयन्ते[7] ।
प्रासादश्रेष्ठे च तथा प्रजानते ये चो रमन्ते तत्रि देवपुत्राः ॥ ४१ ॥
इह स्थितो घ्रायति गन्धु[8] तेषां गन्धेन सो जानति[9] देवपुत्रान् ।
यो यत्र कर्म कुरुते स्थितो वा शृणोति वा गच्छति यत्र वापि ॥ ४२ ॥
या देवकन्या बकुपुष्पमण्डिता ग्रामुक्तमाल्याभरणा[10] अलंकृताः[11] ।
रमन्ति गच्छन्ति च यत्र यत्र गन्धेन सो जानति बोधिसत्त्वः ॥ ४३ ॥

1) सुवर्ण च हिरण्य Ca. K.
2) Certainly a misreading; O. has विविधाश्च (sic!) रत्ना; equally bad.
3) अनर्घमूल्यं विविधं च रत्नम् O. °नान्विविधांश्च रत्नान् the rest.
4) All but O. तांश्च सर्वान्.
5) यात्र B. Ca. K.
6) वो A. K. W. धी Ca. Cb.
7) सुधर्मदेवासनि वै K. Reading of O. unknown.
8) धं A. B. Cb. W. धु K.
9) गन्धेन जानाति च A. W.
10) चैला O.
11) स्वलं O. better.

यावद्भवाग्रादुपरिं च देवा ब्रह्मा महाब्रह्मविमानचारिणः ।
तांश्चापि गन्धेन तत्रि प्रजानते स्थितांश्च ध्याने अथ व्युत्थितान्वा[1] ॥ ४४ ॥
आभास्वरांश्चानति[2] देवपुत्रान् च्युतोपपन्नांश्च अपूर्वकांश्च ।
घ्राणेन्द्रियं[3] ईदृश[4] तस्य भोति यो बोधिसत्त्वो इमु[5] सूत्र धारयेत् ॥ ४५ ॥
ये केचि भिक्षू[6] सुगतस्य शासने अभियुक्तरूपा स्थित चङ्क्रमेषु ।
उद्देशस्वाध्यायरताश्च भिक्षवो[7] सर्वान्[8] हि सो जानति बोधिसत्त्वः ॥ ४६ ॥
ये श्रावका भोन्ति जिनस्य पुत्रा विहरन्ति केचित्[9] सद वृक्षमूले ।
गन्धेन सर्वान्विदु जानते तान् अमुत्र भिक्षु अमुको स्थितो ति ॥ ४७ ॥
ये बोधिसत्त्वाः स्मृतिमन्त ध्यायिनो उद्देशस्वाध्यायरताश्च ये सदा ।
पर्षासु धर्मं च प्रकाशयन्ति गन्धेन ताञ्जानति बोधिसत्त्वः ॥ ४८ ॥
यस्यां दिशायां सुगतो महामुनिर्धर्मं प्रकाशेति[10] हितानुकम्पकः ।
पुरस्कृतः श्रावकसंघमध्ये गन्धेन सो[11] जानति लोकनाथम्[12] ॥ ४९ ॥

1) उत्थितां वा Cb.
2) रां ज्ञा A. B. W. रा ज्ञा K. Cb.
3) यमी K. badly.
4) श तस्य K. O. शमस्य the rest.
5) इद् O.
6) All but O. भिक्षु केचित्सु.
7) Sic O. भिक्षून् the others.
8) सर्वा हि A. सर्वांश्च B. Ca. Cb. तान्सर्वान् O.
9) तेषां B. एकासनि O.
10) प्रदेशेन्ति K.
11) तं B. तां W. सो K.
12) थः A. W. थं B. Cb. K.

ये चापि सत्त्वा स्य शृणोत्ति धर्मं श्रुत्वा च ये प्रीतमना[1] भवन्ति ।
इक्ष स्थितो जानति बोधिसत्त्वो जिनस्य पर्षामपि[2] तत्र सर्वाम्[3] ॥ ५० ॥
एतादृशं घ्राणबलं स्य भोति न च ताव दिव्यं भवते स्य घ्राणम् ।
पूर्वंगमं तस्य तु एत[4] भोति दिव्यस्य घ्राणस्य अनास्रवस्य[5] ॥ ५१ ॥

पुनरपरं सततसमिताभियुक्त स कुलपुत्रो वा कुलदुहिता वेमं धर्मपर्यायं धार्यमाणो देशयमानः प्रकाशयमानो लिखमानस्तैर्द्वादशभिर्जिह्वागुणशतैः[6] समन्वागतं जिह्वेन्द्रियं प्रतिलप्स्यते । स तथारूपेण जिह्वेन्द्रियेण यान्यान्यत्रसानास्वादयति यान्यान्यत्रसाञ्जिह्वेन्द्रिय उपनिक्षेप्स्यति[7] सर्वे ते दिव्यं महारसं मोदयन्ते[8] । तथा चास्वादयिष्यति यथा न कंचिद्रसममनआपमास्वादयिष्यति[9][10] । ये ऽप्यमनआपा[11] रसास्ते ऽपि तस्य जिह्वेन्द्रिये समुपनिक्षिप्ता दिव्यं रसं मोदयन्ते[12] । यं च धर्मं व्याकरिष्यति पर्षन्मध्यगतस्तेन[13][14] तस्य ते

1) All ति.
2) पर्षानपि K.
3) सर्वान् K. पर्षाम our reading for पर्षा ग्र and परिषा ग्र. The reading of the MSS. may be retained if we read सर्वा, i. e. Skr. सर्वाः.
4) एन Cb. एत K. एनु Ca. B.
5) MSS. add इति.
6) य added in Cb. The passage different in O.
7) From यान्य° (after °येण) till °त्रसाञ् (before जिह्वेन्द्रिये) left out in Cb., which, however, reads यानि रसाणि जिह्वेन्द्रिये. Other MSS. add यान्यान्यत्रसान्द्रव्यति. O. has यद्येदेव रसं सायिष्यति यद्यद्रसं जि.
8) रसं वेदितव्यं added in A. Ca. W.
9) किं Cb. K.
10) द्रसममनापं स्वा A. K. द्रसमनायं स्वा B. W. न्वममानमास्वा Cb.
11) प्यमनापा A. B. W. प्यमनग्रात्म Cb. प्यमनग्राम K.
12) महारसं O
13) Left out in W.
14) Left out in K.

सत्त्वाः प्रीणितेन्द्रिया भविष्यन्ति तुष्टाः परमतुष्टः[1] प्रामोद्यजाताः । मधुरश्चास्य वल्गुमनोज्ञस्वरो गम्भीरो निश्चरिष्यति हृदयंगमः प्रेमणीयः । तेनास्य ते सत्त्वास्तुष्टा उदग्रचित्ता भविष्यन्ति । येषां च धर्मं देशयिष्यति ते चास्य मधुरनिर्घोषं श्रुत्वा वल्गुमनोज्ञं देवा अप्युपसंक्रमितव्यं मंस्यन्ते दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय[2] च । देवपुत्रा अपि देवकन्या अप्युपसंक्रमितव्यं मंस्यन्ते दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । शक्रा अपि ब्रह्माणो ऽपि ब्रह्मकायिका अपि देवपुत्रा उपसंक्रमितव्यं मंस्यन्ते दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । नागा नागकन्या अप्युपसंक्रमितव्यं मंस्यन्ते दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । असुरा असुरकन्या अप्युपसंक्रमितव्यं मंस्यन्ते दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । गरुडा गरुडकन्या अप्युपसंक्रमितव्यं मंस्यन्ते दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । किंनराः किंनरकन्या अपि महोरगा महोरगकन्या अपि यक्षा यक्षकन्या अपि पिशाचाः पिशाचकन्या अप्युपसंक्रमितव्यं मंस्यन्ते दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । ते चास्य सत्कारं करिष्यन्ति गुरुकारं माननां पूजनामर्चनामपचायनां[3] करिष्यन्ति । भिक्षुभिक्षुण्युपासकोपासिका अपि दर्शनकामा भविष्यन्ति । राज्ञो ऽपि[4] राजपुत्रा अपि राज्ञामात्या अपि राज्ञमहामात्रा[5] अपि दर्शनकामा भविष्यन्ति । बलचक्रवर्तिनो ऽपि राज्ञश्चक्रवर्तिनो ऽपि[6] सप्तरत्नसमन्वागताः सकुमाराः सामात्याः सान्तःपुरपरिवारा दर्शनकामा भविष्यन्ति सत्कारार्थिनः । तावन्मधुरं स धर्मभाणको धर्मं भाषिष्यते यथाभूतं[7][8] यथोक्तं तथागतेन । अन्ये ऽपि

1) परि A. K. W.
2) च left out in Cb. K.
3) अर्चनामपचायनां left out in A. K. W. O.
4) राज्ञो ऽपि left out in K.
5) Sic O. त्या the rest.
6) All but O. add राज्ञः.
7) सद्ध A. B. Cb. W. O. स ध K.
8) त A. B. Cb.

ब्राह्मणगृहपतयो नैगमज्ञानपदास्तस्य धर्मभाणकस्य सततसमितं समनुबद्धा भविष्यन्ति यावदायुष्पर्यवसानम्[1]। तथागतश्रावका अप्यस्य दर्शनकामा भविष्यन्ति। प्रत्येकबुद्धा अप्यस्य दर्शनकामा भविष्यन्ति। बुद्धा अप्यस्य भगवन्तो दर्शनकामा भविष्यन्ति। यस्यां च दिशि स कुलपुत्रो वा कुलदुहिता वा विहरि[2]ष्यति तस्यां दिशि तथागताभिमुखं धर्मं देशयिष्यति बुद्धधर्माणां च भाजनभूतो भविष्यति। एवं मनोज्ञस्तस्य गम्भीरो धर्मशब्दो निश्चरि[3]ष्यति[4]॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

जिह्वेन्द्रियं तस्य विशिष्ट[5] भोति न ज्ञातु क्षीनं रस स्वादयेत।
निक्षिप्तमात्राश्च भवन्ति दिव्या[6] रसेन दिव्येन समन्विताश्च॥ ५२॥
वल्गुस्वरां मधुर प्रभाषते गिरां श्रवणीयमिष्टां च मनोरमां च।
वर्षाय मध्यस्मि कृ प्रेमणीयं गम्भीरघोषं च सदा प्रभाषते[7]॥ ५३॥
यश्चापि धर्मं शृणुते अस्य भाषतो दृष्टान्तकोटीनयुतैरनेकैः[8]।
प्रामोद्य तत्रापि जनेति सो अयं पूजां च तस्य कुरुते अप्रमेयाम्॥ ५४॥
देवा पि नागासुरगुह्यकाश्च द्रष्टुं तमिच्छन्ति च नित्यकालम्।
शृणोति[9] धर्मं च सगौरवाश्च इमे गुणास्तस्य भवन्ति सर्वे॥ ५५॥

1) नात् Cb.
2) भवि Cb. विहर K.
3) नो O.
4) निश्चारयतीति W. All but O. add इति.
5) विशुद्ध O.
6) व्याः A. व्या B. W. O. व्यो Cb. व्यं K.
7) ति A. K. W. ते B. Cb. प्रमुंचति O.
8) कोतुनयुतान कोटिभिः O.
9) णो B. Cb. K. धर्मं च शृणोति O.

आकाङ्क्षमाण इमं[1] लोकधातुं स्वरेण सर्वामभिविज्ञापेया[2]।
स्निग्धं[3] स्वरो अस्य मधुरश्च भोति गम्भीर वल्गुश्च सुप्रेमणीयः॥ ५६॥
राज्ञान ये क्षितिपति चक्रवर्तिनः पूजार्थिकास्तस्युपसंक्रमन्ति।
सपुत्रदारा करियाण अञ्जलिं शृणोति[4] धर्मं स्य च[5] नित्यकालम्॥ ५७॥
यक्षाण चो भोति सदा पुरस्कृतो नागान गन्धर्वगणान चैव।
पिशाचकानां च पिशाचिकानां सुसत्कृतो मानितु पूजितश्च॥ ५८॥
ब्रह्मा पि तस्य[6] वशवर्ति भोति मरुेश्वरो ईश्वर देवपुत्रः।
शक्रस्तथान्ये अपि च देवपुत्रा बहुदेवकन्याश्युपसंक्रमन्ति॥ ५९॥
बुद्धाश्च ये लोकहितानुकम्पकाः सश्रावकास्तस्य निशाम्य घोषम्[7]।
करोन्ति[8] रक्षां मुखदर्शनाय तुष्टाश्च भोन्ति[9] ब्रुवतो अस्य धर्मम्[10]॥ ६०॥

पुनरपरं सततसमिताभियुक्त स बोधिसत्त्वो महासत्त्व इमं धर्मपर्यायं धारयमाणो वा वाचयमानो वा प्रकाशयमानो वा देशयमानो वा लिखमानो[11] वाष्टौ कायगुणशतानि प्रतिलप्स्यति[12]। तस्य कायः शुद्धः परिशुद्धो वैडूर्यपरिशुद्धच्छविवर्णो भविष्यति प्रियद-

1) णश्चिम Cb. अयं (Skr. अयं) for इम O. preferable.
2) या A. K. W. म्या B. याः Cb. ति O.
3) तिष्ठः B.
4) All but B. O. णोति.
5) धर्मोस्य तु O. धर्म and धर्मं च स the rest.
6) तस्यो B.
7) षां A. षं B. Cb. O. षाम् K. षान् W.
8) कुर्वन्ति O. करोति the others.
9) All but O. भोन्ती.
10) MSS. add इति, O. excepted.
11) लिखि K. लिखिष्यति O. लिखापयमानो the rest.
12) ते B. Cb. Wanting in O.

र्शनः सत्त्वानाम्। स तस्मिन्नात्मभावे परिशुद्धे सर्वं त्रिसाहस्रमहासाहस्रंलोकधातुं[1][2] द्रक्ष्यति। ये च त्रिसाहस्रमहासाहस्रे[3] लोकधातौ सत्त्वाश्चयवन्त्युपपद्यन्ते[4] च हीनाः प्रणीताश्च सुवर्णा दुर्वर्णाः सुगतौ दुर्गतौ ये च चक्रवाडमहाचक्रवाडेषु मेरुसुमेरुषु[5] च पर्वतराजेषु सत्त्वाः प्रतिवसन्ति ये चाधस्ताद्वीच्यावूर्ध्वं[6] च यावद्भवाग्रं सत्त्वाः प्रतिवसन्ति तान्सर्वान्स्व आत्मभावे द्रक्ष्यति। ये चापि केचिद्स्मिंस्त्रिसाहस्रमहासाहस्रे[7] लोकधातौ श्रावका वा प्रत्येकबुद्धा वा बोधिसत्त्वा वा तथागता वा प्रतिवसन्ति यं च ते तथागता धर्मं देशयन्ति ये च सत्त्वास्तांस्तथागतान्पर्युपासते सर्वेषां तेषां सत्त्वानामात्मभावप्रतिलम्भात्स्व आत्मभावे द्रक्ष्यति। तत्कस्य हेतोः। यथापीदं परिशुद्धत्वादात्मभावस्येति॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

परिशुद्ध तस्य[8] भवतेत्मभावो यथापि वैडूर्यमयो विशुद्धः।
सत्त्वान नित्यं प्रियदर्शनश्च यः सूत्र धारेति इदं उदारम्॥ ६१॥
आदर्शपृष्ठे[9] यथ बिम्बु पश्येत् लोको स्य काये अथु दृश्यते तथा।
स्वयंभु सो पश्यति नान्यसत्त्वान्परिशुद्धि[10] कायस्यियमेवंरूपा[11][12]॥ ६२॥

1) स्र A. Cb. K. स्रं B. स्रे W.
2) तौ A. K. W. तुं B. Cb.
3) स्र A. B. K. W. स्रेयां Cb. (r. स्रायां).
4) न्ते उ in all MSS. but O.
5) सुमेरुमहासुमेरुषु B. Cb.
6) वीचिपूर्वं A. K. W. वाच्याद्यूर्द्धं च B. Cb.
7) स्र A. W. स्रे B. K. स्रेयां Cb.
8) तस्यो Cb.
9) आदर्शस्य A.
10) शुद्धि our conjecture for शुद्ध of the MSS.
11) कायस्यियमे O. कायेस्मिममे the others.
12) रूपां A. W. पा B. K. पाः Cb. पम O.

ये लोकधातौ हि इहास्ति[1] सत्त्वा मनुष्यदेवासुरगुह्यका वा।
नरकेषु प्रेतेषु तिरश्चयोनिषु[2] प्रतिबिम्ब[3] संदृश्यति तत्र[4] काये॥ ६३॥
विमान देवान भवाग्र यावच्चक्रं पि च[5] पर्वत चक्रवाडम्[6]।
किमवान्सुमेरुश्च[7] महांश्च मेरुः[8] कायस्मि[9] दृश्यन्तिमि सर्वथैव[10]॥ ६४॥
बुद्धां पि सो पश्यति आत्मभावे सश्रावकान्बुद्धसुतांस्तथान्यान्। 5
ये बोधिसत्त्वा विकुरन्ति चैकका गणे च ये धर्म प्रकाशयन्ति॥ ६५॥
एतादृशो कायविशुद्धि तस्य यहि दृश्यते सर्विय[11] लोकधातुः।
न च ताव सो दिव्य तं[12] प्रापुणोति प्रकृतोय कायस्ययमीदृशो भवेत[13]॥ ६६॥

पुनरपरं सततसमिताभियुक्तास्य[14] बोधिसत्त्वस्य महासत्त्वस्य तथागते[15] परिनिर्वृत इमं[16] धर्मपर्यायं धारयतो देशयतः संप्रकाशयतो लिखतो[17][18] वाचयतस्तैर्द्दादशभिर्मनस्का- 10

1) धातूय O.
2) Sic O. योनौ the others.
3) म्बु A. W.
4) दृश्यन्ति हि तस्य O.
5) चो A. W.
6) डां A. W. डं B. Cb. K.
7) रुं A. W. रु B. Cb. K.
8) रुं A. W. रु B. रुः Cb. K.
9) कायो स्य Cb.
10) न्ति तथैव सर्वे B. K.
11) हि B.
12) I. e. Skr. दिव्यां ताम्.
13) MSS. have भवेदिति.
14) क्तास्य A. W. क्तस्य B. Cb. K.
15) तस्य B. Cb. K.
16) तस्येमं B. Cb. K.
17) सं in Cb. O. only.
18) लिखितो A. B. W. K. लिखिष्यति O. लिखापयतो in other MSS.

[1]गुणशतैः समन्वागतं मनइन्द्रियं परिशुद्धं भविष्यति । स तेन परिशुद्धेन मनइन्द्रियेण यश्चैकगाथामप्यन्यशः श्रोष्यति तस्य बह्वर्थमाज्ञास्यति । स तामवबुध्य[2] तन्निदानं मासमपि धर्मं देशयिष्यति [3]चतुर्मासमपि संवत्सरमपि धर्मं देशयिष्यति । यं च धर्मं भाषिष्यति सा अस्य स्मृतो न स संप्रमोषं[4] यास्यति । ये केचिल्लौकिका लोकव्यवहारा भाषाणि वा मन्त्रा वा सर्वांस्तान्धर्मनयेन संस्यन्दयिष्यति[5] । यावन्तश्च कोचित्तिसाहस्रमहासाहस्रायां[6] लोकधातौ षट्सु गतिषूपपन्नाः सत्त्वाः संसरन्ति सर्वेषां तेषां सत्त्वानां चित्तचरितविस्पन्दितानि ज्ञास्यति । इञ्जितमन्यितप्रपञ्चितानि[7][8][9] ज्ञास्यति प्रविचिनिष्यति[10] । अप्रतिलब्धे च तावदार्यज्ञान एवंरूपं चास्य मनइन्द्रियं परिशुद्धं भविष्यति[11] । यां यां च धर्मनिरुक्तिमनुविचित्य धर्मं देशयिष्यति सर्वं तद्भूतं[12] देशयिष्यति[13] । सर्वं तत्तथागतभाषितं सर्वं पूर्वजिनसूत्रपर्यायनिर्दिष्टं भाषति[14] ।

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

1) मनस्कर्म K. O.

2) तां A. W. ति B. Cb. तं K. द्वा तंनिदानं तदारम्बणं O.

3) K. adds स.

4) Sic O.; the others leave out सं.

5) संदर्श K. Reading of O. unknown.

6) स्र A. W. स्रे B. O. स्रां Cb. स्र्या K.

7) इंज्ञित in all MSS.

8) मन्यित A. B. K. मत्रित Cb. मुत्पित W. A break in O.

9) प्रपंचता A. प्रपंचितां W. प्रपञ्चितानि B. K. प्रमुंचितानि Cb.

10) प्रविचेष्यंति Cb.

11) भवति B. K.

12) तं भूतं B. Cb. K. तद्भूतं A. W.

13) देशयति B. Cb. K.

14) भाषतीति B. Cb. K. भाषति O. भाषिष्यतीति A. Ca. W.

मनइन्द्रियं तस्य विशुद्धं भोति प्रभास्वरं प्रह्लमनाविलं च ।
सो तेन धर्मान्विविधान्प्रजानति[1] क्षीनानथोत्कृष्ट तथैव मध्यमान् ॥ ६७ ॥
एकामपि[2] गाथ शृणित्व धीरो अर्थं बहुं जानति तस्य तत्र ।
सकृतं च भूतं च सदा प्रभाषते[3] मासान्पि[4] चत्वारि अथापि वर्षम् ॥ ६८ ॥
ये चापि सत्त्वा इह लोकधातौ अभ्यन्तरे बाह्यिरिये वसन्ति ।
देवा मनुष्यासुरगुह्यकाश्च नागाश्च ये चापि तिरश्चयोनिषु[5] ॥ ६९ ॥
षट्सु गतीषु[6] निवसन्ति सत्त्वा विचित्तितं तेष भवेत यं[7] च ।
एकक्षणे सर्वि[8] विदुर्विजानते धारेत्व सूत्रं इम आनुशंसाः ॥ ७० ॥
यं चापि बुद्धः शतपुण्यलक्षणो धर्मं प्रकाशेदिद् सर्वलोके ।
तस्यापि शब्दं शृणुते विशुद्धं यं चापि सो भाषति गृह्यते तत्[12] ॥ ७१ ॥
बहून्विचित्रेति[13] च अग्रधर्मान्बहूंश्च सो भाषति नित्यकालम् ।
न चास्य संमोहु[14] कदाचि भोति धारेत्व[15] सूत्रं इम आनुशंसाः ॥ ७२ ॥

1) ति K. O. तो the rest.

2) पी A. पि B. Cb. K. W. O.

3) ती B. ति K. O. more original.

4) सां A. B. K. W. सं Ca. षा Cb. सो O.

5) Sic O.; योनौ the others.

6) षू K. W.

7) यच्चा A. W. यच्च B. य च Cb. यच्च K. Prākṛ. for यच्च.

8) र्व Cb. K.

9) रे B. Cb. K. रि A. Ca. W. O.

10) सा W.

11) य A.

12) तत् A. Cb. W. तं B. तां K.

13) त्यपि A. त्रेति B. Cb. K. त्रेपि W.

14) क्ष Cb. K.

15) रेति A. W. रेत्व B. रेत Cb. रेतु K.

संधिं विसंधिं च विजानते ऽसौ सर्वेषु धर्मेषु विलक्षणानि ।
प्रजानते ग्रर्थ निरुक्तपथं[1] यथा च तं जानति भाषते तथा ॥ ७३ ॥
यं भाषितं भोति कृ[2] दीर्घरात्रं पूर्वेकृि[3] लोकाचरियेकृि[4] सूत्रम् ।
तं धर्म सो भाषति नित्यकालं ग्रसंत्रसंत्तो[5] परिषाय मध्ये ॥ ७४ ॥
मनइन्द्रियं ईदृशमस्य[6] भोति धारेत्व सूत्रं इमु वाचयित्वा ।
न च ताव साङ्गं लभते कृ ज्ञानं पूर्वगमं तस्य इमं तु भोति ॥ ७५ ॥
ग्राचार्यभूमी कृि स्थितश्च भोति सर्वेष सत्त्वान कथेय धर्मम् ।
निरुक्तिकोटीकुशलश्च भोति इमु धारयत्तो सुगतस्य सूत्रम्[7] ॥ ७६ ॥

॥ इति ग्रोसद्धर्मपुण्डरीके धर्मपर्याये धर्मभाणकानुशंसापरिवर्तो[8] नामाष्टादशमः[9] ॥

1) च्च A. W. च्च K.
2) कृ A. B. W. कृि Cb. च K.
3) पूर्वेण K.
4) ते K.
5) ग्रसंत्तसक्तो A. ग्रसंत्रसत्तो B. ग्रसंतसंतो Cb. ग्रसंतसंतो K. ग्रथ सत्तसंत्तो W.
6) त Cb. K.
7) MSS. add इति.
8) इति सद्धर्मपुंडरीके षडायतनविशुध्यानुसंसापरिवर्तो A.
इति ग्रोसद्धर्म° °ध्याश्रनु° W.
ग्रार्यसद्धर्मपुण्डरीके धर्मपर्यायमहाविपुल्यसूत्रराजे धर्मभाणकानुसंसापरिवर्तो B.
धर्मभाणकानुसंसापरिवर्तो Ca. K.
°वर्त Cb.
9) ऊनविंशतिमः Cb.

XIX.

ग्रथ खलु भगवान्महास्थामप्राप्तं बोधिसत्त्वं महासत्त्वमामन्त्रयते स्म[1] । ग्रनेनापि तावन्महास्थामप्राप्त पर्यायेणैवं वेदितव्यं यथा यं[2] इमेवंरूपं धर्मपर्यायं प्रतिक्षेप्स्यन्ति[3] । एवंरूपांश्च[4] सूत्रान्तधारकांश्च[5] भिक्षुभिक्षुण्युपासकोपासिका ग्राक्रोशिष्यन्ति[6] परिभाषिष्यन्ति ग्रसत्यया परुषया वाचा समुदाचरिष्यन्ति तेषामेवमनिष्टो विपाको भविष्यति यो न शक्यं वाचा परिकीर्तयितुम्[7] । ये चेममेवंरूपं सूत्रान्तं[8] धारयिष्यन्ति[9] वाचयिष्यन्ति[10] देशयिष्यन्ति[11] पर्यवाप्स्यन्ति परेभ्यश्च[12] विस्तरेण संप्रकाशयिष्यन्ति तेषामेवमिष्टो[13] विपाको भविष्यति यादृशो मया पूर्वं परिकीर्तित एवंरूपां च चक्षुःश्रोत्रघ्राणजिह्वाकायमनःपरिशुद्धिमधिगमिष्यन्ति ॥

भूतपूर्वं महास्थामप्राप्तातीते ऽध्वन्यसंख्येयैः कल्पैरसंख्येयतरैरप्रमेयैरचिन्त्यैस्तेभ्यः परेण परतरेण यदासीत्तेन कालेन तेन समयेन भीष्मगर्जितस्वरराजो[14] नाम

1) यामास A. K.
2) यं इ K. यद् left out in Cb. W.
3) ति A. B. W. त्ति K. तिपिस्यन्ति Cb.
4) पाश्च A. B. K. W. प Cb.
5) कांश्च A. Cb. K. W. का B.
6) का ग्रा A. Cb. K. W. कानां B. कान Ca.
7) कीर्तितुं A. W.
8) धर्मपर्यायं Cb.
9) धार left out in Cb.
10) Left out in A.
11) This word is put after पर्यवा° in B. Cb. K.
12) परेषाञ्च B. K.
13) व इ Cb. K.
14) A. adds निर्घोष. W. adds घोष.

तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उदपादि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्विनिर्भोगे कल्पे महासंभवायां[1] लोकधातौ । स खलु पुनर्महास्थामप्राप्त भगवान्भीष्मगर्जितस्वरराजस्तथागतो[2][3] ऽर्हन्सम्यक्संबुद्धस्तस्यां[4] महासंभावायां[5] लोकधातौ सदेवमानुषासुरस्य लोकस्य पुरतो धर्मं देशयति स्म । यदिदं श्रावकाणां चतुरार्यसत्यसंप्रयुक्तं धर्मं देशयति स्म जातिजराव्याधि[6]मरणशोकपरिदेवदुःखदौर्मनस्योपायासंसमतिक्रमाय निर्वाणपर्यवसानं प्रतीत्यसमुत्पादप्रवृत्तिम्[7] । बोधिसत्त्वानां[8] महासत्त्वानां षट्पारमिताप्रतिसंयुक्तानामनुत्तरां सम्यक्संबोधिमारभ्य तथागतज्ञानदर्शनपर्यवसानं धर्मं देशयति स्म । तस्य खलु पुनर्महास्थामप्राप्त भगवतो भीष्मगर्जितस्वरराज[9][10]स्य तथागतस्यार्हतः सम्यक्संबुद्धस्य चत्वारिंशद्गङ्गानदीवालिकासमानि[11] कल्पकोटीनयुतशतसहस्राण्यायुष्प्रमाणमभूत् । परिनिर्वृतस्य च जम्बुद्वीपपरमाणुरजःसमानि कल्पकोटीनयुतशतसहस्राणि सद्धर्मः स्थितो ऽभूच्चतुर्द्वीपपरमाणुरजःसमानि[12] कल्पकोटीनयुतशतसहस्राणि सद्धर्मप्रतिरूपकः स्थितो ऽभूत् । तस्यां[13]

1) भावे B.
2) A. W. add घोष.
3) राजो तथा Cb. राजो नाम तथा K.
4) तस्मिं Ca. तस्यां वलायां Cb.
5) भवे B. Ca. महा left out in K.
6) व्याधि left out in K.
7) सा Cb. K. सानां O.
8) K. adds च.
9) A. adds निर्घोष. W. adds घोष.
10) Sic O.; ज्ञः the rest.
11) कोपमानि K.
12) A. K. W. add का. चतुर्द्वीपिकालोकधातुपरमाणुरजस O.
13) तस्मिन् B. Ca. तत्र O.

खलु पुनर्महास्थामप्राप्त महासंभवायां[1] लोकधातौ भगवतो भीष्मगर्जितस्वरराजस्य[2][3] तथागतस्यार्हतः सम्यक्संबुद्धस्य परिनिर्वृतस्य सद्धर्मप्रतिरूपके चान्तर्हिते ऽपरो ऽपि भीष्मगर्जितस्वरराज[4] एव तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उदपादि विद्याचरण[5]संपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्[6] । अनया महास्थामप्राप्त परंपरया तस्यां महासंभवायां[7] लोकधातौ भीष्मगर्जितस्वरराजनाम्नां तथागतानामर्हतां सम्यक्संबुद्धानां[8] विंशतिकोटीनयुतशतसहस्राण्यभूवन् । तत्र महास्थामप्राप्त यो ऽसौ तथागतः सर्वपूर्वको[9] ऽभूद्भीष्मगर्जितस्वरराज[10][11]ो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः[12] शास्ता देवानां च मनुष्याणां च बुद्धो भगवान् । तस्य भगवतः परिनिर्वृतस्य सद्धर्मे ऽन्तर्हिते[13] सद्धर्मप्रतिरूपके चान्तर्धीयमाने तस्मिञ्शासने ऽधिमानिकभिक्षवध्याक्रान्ते[14] सदापरिभूतो नाम बोधिसत्त्वो भिक्षुरभूत् । केन कारणेन महास्थामप्राप्त स बोधिसत्त्वो महासत्त्वः सदापरिभूत इत्युच्यते । स खलु पुनर्महास्थामप्राप्त बोधिसत्त्वो महासत्त्वो यं यमेव[15] पश्यति भिक्षुं वा

1) भवे B.
2) K. add तस्य.
3) A. W. add घोष. भीष्म for भीष्म O. So throughout.
4) A. W. add घोष.
5) From विद्या° till भगवान् left out in Cb.
6) From सुगतो till भगवान् left out in B. Ca. K.
7) तस्मिं °भवे A. B. W.
8) ती A. ति B. K. तिः Cb.
9) स च पौर्विको A. सर्वपूर्वको B. K. स च पूर्वको Cb.
10) A. adds घोष.
11) ज्ञा Cb. K. O.
12) त्तरपुरुष A. Ca. Cb. त्तरः पुरुष B. त्तरपुरुषः W.
13) र्मन्त A. W. र्मान्त B. Cb. र्मे न्त Ca. K.
14) भिक्षुभिरध्या K. भिक्षुभिस्तच्छासनमध्या O.
15) यद्यदेव B. यद्येवं Cb. यं O.

भिनुणीं वोपासकं वोपासिकां वा तं तमुपसंक्रम्यैवं वदति नाहमायुष्मन्तो युष्माकं[1] परिभवामि । अपरिभूता यूयम्[2] । तत्कस्य हेतोः । सर्वे हि भवन्तो बोधिसत्त्वचर्यां चरन्तु[3] । भविष्यथ यूयं तथागता अर्हन्तः सम्यक्संबुद्धा इति[4] । अनेन महास्थामप्राप्त पर्यायेण स[5] बोधिसत्त्वो महासत्त्वो भिनुभूतो नोद्देशं करोति न स्वाध्यायं करोति अन्यत्र यं यमेव पश्यति दूरगतमपि सर्वं तमुपसंक्रम्यैवं संश्रावयति भिनुं वा भिनुणीं वोपासकं वोपासिकां वा तं तमुपसंक्रम्यैवं वदति । नाहं भगिन्यो युष्माकं परिभवामि । अपरिभूता यूयम् । तत्कस्य हेतोः । सर्वा यूयं बोधिसत्त्वचर्यां चरध्वम्[6] भविष्यथ यूयं तथागता अर्हन्तः सम्यक्संबुद्धाः । यं यमेव महास्थामप्राप्त स बोधिसत्त्वो महासत्त्वस्तस्मिन्समये भिनुं वा भिनुणीं वोपासकं वोपासिकां वैवं संश्रावयति[7] । सर्वे[8] अस्य यद्भूयस्त्वेन[9] क्रुध्यन्ति व्यापद्यन्त्यप्रसादमुत्पादयन्त्याक्रोशन्ति परिभाषन्ते[10] । कुतो ऽयमपृष्टो भिनुरपरिभवचित्तमित्यस्माकमु[11]पदर्शयति । परिभूतमात्मानं करोति यदस्माकं[12] व्याकरोत्यनुत्तरायां सम्यक्संबोधौ अप्रत्तमनाकाङ्क्षितं च[13] । अथ खलु महास्थामप्राप्त तस्य बोधिसत्त्वस्य महासत्त्वस्य बहूनि वर्षाणि तथाक्रु-

1) तेषामु O.

2) नाहं युष्माकमावुसाको O. Certainly more original.

3) युष्मे मम O.

4) A. B. K. W. त्ति. Cb. तु यूयं बोधिसत्वचारिकां चरथ O.

5) In Cb. only.

6) चारिकां चरथ O.

7) A. W. K. add स्म.

8) सर्वस्य A. Cb. K. W. सर्वेस्य B. ते तस्य सर्वे O.

9) भूयेन O.

10) Sic Cb. त्ति O.

11) चित्तमुत्पादयन्ति अपरिभवचित्तमित्यस्माकमु B. चित्तमुत्पादयति अस्माकमु Cb. अपरिभवनचित्तता इत्यात्मनस्यो O.

12) स्मां B. K. W.

13) Left out in B. Cb.

श्यतः परिभाष्यमाणस्य[1] गच्छन्ति । न च कस्यचित्क्रुध्यति न व्यापादचित्तमुत्पादयति । ये चास्यैवं संश्रावयतो लोष्टं वा दण्डं[2] वा क्षिपन्ति स तेषां दूरत एव उच्चैःस्वरं कृत्वा संश्रावयति स्म[3] । नाहं युष्माकं[4] परिभवामीति । तस्य ताभिरभिमानिकभिनुभिनुणुपासकोपासिकाभिः[5] सततसमितं संश्राव्यमाणाभिः[6] सदापरिभूत इति नाम कृतमभूत्[7][8] ॥

तेन खलु पुनर्महास्थामप्राप्त सदापरिभूतेन बोधिसत्त्वेन महासत्त्वेन कालक्रियायां प्रत्युपस्थितायां मरणकालसमये प्रत्युपस्थिते ऽयं सद्धर्मपुण्डरीको धर्मपर्यायः श्रुतो ऽभूत् । तेन च भगवता भीष्मगर्जितस्वरराजेन[9] तथागतेनार्हता सम्यक्संबुद्धेनायं धर्मपर्यायो विंशतिभिर्गाथाविंशतिकोटीनयुतशतसहस्रैर्भाषितो ऽभूत् । स च सदापरिभूतो बोधिसत्त्वो महासत्त्वो मरणकालसमये प्रत्युपस्थिते ऽन्तरीक्षनिर्घोषादिमं धर्मपर्यायमश्रौषीत् । येन केनचिद्भाषितमन्तरीक्षान्निर्घोषं श्रुत्वेमं धर्मपर्यायमुद्गृहीतवानिमां चैवंरूपां चतुर्विशुद्धिं श्रोत्रविशुद्धिं घ्राणविशुद्धिं जिह्वाविशुद्धिं कायविशुद्धिं मनोविशुद्धिं च प्रतिलब्धवान् । सहस्रप्रतिलब्धाभिर्विशुद्धिभिः पुनरन्यानि विंशतिवर्षकोटीनयुतशतसहस्राण्यात्मनो जीवितसंस्कारमधिष्ठायेमं सद्धर्मपुण्डरीकं धर्मपर्यायं संप्रकाशितवान्[10] । ये च ते

1) भाष्यमाणस्य B. भाष्यमाणाः स Cb. भाषतो A. K. W. आक्रोश्यन्तस्य परिभाषन्तस्य O.

2) क्रुध्यन्ति लेडुं वा O.

3) A. K. W. add स्म.

4) युष्मे आवुसा O.

5) तैर् B. तेभिरधिमानिकेभिर्भिनुभिरधिमानि ··· O.

6) काभिनु A. Cb. K. W. कैर्भिनु B. We propose to read: तैरभिमानिकभिनुभिरभिमानिकाभनुणयु.

7) A. W. add भिरेवं वदति नाहं युष्माकं परिभवामीति ॥ तस्यैतैः K. also adds in a similar way, ending as तस्य तैः.

8) कृतम left out in K.

9) A. K. W. add घोष.

10) संश्रावित B. Cb. From hence forward a break in Q.

ऽभिमानिकाः सत्त्वा भिक्षुभिक्षुण्युपासकोपासिका ये पूर्वं नाकं युष्माकं परिभवामीति संभाविता यैरस्येदं[1] सदापरिभूत इति नाम कृतमभूत्तस्योदारर्द्धिबलस्थामं[2] प्रतिज्ञा[3]प्रतिभानबलस्थामं प्रज्ञाबलस्थामं च दृष्ट्वा सर्वे ऽनुसंधायोभूता अभूवन्धर्मश्रवणाय। सर्वे तेनान्यानि च बहूनि प्राणिकोटीनयुतशतसहस्राण्यनुत्तरायां सम्यक्संबोधौ समादापितान्यभूवन्॥

स[4] खलु पुनर्महास्थामप्राप्त बोधिसत्त्वो महासत्त्वस्ततश्चयित्वा चन्द्रस्वरराजसहनाम्नां तथागतानामर्हतां सम्यक्संबुद्धानां विंशतिकोटीशतान्यारागितवान्सर्वेषु[5] चेमं धर्मपर्यायं संप्रकाशयामास[6]। सो ऽनुपूर्वेण तेनैव पूर्वकेण कुशलमूलेन पुनरप्यनुपूर्वेण दुन्दुभिस्वरराजसहनाम्नां तथागतानामर्हतां सम्यक्संबुद्धानां विंशतिमेव[7] तथागतकोटीनयुतशतसहस्राण्यारागितवान्सर्वेषु चेममेव सद्धर्मपुण्डरीकं धर्मपर्यायमारागितवान्संप्रकाशितवांश्चतसृणां पर्षदाम्। सो ऽनेनैव पूर्वकेण कुशलमूलेन पुनरप्यनुपूर्वेण मेघस्वरराजसहनाम्नां तथागतानामर्हतां सम्यक्संबुद्धानां विंशतिमेव तथागतकोटीशतसहस्रा-

1) स्यायं Cb.
2) कृतो ऽभू Cb.
3) तस्य सोदार K.
4) प्रतिज्ञा left out in K. A.
5) स B. K. W. अथ Cb. left out in A.
6) A. adds सद्धर्मपुंडरीकं नाम A. W. also add सद्धर्मपुंडरीकं.
7) A. reads संप्रकाशिवान् चतसृणां पर्षदां सर्वेषु चैवंरूपय चनुःपरिप्रुच्या शयामास.
8) र्वि A. K. W.
9) रे B. K.
10) सहस्र left out in K. W.
11) वं B.
12) रे B. K.
13) सहस्र left out in B. Cb.

ण्यारागितवान्सर्वेषु चेममेव[1] सद्धर्मपुण्डरीकं धर्मपर्यायमारागितवान्संप्रकाशितवांश्चतसृणां पर्षदाम्। सर्वेषु चैवंरूपया चनुःपरिप्रुच्या समन्वागतो ऽभूच्छ्रोत्रपरिप्रुच्या[2] घ्राणपरिप्रुच्या जिह्वापरिप्रुच्या कायपरिप्रुच्या मनःपरिप्रुच्या समन्वागतो ऽभूत्॥

स खलु पुनर्महास्थामप्राप्त सदापरिभूतो बोधिसत्त्वो महासत्त्व इयतां तथागतकोटीनयुतशतसहस्राणां सत्कारं गुरुकारं माननां पूजनामर्चनामपचायनां कृत्वान्येषां च बहूनां बुद्धकोटीनयुतशतसहस्राणां सत्कारं गुरुकारं माननां पूजनामर्चनामपचायनां कृत्वा सर्वेषु च[3] तेष्वेममेव[4] सद्धर्मपुण्डरीकं धर्मपर्यायमारागितवानारागयित्वा[5] स तेनैव पूर्वकेण[6] कुशलमूलेन परिपक्वेनानुत्तरां सम्यक्संबोधिमभिसंबुद्धः[7]। स्यात्खलु पुनस्ते महास्थामप्राप्तिवं काङ्क्षा वा विमतिर्वा विचिकित्सा वान्यः स तेन कालेन तेन समयेन सदापरिभूतो नाम बोधिसत्त्वो महासत्त्वो ऽभूद्यस्तस्य भगवतो भीष्मगर्जितस्वरराजस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य शासने चतसृणां पर्षदां सदापरिभूतः समत्ततो ऽभूद्येन ते तावत्तस्तथागता अर्हन्तः सम्यक्संबुद्धा आरागिता अभूवन्। न खलु पुनस्ते महास्थामप्राप्तिवं द्रष्टव्यम्। तत्कस्य हेतोः। अकमेव स महास्थामप्राप्त तेन कालेन तेन समयेन सदापरिभूतो नाम बोधिसत्त्वो महासत्त्वो ऽभूवम्[8]। यदि मया महास्थामप्राप्त पूर्वमयं धर्मपर्यायो नोद्गृहीतो ऽभविष्यन्न[9] धारितो नाकमेवं क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुद्धो

1) वं A. K. W.
2) ऽभूत् स श्रो A.
3) Left out in B. Cb. K.
4) वं A. K. W.
5) गित्वा A.
6) पौ K.
7) K. adds स्यात्.
8) A. W. add घोष.
9) भूवद् A. भूवन् B. Ca. भूवं K. भूत् W.
10) भविष्यति A. भविष्यत्त B. Ca. W. भविष्यत्तो Cb. भविष्यन् K.

भविष्यम्[1]। यतश्चाहं महास्थामप्राप्त पौर्विकाणां[2] तथागतानामर्हतां सम्यक्संबुद्धानामन्तिकादमं धर्मपर्यायं धारितवान्वाचितवान्देशितवांस्ततो ऽहमेवं क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुद्धः। यान्यपि तानि महास्थामप्राप्त तेन सदापरिभूतेन बोधिसत्त्वेन महासत्त्वेन भिक्षुशतानि भिक्षुणीशतानि चोपासिकाशतान्युपासिकाशतानि च तस्य भगवतः शासन इमं धर्मपर्यायं संश्रावितवान्यभूवन्। नाहं युष्माकं परिभवामीति[4]। सर्वे भवन्तो बोधिसत्त्वचर्यां चरन्तु[5]। भविष्यथ यूयं तथागता अर्हन्तः सम्यक्संबुद्धाः। यैस्तस्य बोधिसत्त्वस्यान्तिके व्यापादचित्तमुत्पादितमभूत् तैर्विंशतिकल्पकोटीनयुतशतसहस्राणि[7] न क्वचित् तथागतो[8] दृष्टो ऽभूत्नापि धर्मशब्दो न संघशब्दः श्रुतो ऽभूत्। दश च कल्पसहस्राण्यवीचौ महानरके[9] दारुणां वेदनां वेदयामासुः। ते च[3] सर्वे तस्मात्कर्मावरणात्परिमुक्तास्तेनैव बोधिसत्त्वेन महासत्त्वेन परिपाचिता अनुत्तरायां सम्यक्संबोधौ। स्यात्खलु पुनस्ते महास्थामप्राप्त काङ्क्षा वा विमतिर्वा विचिकित्सा वा कतमे तेन कालेन तेन समयेन ते सत्त्वा अभूवन्ये ते तं बोधिसत्त्वं महासत्त्वमुच्छापितवन्त उच्चघितवन्तः[13]। अस्यामेव महास्थामप्राप्त

1) भविष्य A. Ca. W. भविष्ये B. भवितव्यः Cb. भविष्यं K.

2) पौर्वि A. W. पौर्व B. Ca. A. पूर्व Cb.

3) च left out in Cb. K.

4) इति left out in K.

5) तः A. तः। W. चरता Cb. चरन्तो B. चरंतो K. चरन्तु our conjecture cp. p. 378.

6) द्वा K.

7) सहस्र left out in K.

8) त Cb.

9) महानिरये K.

10) K. adds ते.

11) महासत्त्व left out in A. K. W.

12) उच्छा A. Cb. K. W. उच्छा B.

13) A mistaks for उज्झग्घि; cp. Pāli *ujjhagghati* and Skr. *jakṣat*.

पर्षदि[1] भद्रपालप्रमुखानि[2] पञ्चबोधिसत्त्वशतानि सिंहचन्द्राप्रमुखानि[2] पञ्चभिक्षुणीशतानि सुगतचेतनाप्रमुखानि पञ्चोपासिकाशतानि सर्वाण्यवैवर्तिकानि कृतान्यनुत्तरायां सम्यक्संबोधौ। एवमियं महास्थामप्राप्त महार्थस्य धर्मपर्यायस्य धारणा वाचना[4] देशना[5] बोधिसत्त्वानां महासत्त्वानामनुत्तरायाः सम्यक्संबोधेराहारको[6] संवर्तते। तस्मात्तर्हि महास्थामप्राप्तायं धर्मपर्यायो बोधिसत्त्वैर्महासत्त्वैस्तथागते परिनिर्वृत अभीक्ष्णं धारयितव्यो वाचयितव्यो देशयितव्यः[7] संप्रकाशयितव्य इति॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत॥

अतीतमध्वानमनुस्मरामि भीष्मस्वरो राज जिनो यदासि।
महानुभावो नरदेवपूजितः प्रणायको नरमरूपत्तरत्तसाम्[8]॥ १॥
तस्य जिनस्य परिनिर्वृतस्य सद्धर्म संतोभ[9] त्रजन्ति पश्चिमे।
भिक्षु अभूषी तद बोधिसत्त्वो नामेन सो सदापरिभूत उच्यते॥ २॥
उपसंक्रमित्वा[11] तद भिक्षु अन्यानुपलम्भदृष्टीन तथैव भिक्षुणी[12]।
परिभाव मह्यं[13] न कदाचिदस्ति यूयं हि चर्या चरथाग्रबोधये॥ ३॥

1) परिषदि K.

2) पूर्वंगम A. W.

3) A. adds च.

4) In Cb. only.

5) A. W. add सहगतः पुण्यस्कंधः यः. K. adds पुण्योय च यो.

6) कः K.

7) Left out in A. B. W.

8) मरूरात्तसानां A. W. मरूयत्तरात्तसां B. मरूयत्तरासान् Cb. मरूयत्तरात्तसाम् K.

9) भि A. B. भ Cb. K. भी W. Perhaps to r. र्मि °भ (for भं).

10) सदा A. W. सद् B. Cb. K.

11) मी K.

12) णीं A. W. णी B. Cb. K. (Skr. णीः).

13) पभिवो मे A. W.

14) चर्या वर K.

एवं च संश्रावयि नित्यकालं आक्रोशपरिभाष सकृत्तु तेषाम्[1]।
कालक्रियाया समुपस्थितायां श्रुतं इदं सूत्रमभूषि तेन ॥ ४ ॥
अकृत्व कालं तद् पण्डितेन अधिष्ठहित्वा[2] च सुदीर्घमायुः।
प्रकाशितं सूत्रमिदं तदासीत्तस्मि शासने तस्य विनायकस्य ॥ ५ ॥
ते चापि सर्वे बहु आपलम्भिका बोधाय[3] तेन परिपाचितासीत्।
ततश्चयविज्ञान स बोधिसत्त्वो आरागयी बुद्धसकृत्कोट्यः ॥ ६ ॥
अनुपूर्वपुण्येन कृतेन तेन प्रकाशयित्वा इमु[5] सूत्र नित्यम्।
बोधिं स संप्राप्त[6] जिनस्य पुत्रो अहमेव सो शाक्यमुनिस्तदासीत् ॥ ७ ॥
ये चापि भिक्षू तद[7] आपलम्भिका या भिक्षुणो ये च उपासका वा।
उपासिकास्तत्र[8] च यावदासीद्ये बोधि संश्रावित पण्डितेन ॥ ८ ॥
ते[9] चापि दृष्ट्वा बहुबुद्धकोट्य[10] इमे च ते पञ्चशता अनूनकाः।
तथैव भिक्षूणा च भिक्षुणो च उपासिका[11]श्चापि मि[12] मह्य संमुखम् ॥ ९ ॥

---

1) सकृंतु तेषां A. Cb. W. कृमत्तु तेषां B. कृमत्तु नित्यं K. भाष for भाषं.
2) अधि A. Cb. K. W. प्रति B.
3) बोधिय Ca. meant बोधोय; बोधाय the rest.
4) त्वो B. K. W. त्व the others.
5) म K. W.
6) प्रु Cb. मु K.
7) त्त तद् A. नु तद् B. नु वद् Cb. नू तद् K. नुस्तद् W.
8) का त A. K. W. कास्त B.
9) तैश्चापि A. B. Ca. K. W. ते चापि Cb.
10) त्यः A. Cb. W. त्य B. त्या K.
11) स Cb.
12) श्चापिम A. श्चैवमि B. W. चैत्रपि Ca. श्चापिय Cb. श्चापिमि K.

Saddharmapuṇḍarika. Ms. Petrovskij. End of Chapter III.

Saddharmapuṇḍarika. Ms. Petrovskij. End of Chapter X.

सर्वे मया श्रावित अग्रधर्मे ते चैव सर्वे परिपाचिता मे[1]।

मयि निर्वृते चापिमि सर्वि धीरा इमु धारयिष्यन्ति कु[2] सूत्रमग्रम् ॥ १० ॥

कल्पान[3] कोळो बकुभोरचिन्त्येर्न कदाचिदेतादृश धर्म श्रूयते[4]c।

बुद्धान कोटीशत चैव[5] भोन्ति न च ते पिमं[6] सूत्र प्रकाशयन्ति ॥ ११ ॥

[7]तस्माच्छ्रुणित्वा[8] इदमेवद्रूपं परिकीर्तितं धर्मु स्वयं[9] स्वयंभुवा।

आराधयित्वा[10] च पुनः पुनश्चिमं प्रकाशयेत्सूत्र ममेकु निर्वृते[11] ॥ १२ ॥

॥ इति श्रीसद्धर्मपुण्डरीके धर्मपर्याये सदापरिभूतपरिवर्तो[12] नामैकोनविंशतितमः[13] ॥

---

1) तानि मे Ca. ता ये Cb.
2) कु K. कि the rest.
3) कोळो A. W. कोटी B. Ca. Cb. K.
4) धर्मु K.
5) बुद्धाना यो कोटीशत कि B. °शता कि Ca. Cb. बुद्धान पि कोटिशतानि K.
6) न च ताविमं A. B. Ca. Cb. K. न च ते पि तं W.
7) य K.
8) म Ca. Cb.
9) Left out in Cb.
10) आधार Cb. read आराध.
11) MSS. have त इति ॥
12) आर्य (for इति श्री) K.
13) एकोन left out in Cb.

XX.

अथ खलु यानि तानि साकल्लोकधातुपरमाणुरजःसमानि[1] बोधिसत्त्वकोटीनयुतशतसहस्राणि पृथिवीविवरेभ्यो निष्क्रान्तानि तानि सर्वाणि[2] भगवतो ऽभिमुखमञ्जलिं प्रगृह्य भगवन्तमेतदवोचुः। वयं भगवन्निमं धर्मपर्यायं तथागतस्य परिनिर्वृतस्य सर्वबुद्धक्षेत्रेषु यानि यानि[3] भगवतो बुद्धक्षेत्राणि यत्र यत्र भगवान्परिनिर्वृतो भविष्यति तत्र तत्र संप्रकाशयिष्यामः। अर्थिनो वयं भगवन्नेनेवमुद्देशेन धर्मपर्यायेण धारणाय वाचनाय देशनाय[4] संप्रकाशनाय वा लिखनाय[5]॥

अथ खलु मञ्जुश्रीप्रमुखानि बहूनि[6] बोधिसत्त्वकोटीनयुतशतसहस्राणि[7] यान्यस्यां सहायां[8] लोकधातौ वास्तव्यानि[9] भिक्षुभिक्षुण्युपासकोपासिकादेवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्या बहवश्च गङ्गानदीवालिकोपमा[10][11][12] बोधिसत्त्वा महासत्त्वा भगवन्तमेतदवोचुः। वयमपि भगवन्निमं धर्मपर्यायं संप्रकाशयिष्यामस्तथागतस्य परिनिर्वृ-

1) साकल्लिक A. W. साकल्ल B. Ca. K. त्रिसाकल्ल Cb.
2) सर्वाणि तानि B. Ca. Cb.
3) Left out in K.
4) A. K. W. add वा.
5) A. W. add वा.
6) Left out in Ca.
7) कोटी left out in B.
8) अन्यस्मिं सके B.
9) सनौ A. वसन्ति B. W. वास्तव्यानि Cb. K.
10) का: B.
11) लु: B.
12) Rather कासमा.

तस्यादृष्टेनात्मभावेन भगवन्तन्नरीते स्थिता घोषं संश्रावयिष्यामो ऽनवरोपितकुशलमूलानां च सत्त्वानां कुशलमूलान्यवरोपयिष्यामः॥

अथ खलु भगवांस्तस्यां वेलायां[2] तेषां पौर्विकाणां[3] बोधिसत्त्वानां महासत्त्वानां गणिनां[4] महागणिनां[4] गणाचार्याणामेकं[5] प्रमुखं विशिष्टचारित्रं नाम बोधिसत्त्वं महासत्त्वं गणिनं[6] महागणिनं[6] गणाचार्यमामन्त्रयामास[7]। साधु साधु विशिष्टचारित्र। एवं युष्माभिः करणीयमस्य धर्मपर्यायस्यार्थे। यूयं तथागतेन परिपाचिताः॥

अथ खलु भगवाञ्शाक्यमुनिस्तथागतः स च भगवान्प्रभूतरत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धः[8] परिनिर्वृतः स्तूपमध्ये सिंहासनोपविष्टौ[9] द्वावपि स्मितं प्रादुष्कुरुतो[10] मुखविवरान्तराभ्यां च जिह्वेन्द्रियं निर्णामयतः। ताभ्यां[11] च जिह्वेन्द्रियाभ्यां यावद्ब्रह्मलोकमनुप्राप्तुतस्ताभ्यां[11] च जिह्वेन्द्रियाभ्यां बहूनि रश्मिकोटीनयुतशतसहस्राणि निश्चरन्ति स्म। तासु च रश्मिष्वेकैकस्या रश्मेर्बहूनि[12] बोधिसत्त्वकोटीनयुतशतसहस्राणि निश्चेरुः सुवर्णवर्णैः कायैर्द्वात्रिंशद्भिर्महापुरुषलक्षणैः समन्वागताः पद्मगर्भे सिंहासने निषण्णाः। ते च बोधिसत्त्वा दिग्विदिक्षु लोकधातुशतसहस्रेषु विसृताः[13] सर्वासु दिग्विदिक्षूत्तरीते

1) स्यादृश्येना Cb. स्येदृशेना K.
2) तस्यां वेलायां left out in A. K. W.
3) पूर्व Cb. K.
4) णी A. B. W.
5) वं A. W.
6) गणिं A. B. W. गणिनं (first) left out in K.
7) यते स्म B.
8) Left out in A. W.
9) ष्टौ A. W. ष्टः। B. Cb. K.
10) र्वतः A. W. रुतः B. Cb. र्वत्तः K.
11) Left out in K.
12) बहु A. W.
13) विनिष्पताः K. should be विनिःसृता.

स्थिता धर्मं देशयामासुः। यथैव भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धो जिह्वेन्द्रियेणार्द्धप्रातिहार्यं करोति प्रभूतरत्नश्च तथागतो ऽर्हन्सम्यक्संबुद्धस्तथैव ते [1]सर्वे तथागता अर्हन्तः सम्यक्संबुद्धा ये ते ऽन्यलोकधातुकोटीनयुतशतसहस्रेभ्यो ऽभ्यागता रत्नवृक्षमूलेषु पृथक्[2]पृथक्सिंहासनोपविष्टा जिह्वेन्द्रियेणार्द्धप्रातिहार्यं कुर्वन्ति॥

अथ खलु भगवाञ्शाक्यमुनि[3]स्तथागतो ऽर्हन्सम्यक्संबुद्धस्ते च सर्वे तथागता अर्हन्तः सम्यक्संबुद्धास्तमृद्ध्यभिसंस्कारं परिपूर्णं वर्ष[4]शतसहस्रं कृतवन्तः। अथ खलु वर्षशतसहस्रस्यात्ययेन[5] ते तथागता अर्हन्तः सम्यक्संबुद्धास्तानि जिह्वेन्द्रियाणि पुनरेवोपसंहृत्यैकस्मिन्नेव क्षणलवमुहूर्ते समकालं सर्वैर्मुखैः सिंहोत्कासनशब्दः कृत एकश्चाच्छ[6]टासंघातशब्दः[7] कृतस्तेन च महोत्कासनशब्देन[8] महास्फोटसंघातशब्देन[9] यावत्ति दशसु दिक्षु[10] बुद्धक्षेत्रकोटीनयुतशतसहस्राणि तानि सर्वाण्याकम्पितान्यभूवन्प्रकम्पितानि संप्रकम्पितानि चलितानि प्रचलितानि संप्रचलितानि वेधितानि प्रवेधितानि संप्रवेधितानि। तेषु च सर्वेषु[11] बुद्धक्षेत्रेषु यावत्तः सर्वसत्त्वा देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यास्ते ऽपि सर्वे बुद्धानुभावेन तत्रस्था एवमिमां[12] सहां लोकधातुं पश्यन्ति[13]

1) सर्व MSS.
2) पृथक् पृथक् left out in B. Cb.
3) मुनिः प्रभूतरत्नश्च तथागतो A. W.
4) शत left out in B. Cb. K.
5) भ्यासत्ययेन Cb.
6) सिंह added in A. K. W.
7) Left out in Cb.
8) A. Ca. W. add च.
9) Cb. B. add च. We expect महाच्छटा for °स्फोटा.
10) K. adds सर्व.
11) आ left out in Cb. K.
12) सर्व B. Ca. Cb. Here the break in O. at an end.
13) एवं इ A. Ca. एव इ B. Cb. एवमि K. W. एव स्वेस्वे लोकधातौ O.

स्म[1]। तानि च सर्वतथागतकोटीनयुतशतसहस्राणि रत्नवृक्षमूलेषु[2] पृथक्पृथक्सिंहासनोपविष्टानि भगवन्तं च शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं[3] तं च भगवन्तं प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं परिनिर्वृतं[4] तस्य महारत्नस्तूपस्य मध्ये सिंहासनोपविष्टं भगवता शाक्यमुनिना तथागतेन सार्धं निषण्णं ताश्चतस्रः पर्षदः[5] पश्यन्ति स्म[6]। दृष्ट्वा चाश्चर्यप्राप्ता अद्भुतप्राप्ता औद्विल्यप्राप्ता अभूवन्। एवं चात्तरोत्ताद्घोषमश्रौषुः। एष[7] मार्षा अप्रमेयाण्यसंख्येयानि लोकधातुकोटीनयुतशतसहस्राणयतिक्रम्य सहा नाम लोकधातुस्तस्यां[8] शाक्यमुनिर्नाम तथागतो ऽर्हन्सम्यक्संबुद्धः। स एतर्हि सद्धर्मपुण्डरीकं नाम धर्मपर्यायं सूत्रान्तं[9] महावैपुल्यं[10] बोधिसत्त्वाववादं सर्वबुद्धपरिग्रहं बोधिसत्त्वानां महासत्त्वानां संप्रकाशयति[11]। तं[12] यूयमध्याशयेनानुमोदध्वं तं च भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं[13] तं च भगवन्तं[14] प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं ममस्कुरुध्वम्[15]॥

1) Left out in K. W. O.
2) A. B. Ca. W. leave out षु.
3) A. W. add सिंहासनोपविष्टं.
4) Left out in O.
5) पदिषदः Cb. K.
6) Left out in Cb. K. O.
7) In all MSS.; consistent only is O. because धातु is regularly of masc. gender in it. But it would be easy to read एषा for एष.
8) तत्र O.
9) सूत्रं O.
10) Here वैपुल्यं also in O. instead of वैतुल्यं.
11) K. adds स्म.
12) K. adds च.
13) From तं till °बुद्धं left out in W.
14) Left out in K.
15) K. adds पूजयध्वं च.

अथ खलु ते सर्वसत्त्वा[1] इमेवंरूपमत्तरौक्षान्निर्घोषं श्रुत्वा तत्रस्था एव नमो भगवते शाक्यमुनये तथागतायार्हते सम्यक्संबुद्धायेति वाचं भाषन्ते स्माञ्जलिं[2] प्रगृह्य। विविधांश्[3] च पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावैजयन्त्यो येनेयं सहा[4] लोकधातुस्तेन क्षिप्यन्ति स्म नानाविधानि चाभरणानि पिनद्धानि केयूरकारमणिरत्नान्यपि क्षिप्यन्ति स्म भगवतः शाक्यमुनेः प्रभूतरत्नस्य[6] च[7] तथागतस्य पूजाकर्मणे[8]। अस्य च सद्धर्मपुण्डरीकस्य धर्मपर्यायस्य। ताश्च पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावैजयन्त्यस्तानि च केयूरकारमणिरत्नानि[9] क्षिप्तानीमां सहां लोकधातुमागच्छन्ति स्म। तैश्च पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावैजयन्तीराशिभिः[10] केयूरकारमणिरत्नैश्चास्यां सहायां लोकधातौ सार्धं तैरन्यैर्लोकधातुकोटीनयुतशतसहस्रैरेकीभूतैर्ये[11] तेषु तथागताः संनिषण्णास्तेषु सर्वेषु वैरोचनेषु उत्तरोत्तरे[12] समन्तान्[13] महापुष्पवितानं परिसंस्थितमभूत्॥

अथ खलु भगवांस्तान्त्रिंशिष्टचारित्रप्रमुखान्बोधिसत्त्वान्महासत्त्वानामन्त्रयामास। अचिन्त्यप्रभावाः कुलपुत्रास्तथागता अर्हन्तः सम्यक्संबुद्धाः। बहून्यप्यहं कुलपुत्राः

1) सर्व left out in K. O.

2) ली A. B. लीन् Cb. लीः K. लि W. इति वाचं भाषन्ते स्म left out in O. दृशनखाञ्जलिं O.

3) धां B. K.

4) यंतीन्यनेयंसहा A. यंतीन्येनेयं सहा W. यंत्यो येनायं सहो B. यंत्या येन सहा Cb. यन्त्यो येनेयं सहा K. Very different in O.

5) रा A. रां B. र Cb. रान् K.

6) Left out in B. Cb. K.

7) In W. only.

8) कर्मणे A. K. W. कर्मणा B. करणे Cb.

9) K. reads कारणयर्द्धकाराणि च मणिरत्नानि च.

10) A. adds भी W. adds भि.

11) भूता ये K.

12) सर्वेष्वत्तरोत्ते वैरोचनसे B. Cb. K. O.

13) समन्तान् left out in B. Cb.

कल्पकोटीनयुतशतसहस्राण्यस्य धर्मपर्यायस्य परिन्दनार्थं नानाधर्मप्रमुखैर्बहूनानुशंसान्[1] भाषेयं न चाहं गुणानां पारं गच्छेयमस्य धर्मपर्यायस्य भाषमाणः[2]। संक्षेपेण कुलपुत्राः सर्वबुद्धधर्माः[3] सर्वबुद्धवृषभिता[4] सर्वबुद्धरहस्यं सर्वबुद्धगम्भीरस्थानं[5] मयास्मिन्धर्मपर्याये देशितम्। तस्मात्तर्हि कुलपुत्रा युष्माभिस्तथागतस्य परिनिर्वृतस्य सत्कृत्यायं धर्मपर्यायो धारयितव्यो देशयितव्यो[6] लिखितव्यो वाचयितव्यः प्रकाशयितव्यो भावयितव्यः पूजयितव्यः। यस्मिंश्च कुलपुत्राः पृथिवीप्रदेशे अयं धर्मपर्यायो वाच्येत वा प्रकाश्येत वा देश्येत[7] वा लिख्येत वा चित्त्येत वा भाव्येत[8] वा स्वाध्यायेत वा पुस्तकगतो वा तिष्ठेद्रामे वा विहारे वा गृहे[9] वा वने[10] वा नगरे[10] वा वृक्षमूले वा प्रासादे वा लयने वा गुहायां वा तस्मिन्पृथिवीप्रदेशे तथागतमुद्दिश्य चैत्यं कर्तव्यम्। तत्कस्य हेतोः। सर्वतथागतानां हि स पृथिवीप्रदेशो बोधिमण्डो वेदितव्यस्तस्मिंश्च पृथिवीप्रदेशे सर्वतथागता[11] अर्हन्तः सम्यक्संबुद्धा अनुत्तरां सम्यक्संबोधिमभिसंबुद्धा इति वेदितव्यं[12] तस्मिंश्च पृथिवीप्रदेशे सर्वतथागतैर्धर्मचक्रं प्रवर्तितं तस्मिंश्च पृथिवीप्रदेशे सर्वतथागताः परिनिर्वृता इति वेदितव्यम्[13]॥

1) Sic O. संसंपर्यायां A. W. K. संशपयायं B. संसापयायां Cb.

2) णाः All but K. O.

3) बुद्ध left out in Cb.

4) ताः Cb. K. तं O.

5) रं (leaving out स्थानं) A.

6) Left out in B.

7) देश्येत in put in before प्रकाश्येत in Cb. K.

8) भाव्येत A. भाष्येत B. Ca. भाषेद्वा Cb.

9) गृहे is put in after वने in K.

10) Left out in Cb. The following नगरे वा left out in O.

11) सर्वे K. सर्वैभिस्तथागतैभिरनुत्तरा सम्यक्संबोधिरभिसंबुद्धा O.

12) वेदितव्यास्त° and वेदितव्यस्त° the MSS.

13) Left out in Cb. K. वेदितव्याः A. B. Ca. W. We follow O.

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

अचित्तिया लोकहितान धर्मता[1] अभिज्ञज्ञानस्मि प्रतिष्ठितानाम् ।
ये ऋद्धि दर्शेन्ति[2] अनन्तचक्षुषः प्रमोक्षकोतोरिह सर्वदेहिनाम् ॥ १ ॥
त्रिधेन्द्रियं प्रापिय[3] सर्वलोकं रश्मीसहस्राणि प्रमुञ्चमानाः ।
आश्चर्यभूता इह ऋद्धिदर्शिताः ते सर्वि[5] ये प्रस्थित अग्रबोधौ[4] ॥ २ ॥
उत्कासितं चापि करोन्ति बुद्धा एकोच्चारये[6] च करोन्ति शब्दम् ।
ते विज्ञपेन्ति[7] इमु सर्वलोकं दशो दिशायां[8] इम लोकधातुम् ॥ ३ ॥
एतानि चान्यानि च प्रातिहार्यगुणान्निदर्शेन्ति[10] हितानुकम्पकाः[9] ।
कथं नु ते हर्षित तस्मि काले धारेषु सूत्रं सुगतस्य[11] निर्वृते ॥ ४ ॥
बहू[12] पि कल्पान सहस्रकोट्यो वदेय वर्णं सुगतात्मजानाम् ।
ये धारयिष्यन्ति[13][14] इमं[15] सूत्रमग्र्यं परिनिर्वृते लोकविनायकस्मिन् ॥ ५ ॥

1) हितानुकंपा धर्मता A. हितानु धर्मता B. Ca. W. हितान धर्मता Cb. K. A break in O.
2) देशंति A. W. दर्शंति B. Cb. K.
3) वि K.
4) इयम् Cb. K.
5) सार्थ A. प्रार्थि the rest. Our reading conjectural.
6) एक K.
7) येन्ति K. येन्ती the rest.
8) देशो दशायां A. दिशो दशाया B. देशो दशाया Cb. दशो दिशाया K. दसो दिसायां W.
9) र्यो A. W. र्यान् B. Ca. र्याम Cb. र्ये K.
10) देशेंति A.
11) सुगतेस्मि K.
12) बहूं A. B. K. बहू Cb. W.
13) धारयंति A.
14) मम Cb.
15) ग्र्यं A. B. Ca. K. W. ग्रम् Cb. Cp. Pāli *aggam*.

न तेष पर्याप्त[1] भवेदुणानां आकाशधातो किं यथा दिशासु ।
अचित्तिया तेष गुणा भवन्ति[2] ये सूत्र धारेन्ति[3] इदं शुभं सदा[4] ॥ ६ ॥
दृष्टो अहं सर्व इमे च नायका अयं च[5] यो निर्वृतु लोकनायकः ।
इमे च सर्वे बहुबोधिसत्त्वाः पर्षाश्च चत्वारि अनेन दृष्टाः ॥ ७ ॥
अहं च आगागितु तेनिहाद्य इमे च आगागित सर्वि नायकाः ।
अयं च यो निर्वृतको जिनेन्द्रो ये चापि अन्ये दशसु दिशासु ॥ ८ ॥
अनागतातीत तथा च बुद्धाः[6] तिष्ठन्ति[7] ये चापि दशसु दिशासु ।
ते सर्वि दृष्टाश्च सुपूजिताश्च भवेयु यो धारयि[8] सूत्रमेतत्[9] ॥ ९ ॥
हर्षस्यज्ञानं पुरुषोत्तमानां[10] यं बोधिमण्डस्मि विचित्तितासीत्[11] ।
अनुचिन्तयेत्सो पि तु क्षिप्रमेव यो धारयेत्सूत्रमु भूतधर्मम् ॥ १० ॥
प्रतिभानु तस्यापि भवेदनन्तं यथापि वायुर्न कहिंचि सज्जति ।
धर्मे पि चार्थे च निरुक्ति जानति[12] यो धारयेत्सूत्रमिदं विशिष्टम्[13] ॥ ११ ॥

1) तु K.
2) भवेयुः Cb.
3) इमं B. Ca. Cb.
4) धारेन्ति सदा इमं शुभं K.
5) सो A. W.
6) बुद्धा ति A. B. K. W. बुद्धाः । ति Cb.
7) यु K.
8) तं Ca.
9) MSS. ज्ञाने.
10) यो A. ये B. Ca. Cb. K. यां W. यं, our reading, Skr. यत्.
11) I. e. तमासीत्.
12) ती A. B. Ca. W. ति Cb. K.
13) वरिष्ठं K.

अनुसंधि सूत्राण सदा प्रजानति संधाय[1] यं भाषितु[2] नायकेहि।
परिनिर्वृतस्यापि विनायकस्य सूत्राण[3] सो जानति भूतमर्थम्॥ १२॥
चन्द्रोपमः सूर्यसमः स भाति आलोकप्रद्योतकरः स भोति।
विचरत्तु सो मेदिनि तेन तेन समादपेतो[5] बुद्धबोधिसत्त्वान्॥ १३॥
तस्माद्धि ये पण्डित बोधिसत्त्वाः श्रुत्वानि[6] तादृश[7] आनुशंसा।
धारेयु सूत्रं मम निर्वृतस्य न तेष[8] बोधाय[9] भवेत संशयः॥ १४॥

॥ इति आर्य[11]सद्धर्मपुण्डरीके धर्मपर्याये तथागतर्द्ध्यभिसंस्कारपरिवर्तो नाम विंशतितमः[12]॥

1) सत्राय A. Ca. सत्रोय B. सत्राव Cb. सन्धाय K. सत्काय W.
2) भाषयति K.
3) सूत्रेषु A. K.
4) भो Cb.
5) येमी A. B. यत्ती Ca. येत्ती Cb. W. येती K.
6) हि Ca. के the rest.
7) शी A.
8) तेस्य A. W. तस्य the others. All wrong.
9) All बोधाय.
10) All य इति॥
11) आर्य K.
12) वर्तो एकविंशतितमः॥ Cb.

XXI.

अथ खलु भैषज्यराजो[1] बोधिसत्त्वो महासत्त्व उत्थायासनादेकांसमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणाम्य[2] भगवन्तमेतदवोचत्। कियद्भगवन्स कुलपुत्रो वा कुलदुहिता वा पुण्यं प्रसवेत्[4] इमं सद्धर्मपुण्डरीकं धर्मपर्यायं धारयेत्कायगतं वा पुस्तकगतं वा कृत्वा। एवमुक्ते भगवान्भैषज्यराजं बोधिसत्त्वं महासत्त्वमेतदवोचत्। यः कश्चिद्भैषज्यराज कुलपुत्रो वा कुलदुहिता वाशीतिगङ्गानदीवालिकासमानि[5] तथागत[6]कोटीनयुतशतसहस्राणि सत्कुर्यात्[7] गुरुकुर्यान्मानयेत्पूजयेत्तत्किं मन्यसे भैषज्यराज कियत्कुलपुत्रो वा कुलदुहिता वा ततोनिदानं बहु पुण्यं प्रसवेत्। भैषज्यराजो बोधिसत्त्वो महासत्त्व[8] आह। बहु भगवन्बहु सुगत। भगवानाह। आरोचयामि ते भैषज्यराज प्रतिवेदयामि। यः कश्चिद्भैषज्यराज कुलपुत्रो वा कुलदुहिता वास्मात्सद्धर्मपुण्डरीकाद्धर्मपर्यायादन्तश एकामपि चतुष्पदीगाथां धारयेद्वाचयेत्पर्यवाप्नुयात्प्रतिपत्त्या[9] च संपादयेदतः स भैषज्यराज कुलपुत्रो वा कुलदुहिता वा ततोनिदानं बहुतरं पुण्यं प्रसवेत्[10]॥

1) A. adds नाम.
2) All प्रणाम्य.
3) कियत्तं भ Cb. K. More original.
4) प्रसूयते। य Ca. प्रसवति। य Cb.
5) लु Cb.
6) बुद्ध instead of तथागत in Cb.
7) सत्कृत्यकुर्या K.
8) In A. W. only.
9) वा A. K. W.
10) प्रसूयते B. Ca.

अथ खलु भैषज्यराज्ञो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायां भगवन्तमेतदवोचत्। दास्यामो वयं भगवंस्तेषां कुलपुत्राणां कुलदुहितॄणां[1] वा येषामयं सद्धर्मपुण्डरीको धर्मपर्यायः कायगतो वा स्यात्पुस्तकगतो वा[2] रक्षावरणगुप्तये धारणीमन्त्रपदानि। तद्यथा। अन्ये मन्ये[3] मने[4] मामने[4] चित्ते चारिते समे समिता[5] विशान्ते मुक्ते मुक्ततमे[7] समे अविषमे[8] समसमे[9] ज्ञये[10] क्षये अक्षये अक्षिणे[11] शान्ते समिते[12] धारणि[13] आलोकभाषे[14] प्रत्यवेक्षणि[15][16] निधिरु अभ्यन्तरनिविष्टे[17] अभ्यन्तरपरिशुद्धि[18] मुत्कुले[19] मुत्कुले अरडे[20] परडे मुकाङ्क्षे[21] असमसमे बुद्ध-

1) वा A. K. W. च B. Ca. Cb.
2) वा आर K.
3) A. W. add अरी परी अ; Cp. the list in Engl. transl. p. 371.
4) णे K.
5) ते K.
6) सा Ca.
7) ये A. W.
8) स A. B. Cb. K. W. ष Ca.
9) Left out in Cb.
10) क्षे A. W.
11) Left out in Ca.
12) सा Ca. Cb.
13) सनी Ca. समि Cb. शमि K.
14) णी A.
15) काभसे B. K. कावभाषे Cb.
16) निपिभि Ca. निविते Cb. निपिरु K.
17) A. W. add चिचिरु.
8) तरशिशिष्ट B. तरविमिष्ट Ca. तरप्रनिविष्टे W.
19) तरपरिशुद्धो B. तरविमुद्धो Ca. पारशुद्धे Cb. परिशुद्धे K.
20) त्कू B. कु K.
21) ङ्के Ca. ङ्के Cb. शुकाङ्के K.

विलोकिते[1] धर्मपरीक्षिते संघनिर्घोषणि निर्घोषणि[2] भयाभयविशोधनि[3] मन्त्रे मन्त्राक्षयते[4] रुते रुतकौशल्ये अक्षये अक्षयवनताये[5] वक्कुले वलोडे[6] अमन्यनताये[7] स्वाहा[8]। इमानि भगवन्मन्त्रधारणीपदानि[9], द्वाषष्टिभिर्गङ्गानदीवालिकासमैर्बुद्धैर्भगवद्भिर्भाषितानि[10]। ते सर्वे बुद्धा भगवन्तस्तेन दुग्धाः स्युर्यं एवंरूपान्धर्मभाणकानेवंरूपान्सूत्रान्तधारकानतिक्रामेत्॥

अथ खलु भगवान्भैषज्यराजाय बोधिसत्त्वाय महासत्त्वाय[12] साधुकारमदात्। साधु साधु भैषज्यराज[13] सत्त्वानामर्थः कृतो धारणीपदानि भाषितानि सत्त्वानामनुकम्पामुपादाय[14]। रक्षावरणगुप्तिः कृता[15]॥

अथ खलु प्रदानशूरो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। अहमपि भगवन्नेवंरूपाणां धर्मभाणकानामर्थाय[16] धारणीपदानि दास्यामि[17] येषामेवंरूपाणां धर्मभाणकानां

1) रि A. W.
2) णी A. B. णि K. त्ति W.
3) नी B. Ca. K. W.
4) क्षरे Cb.
5) य left out in Ca.
6) A. adds वलोक.
7) न left out in Ca. while K. reads वन.
8) left out in A. Cb. W.
9) मन्त्र left out in Cb. K.
10) काम B. Ca. Cb. K. कोप A. W.
11) K. reads एवंरूपाणां धर्मभाणकानामेवरूपां.
12) Left out in K.
13) K. adds बहूनान्ते भैषज्यराज.
14) कम्पाये A. Ca. W.
15) गुप्तिं कृत्वा A. W. गुप्तिः कृता B. Cb. K.
16) क्षेतोरू (for अर्थाय) K.
17) यस्ते K.

न कश्चिद्वतारप्रेक्ष्यवतारगवेष्यवतारं[1] लप्स्यते[2]। तद्यथा यक्षो वा राक्षसो वा पूतनो वा कृत्यो वा कुम्भाण्डो वा प्रेतो वावतारप्रेक्ष्यवतारगवेष्यवतारं[3] न[4] लप्स्यत इति। अथ खलु प्रधानशूरो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायामिमानि धारणीमन्त्रपदानि[5] भाषते स्म। तद्यथा। ज्वले महाज्वले उक्के[6] तुक्के[7] मुक्के[8] अडे[9] अडावति मृत्ये[10][11] नृत्यावति इट्टिनि[12] विट्टिनि चिट्टिनि[13][14] नृत्यनि नृत्यावति[15] स्वाहा[16]। इमानि[17] भगवन्धारणीपदानि गङ्गानदीवालिकासमैस्तथागतैरर्हद्भिः सम्यक्संबुद्धैर्भाषितान्यनुमोदितानि च। ते सर्वे तथागतास्तेन दुग्धाः स्युर्[18][19]तानेवंरूपान्धर्मभाणकानतिक्रमेत॥

अथ खलु वैश्रवणो महाराजो भगवन्तमेतदवोचत्। अहमपि भगवन्धारणीपदानि

1) गवेषी अवतार न in Cb. only. न must be left out.
2) ति B. K.
3) अवतारं left out in Cb.
4) न left out in B.
5) मन्त्र in Cb. only, while धारणी is left out in Cb.
6) उक्के A.
7) भुक्कु W. तुक्के A. left out in B. Cb. K.
8) मक्थे A.
9) अत्रा A. अत Cb.
10) नृत्ये A. B. K. left out in Cb.
11) तिटा B. नृत्य Cb. नृत्या K.
12) टि B. ट्टु Cb.
13) विट्टनि Cb. निट्टिनि K. Cb. adds निट्टिनि.
14) त्ये Ca. Cb. त्य A.
15) त्या A.
16) In Cb. only. Cp. the lists in Engl. translation p. 372.
17) Cb. adds तानि.
18) लु Cb.
19) MSS. have स्युः ता.

भाषिष्ये तेषां धर्मभाणकानां कृताय सुखायानुकम्पायै रक्षावरणगुप्तये। तद्यथा। अट्टे[2] तट्टे नट्टे[3] वनट्टे[4] अनडे[5] नाडि[6] कुनाडि[7] स्वाहा। एभिर्भगवन्धारणीपदैस्तेषां धर्मभाणकानां पुद्गलानां[8] रक्षां करोमि योगक्षेमशताच्चाहं तेषां कुलपुत्राणां कुलदुहितॄणां चैवंरूपाणां[9] सूत्रान्तधारकाणां[10] रक्षा कृता भविष्यति स्वस्त्ययनं कृतं भविष्यति॥

अथ खलु विरूढको महाराजो तस्यामेव पर्षदि संनिपतितो ऽभूत्संनिषण्णश्च कुम्भाण्डकोटीनयुतशतसहस्रैः परिवृतः पुरस्कृतः। स उत्थायासनादेकांसमुत्तरासङ्गं कृत्वा[11] येन भगवांस्तेनाञ्जलिं प्रणाम्य[12] भगवन्तमेतदवोचत्। अहमपि भगवन्धारणीपदानि[13] भाषिष्ये बुद्धज्ञानकृताय[14] तेषां च[14] तथारूपाणां[14] धर्मभाणकानामेवंरूपाणां सूत्रान्तधारकाणां[15] रक्षावरणगुप्तये धारणीमन्त्रपदानि। तद्यथा। अगणे गणे गौरि[16] गन्धारि चण्डालि मात-

1) सुखाय in B. Cb. only.
2) Left out in B. Cb. K.
3) Left out in B. Cb.
4) Left out in B.
5) अरत्रे A. अनत्रो Cb.
6) नात्रि A.
7) निकुरुति Cb. कुनाडि K.
8) In Cb. only.
9) चै B. Cb. वै the rest.
10) K adds भिक्षूणां धर्मभाणकानां.
11) एकांस° कृत्वा left out in K. A. W.
12) MSS. प्रणाम्य.
13) In Cb. only.
14) In B. Cb. added पुद्गलानां.
15) एवंरूपाणां सूत्रान्तधारकाणां left out in Cb.
16) गो W.

ङ्गि पुक्कसि[1] मंकुले[2] ब्रूसलि[3] मिसि[4] स्वाहा । इमानि तानि भगवन्धारणीमन्त्रपदानि[5] यानि द्वाचत्वारिंशद्बुद्धकोटीभिर्भाषितानि । ते सर्वे तेन दुग्धाः स्युर्यस्तानेवंरूपान्धर्मभाणकानतिक्रमेत[6] ॥

अथ खलु लम्बा १ च नाम रात्रसी विलम्बा २ च नाम रात्रसी[7] कूटदन्ती ३ च नाम रात्रसी पुष्पदन्ती ४ च नाम रात्रसी मकुटदन्ती[8] ५ च नाम रात्रसी केशिनी ६ च नाम रात्रस्यचला[9] ७ च नाम रात्रसी[10] मालाधारी ८ च नाम रात्रसी कुक्षी ९ च नाम रात्रसी सर्वसत्त्वोज्जोहारी[11] १० च नाम रात्रसी[12] कारीतो ११ च नाम रात्रसी[13] सपुत्रपरिवारा एताः सर्वा रात्रस्यो येन भगवांस्तेनोपसंक्रान्ता उपसंक्रम्य सर्वास्ता रात्रस्य एकस्वरेण भगवन्तमेतदवोचन्[14] । वयमपि भगवंस्तेषामेवंरूपाणां सूत्रान्तधारकाणां धर्मभाणकानां रक्षावरणगुप्तिं करिष्यामः स्वस्त्ययनं[15] च करिष्यामो यथा तेषां धर्मभाणकानां न कश्चिदवतारप्रेक्ष्यवतारगवेष्यवतारं लप्स्यतीति ॥

---

1) पोक्कसि A. पुक्कशि Ca. पोकसि W.
2) ङ्गुलि Cb.
3) ब्रूसल A. ब्रूसणा Cb.
4) सि Cb. left out in B. Ca. K.
5) मन्त्र in A. Ca. only.
6) यानि द्वा left out in K. द्वा left out in Cb.
7) A. W. add प्रलंबा च नाम रात्रसी.
8) मट्टदंती A. मट्टचण्डी W.
9) सी अचला A. षी अचलना Cb.
10) A. W. add अचला च नाम रात्रसी.
11) सत्त्वतेज्जो Cb. सत्वओज्जो K. Cp. Engl. translation p. 374.
12) रि A.
13) सकत्र Cb.
14) In Cb. K. only.
15) In A. W. only.

अथ खलु ताः सर्वा रात्रस्य एकस्वरेण समं[1] संगात्या भगवत इमानि धारणीमन्त्रपदानि प्रयच्छन्ति स्म । तद्यथा । इति मे[2] इति मे इति मे इति मे इति मे[3] । निमे निमे निमे निमे निमे[4] । रुके[2] रुके रुके रुके रुके[5] । स्तुके[2] स्तुके स्तुके स्तुके स्तुके[6] स्वाहा ।[7] इमं शीर्षं समारुह्य मा कश्चिद्रोकी[8] भवतु धर्मभाणकानां यक्षो वा रात्रसो वा प्रेतो वा पिशाचो वा पूतनो[9] वा कृत्यो वा वेतालो[10] वा कुम्भाण्डो वा स्तब्धो[11] वोमारको[12] वोस्तारको[13] वापस्मारको[14] वा यक्षकृत्यो[15] वामनुष्यकृत्यो[15] वा मनुष्यकृत्यो[15] वा एकाह्निको[16] वा द्वैतीयकको वा त्रैतीयकको[18] वा चतुर्थको[19] वा नित्यज्वरो वा विषमज्वरो[20] वात्तशः स्वप्नान्तरगतस्यापि

---

1) समं Cb. K. सम A. B.
2) B. adds here स्वा instead of repeating the same words four times.
3) A. reads स्वा for the last इति मे K. adds here ॥ ५ ॥ so in the following tree similar cases.
4) A. reads स्वा for the last निमे । But Cb. leaves out the latter three निमे altogether.
5) A. adds here स्वा.
6) A. adds here स्वा ॥ Cb. reads कस्ते five times instead of स्तुके.
7) इमं A. Cb. K. W. इदं B.
8) MSS. रागी.
9) पूतो W. पुतनो A.
10) वेतात्रा A. भूतो Cb. वेताडो K.
11) स्कब्धो K. left out in B. Cb.
12) तारको Cb. left out in K.
13) स्तारको W. वा ओस्तार् B. वा स्तथो Cb. वा ओस्तारको K.
14) रको A. W. रपं B. रूपो Cb. रूप K.
15) तो Cb. K. in which मनुष्य is put in before अमनुष्य.
16) एकाह्निको Cb. K. वासुरकृत्यो the rest.
17) यको B. Cb. K. यकृतो W. कृत्यो A.
18) यको B. Cb. K. यकृतो W. त्रै° left out in A.
19) र्थिको K. थकृतो A. W.
20) विषमज्वरो वा in Cb. only.

स्त्रीरूपाणि वा पुरुषरूपाणि वा दारकरूपाणि वा दारिकारूपाणि वा विक्रेष्ठां कुर्युर्नेदं[1] स्थानं विद्यते ॥

अथ खलु ता रात्रस्य एकस्वरेण समं संगीत्या भगवत्तमाभिर्गाथाभिरध्यभाषन्त[2] ॥

सप्तधास्य स्फुटेन्मूर्धा[3] अर्जकस्येव मञ्जरी ।
य इमं मन्त्र श्रुत्वा वै[4] अतिक्रमेद्धर्मभाणकम्[5] ॥ १ ॥
या गतिर्मातृघातीनां पितृघातीनां च या गतिः ।
तां गतिं प्रतिगच्छेद्यो[6] धर्मभाणकमतिक्रमेत् ॥ २ ॥
या गतिस्तिलपोडानां तिलकूटानां च या गतिः ।
तां गतिं प्रतिगच्छेद्यो[7] धर्मभाणकमतिक्रमेत् ॥ ३ ॥
या गतिस्तुलकूटानां मानकूटानां[8] च[9] या गतिः ।
तां गतिं प्रतिगच्छेद्यो[10] धर्मभाणकमतिक्रमेत् ॥ ४ ॥

एवमुक्ता ताः कुक्षिप्रमुखा रात्रस्यो भगवत्तमेतदूचुः । वयमपि[11] भगवंस्तेषामेवंरूपाणां धर्मभाणकानां रक्षां करिष्यामः स्वस्त्ययनं दण्डपरिहारं विषदूषणं[12] करिष्याम इति । एवमुक्ते भगवांस्ता रात्रस्य एतदवोचत् । साधु साधु भगिन्यो यद्यूयं तेषां धर्मभा-

1) कुर्यु नेदं A. W. कुर्यु नैतत् B. कुर्यान्नैन Cb. कुर्यान्नेतं K.
2) षत्त स्म B. Cb. K.
3) स्फुटेत्मूधाम A. W. स्फुटा मूर्ध्नम B. स्फेले मूर्ध्ना ग्र Cb. स्फुटेत्मूर्ध्नाम K.
4) य इमां मंत्रपदां श्रुत्वा वै A. ंचै B. Cb. W. य इमम्मन्त्र श्रुत्वा चै K.
5) क्रा B.
6) चक्षेया यो A. B. K. W. चक्षेत् यो यं Cb.
7) चक्षेया यो in all MSS.
8) कर्म Ca. कात्स Cb.
9) In Cb. only.
10) चक्षेया यो A. Cb. K. W. चक्षेयो Ca. चक्षेय यो B.
11) Cb. adds भदंत.
12) विषदूषणं A. Ca. K. W. विषणाषणं Cb.

णकानां रक्षावरणगुप्तिं करिष्यथे यो[1] ऽस्य धर्मपर्यायस्यान्तशो नामधेयमात्रमपि धारयिष्यन्ति । कः पुनर्वादो य इमं धर्मपर्यायं सकलसमाप्तं धारयिष्यन्ति पुस्तकगतं वा[2] सत्कुर्युः[3] पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकावैजयन्तीभिस्तैलप्रदीपैर्वा घृतप्रदीपैर्वा[5] गन्धतैलप्रदीपैर्वा[5] चम्पकतैलप्रदीपैर्वा[6] वार्षिकतैलप्रदीपैर्वोत्पलतैलप्रदीपैर्वा सुमनातैलप्रदीपैर्वैदूर्यैर्बर्कुविधैः पूजाविधानशतसहस्रैः सत्करिष्यन्ति गुरुकरिष्यन्ति[8] ते[7] लया कुक्षि सपरिवारया रक्षितव्याः ॥

अस्मिन्खलु पुनर्धारणीपरिवर्ते निर्दिश्यमान अष्टाषष्टीनां प्राणसहस्राणामनुत्पत्तिकधर्मक्षान्तिप्रतिलाभो[9] ऽभूत् ॥

॥ इति श्रीसद्धर्मपुण्डरीके धर्मपर्याये धारणीपरिवर्तो[10] नामैकविंशतिमः[11] ॥

1) यो Cb.
2) Ca. B. add कृत्वा.
3) सत्कुर्यात् Cb.
4) वैजयन्ती in A. W. only.
5) Left out in Cb.
6) Left out in B.
7) विधान left out in B. Ca. K.
8) सत्कुर्यादुरुकुर्यात्ते B. Ca. adds मानयेत्पूजयेत् K. reads सत्कुर्युर्गुरुकुर्युः.
9) लाभो A. W. लब्धो B. Cb. लम्भो Ca. K.
10) आर्य (for इति श्री) K.
11) नाम द्वा Cb.

XXII.

अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। केन कारणेन भगवन्भैषज्यराजो बोधिसत्त्वो महासत्त्वो ऽस्यां सहायां लोकधातौ प्रविचरति बहूनि चास्य भगवन्डुष्करकोटीनयुतशतसहस्राणि संदृश्यन्ते[1]। तत्साधु भगवान्देशयतु तथागतो ऽर्हन्सम्यक्संबुद्धो भैषज्यराजस्य बोधिसत्त्वस्य महासत्त्वस्य यत्किंचिच्चर्याप्रदेशमात्रं पच्छ्रुत्वा देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यास्तदन्यलोकधात्वागताश्च बोधिसत्त्वा महासत्त्वा इमे च महाश्रावकाः श्रुत्वा सर्वे प्रीतास्तुष्टा उदग्रा आत्तमनसो भवेयुरिति॥

अथ खलु भगवान्नक्षत्रराजसंकुसुमिताभिज्ञस्य बोधिसत्त्वस्य महासत्त्वस्याध्येषणां विदित्वा तस्यां वेलायां नक्षत्रराजसंकुसुमिताभिज्ञं बोधिसत्त्वं महासत्त्वमेतदवोचत्। भूतपूर्वं कुलपुत्रातीते ऽध्वनि गङ्गानदीवालिकासमैः[2] कल्पैरधासीत्तेन कालेन तेन समयेन चन्द्रसूर्यविमलप्रभासश्रीर्[3]नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उदपादि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। तस्य खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ भगवतश्चन्द्रसूर्यविमलप्रभासाश्रियस्तथागतस्यार्हतः सम्यक्संबुद्धस्याशीतिकोट्यो[4] बोधिसत्त्वानां महासत्त्वानां महासंनिपातो[5] ऽभूद्बुद्धासन-

1) Cb. adds स्म.

2) लुकोप B. लुकास Cb.

3) विमल is put in between चन्द्र and सूर्य throughout this Chapter in A. W.

4) तिः Ca. K.

5) पतितो MSS.

तगङ्गानदीवालिकासमाश्चास्य[1] श्रावकसंनिपातो[2] ऽभूत्[3]। अपगतमातृग्रामं च तत्प्रवचनमभूदपगतनिरयतिर्यग्योनिप्रेतासुरकायं समं रमणीयं पाणितलजातं च[4] तद्बुद्धक्षेत्रमभूद्विद्यावैडूर्यमयभूमिभागं रत्नचन्दनवृक्षसमलंकृतं च[4] रत्नजालसमीरितं[5] चावसक्तपट्टदामाभिप्रलम्बितं च रत्नगन्धघटिकानिर्धूपितं च। सर्वेषु च रत्नवृक्षमूलेष्विषुक्षेपमानमात्रे[7] रत्नव्योमकानि संस्थितान्यभूवन्सर्वेषु च रत्नव्योमकमूर्ध्नेषु कोटीशतं[8] देवपुत्राणां तूर्यताडावचरसंगीतिसंप्रवर्तितेनावस्थितमभूत्तस्य भगवतश्चन्द्रसूर्यविमलप्रभासाश्रियस्तथागतस्यार्हतः सम्यक्संबुद्धस्य पूजाकर्मणे। स च भगवानिमं सद्धर्मपुण्डरीकं धर्मपर्यायं तेषां महाश्रावकाणां तेषां च बोधिसत्त्वानां महासत्त्वानां विस्तरेण संप्रकाशयति स्म सर्वसत्त्वप्रियदर्शनं बोधिसत्त्वं महासत्त्वमधिष्ठानं कृत्वा। तस्य खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ भगवतश्चन्द्रसूर्यविमलप्रभासाश्रियस्तथागतस्यार्हतः सम्यक्संबुद्धस्य द्वाचत्वारिंशत्कल्पसहस्राण्यायुष्प्रमाणमभूत्तेषां च बोधिसत्त्वानां महासत्त्वानां तेषां च महाश्रावकाणां तावदेवायुष्प्रमाणमभूत्। स च सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तस्य भगवतः प्रवचने दुष्करचर्याभियुक्तो ऽभूत्। स द्वादश वर्षसहस्राणि चङ्क्रमाभिरूढो ऽभून्महावीर्यारम्भेण योगाभियुक्तो ऽभूत्। स द्वादशानां वर्षसहस्राणामत्ययेन सर्वरूपसंदर्शनं नाम समाधिं

1) लु B.

2) स्य left out in B. Cb.

3) च added in Cb.

4) Left out in B. K.

5) सच्छन्नादितं B. सच्छ्रीदितं Ca. सच्छ्रादितं K. समीरितं A. समीलितं W.

6) K. adds नन्दन.

7) मात्रेण A. B. Cb. W.

8) त K.

9) रं K.

10) K. puts सम् in between सत्त्वम् and अधि.

11) द्वा in Ca. only.

12) कोटी added in Cb.

प्रतिलभते[1] स्म। सकृत्प्रतिलम्भाच्च तस्य समाधेः स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातस्तस्यां[2] वेलायामेवं चित्तयामास। इमं सद्धर्मपुण्डरीकं धर्मपर्यायमागम्यायं मया सर्वबुद्धोपसंदर्शनः समाधिः प्रतिलब्धः। तस्यां[3] वेलायां[4] स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्व एवं चित्तयति स्म। यन्वहं भगवतश्चन्द्रसूर्यविमलप्रभासश्रियस्तथागतस्य पूजां कुर्यामस्य च सद्धर्मपुण्डरीकस्य धर्मपर्यायस्य। स तस्यां वेलायां तथारूपं समाधिं समापन्नो[5] यस्य समाधेः समनन्तरसमापन्नस्य सर्वसत्त्वप्रियदर्शनस्य बोधिसत्त्वस्य महासत्त्वस्याथ तावदेवोपर्यन्तरीक्षान्मान्दारवमहामान्दारवाणां[6] पुष्पाणां महान्तं पुष्पवर्षमभिप्रवृष्टम्। कालानुसारिचन्दनमेघः कृत उरगसारचन्दनवर्षमभिप्रवृष्टम्। तादृशी च नक्षत्रराजसंकुसुमिताभिज्ञा सा गन्धजातिर्यस्या एकः कर्ष[7] इमां[8] सकालोकधातुं मूल्येन क्षमति[9]॥

अथ खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वः स्मृतिमान्संप्रजानंस्तस्मात्समाधेर्व्युत्तिष्ठद्व्युत्थाय चैवं चित्तयामास। न तथार्द्धप्रातिहार्यसंदर्शनेन भगवतः पूजा[11] कृता[12] भवति यथात्मभावपरित्यागेनेति। अथ खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ स[1] सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायामगरुतुरुष्ककुन्दुरुक्कारसं[2] भक्षयति[3] स्म चम्पकतैलं च पिबति स्म। तेन[4] खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ पर्यायेण तस्य सर्वसत्त्वप्रियदर्शनस्य बोधिसत्त्वस्य महासत्त्वस्य सततसमितं गन्धं भक्षयतश्चम्पकतैलं[5] च पिबतो द्वादशवर्षाण्यतिक्रान्तान्यभूवन्। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स[6] सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तेषां द्वादशानां वर्षाणामत्ययेन तं[7] स्वमात्मभावं दिव्यैर्वस्त्रैः परिवेष्ट्य गन्धतैलप्लुतं[8] कृत्वा स्वकमधिष्ठानमकरोत्स्वकमधिष्ठानं कृत्वा स्वं[9] कायं प्रज्वालयामास तथागतस्य पूजाकर्मणोऽस्य च सद्धर्मपुण्डरीकस्य धर्मपर्यायस्य पूजार्थम्। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ तस्य सर्वसत्त्वप्रियदर्शनस्य बोधिसत्त्वस्य महासत्त्वस्य ताभिः कायप्रदीपप्रभाज्वालाभिः[10][11] शीतिगङ्गानदीवालिकासमा लोकधातवः स्फुटा अभूवन्। तासु[12] च लोकधातुष्वशीतिगङ्गानदीवालिकासमा[13][14] एव[15] बुद्धा भगवन्तस्ते सर्वे साधुकारं ददन्ति स्म। साधु साधु कुलपुत्र साधु खलु पुनस्त्वं कुलपुत्रायं

1) K. adds समापन्न.
2) Ca. adds च.
3) K. adds च.
4) Left out in B. Cb. K.
5) समापद्यतः A. W.
6) नन्दा A. K. W.
7) घं कृतोर् A. घ कृतोर् K. W. घं च कृत्वोर् B. घं च कृत्वा उर्. We propose मेघाकृतरु Cb.
8) इयं A. B. K. W. इमं Cb.
9) मूल्य न क्षमते Cb. मूल्यन्न क्षमति K. मूल्यं क्षमते A. B. Ca. W.
10) नन्स्त K. ज्ञानवांस्ततः समा B. ज्ञानक्षतः समा Cb.
11) पूजां A. Cb. W. पूजा B. पूजान् K.
12) कृत्वा Cb.

1) Left out in Cb. K.
2) रु left out in K.
3) द्य K.
4) अनेन K.
5) Left out in Cb. K.
6) Left out in B. Cb. K.
7) तं A. B. K. W. ततश्च Cb.
8) गन्ध left out in B. Cb. K.
9) स्वं B. स्व K. left out in A. Cb. W.
10) प्रमुक्ताभिः added in A. B. Ca.
11) ज्वलाप्रभा A. K. प्रभाज्वला B. ज्वलाप्रमुक्ता Cb. ज्वला W.
12) All but K. तेषु.
13) तिर्ग Ca.
14) लु K.
15) एवं K. left out in W.

स भूतो बोधिसत्त्वानां महासत्त्वानां वीर्यारम्भ इयं सा भूता तथागतपूजा धर्मपूजा। [1] न [2] तथा पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजपताकापूजा नाप्यामिषपूजा नाप्युरगसारचन्दनपूजा। इदं तत्कुलपुत्राग्रप्रदानं न तथा राज्यपरित्यागदानं न प्रियपुत्रभार्यापरित्यागदानम्। इयं पुनः कुलपुत्र विशिष्टाग्रा वरा प्रवरा प्रणीता धर्मपूजा यो ऽयमात्मभावपरित्यागः[3]। अथ खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ ते बुद्धा भगवन्त इमां वाचं भाषित्वा तूष्णीमभूवन्॥

तस्य खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ सर्वसत्त्वप्रियदर्शनात्मभावस्य दीप्यतो द्वादश वर्षशतान्यतिक्रान्तान्यभूवन्न च प्रशमं गच्छति स्म। स पश्चाद्द्वादशानां वर्षशतानामत्ययात्[4] प्रशान्तो ऽभूत्। स खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्व एवंरूपां तथागतपूजां च धर्मपूजां च कृत्वा ततश्च्युतस्तस्यैव भगवतश्चन्द्रसूर्यविमलप्रभासश्रियस्तथागतस्यार्हतः सम्यक्संबुद्धस्य प्रवचने राज्ञो विमलदत्तस्य गृहे उपपन्न औपपादिके[5] उत्सङ्गे पर्यङ्केण[6] प्रादुर्भूतो ऽभूत्। समनन्तरोपपन्नश्च खलु पुनः स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायां स्वमातापितरौ[7][8] गाथयाध्यभाषत॥

अयं ममा[9] चङ्क्रम[10] राज श्रेष्ठ यस्मिं[11] मया स्थित्व समाधि लब्धः।
वीर्यं दृढं आरभितं[12] महाव्रतं परित्यजित्वा प्रियमात्मभावम्॥ १॥

1) Left out in Cb.
2) तथागतस्य A.
3) MSS. have त्यागेति.
4) त्ययेन Cb. K.
5) ड B. Cb.
6) न A. Cb. W. ण B. left out in K.
7) स्वं B. K. स्वा Cb.
8) मातरं K. All पितरं.
9) मया B.
10) मु Cb. मे K.
11) यस्मिन् in all MSS.
12) भतुं K.

अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्व इमां गाथां भाषित्वा[1] स्वमातापितरावेतदवोचत्। अप्याप्यम्ब[2] तात स भगवांश्चन्द्रसूर्यविमलप्रभासश्रीस्तथागतो ऽर्हन्सम्यक्संबुद्ध एतर्हि तिष्ठति धियते यापयति[3] धर्मं देशयति यस्य मया भगवतश्चन्द्रसूर्यविमलप्रभासश्रियस्तथागतस्य[4] पूजां कृत्वा सर्वकृतकौशल्यधारणी प्रतिलब्धायं च महाधर्मपुण्डरीको धर्मपर्यायो ऽशीतिभिर्गाथाकोटीनयुतशतसहस्रैः कङ्कैश्च विरैश्च[6] शान्तोभ्येश्च तस्य भगवतो ऽन्तिकाच्छ्रुतो ऽभूत्। तत्साधम्ब तात गमिष्याम्यहं तस्य भगवतो ऽन्तिकं[7] तस्मिंश्च गत्वा भूयस्तस्य भगवतः पूजां करिष्यामीति। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायां सप्ततालमात्रं वैकाशसमभ्युद्गम्य सप्तरत्नमये कूटागारे पर्यङ्कमाभुज्य[8] तस्य भगवतः सकाशमुपसंक्रान्त उपसंक्रम्य[9][10] तस्य भगवतः पादौ शिरसाभिवन्द्य[11] तं भगवन्तं सप्तकृत्वः[12] प्रदक्षिणीकृत्य[13] येन[14] स भगवांस्तेनाञ्जलिं प्रणाम्य तं भगवन्तं नमस्कृत्वानया गाथयाभिष्टौतीति स्म॥

1) स्वं मातापितरमे A B. Ca. स्वमातापितरावेतद् Cb. तौ स्वौ मातापितरौ एतद् K.
2) All but K. add स्व.
3) A. adds सत्त्वानां.
4) From श्च till गतस्य in Ca. Cb. only.
5) त्या A. K.
6) विश्वरै A. विस्वरै B. K. W. कविश्वरै Cb.
7) के A. W.
8) भुञ्जित्वा K.
9) संक्रामडुप B. Cb. K.
10) In B. only.
11) वन्दित्वा K.
12) त्य Cb. त्व K.
13) कृत्वा K.
14) स only in K.
15) स्तौ A. W. स्तुव B. स्तुवं Cb. स्तव K. more original.

सुविमलवदनो[1] नरेन्द्र धीरा[2] तव प्रभ राजति[3] यं दशदिशासु[4]।
तुभ्यं[5] सुगत कृत्व अग्रपूजां अकृमिकृ आगतु नाथ दर्शनाय ॥ २ ॥

अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायामिमां गाथां भाषित्वा तं भगवन्तं चन्द्रसूर्यविमलप्रभासाश्रियं तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। अद्यापि त्वं भगवंस्तिष्ठसि। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स भगवांश्चन्द्रसूर्यविमलप्रभासश्रीस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तं सर्वसत्त्वप्रियदर्शनं बोधिसत्त्वं महासत्त्वमेतदवोचत्। परिनिर्वाणकालसमयो मे कुलपुत्रानुप्राप्तः[6] त्वयात्तकालो मे कुलपुत्रानुप्राप्तस्तदच्छ[7] त्वं कुलपुत्र मम मञ्चं प्रज्ञपयस्व परिनिर्वापिष्यामीति[8]। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स भगवांश्चन्द्रसूर्यविमलप्रभासश्रीस्तथागतस्तं सर्वसत्त्वप्रियदर्शनं बोधिसत्त्वं महासत्त्वमेतदवोचत्। इदं[9] च ते कुलपुत्र शासनमनुपरिन्दोमोमांश्च[10] बोधिसत्त्वान्महासत्त्वानिमांश्च महाश्रावकानिमां च बुद्धबोधिमिमां च लोकधातुमिमानि च रत्नव्योमकानीमानि च रत्नवृक्षाणीमांश्च देवपुत्रान्ममोपस्थायकाननुपरिन्दामि[11][12][13]। परि-

1) नो Cb.
2) धोरा A. W. वीरा B. Cb. K.
3) प्रभत्रराजते A. प्रभया राजति Cb. प्रभ राजनं W.
4) दि A. दि B. Cb. K. W.
5) तुभ्यं च MSS. against the metre.
6) From त्वया till प्राप्तस् left out in Cb.
7) त्व A. W. स्त्वं B. स्व K.
8) वायिष्या Cb. वापयिष्या K. वास्यामि A. B. Ca. W.
9) इमञ्च B. K.
10) परिदा A. परिंदा W. परिन्दा B. Cb. शासनमनुपरिन्दा K.
11) त्म K.
12) पि Cb.
13) काननुपरिंदा A. काननुपरिंदा K.

निर्वृतस्य च मे कुलपुत्र ये धातवस्ताननुपरिन्दामि[1]। आत्मना[2] च त्वया कुलपुत्र मम धातूनां[3] विपुला पूजा कर्तव्या वैस्तारिकाश्च[4] ते धातवः कर्तव्याः स्तूपानां[5] च बहूनि सहस्राणि कर्तव्यानि। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स भगवांश्चन्द्रसूर्यविमलप्रभासश्रीस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तं सर्वसत्त्वप्रियदर्शनं बोधिसत्त्वं महासत्त्वमेवमनुशिष्य[6] तस्यामेव रात्र्यां पश्चिमे यामे ऽनुपधिशेषे निर्वाणधातौ परिनिर्वृतो ऽभूत्॥

अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तं भगवन्तं चन्द्रसूर्यविमलप्रभासाश्रियं तथागतं परिनिर्वृतं विदित्वोरगसारचन्दनचितां[7] कृत्वा तं तथागतात्मभावं संप्रज्वालयामास[8]। दग्धं निशान्तं[9] च तथागतात्मभावं विदित्वा ततो धातून्गृहीत्वा[10] रोदति क्रन्दति परिदेवते[11] स्म। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वो रुदित्वा क्रन्दित्वा परिदेवित्वा[12] सप्तरत्नमयानि चतुरशीतिकुम्भसहस्राणि[13][14] कारयित्वा तेषु तांस्तथागतधातून्[15][16] प्रक्षिप्य सप्तरत्नमयानि चतु-

1) स्ताननुपरिंदा A. स्ताननुपरिंदा Cb. K. W.
2) नो Ca.
3) धातुस्तूपानां A. W.
4) श्चैव B.
5) In Cb. only.
6) शास्य अस्यामेव K.
7) W. adds मय.
8) सं left out in K.
9) तं added in B.
10) धातु गृहीत्वा A. Cb. W. धातू गृह्य B. K.
11) ति Cb. K.
12) देव्य A. Ca. W.
13) तिं W.
14) तिस्त्रय (for कुम्भ) Cb.
15) तं A. W. तां B. K. left out in Cb.
16) धातुं A. W.

रशीतिस्तूपसहस्राणि प्रतिष्ठापयामास यावद्ब्रह्मलोकमुच्चैस्त्वेन चक्रत्रावलोसमलंकृतानि[1] पटूघण्टासमीरितानि च। स तान्स्तूपान्प्रतिष्ठाप्यैवं चिन्तयामास। कृता मया तस्य भगवतश्चन्द्रसूर्यविमलप्रभासश्रियस्तथागतस्य धातूनां[2] पूजा यतश्च भूय उत्तरिविशिष्टतरां तथागतधातूनां[3] पूजां करिष्यामीति। अथ खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तं सर्वावन्तं बोधिसत्त्वगणं तांश्च महाश्रावकांस्तांश्च देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यगणानामन्त्रयामास[4]। सर्वे यूयं कुलपुत्राः समन्वाहरध्वं तस्य भगवतो धातूनां पूजां करिष्याम इति। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायां तेषां चतुरशीतीनां तथागतधातुस्तूपसहस्राणां[5] पुरस्ताच्चक्षुतपुण्यविचित्रितं स्वं बाहुमादीपयामासादीप्य च द्वासप्ततिवर्षसहस्राणि[6] तेषां तथागतधातुस्तूपानां[7] पूजामकरोत्[8]। पूजां च कुर्वतो[9] तस्याः[10] पर्यङ्को ऽसंख्येयानि श्रावककोटीनयुतशतसहस्राणि विनीतानि सर्वेश्च तैर्बोधिसत्त्वैः सर्वत्रोपसंदर्शनसमाधिः[11] प्रतिलब्धो ऽभूत्॥

अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वावान्बोधिसत्त्वगणस्ते च सर्वे महाश्रा-

---

1) वडि A. वली B. वडो K. वडा W.

2) गतस्य स्तूपानां A. गतधातू B. Ca. गतस्य धातूनां Cb. गतस्य स्तूपानां धातु K. गतस्य धातुनां W.

3) K. adds स्तूपा.

4) Here again O. but with gaps.

5) A. W. add गर्भ; Cb. reads धातूनां स्तूपानां.

6) र्व K.

7) धातु in A. W. only.

8) In B. K. added तेन तां.

9) तेन is put in here instead of तस्याः in A. W.

10) ततः added in A. B. Ca. W. and left out तस्याः.

11) नः Cb. K.

वकास्ते सर्वसत्त्वप्रियदर्शनं बोधिसत्त्वं महासत्त्वमङ्कतो नं दृष्ट्वाश्रुमुखा[1] रुदन्तः[2] क्रन्दन्तः[2] परिदेवमानाः[3] परस्परमेतदूचुः[4]। अयं सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वो ऽस्माकमाचार्यो ऽनुशासकः सो ऽयं सांप्रतमङ्कतो नो बाहुकीनः संवृत्त इति। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ स सर्वसत्त्वप्रियदर्शनो बोधिसत्त्वो महासत्त्वस्तान्बोधिसत्त्वांस्तांश्च महाश्रावकांस्तांश्च देवपुत्रानामन्त्रयामास[5]। मा यूयं कुलपुत्रा नामङ्कतो नं दृष्ट्वा[6] रुदत मा क्रन्दत मा[7] परिदेवध्वम्। एष[8] ऽहं कुलपुत्रा ये केचिद्दशसु दिक्ष्वनन्तापर्यन्तासु[9] लोकधातुषु बुद्धा भगवन्तस्तिष्ठन्ति धियन्ते यापयन्ति तान्सर्वान्बुद्धान्भगवतः साक्षिणः कृत्वा। तेषां पुरतः सत्याधिष्ठानं करोमि येन सत्येन सत्यवचनेन स्वं मम[10] बाहुं तथागतपूजाकर्मणो परित्यज्य सुवर्णावर्णो मे कायो भविष्यति तेन सत्येन सत्यवचनेनायं मम बाहुर्यथा पौराणो भवित्रिं च महापृथिवी षड्विकारं प्रकम्पत्वन्तरीक्षगताश्च देवपुत्रा महापुष्पवर्षं प्रवर्षन्तु[11][12]। अथ खलु नक्षत्रराजसंकुसुमिताभिज्ञ समनन्तरकृते[13] ऽस्मिन्सत्याधिष्ठाने[14] तेन सर्वसत्त्वप्रिय-

---

1) श्रुमुखा Cb. K. O. अकण्ठा the rest.

2) रोदन्ति क्रन्दन्ति O.

3) देवयन्ति O. देवन्तः K.

4) मेतम् B. K. स्यैवम् O.

5) स्तांश्च बो A. W.

6) A. W. add च.

7) रुदध्वं क्रन्दध्वं without repeating मा in Cb. K. रोदथ मा क्रन्दथ मा परिदेवथ O.

8) सो A. B. Ca. W.

9) त्रेषु B. Cb. O.

10) Left out in B. K. A break in O.

11) भवन्विति। इयं पृथिवीप्रदेश K.

12) प्रवर्षयन्तु K. मभि — — — O. From the following it appears that the true reading is अभिप्रवर्षन्तु.

13) K. adds चा.

14) A. Cb. add न.

दर्शनेन बोधिसत्त्वेन महासत्त्वेनाथ खल्वियं[1] त्रिसाहस्रमहासाहस्रो[2] लोकधातुः षड्विकारं प्रकम्पित[3] उपर्यन्तरीक्षाच्च महापुष्पवर्षमभिप्रवर्षितं[4]। तस्य च सर्वसत्त्वप्रियदर्शनस्य बोधिसत्त्वस्य महासत्त्वस्य स बाकुर्यथा पौराणः संस्थितो ऽभूद्यदुत[5] तस्यैव बोधिसत्त्वस्य महासत्त्वस्य ज्ञानबलाधानेन[6] पुण्यबलाधानेन[7] च। स्यात्खलु पुनस्ते[8] नक्षत्रराजसंकुसुमिताभिज्ञ काङ्क्षा वा विमतिर्वा विचिकित्सा वान्यः स तेन कालेन तेन समयेन सर्वसत्त्वप्रियदर्शनो[9] बोधिसत्त्वो महासत्त्वो ऽभूत्। न खलु पुनस्ते[10] नक्षत्रराजसंकुसुमिताभिज्ञैवं द्रष्टव्यम्। तत्कस्य हेतोः। अयं स नक्षत्रराजसंकुसुमिताभिज्ञ भैषज्यराजो बोधिसत्त्वो महासत्त्वस्तेन कालेन तेन समयेन सर्वसत्त्वप्रियदर्शनो[9] बोधिसत्त्वो महासत्त्वो ऽभूत्। इयत्ति नक्षत्रराजसंकुसुमिताभिज्ञ भैषज्यराजो बोधिसत्त्वो महासत्त्वो दुष्करकोटीनयुतशतसहस्राणि करोत्यात्मभावपरित्यागांश्च करोति। बक्कतरं खल्वपि[11] स नक्षत्रराजसंकुसुमिताभिज्ञ बोधिसत्त्वयानसंप्रस्थितः कुलपुत्रो वा कुलदुहिता वेमामनुत्तरां सम्यक्संबोधिमाकाङ्क्षमाणो यः पादाङ्गुष्ठं तथागतचैत्येष्वादीपयेदेकां हस्ताङ्गुलिं पादाङ्गुलिं वैकाङ्गं वा बाङ्गमादीपयेद्बोधिसत्त्वयानसंप्रस्थितः[12] स कुलपुत्रो वा कुलदुहिता वा बक्कतरं पुण्याभिसंस्कार

1) त्व A. B. W. त्वि Cb. K.
2) स्रो A. B. स्रे Cb. स्री K. स्र W.
3) प्रकंपति A. प्रकंपित B. W. प्रकंपतिः Cb. प्रकम्पिता K.
4) वर्षमपि प्रावर्षत् A. W. वर्ष प्रवृष्टं B. वर्ष प्रवर्षितं Ca. वर्षमभिप्रवर्षितं Cb. K.
5) यद्दृन् K.
6) ज्ञानबलेन A. W.
7) पुण्याध्यानबलेन A. W. left out in Cb.
8) स्तेन च B. स्तेन Cb. K.
9) A. K. W. add नाम.
10) स्तेन B. ते or तेन left out in Cb.
11) Left out in A. W.
12) Left out in K.

प्रसवति न त्वेव[2] राज्यपरित्यागान्न प्रियपुत्रदुहितृभार्यापरित्यागान्न त्रिसाहस्रमहासाहस्रीलोकधातोः[4] [5] सर्वसमुद्रपर्वतोत्तमसरस्तडागकूपारामाणां[8] परित्यागात्। यश्च खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ बोधिसत्त्वयानसंप्रस्थितः कुलपुत्रो वा कुलदुहिता[9] वेमां त्रिसाहस्रमहासाहस्रीं[10] लोकधातुं सप्तरत्नपरिपूर्णां[11] कृत्वा सर्वबुद्धबोधिसत्त्वश्रावकप्रत्येकबुद्धेभ्यो दानं दद्यात्स नक्षत्रराजसंकुसुमिताभिज्ञ कुलपुत्रो वा कुलदुहिता वा तावत्पुण्यं प्रसवति यावत्स कुलपुत्रो वा कुलदुहिता वा य इतः सद्धर्मपुण्डरीकाद्धर्मपर्यायादुत्तश्चतुष्पादिकामपि[12] गाथां धारयेत्। इमं[13] तस्य बक्कतरं पुण्याभिसंस्कारं वदामि न त्वेवेमां[14] त्रिसाहस्रमहासाहस्रीं[15] लोकधातुं सप्तरत्नपरिपूर्णां[16] कृत्वा दानं ददतस्तस्य सर्वबुद्धबोधिसत्त्वश्रावकप्रत्येकबुद्धेभ्यः॥

तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ सर्वेषामुत्तमसरस्तडागानां महासमुद्रो मूर्धप्राप्तः। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञ सर्वेषां तथागतभाषितानां सूत्रान्तानामयं

1) प्रसूयते B.
2) न्वे A. B. Ca. W.
3) राजकुल Cb.
4) स्रो A. B. स्र Cb. स्रायां K. स्रां W.
5) तो B. तोः K. तु A. Cb.
6) स left out in Cb.
7) All but Cb. K. add स.
8) रामायाः B. K. The rest have म.
9) वा इमं A. B. W. वा इमां Cb. K.
10) स्रां A. W. स्रों Ca. स्रो K.
11) पूर्णां A. Cb. W. पूर्णां B. K.
12) ष्पदीमपि K.
13) दं B. K.
14) मं A. B. Cb. W. मां K.
15) स्रं A. B. Cb. W. स्रो K.
16) र्णां A. B. Cb. W. र्णां K.

सद्धर्मपुण्डरीको धर्मपर्यायो मूर्धप्राप्तः १। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ सर्वेषां कालपर्वतानां चक्रवाडानां महाचक्रवाडानां[1] च[2] सुमेरुः पर्वतराज[3]ो मूर्धप्राप्तः। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वेषां तथागतभाषितानां सूत्रान्तानां राजा मूर्धप्राप्तः २। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ सर्वेषां नक्षत्राणां चन्द्रमाः प्रभाकरो ऽग्रप्राप्तः। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञ सर्वेषां तथागतभाषितानां सूत्रान्तानामयं सद्धर्मपुण्डरीको धर्मपर्यायश्चन्द्रकोटीनयुतशतसहस्रातिरेकप्रभाकरो ऽग्रप्राप्तः[4] ३। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ सूर्यमण्डलं सर्वं तमोऽन्धकारं विधमति। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वाकुशलतमोऽन्धकारं विधमति ४। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ त्रायस्त्रिंशानां देवा[5]नां शक्रो देवानामिन्द्रः। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वेषां तथागतभाषितानां सूत्रान्तानामिन्द्रः ५। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ ब्रह्मा सहांपतिः सर्वेषां ब्रह्मकायिकानां देवा[6]नां राजा ब्रह्मलोके पितृकार्यं करोति। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वेषां सत्त्वानां शैक्षाशैक्षाणां च सर्वश्रावका[7]णां प्रत्येकबुद्धानां बोधिसत्त्वयानसंप्रस्थितानां च पितृकार्यं करोति ६। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ सर्वबालपृथग्जना[8]नतिक्रान्तः स्रोतआपन्नः सकृदागाम्यनागाम्यर्हत्प्रत्येकबुद्धश्च। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वांस्तथागतभाषितान्सूत्रान्तानतिक्रम्याभ्युद्गतो मूर्धप्राप्तो वेदितव्यः। ते ऽपि

1) Left out in A. K. W.
2) A. K. W. add पर्वतानां.
3) ज्ञा Ca. K.
4) पर्यायो मूर्धप्राप्त चन्द्रकोटीनयुत K.
5) देवपुत्राणां B. देवनिकायानां K.
6) Left out in A. W.
7) श्रावकप्रत्येक K.
8) न left out in A.

नक्षत्रराजसंकुसुमिताभिज्ञ सत्त्वा मूर्धप्राप्ता वेदितव्या ये खल्वमं सूत्रराजं धारयिष्यन्ति ७। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ सर्वश्रावकप्रत्येकबुद्धानां बोधिसत्त्वो ऽग्र[1] आख्यायते। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वेषां तथागतभाषितानां सूत्रान्तानामग्र[2] आख्यायते ८। तद्यथापि नाम नक्षत्रराजसंकुसुमिताभिज्ञ सर्वेषां श्रावकप्रत्येकबुद्धबोधिसत्त्वानां तथागतो धर्मराजः पट्टबद्धः। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायस्तथागतभूतो बोधिसत्त्वयानसंप्रस्थितानाम्[3] ९। त्राता खल्वपि नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वसत्त्वानां सर्वभयेभ्यो विमोचकः सर्वदुःखेभ्यः। तडाग इव तृषितानामग्निरिव शीतार्तानां चैलमिव नग्नानां सार्थवाह इव वणिजानां मातेव पुत्राणां नौरिव पारगामिनां वैद्य इवातुराणां दीप इव तमोऽन्धकारावृतानां रत्नमिव धनार्थिनां चक्रवर्तीव सर्वकोटूराजानां समुद्र इव सरितामुत्केव सर्वतमोऽन्धकारविधमनाय[4]। एवमेव नक्षत्रराजसंकुसुमिताभिज्ञायं सद्धर्मपुण्डरीको धर्मपर्यायः सर्वदुःखप्रमोचकः सर्वव्याधिच्छेदकः[5] सर्वसंसारभय[6]बन्धनसंकटप्रमोचकः। येन चायं नक्षत्रराजसंकुसुमिताभिज्ञ सद्धर्मपुण्डरीको धर्मपर्यायः श्रुतो भविष्यति[7] यश्च[8] लिखति[9] यश्च लेखयति[10]। एषां नक्षत्रराजसंकुसुमिताभिज्ञ पुण्याभिसंस्का-

1) ग्र्ये A. अग्र B. K. ग्र्या Cb. ग्र्य W.
2) ग्र्य A. W. Cp. Pāli *agga*.
3) तत्र (instead of खल्वपि) in B. Cb.
4) धमतया A. K. W. धननेन B. धमतायाः Cb. Our reading conjectural. Equally admissible would be धमनतायै.
5) In B. Cb. only.
6) भय in B. Cb. only.
7) भवति B.
8) Left out in K.
9) लिखिषिष्यति K.
10) लेखापय K. more original.

राणां बौद्धेन ज्ञानेन न शक्यं पर्याप्तो ऽधिगन्तुम्। यावत्तं[1] पुण्याभिसंस्कारं[2] स कुलपुत्रो वा कुलदुहिता वा प्रसविष्यतीमं[3] धर्मपर्यायं[4] धारयित्वा वाचयित्वा वा[5] देशयित्वा वा[6] श्रुत्वा वा लिखित्वा वा पुस्तकगतं वा कृत्वा सत्कुर्याद्गुरुकुर्यान्मानयेत्पूजयेत्पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वज[7]पताकावैजयन्तीभिर्वाद्यवस्त्राञ्जलिकर्मभिर्वा घृतप्रदीपैर्वा गन्धतैलप्रदीपैर्वा चम्पकतैलप्रदीपैर्वा[10] सुमनातैलप्रदीपैर्वा[11] पाटलितैलप्रदीपैर्वा[12] वार्षिकातैलप्रदीपैर्वा[13] नवमालिकातैलप्रदीपैर्वा[14] सत्कारं[15] कुर्याद्गुरुकारं[15] कुर्यात्[15]॥

बकुलश्च स नक्षत्रराजसंकुसुमिताभिज्ञ बोधिसत्त्वयानसंप्रस्थितः कुलपुत्रो वा कुलदुहिता वा प्रसविष्यति[16] य इमं भैषज्यराजपूर्वयोगपरिवर्तं धारयिष्यति वाचयिष्यति श्रोष्यति[17]। सचेत्पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ मातृग्राम इमं धर्मपर्यायं श्रुत्वोद्ग्रहीष्यति[18] धारयि-

---

1) यावंत् B. यावं Cb. यावत् K. यावंतां W.

2) स्कारणां स Cb.

3) प्रसवत्ति। य इमं K.

4) Left out in K.

5) In A. only.

6) Left out in all MSS.

7) B. adds घण्टा.

8) वैजयन्तीभिर् left out in K.

9) भिर् added in W.

10) Left out in Cb.

11) In K. W. only.

12) लि K.

13) Left out in K.

14) A. W. add बकुलविधाभिश्च.

15) Left out in Cb. The 2-nd कुर्यात् left out in K.

16) प्रसवति यः। Cb.

17) A. adds च स B. adds स च W. adds च.

18) द्ग् K. W.

ष्यति तस्य स एव पश्चिमः स्त्रीभावो भविष्यति। यः कश्चिन्नक्षत्रराजसंकुसुमिताभिज्ञेमं भैषज्यराजपूर्वयोगपरिवर्तं पश्चिमायां पञ्चाशत्यां श्रुत्वा मातृग्रामः प्रतिपत्स्यते स खल्वित्वतश्च्युतः सुखावत्यां लोकधातावुपपत्स्यते। यस्यां स भगवानमितायुस्तथागतो ऽर्हन्सम्यक्संबुद्धो बोधिसत्त्वगणपरिवृतस्तिष्ठति धर्मं देशयति यापयति। स तस्यां पद्मगर्भे सिंहासने निषण्ण उपपत्स्यते न च तस्य रागो व्यावधिष्यते न द्वेषो न मोहो न मानो न मात्सर्यं न क्रोधो न व्यापादः। सहोपपन्नश्च पञ्चाभिज्ञाः प्रतिलप्स्यत अनुत्पत्तिकधर्मक्षान्तिं च प्रतिलप्स्यते। अनुत्पत्तिकधर्मक्षान्तिप्रतिलब्धः स खलु पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ बोधिसत्त्वो महासत्त्वो द्वासप्ततिगङ्गानदीवालिकासमांस्तथागतान्द्रक्ष्यति। तादृशं चास्य चतुरिन्द्रियं परिशुद्धं भविष्यति येन चतुरिन्द्रियेण परिशुद्धेन तान्बुद्धान्भगवतो द्रक्ष्यति। ते चास्य बुद्धा भगवन्तः साधुकारमनुप्रदास्यन्ति। साधु साधु कुलपुत्र यत्त्वया सद्धर्मपुण्डरीकं धर्मपर्यायं श्रुत्वा तस्य भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक्संबुद्धस्य प्रवचन

---

1) K. adds वाचयिष्यति.

2) Cb. adds न.

3) ग्राम A. B W. ग्रामन् Cb. ग्रामः K.

4) Left out in B. K.

5) भ A.

6) Left out in K.

7) रोगो K.

8) व्यावाधिष्यति B. वाधिष्यते Cb. व्यावाद्धयिष्यति K Cp. Pāli *vyabādheti*.

9) क्षिम्प्र K.

10) तिर्ग B.

11) लु B. Cb.

12) भवति Cb.

13) तस्य तच्चास्य Cb.

14) रं दा A. W.

15) स त्वं यः A. यस्त्वं B. K. यत्त्वया Cb. यः त्वं यः W.

उद्दिष्टं स्वध्यायितं भावितं चित्तितं मनसिकृतं परसत्त्वानां च[1] संप्रकाशितम्। अयं ते कुलपुत्र पुण्याभिसंस्कारो न शक्यमग्निना दग्धुं नोदकेन कर्तुम्। अयं ते कुलपुत्र पुण्याभिसंस्कारो न शक्यं बुद्धसहस्रेणापि[2] निर्देष्टुम्। विकृतमारप्रत्यर्थिकस्त्वं कुलपुत्रोत्तीर्णाभयसंग्रामो मर्दितशत्रुकण्ठकः[3]। बुद्धशतसहस्राधिष्ठितो ऽसि[4]। न तव कुलपुत्र सदेवके लोके समारके सब्रह्मके सश्रमणब्राह्मणिकायां प्रजायां[5] सदृशो विद्यते तथागतमेकं विनिर्मुच्य। नान्यः कश्चिच्छ्रावको वा प्रत्येकबुद्धो वा बोधिसत्त्वो वा यस्त्वां[6] शक्तः पुण्येन वा[7] प्रज्ञया वा समाधिना वाभिभवितुम्। एवं ज्ञानबलाधानप्राप्तः स नक्षत्रराजसंकुसुमिताभिज्ञ बोधिसत्त्वो भविष्यति॥

यः कश्चिन्नक्षत्रराजसंकुसुमिताभिज्ञेमं भैषज्यराजपूर्वयोगपरिवर्तं भाष्यमाणं श्रुत्वा साधुकारमनुप्रदास्यति तस्योत्पलगन्धो मुखाद्वास्यति गात्रेभ्यश्चास्य चन्दनगन्धो भविष्यति[8]। य इमं[9] धर्मपर्याये साधुकारं दास्यति तस्येम एवंरूपा दृष्टधार्मिका[10] गुणानुशंसा[11] भविष्यन्ति ये मयेतर्हि निर्दिष्टाः। तस्मात्तर्हि नक्षत्रराजसंकुसुमिताभिज्ञानुपरिन्दाम्यहमिमं सर्वसत्त्वप्रियदर्शनस्य बोधिसत्त्वस्य महासत्त्वस्य[12] पूर्वयोगपरिवर्तं यथा[12] पश्चिमे काले पश्चिमे समये पश्चिमायां पञ्चाशत्यां वर्तमानायां[13] पश्चिमस्मिञ्जम्बुद्वीपे प्रचरेत्रान्तर्धानं गच्छेत्र च

1) A. adds परपुद्गलानां च.
2) शत added in A. W.
3) For कण्टकः, like in Pāli.
4) ऽसि added by us.
5) याः A. W. B. यां Cb. या K.
6) MSS. तव.
7) Cb. K. add ज्ञानेन वा.
8) श्चन्दन B. W.
9) इमं A. W.
10) तस्येमे ईदृशा धार्मिका B. Ca. K.
11) संशा A. B. K. संसा Cb. W.
12) Left out in K.
13) वर्तमानायां left out in A. W.

मारः पापीयानवतारं लभेत्र मारकायिका देवता न नागा न यक्षा न गन्धर्वा न कुम्भाण्डा अवतारं लभेयुः। तस्मात्तर्हि नक्षत्रराजसंकुसुमिताभिज्ञाधितिष्ठामीमं[1] धर्मपर्यायमस्मिञ्जम्बुद्वीपे। भैषज्यभूतो भविष्यति ग्लानानां सत्त्वानां व्याधिस्पृष्टानाम्। इमं धर्मपर्यायं श्रुत्वा व्याधिः काये न क्रमिष्यति[2] न जरा नाकालमृत्युः। सचेत्पुनर्नक्षत्रराजसंकुसुमिताभिज्ञ यः[3] कश्चिद्बोधिसत्त्वयानसंप्रस्थितः पश्येदेवंरूपं सूत्रान्तधारकं भिक्षुं तं चन्दनचूर्णैर्नीलोत्पलैरभ्यवकिरेदभ्यवकीर्य चैवं चित्तमुत्पादयितव्यम्। गमिष्यत्ययं कुलपुत्रो बोधिमण्डं। प्रक्षीष्यत्ययं तृणानि[4] प्रज्ञपयिष्यत्ययं[5] बोधिमण्डे तृणसंस्तरं। करिष्यत्ययं मारयन्तपराजयं। प्रपूरयिष्यत्ययं धर्मशङ्खं। प्राकृनिष्यत्ययं धर्मभेरीमुत्तरिष्यत्ययं भवसागरम्। एवं नक्षत्रराजसंकुसुमिताभिज्ञ तेन बोधिसत्त्वयानसंप्रस्थितेन कुलपुत्रेण वा कुलदुहित्रा वैवंरूपं सूत्रान्तधारकं भिक्षुं दृष्ट्वैवं चित्तमुत्पादयितव्यम्। इत्येतादृशाश्चास्य गुणानुशंसा भविष्यन्ति यादृशास्तथागतेन निर्दिष्टाः॥

अस्मिन्खलु पुनर्भैषज्यराजपूर्वयोगपरिवर्ते निर्दिश्यमाने चतुरशीतीनां बोधिसत्त्वसहस्राणां सर्वकृतकौशल्यानुगताया धारण्याः प्रतिलम्भो ऽभूत्। स च भगवान्प्रभूतरत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धः साधुकारमदात्। साधु साधु नक्षत्रराजसंकुसुमिताभिज्ञ यत्र हि नाम त्वमेवमचिन्त्यगुण[धर्मास्तथागतेन निर्दिष्टास्त्वं चाचिन्त्यगुण]धर्मसमन्वागतं[6] तथागतं[7] परिपृच्छसीति॥

1) धिष्ठिता A. B. Cb. W. धिष्ठिहा
2) ना क्र B. नापक्र K.
3) Left out in K.
4) Left out in A. W.
5) प्रज्ञ B. प्रज्ञा Cb. पला K.
6) The words between brackets are a clumsy interpolation.
7) समन्वागतं left out in K.
8) In Ca. K. only.

॥ इति श्रीसद्धर्मपुण्डरीके धर्मपर्याये भैषज्यराजपूर्वयोगपरिवर्तो नाम द्वाविंशतिमः[2] ॥

1) आर्य (instead of इति श्री) in K.

2) वर्तस्त्रयोविंशतिमः Cb. °तितमः W.

XXIII.

अथ खलु भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तस्यां वेलायां मुखपुरुषलक्षणादूर्ध्वविवरान्तरादूर्णाकोशात्प्रभां प्रमुमोच। यया प्रभया पूर्वस्यां दिश्यष्टादशगङ्गानदीवालिकासमानि बुद्धक्षेत्रकोटीनयुतशतसहस्राण्यभया स्फुटान्यभूवन्। तानि चाष्टादशगङ्गानदीवालिकासमानि[1] बुद्धक्षेत्रकोटीनयुतशतसहस्राण्यतिक्रम्य वैरोचनरश्मिप्रतिमण्डिता[2] नाम लोकधातुः। तत्र कमलदलविमलनक्षत्रराजसंकुसुमिताभिज्ञो नाम तथागतो ऽर्हन्सम्यक्संबुद्धस्तिष्ठति धियते यापयति विपुलेनायुष्प्रमाणेन विपुलेन बोधिसत्त्वसंघेन सार्ध[3] परिवृतः पुरस्कृतो धर्मं देशयति स्म। अथ खलु[4] भगवता शाक्यमुनिना तथागतेनार्हता सम्यक्संबुद्धेनोर्णाकोशात्प्रभा प्रमुक्ता[5] सा तस्यां वेलायां वैरोचनरश्मिप्रतिमण्डितां लोकधातुं सहत्याभया स्फुरति स्म। तस्यां[6] खलु पुनर्वैरोचनरश्मिप्रतिमण्डितायां[7] लोकधातौ गद्गद्स्वरो[8] नाम बोधिसत्त्वो महासत्त्वः प्रतिवसति स्मावरोपितकुशलमूलो दृष्टपूर्वांश्च[9] तेन बहूनां तथागतानामर्हतां सम्यक्संबुद्धानामेवंरूपा दृश्यवभा-

1) Left out in Cb. B.

2) तो Ca.

3) Left out in B.

4) सा A. या सा B. Cb. K. सो W.

5) प्र Left out in A. B. W.

6) तस्मिं B.

7) ण्डिते B. Cb.

8) गंगद् in all MSS.

9) पूर्वाश्च A. B. K. W. पूर्वश्च Cb.

साः। बक्कसमाधिप्रतिलब्धश्च स गद्गद्स्वरो बोधिसत्त्वो महासत्त्वः। तद्यथा धनाग्रकेयूरसमाधिप्रतिलब्धः १ सद्धर्मपुण्डरीकसमाधिप्रतिलब्धो २ विमलदत्तसमाधिप्रतिलब्धो ३ नक्षत्रराजविक्रीडितसमाधिप्रतिलब्धो ४ ऽनिलम्भसमाधिप्रतिलब्धो ५ ज्ञानमुद्गतसमाधिप्रतिलब्धश्चन्द्रप्रदीपसमाधिप्रतिलब्धः ६। ७ सर्वद्युतकौशल्यसमाधिप्रतिलब्धः ८ सर्वपुण्यसमुच्चयसमाधिप्रतिलब्धः ९ प्रसादवतीसमाधिप्रतिलब्ध १० ऋद्धिविक्रीडितसमाधिप्रतिलब्धो ११ ज्ञानोत्कासमाधिप्रतिलब्धो १२ व्यूकराजसमाधिप्रतिलब्धो १३ विमलप्रभासंसमाधिप्रतिलब्धो १४ विमलगर्भसमाधिप्रतिलब्धो १५ ऽक्कृत्तसमाधिप्रतिलब्धः १६ सूर्यावर्तसमाधिप्रतिलब्धः १७। पेयालं यावद्गङ्गानदीवालिकोपमसमाधिकोटीनयुतशतसहस्रप्रतिलब्धो गद्गद्स्वरो बोधिसत्त्वो महासत्त्वः। तस्य खलु पुनर्गद्गद्स्वरस्य बोधिसत्त्वस्य महासत्त्वस्य सा प्रभा काये निपतिताभूत्। अथ खलु गद्गद्स्वरो बोधिसत्त्वो महासत्त्व उत्थायासनादेकांसमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणाम्य तं भगवन्तं कमलदल-

1) बक्क in Cb. only.
2) In K. only.
3) गद्गद् K.
4) K. adds नाम.
5) K. adds विरजो.
6) K. adds व्यूकराजसमा°.
7) प्रभ A. Cp. Engl. translation p. 394, note 2.
8) B. Ca. add नुगत.
9) प्रसादवति A. K. W. प्रसादिवती B. प्रसादवती Ca.
10) Left out in B. Ca. K.
11) स in Cb. only.
12) सूर्यगर्भ Cb.
13) Rather कासम.
14) ण K.
15) All प्रणाम्य.

विमलनक्षत्रराजसंकुसुमिताभिज्ञं तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। गमिष्याम्यहं भगवंस्तां सहां लोकधातुं तं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्संबुद्धं दर्शनाय वन्दनाय पर्युपासनाय तं च मञ्जुश्रियं कुमारभूतं दर्शनाय तं च भैषज्यराजं बोधिसत्त्वं दर्शनाय तं च प्रदानशूरं बोधिसत्त्वं दर्शनाय तं च नक्षत्रराजसंकुसुमिताभिज्ञं बोधिसत्त्वं दर्शनाय तं च विशिष्टचारित्रं बोधिसत्त्वं दर्शनाय तं च व्यूकराजं बोधिसत्त्वं दर्शनाय तं च भैषज्यराजसमुद्गतं बोधिसत्त्वं दर्शनाय॥

अथ खलु भगवान्कमलदलविमलनक्षत्रराजसंकुसुमिताभिज्ञस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तं गद्गद्स्वरं बोधिसत्त्वं महासत्त्वमेतदवोचत्। न त्वया कुलपुत्र तस्यां सहायां लोकधातौ गत्वा क्षोभसंज्ञोत्पादयितव्या। सा खलु पुनः कुलपुत्र लोकधातुरुत्कूलनिकूला मृन्मयी कालपर्वताकीर्णा गूथोडिच्छपरिपूर्णा। स च भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धो ह्रस्वकायस्ते च बोधिसत्त्वा ह्रस्वकायास्तव च कुलपुत्र द्वाचत्वारिंशद्योजनशतसहस्राण्यात्मभावप्रतिलाभः। मम च कुलपुत्राष्टषष्टियोजनशतसहस्राण्यात्मभावप्रतिलाभः। त्वं च कुलपुत्र प्रासादिको दर्शनीयो ऽभिरूपः परमशुभवर्ण-

1) तस्मिं सहे B.
2) स A. B. Cb. W. सा K.
3) ल B. लो Cb.
4) यः B. यो Cb. या the rest.
5) र्ण B. Cb.
6) ल B.
7) र्णा: B. Cb.
8) शत in Cb. K. only.
9) Sic A. K. W. लब्धो the rest.
10) ष्ठा A. W.
11) र्यो K.
12) लाभः A. W. लम्भ K.
13) या added in A. Ca. W.

पुष्करतया समन्वागतः पुण्यशतसहस्रात्[1]तिरेकलक्षणलक्षीकः। तस्मात्तर्हि कुलपुत्र तां सहां लोकधातुं गत्वा मा हीनसंज्ञामुत्पादयिष्यसि[2] तथागते च[3] बोधिसत्त्वेषु च[4] तस्मिंश्च बुद्धक्षेत्रे॥

एवमुक्ते गद्गद्स्वरो बोधिसत्त्वो महासत्त्वस्तं भगवन्तं कमलदलविमलनेत्रराजसंकुसुमिताभिज्ञं तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। तथाहं भगवन्करिष्ये यथा तथागत आज्ञापयति[5]। गमिष्याम्यहं भगवंस्तां सहां लोकधातुं तथागताधिष्ठानेन तथागतबलाधानेन[6] तथागतविक्रीडितेन तथागतव्यूहेन तथागताभ्युद्गतज्ञानेन[7][8]। अथ खलु गद्गद्स्वरो बोधिसत्त्वो महासत्त्वस्तस्यां वेलायामनुच्चलित एव तस्माद्बुद्धक्षेत्रादनुत्थितश्चैव तस्मादासनात्तथारूपं समाधिं समापद्यते स्म यस्य समाधेः समनन्तरसमापन्नस्य गद्गद्स्वरस्य बोधिसत्त्वस्याथ तावदेवेहं[9] सहायां लोकधातौ गृध्रकूटे पर्वते तस्य[10] तथागतधर्मासनस्य पुरस्ताच्चतुरशीतिपद्मकोटीनयुतशतसहस्राणि प्रादुर्भूतान्यभूवन्सुवर्णदण्डानि वैडूर्यपत्राणि पद्मकिंशुकवर्णानि[11][12] संदृश्यन्ते स्म।

अथ खलु मञ्जुश्रीः कुमारभूतस्तं पद्मव्यूहप्रादुर्भावं दृष्ट्वा भगवन्तं शाक्यमुनिं तथा-

1) स्राभि A.

2) From here, in K. lost one leaf (107). ज्ञामु our correction for ज्ञो of the MSS.

3) च in A. W. only.

4) च in Cb. only.

5) This paragraph is left out in B. Cb.

6) Left out in Cb.

7) तेन A. Cb. K. W.

8) B. adds च.

9) स्याधतादेवेहं A. तावदेहं the other MSS.

10) Left out in B. Cb.

11) किंशुलक Cb.

12) सं in B. only.

गतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। कस्येदं[1] भगवन्पूर्वनिमित्तं येनेमानि चतुरशीतिपद्मकोटीनयुतशतसहस्राणि संदृश्यन्ते स्म सुवर्णदण्डानि[2] वैडूर्यपत्राणि[2] पद्मकिंशुकवर्णानि[3][4]। एवमुक्ते भगवान्मञ्जुश्रियं कुमारभूतमेतदवोचत्। एष मञ्जुश्रीः पूर्वस्माद्दिग्भागाद्वैरोचनरश्मिप्रतिमण्डिताया लोकधातोस्तस्य भगवतः कमलदलविमलनेत्रराजसंकुसुमिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य बुद्धक्षेत्राद्गद्स्वरो बोधिसत्त्वो महासत्त्वश्चतुरशीतिबोधिसत्त्वकोटीनयुतशतसहस्रैः[5] परिवृतः पुरस्कृत इमां सहां लोकधातुमागच्छति मम[6] दर्शनाय वन्दनाय पर्युपासनायास्य च सद्धर्मपुण्डरीकस्य धर्मपर्यायस्य श्रवणाय। अथ खलु मञ्जुश्रीः कुमारभूतो भगवन्तमेतदवोचत्। कस्तेन भगवन्कुलपुत्रेण कुशलसंभारः कृतो येन स कुशलसंभारेण कृतेनोपचितेनायं विशेषः प्रतिलब्धः। कतमस्मिंश्च भगवन्समाधौ स बोधिसत्त्वश्चरति। तं वयं भगवन्समाधिं शृणुयाम तत्र च वयं भगवन्समाधौ चरेम। तं च वयं भगवन्बोधिसत्त्वं महासत्त्वं पश्येम कीदृशस्तस्य बोधिसत्त्वस्य वर्णः कीदृग्रूपं कीदृग्लिंगं कीदृक्संस्थानं को ऽस्याचार इति। तत्साधु भगवन्करोतु[7] तथागतस्तथारूपं निमित्तं येन निमित्तेन संचोदितः समानः स बोधिसत्त्वो महासत्त्व इमां सहां लोकधातुमागच्छेत्॥

अथ खलु भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तं भगवन्तं प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं परिनिर्वृतमेतदवोचत्। करोतु भगवांस्तथारूपं निमित्तं येन गद्गद्स्वरो बोधिसत्त्वो महासत्त्व इमां सहां लोकधातुमागच्छेत्। अथ खलु भगवान्प्रभूत-

1) कस्यैवं A. K. W. कस्येदं B. Cb.

2) In Cb. only.

3) पद्म left out in Cb.

4) गर्भा (instead of वर्णा) Cb.

5) A. B. K. W. add भिः.

6) In A. added च.

7) करोतु is put in after तथागतः in B. Cb.

रत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धः परिनिर्वृतस्तस्यां वेलायां तथारूपं निमित्तं प्रादुश्चकार[1] गद्गद्स्वरस्य बोधिसत्त्वस्य महासत्त्वस्य संचोदनार्थम्। आगच्छ[2] कुलपुत्रेमां सहां लोकधातुमयं ते[3] मञ्जुश्री. कुमारभूतो दर्शनमभिनन्दति[4]। अथ खलु गद्गद्स्वरो बोधिसत्त्वो महासत्त्वस्तस्य भगवतः कमलदलविमलनेत्रसंकुसुमिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य पादौ शिरसाभिवन्द्य त्रिष्प्रदक्षिणीकृत्य सार्धं तैश्चतुरशीतिबोधिसत्त्वकोटीनयुतशतसहस्रैः[5] परिवृतः पुरस्कृतस्तस्यां वैरोचनरश्मिप्रतिमण्डितायां[6] लोकधातौ[7] रत्नार्हत इमां सहां लोकधातुमागच्छति स्म प्रकम्पद्भिः क्षेत्रैः प्रवर्षद्भिः पद्मैः प्रवाद्यमानैस्तूर्यकोटीनयुतशतसहस्रैः। नीलोत्पलपत्रनेत्रेण वदनेन सुवर्णवर्णेन कायेन पुण्यशतसहस्रालंकृतेनात्मभावेन श्रिया जाज्वल्यमानस्तेजसा दीप्यमानो लक्षणैर्विचित्रितगात्रो नारायणसंहननकायः। सप्तरत्नमयं कूटागारमभिरुह्य वैहायसे सप्ततालमात्रेण बोधिसत्त्वगणपरिवृतः पुरस्कृत आगच्छति स्म। स येनेयं सहा लोकधातुर्येन च गृधकूटः पर्वतराजस्तेनोपसंक्रामदुपसंक्रम्य तस्मात्कूटागाराद्अवतीर्य शतसहस्रमूल्यं मुक्ताहारं गृहीत्वा येन भगवांस्तेनोपसंक्रामदुपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य सप्तकृत्वः प्रदक्षिणीकृत्य

1) र य A. रा Cb. रे W.
2) A. adds तु.
3) तेन Cb.
4) दर्शनायम A. दर्शनाम W.
5) तैश्च् left out in Cb.
6) शीत्या Cb. शीतिभिर्बो A. B. W.
7) तस्यास्मद्वैरो A. तस्मद्वैरो B. तस्यां वैरो Cb. तस्मात् वैरो W.
8) यां A. Cb. ताश्चो B. याः W.
9) तौ Cb.
10) राज्ञ left out in B. Cb.
11) गृह्य A. W.
12) वंदित्वा B.

तं मुक्ताहारं भगवतः पूजाकर्मणे निर्यातयामास निर्यात्य[1] च भगवन्तमेतदवोचत्। कमलदलविमलनेत्रराजसंकुसुमिताभिज्ञो भगवांस्तथागतो ऽर्हन्सम्यक्संबुद्धो भगवतः परिपृच्छत्यल्पाबाधतां[2] अल्पातङ्कतां लघूत्थानतां यात्रां बलं[3] सुखसंस्पर्शविहारतां[4]। एवं च स भगवानवोचत्। कच्चित्ते[5] भगवन्क्षमणीयं[6] कच्चिद्यापनीयं[7] कच्चिद्धातवः[8] प्रतिकुर्वन्ति कच्चित्ते[9] सत्त्वाः स्वाकाराः सुविनेयाः[10] सुचिकित्साः कच्चिच्चुचिकाया[11] मातीव रागचरिता मातीव द्वेषचरिता मातीव मोहचरिता मातीव भगवन्सत्त्वा ईर्ष्यालुका[12] मा मत्सरिणो[13] मामातृज्ञा मापितृज्ञा माश्रामण्या माब्राह्मण्या[14] मा मिथ्यादृष्टयो मादात्तचित्ता मागुप्तेन्द्र-

1) निर्यातयित्वा A. W.; O. here again beginning with यित्वा.
2) अल्पाबाधताय अल्पातङ्कताय लघूत्थानताय परिपृच्छति O. त्यल्पातंकतां A. ति स्म। अल्पातकतां Cb. त्यल्पाबाधतांत्यल्पांतकतां W.
3) यावां बलं A. यात्रां च बलं च B. यात्रां च बलां च Cb. बलंच W. MSS. add च after each substantive यात्रार् बलं W.
4) सुखसं left out in B. सं left out in Cb. सुखाय स्पर्शविहारताय O.
5) कश्चि A. B. कश्चित्तेन Cb. कचि W.
6) क्षय Cb.
7) कश्चि B. Cb. W. कच्चि A.
8) कश्चिद्धातवः A. Cb. कश्चिद्धा धातव B. कंश्चिद्धातवः W.
9) कश्चि A. B. केचि Cb. कच्चि W.
10) वेनेयाः O. विनेयाः the rest. Cp. Pāli *veneyya*.
11) कश्चि सुवि A. कश्चि सुचि B. कच्चि सुवि W.
12) ईर्षालुका A. Cb. ईर्ष्याबकुला B. इत्पर्षालुका W. ईर्ष्यालुका O.
13) रिका A. W. रिण B. Cb. Here begins K. l. 108.
14) ज्ञा A. B. W. ज्ञाः K. ज्ञताः Cb.
15) एया B. एयता Cb. एयाः K. The whole word left out in A. W.
16) एया A. B. W. एयता Cb. एयाः K.
17) यः। Cb. ष्टिका O.
18) त्ता A. B. W. त्तता Cb. त्ताः K.

याः। कच्चित्ते[1] भगवन्निरुत्तमारप्रत्यर्थिका[2] एते सत्त्वाः। कच्चिद्भगवन्प्रभूतरत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धः परिनिर्वृत इमां सहां लोकधातुमागतो[4] धर्मश्रवणाय सप्तरत्नमये स्तूपे मध्यगतः। तं च भगवन्तं तथागतमर्हन्तं सम्यक्संबुद्धं स भगवान्परिपृच्छति[5]। कच्चिद्भगवंस्तस्य भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य तमणीयं[6] कच्चिद्यापनीयं कच्चिद्भगवन्प्रभूतरत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धश्चिरं स्थास्यति। वयमपि भगवंस्तस्य प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य धातुविग्रहं पश्येम। तत्साधु भगवान्दर्शयतु तथागतस्तस्य भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य धातुविग्रहमिति॥

अथ खलु भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तं भगवन्तं प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं पारिनिर्वृतमेतदवोचत्। अयं भगवन्गद्गद्स्वरो बोधिसत्त्वो महासत्त्वो भगवन्तं प्रभूतरत्नं तथागतमर्हन्तं सम्यक्संबुद्धं परिनिर्वृतं द्रष्टुकामः। अथ खलु भगवान्प्रभूतरत्नस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तं गद्गद्स्वरं बोधिसत्त्वं महासत्त्वमेतदवोचत्। साधु साधु कुलपुत्र यत्र हि नाम त्वं भगवन्तं शाक्यमुनिं तथागतमर्हन्तं सम्यक्सं-

1) कश्चि A. W. कश्चित्तेन B. कचि Cb. कच्चि W.

2) र्थिकाः सत्त्वाः B. र्थिकाः। O. र्थिन the rest.

3) कश्चि A. B. Cb. W. कच्चि K. भगवन् left out in A. W.

4) आगतो is put in after °णाय in A. K. W.

5) Cb. K. add स्म.

6) कश्चि A. B. Cb. W. कच्चि K.

7) कश्चि A. B. Cb. कच्चि K. W.

8) स्त left out in A. B. W. Here again O. breaks off.

9) Cb. reads प्रभूतरत्न for शाक्यमुनि and leaves out भगवन्तं °अयं भगवन्.

10) From गद्गद्° till °संबुद्धस्तं left out in A. Cb. तं is added after अयं भगवन् in K.

11) From परिनि° till °संबुद्ध left out in K.

12) A. adds च; W. adds व.

बुद्धं द्रष्टुकामो ऽभ्यागत इमं च सद्धर्मपुण्डरीकं धर्मपर्यायं श्रवणाय मञ्जुश्रियं च कुमारभूतं दर्शनायेति॥

अथ खलु पद्मश्रीर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। कीदृशे[1] भगवन्गद्गद्स्वरेण बोधिसत्त्वेन महासत्त्वेन पूर्व[2] कुशलमूलमवरोपितं[3] कस्य वा तथागतस्यान्तिके। अथ खलु भगवाञ्शाक्यमुनिस्तथागतो[4] ऽर्हन्सम्यक्संबुद्धः पद्मश्रियं बोधिसत्त्वं महासत्त्वमेतदवोचत्। भूतपूर्वं कुलपुत्रातीते ऽध्वन्यसंख्येये[5] कल्पे[5] ऽसंख्येयतरे विपुले ऽप्रमेये ऽप्रमाणे यदासीत्तेन कालेन तेन समयेन मेघदुन्दुभिस्वरराजो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उदपादि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्सर्वरूपसंदर्शनायां[6] लोकधातौ प्रियदर्शने[7] कल्पे। तस्य खलु पुनः कुलपुत्र भगवतो मेघदुन्दुभिस्वरराजस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य गद्गद्स्वरेण बोधिसत्त्वेन महासत्त्वेन तूर्यशतसहस्रप्रवादितेन[8] द्वादशवर्षशतसहस्राणि[9] पूजा कृताभूत्। सप्तरत्नमयानां च भाजनानां[10] चतुरशीतिसहस्राणि[11] दत्तान्यभूवन्। तत्र कुलपुत्र[12] मेघदुन्दुभिस्वरराजस्य[13] तथागतस्य प्रवचने[14] गद्गद्स्वरेण बोधिसत्त्वेन महा-

1) शी A.

2) पूर्व A. B. K. पूर्वं W. left out in Cb.

3) मूलावरोपणेन Cb. °वरुप्तं K. which is also the usual form in O.

4) वां दृष्ट्वा K.

5) Cb. adds पु.

6) रूप left out in A.

7) दर्शने B.

8) स्रं B. K.

9) शत left out in B. Cb.

10) भो K.

11) तिभिः A. तिः B.

12) Left out in A. W.

13) ज्ञस् K. So, too, p. 432, l. 3.

14) A. W. add न.

[1]सत्त्वेनेयमीदृशी [2][3]श्रीः [4]प्राप्ता। स्यात्खलु पुनस्ते कुलपुत्र काङ्क्षा वा विमतिर्वा विचिकित्सा वान्यः स तेन कालेन तेन समयेन गद्गद्स्वरो नाम बोधिसत्त्वो [5]महासत्त्वो ऽभूद्येन [6]सा तस्य भगवतो मेघदुन्दुभिस्वरराजस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य पूजा कृता तानि [7]चतुरशीति[8][9]भाजनसहस्राणि दत्तानि। न खलु पुनस्ते कुलपुत्रैवं द्रष्टव्यम्। तत्कस्य हेतोः। यथमेव स कुलपुत्र गद्गद्स्वरो बोधिसत्त्वो महासत्त्वो ऽभूद्येन [10]सा तस्य भगवतो मेघदुन्दुभिस्वरराजस्य [11]तथागतस्यार्हतः सम्यक्संबुद्धस्य पूजा कृता तानि [12]चतुरशीतिभाजनसहस्राणि दत्तानि। एवं बकुबुद्धपर्युपासितः कुलपुत्र गद्गद्स्वरो बोधिसत्त्वो महासत्त्वो बकुबुद्धशतसहस्रावरोपितकुशलमूलः कृत[13]बुद्धपरिकर्मा। दृष्टपूर्वा[14]श्चानेन गद्गद्स्वरेण बोधिसत्त्वेन महासत्त्वेन गङ्गानदीवालिकासमा बुद्धा भगवन्तः। पश्यसि त्वं पद्मश्रीरेतं [15][16]गद्गद्स्वरं बोधिसत्त्वं महासत्त्वम्। पद्मश्रीराह। पश्यामि भगवन्पश्यामि सुगत। भगवा-

1) Left out in A. K. W.
2) द् K.
3) शीघ्रं A. शी Cb. B.
4) सा: A. W.
5) Left out in A. B. Cb. W.
6) सो A. W.
7) K. adds च.
8) भो W.
9) B. adds शत.
10) सो A. B. Cb. W. सा K.
11) ज्ञस् K.
12) तानि च भाजनानि दत्तानि B. K.
13) कत A. B. Cb. W. कृत K.
14) पूर्वा Cb. K.
15) लुकोप A. K. W. लुकास B. लिकास Cb.
16) श्रीगर्भ एनं तं A. श्रीरेवं B. श्री एवं Cb. श्रीरेतं K. श्रीगर्भ एनं W.

नाह। एष खलु पुनः पद्मश्रीर्गद्गद्स्वरो बोधिसत्त्वो महासत्त्वो बकुभी रूपैरिमं [1]सद्धर्मपुण्डरीकं धर्मपर्यायं देशयति स्म। [2]तद्यथा क्वचिद्ब्रह्मरूपेण क्वचिद्रुद्ररूपेण [3]क्वचिच्चक्रवर्तिरूपेण [4]क्वचिद्दीश्वररूपेण क्वचित्सेनापतिरूपेण [5]क्वचिद्वैश्रवणरूपेण क्वचिच्चक्रवर्तिरूपेण क्वचित्कोटुम्बिकरूपेण क्वचिच्छ्रेष्ठिरूपेण क्वचिद्पुरोहितरूपेण क्वचिन्नैगमरूपेण क्वचिद्ब्राह्मणरूपेणेमं सद्धर्मपुण्डरीकं धर्मपर्यायं देशयति स्म [6]। क्वचिद्भिक्षुरूपेण क्वचिद्भिक्षुणीरूपेण क्वचिदुपासकरूपेण क्वचिदुपासिकारूपेण क्वचिच्छ्रेष्ठिभार्यारूपेण क्वचिद्पुरोहितभार्यारूपेण क्वचिन्नैगमभार्यारूपेण [7]क्वचिद्दारकरूपेण क्वचिद्दारिकारूपेण गद्गद्स्वरो बोधिसत्त्वो महासत्त्व इमं सद्धर्मपुण्डरीकं धर्मपर्यायं सत्त्वानां [8]देशयति [9]स्म [10]। इयद्भिः कुलपुत्र रूपसंदर्शनैर्गद्गद्स्वरो बोधिसत्त्वो महासत्त्व इमं सद्धर्मपुण्डरीकं धर्मपर्यायं [11]सत्त्वानां [11]देशयति स्म [12]। यावत्केषांचिद्यक्षरूपेण गद्गद्स्वरो बोधिसत्त्वो महासत्त्व इमं सद्धर्मपुण्डरीकं धर्मपर्यायं [13]सत्त्वानां [14]देशयति [15]स्म। केषांचिदसुररूपेण केषांचिद्गरुडरूपेण केषांचित्किंनररूपेण केषांचिन्महोरगरूपेण गद्गद्स्वरो बोधिसत्त्वो महासत्त्व इमं सद्धर्मपुण्डरीकं धर्मपर्यायं सत्त्वानां

1) बकुभिरुपायैरिमं B. Cb.
2) Left out in B.
3) Left out in B. Cb. K.
4) Left out in Cb.
5) A. Ca. W. add क्वचिच्छ्रैवरूपेण.
6) Left out in B. Cb.
7) In Cb. only.
8) Left out in A. W.
9) धर्मन् is added in K. W.
10) Left out in B.
11) Left out in A.
12) Left out in B. Cb.
13) Left out in W.
14) A. adds धर्म.
15) Left out in B. Cb. K.

देशयति स्म[1]। यावन्निरयतिर्यग्योनियमलोकात्तणोपपन्नानामपि सत्त्वानां गद्गद्स्वरो बोधिसत्त्वो महासत्त्व इमं[2] सद्धर्मपुण्डरीकं धर्मपर्यायं देशयंस्त्राता भवति[3]। यावद्दक्षिणपूरमध्यगतानामपि सत्त्वानां गद्गद्स्वरो बोधिसत्त्वो महासत्त्वः स्त्रीरूपमभिनिर्मायेमं सद्धर्मपुण्डरीकं धर्मपर्यायं सत्त्वानां[4] देशयति[4] स्म[4]। अस्यां सहायां[5] लोकधातौ सत्त्वानां धर्मं देशयति स्म[6]। त्राता खल्वपि[7] पद्मश्रीर्गद्गद्स्वरो बोधिसत्त्वो महासत्त्वः सहायां[8] लोकधातावुपपन्नानां सत्त्वानाम्[9]। तस्यां च सहायां[10] लोकधातावेव स गद्गद्स्वरो[11] बोधिसत्त्वो महासत्त्व इयद्भूपनिर्मितिरिमं[12] सद्धर्मपुण्डरीकं धर्मपर्यायं सत्त्वानां देशयति[13]। न चास्य सत्पुरुषस्यार्द्धकानिर्नापि प्रज्ञाकानिः[14]। इयद्भिः कुलपुत्र ज्ञानावभासैर्गद्गद्स्वरो बोधिसत्त्वो महासत्त्वो अस्यां सहायां[5] लोकधातौ प्रज्ञायते। अन्येषु च गङ्गानदीवालिकासमेषु[15] लोकधातुषु बोधिसत्त्वो वैनेयानां[16] सत्त्वानां बोधिसत्त्वरूपेण धर्मं देशयति। आवकवैनेयानां[16] सत्त्वानां आवकरूपेण[17]

1) Left out in Cb. K.
2) From इमं till देशयन् left out in A. W.
3) देशयत्ता भविष्यति Cb.
4) Left out in B. Cb. K. O.
5) अस्मिं सहे B.
6) Left out in B. Cb. O.
7) त्रातारभूतः प O.
8) सहे B. O.
9) सत्त्वानाम् left out in A. Cb. W.
10) तस्यां च वैरोचनरश्मिप्रतिमंडितायां A. W. अस्मिश्च B. तस्यां वैरोच° तायां K. तस्यां च सहायां Cb.
11) धातावेष ग° B. Cb. धातौ। एष ग° K.
12) र्मि K. W.
13) In B. added स्म.
14) From नापि till निः left out in A. K. W.
15) लुकोपमेषु A. B. W. लिकासमेषु Cb. O. लुकोपमासु K.
16) वैनेयिकानां A. Cb. W.
17) The whole paragraph is left out in W.

धर्मं देशयति। प्रत्येकबुद्धवैनेयानां सत्त्वानां प्रत्येकबुद्धरूपेण धर्मं देशयति। तथागतवैनेयानां[1] सत्त्वानां तथागतरूपेण धर्मं देशयति। यावत्तथागतधातुवैनेयानां सत्त्वानां तथागतधातुं[2] दर्शयति। यावत्परिनिर्वाणवैनेयानां[3] सत्त्वानां परिनिर्वृतमात्मानं[4] दर्शयति। एवं ज्ञानबलाधानप्राप्तः[5] खलु पुनः पद्मश्रीर्गद्गद्स्वरो बोधिसत्त्वो महासत्त्वः॥

अथ खलु पद्मश्रीर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। अवरोपितकुशलमूलोऽयं भगवन्गद्गद्स्वरो[6] बोधिसत्त्वो महासत्त्वः। कतम एष भगवन्समाधिर्यस्मिन्समाधाववस्थितेन गद्गद्स्वरेण बोधिसत्त्वेन महासत्त्वेनेयत्तः सत्त्वा विनीता इति। एवमुक्ते भगवाञ्शाक्यमुनिस्तथागतो अर्हन्सम्यक्संबुद्धः[7] पद्मश्रियं बोधिसत्त्वं महासत्त्वमेतदवोचत्। एष हि कुलपुत्र सर्वरूपसंदर्शनो नाम समाधिः। अस्मिन्समाधाववस्थितेन[8] गद्गद्स्वरेण बोधिसत्त्वेन महासत्त्वेनैवमप्रमेयः सत्त्वार्थः कृतः॥

अस्मिन्खलु पुनर्गद्गद्स्वरपरिवर्ते निर्दिश्यमाने यानि गद्गद्स्वरेण बोधिसत्त्वेन महासत्त्वेन सार्धं चतुरशीतिबोधिसत्त्वकोटीनयुतशतसहस्राणीमां सहां लोकधातुमागतानि[9] सर्वेषां तेषां सर्वरूपसंदर्शनस्य समाधेः प्रतिलम्भो[10] अभूत्। अस्यां च सहायां[11] लोकधातौ गणानां समतिक्रान्तानां बोधिसत्त्वानां महासत्त्वानां येषां सर्वरूपसंदर्शनस्य समाधेः प्रतिलम्भो[10] अभूत्॥

1) नेयानां B. K. W. नेयिकानां A. B. Cb.
2) B. reads धातुरूपेण धर्मं. O. has रूपमात्मानमुप ‥.
3) नेयाना A. B. K. W. नेयिकानां Cb.
4) निर्वाण A. W.
5) धानगतः Cb.
6) धौ व्यव Cb.
7) वांच्छा B. Cb. K.
8) य A. K. यत्र O.
9) इह सहे लोकधातौ आग° O.
10) लाभो A. W. O.
11) अस्मिं सहे B. O.

अथ खलु गद्गद्स्वरो बोधिसत्त्वो महासत्त्वो भगवतः शाक्यमुनेस्तथागतस्यार्हतः सम्यक्संबुद्धस्य तस्य च भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य धातुस्तूपे विपुलां[1] विस्तीर्णां[2] पूजां कृत्वा पुनरपि[3] सप्तरत्नमये कूटागारे ऽभिरुह्य प्रकम्पद्भिः[4] क्षेत्रैः प्रवर्षद्भिः पद्मैः प्रवाद्यमानैस्तूर्यकोटीनयुतशतसहस्रैः सार्धं तैश्चतुरशीति[5][6]बोधिसत्त्वकोटीनयुतशतसहस्रैः परिवृतः पुरस्कृतः पुनरपि स्वं बुद्धक्षेत्रमभिगतः। समभिगम्य[7] च तं भगवन्तं कमलदलविमलनक्षत्रराजसंकुसुमिताभिज्ञं तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। कृतो मे भगवन्सकाशां लोकधातौ सत्त्वार्थस्तस्य च[8] भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य धातुस्तूपो दृष्टो वन्दितश्च स च भगवाञ्शाक्यमुनिस्तथागतो दृष्टो वन्दितश्च[9] स च मञ्जुश्रीः कुमारभूतो दृष्टः स च भैषज्यराजो बोधिसत्त्वो महासत्त्वो[9] वीर्यबलवेगप्राप्तः स च प्रधानशूरो बोधिसत्त्वो महासत्त्वो दृष्टः सर्वेषां च तेषां[10] चतुरशीति[11]बोधिसत्त्वकोटीनयुत[12]शतसहस्राणां सर्वरूपसंदर्शनस्य समाधेः प्रतिलम्भो[13] ऽभूत्॥

अस्मिन्[14]खलु पुनर्गद्गद्स्वरस्य बोधिसत्त्वस्य महासत्त्वस्य गमना[15]गमनपरिवर्ते भाष्य-

1) Left out in B. and put in after विस्तीर्णां in Cb.
2) र्णाम् K. Cb. र्णां O.
3) Left out in B. Cb.
4) प्रमनिः B.
5) तैम् in B. K. only, and तेभिम् O.
6) A. adds भिः B. reads शीत्या.
7) सम् left out in A. W.
8) In Cb. only.
9) Left out in K. W.
10) चैषां A. K. W.
11) शीतीनां A. W. K. शीते B. शीति Cb.
12) कोटीनयुतशत left out in K.
13) लाभो A. W.
14) अस्मिंश्च K.
15) गमना left out in K.

माणे द्वाचत्वारिंशतां बोधिसत्त्वसहस्राणामनुत्पत्तिकधर्मक्षान्तिप्रतिलम्भो[1][2] ऽभूत्। पद्मश्रियश्च बोधिसत्त्वस्य महासत्त्वस्य सद्धर्मपुण्डरीकस्य समाधेः प्रतिलम्भो[2] ऽभूत्॥

॥ इति श्रीसद्धर्म[3]पुण्डरीके धर्मपर्याये गद्गद्स्वरपरिवर्तो नाम त्रयोविंशतिमः[4]॥

1) केषु धर्मेषु A. K. W. कधर्म B. Cb.
2) लाभो A. W.
3) आर्य (for इतिश्री) K.
4) चतुर्विंश Cb. Reading of O. unknown.

XXIV.

अथ खल्वक्षयमतिर्बोधिसत्त्वो महासत्त्व[1] उत्थायासनादेकांसमुत्तरासङ्गं कृत्वा दक्षिणं[2] ज्ञानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणाम्य[3] भगवन्तमेतदवोचत्। केन कारणेन भगवन्नवलोकितेश्वरो बोधिसत्त्वो महासत्त्वो ऽवलोकितेश्वर इत्युच्यते। एवमुक्ते भगवानक्षयमतिं बोधिसत्त्वं महासत्त्वमेतदवोचत्। इह कुलपुत्र यावत्ति सत्त्वकोटीनयुतशतसहस्राणि यानि[4] दुःखानि प्रत्यनुभवन्ति तानि[5] सचेदवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नामधेयं शृणुयुस्ते[6] सर्वे तस्माद्दुःखस्कन्धात्परिमुच्येरन्[7]। ये च कुलपुत्र सत्त्वा अवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नामधेयं धारयिष्यन्ति[8] सचेत्ते महत्यग्निस्कन्धे[9] प्रपतेयुः सर्वे ते[10] ऽवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य तेजसा तस्मान्मक्तो

1) Left out in A.

2) णा K.

3) MSS. प्रणाम्य.

4) Cb. adds च.

5) ते सर्वे °व A. ते सचेद्व B. Ca. K. तानि च अव Cb.

6) In a text published in Pekin (?) (in the possession of the late Prof. Max Müller — des. as Ch. in the notes hereafter — the following passages are given between शृणुयुस् and ते सर्वे तान्सर्वांस्तस्माद्दुःखस्कन्धादवलोकितेश्वरः पारमोचयेदीश्वरविधानेनावलोकितेन)। तत्कस्य हेतोः। नानादेशेषु नानास्थानेषु नानाज्ञातिष्वपि नरकतिर्यग्योनिप्रेतयमलोकेष्वण्डजजरायुजसंस्वेदजौपपादुकानि समकालस्मृत एव कुलपुत्रार्यस्रादृष्टो(?)श्वर्येण विधानेन ईदृशो ऽस्य प्रभावो ऽस्मात्कारणादवलोकितेश्वरस्यावलोकितेश्वरं। ये च.

7) च्येयुः Ca. K. O.

8) धारयन्ति A. B. Ca. K. W. धारयिष्यन्ति। ते च Cb. धारयंति ते सर्वे O.

9) Cb. adds न.

10) प्रपतेयुस्ते O.

ऽग्निस्कन्धात्परिमुच्येरन्[1]। सचेत्पुनः कुलपुत्र सत्त्वा[2] नदीभिरुह्यमाना अवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्याक्रन्दं कुर्युः सर्वास्ता नद्यस्तेषां सत्त्वानां गाधं दद्युः। सचेत्पुनः[3] कुलपुत्र सागरमध्ये वल्कनाभिरूढानां[4] सत्त्वकोटीनयुतशतसहस्राणां किरणयसुवर्णमणिमुक्तावज्रवैडूर्यशङ्खशिलाप्रवाडाश्मगर्भमुसारगल्वलोक्षितमुक्तादीनां[7] कृतनिधीनां[8] स पोतेषां[9] कालिकावातेन राक्षसीद्वीपे[11] क्षिप्तः स्यात्तस्मिंश्च कश्चिदेवैकः[12] सत्त्वः स्याद्यो ऽवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्याक्रन्दं कुर्यात्सर्वे ते परिमुच्येरन्[13] तस्माद्राक्षसीद्वीपात्। अनेन खलु[14] पुनः[14] कुलपुत्र कारणेनावलोकितेश्वरो बोधिसत्त्वो महासत्त्वो ऽवलोकितेश्वर इति संज्ञायते[15]॥

सचेत्कुलपुत्र कश्चिदेव वध्योत्सृष्टो ऽवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्या-

1) च्येयुः Ca. K. O.

2) सत्त्वा is put in after °माना in Ca. Cb.

3) पुनः left out in B. K. O.

4) वल्कनाद्रूपानां A. B. W. वल्कनाद्रूढानां Ca. Cb. K. वल्कनाभि° Ch. Differently in O.

5) वज्र left out in B. Ca. Cb. W. O.

6) After प्रवाड Ch. adds रजतजातरूप. O. leaves out शङ्खशिलाप्रवाड, and has अश्म for अश्म.

7) मुक्तश्च Ca. K.

8) कृतशोगतानां B. Ch. सोगता Ca. कृतसो° K. कृतसो° W. कृतेन गता भवेयुस्तेषां O.

9) W. adds का.

10) का left out in Ca. केन Cb.

11) पे Ca. K. O. पं the rest.

12) कश्चिदेकः Ca. Cb.

13) च्येयुम् A. Ca. K. O.

14) Left out in Cb. K. O. अक्षयमते for कुलपुत्र O.

15) इति व्यवस्था स्यात् Cb. इति संज्ञानीयते O.

क्रन्दं कुर्यात्तानि[1] तेषां वध्यघातकानां शस्त्राणि विकीर्येरन्[2][3]। सचेत्खलु पुनः कुलपुत्रायं[4] त्रिसाहस्रमहासाहस्रो लोकधातुर्यत्तरात्तसैः परिपूर्णो भवेत्ते ऽवलोकितेश्वरस्य महासत्त्वस्य नामधेयग्रहणेन[5] दुष्टचित्ता द्रष्टुमप्यशक्ताः स्युः[7]। सचेत्खलु पुनः[8] कुलपुत्र कश्चिदेव सत्त्वो दार्वायस्मयैर्वा[9][10] कुडिनिगडबन्धनैर्बद्धो भवेदपराध्यनपराधी वा तस्यावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नामधेयग्रहणेन[11] क्षिप्रं तानि कुडिनिगडबन्धनानि विवरमनुप्रयच्छन्ति[12]। ईदृशः कुलपुत्रावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य प्रभावः[13]॥

सचेत्कुलपुत्रायं[14] त्रिसाहस्रमहासाहस्रो[15] लोकधातुर्धूर्तैरमित्रैश्चौरैश्च शस्त्रपाणिभिः परिपूर्णो[16] भवेत्तस्मिंश्चैकः सार्थवाहो महान्तं सार्थं[17] रत्नाद्यमनर्घ्यं[18][19] गृहीत्वा गच्छेत्[20]। ते

1) तानि is put in before शस्त्राणि in Ca. K. while A. W. repeats it in the same place.

2) र्येयुः Ca. K. खण्डखण्डानि गच्छेयुः O.

3) The paragraph is left out in Cb.

4) त्रेयं Ca. त्रेवं K.

5) स्त्री Ca. K.

6) र्णा K.

7) In Cb. only.

8) खलु पुनः in B. Cb. only.

9) एव in Cb. only.

10) Left out in Cb. दारुमयैर्वा अयस्मयैर्वा O.

11) धेय wanting in all but O.

12) A. B. Cb. K. W. add स्म.दास्यन्ति for अनुप्रयच्छन्ति O.

13) विषयः O.

14) त्रेयं Ca. K.

15) स्त्री Ca. स्र O.

16) र्णा B. Ca. Cb. K.

17) महान्तं सत्त्वसार्थं A. W. महान्तं सर्वसार्थं B. K. महासत्त्वः सार्थं Cb. महन्तं सार्थं O.

18) घना Cb.

19) मनर्घ्यं left out in Cb. K.

20) Left out in A. B. W. ते च सार्थिकास्तं मार्गं गच्छन्तस्तां° O.

गच्छन्तस्तांश्चौरान्धूर्ताञ्शत्रूंश्च शस्त्रहस्तान्पश्येयुः[1][2]। दृष्ट्वा च पुनर्भीतास्त्रस्ता अशरणा आत्मानं संत्रासयेयुः[3][4]। स च सार्थवाहस्तं सार्थमेवं ब्रूयात्। मा भैष्ट कुलपुत्रा मा भैष्टाभयंददमवलोकितेश्वरं बोधिसत्त्वं महासत्त्वमेकस्वरेण[5] सर्वे समाक्रन्दध्वम्। ततो यूयमस्माच्चौराभयादमित्रभयात्क्षिप्रमेव[6] परिमोक्ष्यध्वे। अथ खलु सर्व एव स सार्थ एकस्वरेणावलोकितेश्वरमाक्रन्देत्[7]। नमो नमस्तस्मै[8] अभयंददायावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वायेति। सकृन्नामग्रहणेनैव स सार्थः सर्वभयेभ्यः परिमुक्तो भवेत्। ईदृशः कुलपुत्रावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य प्रभावः॥

ये कुलपुत्र रागचरिताः सत्त्वास्ते ऽवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नमस्कारं कृत्वा विगतरागा भवन्ति। ये द्वेषचरिताः सत्त्वास्ते ऽवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नमस्कारं कृत्वा विगतद्वेषा भवन्ति। ये मोहचरिताः सत्त्वास्ते ऽवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नमस्कारं कृत्वा विगतमोहा भवन्ति। एवं महर्द्धिकः कुलपुत्रावलोकितेश्वरो बोधिसत्त्वो महासत्त्वः॥

यश्च कुलपुत्रावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य पुत्रकामो मातृग्रामो नमस्कारं करोति तस्य[9] पुत्रः प्रजायते ऽभिरूपः प्रासादिको दर्शनीयः पुत्रलक्षणसमन्वा[10]-

1) गच्छेस्ता A. गच्छेते तान् Ca. गच्छतान् Cb. गच्छंस्तां K. W.

2) पश्येत् A. W.

3) नीया A. नोरन् B. Cb. नीयः Ca. नीयुः K. संत्रीरं W. नेयुः O.

4) Left out in A. Ca.

5) सर्वे A. सर्वं W. left out in B. Ca. Cb. K. O.

6) क्षिप्रमेव in Ch. only.

7) क्रंदयुः A. क्रंदेयुः B. W. O. क्रंदतः Ca. क्रंदेरन् Cb.

8) तस्मै A. Cb. K. W. तस्मिन् Ca. A break in O.

9) तस्या A. W. तस्य B. Cb. K. तस्याः Ca.

10) पुरुष A. W. B. पुत्र Ca. Cb. K.

गतो बक्कुलप्रियो मनापो[1] ज्वरोपितकुशलमूलश्च[2] भवति। यो दारिकामभिनन्दति तस्य[3] दारिका प्रजायते ऽभिरूपा प्रासादिका दर्शनीया परमया शुभवर्णपुष्करतया[4] समन्वागता दारिकालक्षणसमन्वागता[5] बक्कुलप्रिया मनापावरोपितकुशलमूला[6] च भवति। ईदृशः कुलपुत्रावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य प्रभावः।

ये च[7] कुलपुत्रावलोकितेश्वरस्य[8] बोधिसत्त्वस्य[9] महासत्त्वस्य[9] नमस्कारं करिष्यन्ति[10] नामधेयं च धारयिष्यन्ति[11] तेषाममोघफलं भवति। यश्च कुलपुत्रावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नमस्कारं करिष्यति[12] नामधेयं च धारयिष्यति[13]। यश्च द्वाषष्टीनां गङ्गानदीवालिकासमानां[14] बुद्धानां भगवतां[15] नमस्कारं कुर्यान्नामधेयानि च धारयेच्च तावतामेव[16] बुद्धानां भगवतां तिष्ठतां ध्रियतां यापयतां चीवरपिण्डपातशयनासनग्लानप्रत्य-

1) मनापो A. W. मनआपो B. Ca. मनापा Cb.
2) लो A. W. लश्च B. Ca. Cb. K.
3) तस्या A. Ca. W. तस्य B. Cb. K.
4) Left out in Cb.
5) समलंकृता B. K.
6) मना in all MSS.
7) च in B. K. only. B. adds तु.
8) कुलपुत्र left out in Ca. Cb.
9) °राय °त्वाय. So almost always in similar cases before and after in Ch.
10) करिष्यति A. °न्ति W. left out in Cb. कुर्वन्ति Ca. K.
11) From नाम° till ष्यन्ति left out in Ca. From नमस्कारं till ष्यन्ति left out in Cb.
12) कुर्यात् Ca.
13) धारयेत् Ca.
14) ष्टिगंगा B. K. ष्टीभ्यो Ch.
15) कोप A. W.
16) कोपमेभ्यो बुद्धेभ्यो भगवद्भ्यो Ch.
17) एव in Ch. only.
18) Left out in Cb. while B. Ca. read ध्रियमानानां and put it after यापयतां.

यभैषज्यपरिष्कारैः[1] पूजां कुर्यात्। तत्किं मन्यसे कुलपुत्र कियत्तं स[2] कुलपुत्रो वा कुलदुहिता वा ततो निदानं[3] पुण्याभिसंस्कारं प्रसवेत्[4]। एवमुक्ते ऽन्तयमतिर्बोधिसत्त्वो महासत्त्वो[5] भगवन्तमेतदवोचत्। बक्कुं भगवन्बक्कुं सुगत स[6] कुलपुत्रो वा कुलदुहिता वा ततोनिदानं[7] बक्कुं पुण्याभिसंस्कारं प्रसवेत्[8]। भगवानाह। यश्च कुलपुत्र तावतां[9] बुद्धानां भगवतां सत्कारं[10] कृत्वा पुण्याभिसंस्कारो यश्चावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्यान्तश एकमपि नमस्कारं कुर्यान्नामधेयं च धारयेत्[11]समो ऽनधिको ऽनतिरेकः पुण्याभिसंस्कार उभयतो भवेत्[12]। यश्च तेषां द्वाषष्टीनां गङ्गानदीवालिकासमानां बुद्धानां भगवतां सत्कारं[13] कुर्यान्नामधेयानि[14] च धारयेत्। यश्चावलोकितेश्वरस्य[15] बोधिसत्त्वस्य महासत्त्वस्य नमस्कारं कुर्यान्नामधेयं च धारयेत्। एतावुभौ पुण्यस्कन्धौ न शक्नुतः क्षपयितुं कल्पकोटीनयुतशत-

1) भैषज्य left out in W.
2) कियत्स K. स left out in A. Ca. W.
3) In Ca. only.
4) प्रसूयते B.
5) Ch. adds तं.
6) Left out in Cb.
7) Left out in Cb. बक्कुतरं W.
8) रः प्रसूयते B.
9) ताव left out in B.
10) B. K. add गुरुकारं कृत्वा माननां पूजनामर्थनामपचायनां कृत्वा; for अर्थ to r. अर्च.
11) From समो till धारयेत् (before एतौ) left out in Cb.
12) भवेत् in Ch. only.
13) नमस्कारं Ca.
14) धेयं A. W.
15) This paragraph is left out in A. Cb.

सङ्घेरपि । एवमप्रमेयं कुलपुत्रावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य नामधारणात्पुण्यम्[2] ॥

अथ खल्वक्षयमतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । कथं भगवन्नवलोकितेश्वरो बोधिसत्त्वो महासत्त्वो ऽस्यां सहायां[3] लोकधातौ प्रविचरति[4] । कथं सत्त्वानां धर्मं[5] देशयति । कीदृशश्चावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्योपायकौशल्यविषयः । एवमुक्ते भगवानक्षयमतिं बोधिसत्त्वं महासत्त्वमेतदवोचत् । सन्ति कुलपुत्र लोकधातवो येष्ववलोकितेश्वरो बोधिसत्त्वो महासत्त्वो बुद्धरूपेण[6] १ सत्त्वानां धर्मं देशयति । सन्ति लोकधातवो येष्ववलोकितेश्वरो बोधिसत्त्वो महासत्त्वो बोधिसत्त्वरूपेण[7] २ सत्त्वानां धर्मं देशयति । केषांचित्[8]प्रत्येकबुद्धरूपेणावलोकितेश्वरो ३ बोधिसत्त्वो महासत्त्वः सत्त्वानां धर्मं देशयति । केषांचिच्छ्रावकरूपेणावलोकितेश्वरो ४ बोधिसत्त्वो महासत्त्वः सत्त्वानां धर्मं देशयति । केषांचिद्ब्रह्म[9]रूपेणावलोकितेश्वरो ५ बोधिसत्त्वो महासत्त्वः सत्त्वानां धर्मं देशयति । केषांचिच्छक्र[10]रूपेणावलोकितेश्वरो ६ बोधिसत्त्वो महासत्त्वः सत्त्वानां धर्मं देशयति । केषांचिन्नरेन्द्ररूपेणावलोकितेश्वरो ७ बोधिसत्त्वो महासत्त्वः सत्त्वानां धर्मं देशयति । यक्षवैने[11]-

1) A. W. add धेयं.
2) पुण्यः Cb. पुण्य Ca. left out in A.
3) ऽस्मिं सङ्घे B. K.
4) Cb. adds स्म.
5) सत्त्वेभ्यो Ch. So in similar cases hereafter.
6) K. adds च.
7) बोधिसत्त्व left out in Cb.
8) केभ्यश्चित् Cb. So in similar cases hereafter.
9) च्छक्र Ch. ब्राह्मण Cb.
10) ब्रह्म Ch.
11) K. adds केषांचिद्.

यानां[1] सत्त्वानां यक्षरूपेण ८ धर्मं देशयति । ईश्वरवैनेयानां[2] सत्त्वानामीश्वररूपेण ९ धर्मं देशयति । सङ्घेश्वरवैनेयानां[3] सत्त्वानां सङ्घेश्वररूपेण १० धर्मं देशयति । चक्रवर्तिराजवैनेयानां[4][5] सत्त्वानां चक्रवर्तिराजरूपेण[6] ११ धर्मं देशयति । पिशाचवैनेयानां सत्त्वानां पिशाचरूपेण १२ धर्मं देशयति । वैश्रवणवैनेयानां[7][8] सत्त्वानां वैश्रवणरूपेण[7] १३ धर्मं देशयति । सेनापतिवैनेयानां[8] सत्त्वानां सेनापतिरूपेण १४ धर्मं देशयति । ब्राह्मणवैनेयानां[8] सत्त्वानां ब्राह्मणरूपेण १५ धर्मं देशयति । वज्रपाणिवैनेयानां[9] सत्त्वानां वज्रपाणिरूपेण १६ धर्मं देशयति । एवमचिन्त्यगुणसमन्वागतः कुलपुत्रावलोकितेश्वरो बोधिसत्त्वो महासत्त्वः[10] । तस्मात्तर्हि कुलपुत्रावलोकितेश्वरं बोधिसत्त्वं महासत्त्वं पूजयध्वम्[11] । एष कुलपुत्रावलोकितेश्वरो बोधिसत्त्वो महासत्त्वो[12] भीतानां सत्त्वानामभयं ददाति । अनेन कारणेनाभयंदद इति संज्ञायत इह सङ्घायां[13] लोकधातौ ॥

अथ खल्वक्षयमतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । दास्यामो वयं भगवन्नवलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय धर्मप्राभृतं धर्माच्छादम् । भगवानाह । यस्येदानीं[14] कुलपुत्र कालं मन्यसे ॥ अथ खल्वक्षयमतिर्बोधिसत्त्वो महासत्त्वः स्व-

1) नेयिकानां A. Cb. नयिकेभ्यः सत्वेभ्यो Ch. So in similar cases hereafter.
2) नयिक A. नेयक W.
3) The following three paragraphs are left out in B.
4) राज्ञ left out in A. Cb. K.
5) Left out in K.
6) नयिक A.
7) उच्छ्रेय (for वैश्रवण) Cb. Ch.
8) नेयिका Cb.
9) Ch. adds यावद्.
10) A. K. add ऽवलोकितेश्वरो बोधिसत्त्व (left out in K.) इत्युच्यते.
11) पूजयेत् B. K.
12) B. K. add ऽवलोकितेश्वर इत्युच्यते । then read भीतेभ्यः सत्त्वेभ्यो ऽभयं.
13) सङ्घे B. K.
14) Left out in Ca.

कण्ठाद्वतार्य (1)शतसहस्रमूल्यं मुक्ताहारमवलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय धर्माच्छादमनुप्रयच्छति (4)स्म। (5)प्रतीच्छ सत्पुरुषेमं धर्माच्छादं (6)ममानुकम्पाम्। स न प्रतीच्छति स्म॥ अथ खल्वक्षयमतिर्बोधिसत्त्वो महासत्त्वो ऽवलोकितेश्वरं बोधिसत्त्वं महासत्त्वमेतदवोचत्। प्रतिगृह्णाण (7)त्वं कुलपुत्रेमं मुक्ताहारमस्माकमनुकम्पामुपादाय॥ अथ खल्ववलोकितेश्वरो बोधिसत्त्वो महासत्त्वो ऽक्षयमतेर्बोधिसत्त्वस्य महासत्त्वस्यात्तिकात्तं मुक्ताहारं (8)प्रतिगृह्णाति स्मात्तयमतेर्बोधिसत्त्वस्य महासत्त्वस्यानुकम्पामुपादाय तासां (9)च चतसृणां पर्षदां तेषां च देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्याणामनुकम्पामुपादाय। प्रतिगृह्य च द्वौ प्रत्यंशौ कृतवान् कृत्वा (10)चैकं प्रत्यंशं भगवते शाक्यमुनये ददाति स्म द्वितीयं प्रत्यंशं भगवतः प्रभूतरत्नस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य रत्नस्तूपे समुपनामयामास। ईदृश्या कुलपुत्र विकुर्वयावलोकितेश्वरो बोधिसत्त्वो महासत्त्वो ऽस्यां सहायां लोकधातावनुविचरति॥

1) दश (for शत) Cb. सहस्र (for the same) Ca.

2) त्वं K.

3) दनम Ca.

4) स्म left out in B.

5) From प्रती° till स्म left out in Cb.

6) दनं A. W.

7) गृह्ण A. Ca. Cb. W.

8) प्रतीच्छति B. K.

9) In Ca. only.

10) च तं द्विपत्यंशं कृत्वा (for च द्वौ°) Cb.

11) Left out in Cb.

12) समुन्नाम Cb.

13) क्रीव A. कुर्व Ca. Cb. क्रीड B. K. W.

14) ऽस्मिं सहे B. K.

15) स्म is added in A. Ca. Cb. W. but left out in B. K.

अथ खलु भगवांस्तस्यां (1)वेलायामिमा गाथा अभाषत॥

(2)चित्रध्वज (3)अक्षयोमतौ (4)एतमर्थं (5)परिपृच्छ (6)कारणात्(7)।
(8)केन ज्ञिनपुत्र केतुना (9)उच्यते हि (10)(11)अवलोकितेश्वरः॥ १॥
(12)अथ तादृशता (13)विलोकिया (14)प्रणिधोसागरु (15)अक्षयोमतिः(16)।
(17)चित्रध्वजमाधिभाषते (18)शृणु चर्यामवलोकितेश्वरे (19)॥ २॥

1) Ch. reads खल्वक्षयमतिर्बोधिसत्त्वो महासत्त्वस्तस्यां, which agrees with Kumārajīva's version, though the following verses were translated by Jñānagupta sometime after Kumārajīva, and added to the version of the latter. The verses are altogether left out in the oldest Chinese version by Dharmarakṣa Cp. the English translation, p. 413.

2) These verses seem to be in the metre वैतालीय.

3) ज्ञो Cb.

4) अक्षयमति A. W. Rather अक्षयामतौ.

5) तेधनमथु B.

6) च्छि Ch.

7) णा A. B. Ca. K. णात् Cb. Ch. णां W.

8) The metre requires one short syllable more.

9) ना left out in K.

10) left out in K.

11) उच्यते क्व वलो A. W.

12) अर्थ A. W.

13) सादृशतामेव वि A. सादृशनामव B. तादृशता दिशाव K.

14) कितेया B. कितोया W.

15) रु A. र् B. Cb. K. W.

16) ती A. B. K. W. तिः Cb. Ch.

17) ज्ञो Cb. ज्ञ the rest.

18) षमी A. B. K. षती Ca. Cb. षते Ch.

19) रो A.

कल्पशतनेकाचित्तिया बुद्धबुद्धान सहस्रकोटिभिः ।
प्रणिधान यथा विशोधितस्तथ शृणुया हि मम प्रदेशतः ॥ ३ ॥
श्रवणा श्रय दर्शनो पि च श्रनुपूर्वं च तथा श्रनुस्मृतिः ।
भवतीह श्रमोघप्राणिनां सर्वदुःखभवशोकनाशकः ॥ ४ ॥
सचि श्रग्निखदाय पातयेद्घातनार्थाय प्रदुष्टमानसः ।
स्मरतो श्रवलोकितेश्वरं श्रभिसिक्तो इव श्रग्नि शाम्यति ॥ ५ ॥
सचि सागरदुर्गि पातयेन्नागमकरभूतश्रालये ।
स्मरतो श्रवलोकितेश्वरं जलराजे न कदाचि सीदति ॥ ६ ॥

---

1) W. adds बुद्ध.
2) शता A. B. W.
3) नु Ch.
4) यतो Cb.
5) तत्र Ca. ततो Cb. तथा W.
6) यतो Cb.
7) तो A. B. Cb. W. तेः Ca. तः Ch.
8) णा Ch.
9) श्र left out in A. W.
10) सर्वभवदुःख B. K.
11) सच A. B. Ca. W. सचि Cb. Ch. K.
12) A. Ca. Cb. W. add प्र.
13) रो A. Cb. W. रं B. Ca. K. Ch.
14) सच B. W.
15) गरि डुर्ग A. B. K. गरि डुर्गि Ca. गरडुर्ग Cb. गरडुर्गि Ch.
16) भूतशांतमारये A. भूगमालये W.
17) राजो A. B. K. जे Ca. Ch. ज Cb. ज्ञो W.
18) Ch. adds सं.

सचि मेरुतलानुपातयेद्घातनार्थाय प्रदुष्टमानसः ।
स्मरतो श्रवलोकितेश्वरं सूर्यभूतो व नभे प्रतिष्ठति ॥ ७ ॥
वज्रामयपर्वताश्रनो घतनार्थाय च मूर्धि श्रोषरेत् ।
स्मरतो श्रवलोकितेश्वरं रोमकूप न प्रभोन्ति हिंसितुम् ॥ ८ ॥
सचि शत्रुगणैः परीवृतः शस्त्रहस्तेभि विहिंसचेतसैः ।
स्मरतो श्रवलोकितेश्वरं मैत्रचित्त तद् भोन्ति तत्क्षणम् ॥ ९ ॥
सचि श्राघतने उपस्थितो वध्यघातान वशं गतो भवेत् ।
स्मरतो श्रवलोकितेश्वरं खण्डखण्ड तद् शस्त्र गच्छियुः ॥ १० ॥

---

1) साच W.
2) रो A. B. Ca. Cb. K. रं Ch. W.
3) तं B. तो Cb. प्रभूतं A. W.
4) Left out in Ca.
5) ष्ठित A. ष्ठति B. Ca. K. W. ष्ठते Cb.
6) वज्र Ca. Ch.
7) सनि A. सनी B. W. Ca. K. यदिह Cb. यदि Ch.
8) च यदि श्रौषधौ A. यदि श्रौषधी W. यदि मूर्द्ध ज्ञाषरो B. च दुष्टमानसो Cb. च मूर्ध्नि श्रषिरेन् Ch. च मूर्द्ध श्रोषरेत् K. Cp. श्रोसर्रति, श्रोशिरति Mahāvastu. I 24,1; 143,13; 209,9; II, 4,6; 334,22.
9) रं A. B. K. W. रो Cb.
10) Left out in W.
11) हिंसना Cb.
12) हि A. K. Cb. भि B. Ca. Cb.
13) मनसैः Ch.
14) मि Cb.
15) त्त ते भवन्ति Ca. त्त तद्भोन्ति K.
16) घा B. Ch.
17) ते Ca. Cb.
18) ना A.
19) रो Ca. Cb. So too in following verses.
20) ष A. B. Ca. Cb. K. W. यू W.

सचि दारुमयैरयोमयैर्कडिनिगडैरिरु[1] बद्ध बन्धनैः।
स्मरतो अवलोकितेश्वरं क्षिप्रमेव विपटन्ति बन्धना ॥ ११ ॥
मन्त्रबलविद्यौषधी भूतवेताल[4] शरीर[5]नाशनाः।
स्मरतो अवलोकितेश्वरं तेन गच्छन्ति यतः प्रवर्तिताः ॥ १२ ॥
सचि श्रोत्रुरैः परीवृतो यत्तनागामुरभूतराक्षसैः।
स्मरतो अवलोकितेश्वरं रोमकूपं न प्रभोन्ति[10] हिंसितुम् ॥ १३ ॥
सचि व्याडमृगैः परीवृतस्तीक्ष्णदंष्ट्रनखैरमर्कोभयैः।
स्मरतो अवलोकितेश्वरं क्षिप्र गच्छन्ति दिशा समन्ततः ॥ १४ ॥
सचि दृष्टिविषैः परीवृतो ज्वलनार्चिशिखाडुष्टदारुणैः।
स्मरतो अवलोकितेश्वरं क्षिप्रमेव तद् सन्ति[20] निर्विषाः ॥ १५ ॥

1) रिरु A. W. रपि B. K. Cb. भि Ca.
2) त्र A. Cb. W.
3) ष्या Ca. 4) ड Ch. K.
5) शरीर left out in Cb.
6) In Ca. K. only.
7) श्रौ A. B. Ca. W.
8) रि A. B. Ca. W. रो K.
9) नागमकरासुर Ca.
10) प्रभोंतु K.
11) दंत Ch.
12) नखैर्मर्का Cb. Ch.
13) रो Cb.
14) प्रं B. Ch.
15) दिशा समंततो A. K. दिशनानन्तकः B. Ch. दिसान्समंततो Ca. दिशा अनंतः Cb. दिसा सम। ततो W.
16) पृष्टि A. K. W. स्मृष्ट B. Ch. दृष्टि Cb.
17) रि in all MSS.
18) शिखै Cb. 19) रो Ca.
20) ते भवन्ति A. Ca. W. ते left out in B. तद् संति Cb. भवन्ति K.

गम्भीर[1] [2]सविद्यु निश्चरी[3] मेघवज्राशनिवारिप्रस्रवाः[4]।
स्मरतो अवलोकितेश्वरं[5] क्षिप्रमेव प्रशमन्ति तत्क्षणम्[6] ॥ १६ ॥
बद्धडुःखशतैरुपद्रुतान्सत्व दृष्ट्वा[8] बद्धडुःखपीडितान्[9]।
प्रभज्ञानबलो विलोकिया[10] तेन त्रातारु[11] जगे सदेवके ॥ १७ ॥
ऋद्धोबलपारमिंगतो विपुलज्ञानउपायशिक्षितः।
सर्वत्र दृशादृशी[12] जगे[13] सर्वक्षेत्रेषु अशेष दृश्यते[14] ॥ १८ ॥
ये च अक्षणाडुर्गतीभया नरकातिर्यग्यमस्य[16] शासने।
जातोजरव्याधिपीडिता[18] अनुपूर्वं प्रशमन्ति प्राणिनाम् ॥ १९ ॥

1) रं A. Ca.
2) सु Cb. Ch. W.
3) Left out in A. W. निश्चरी for निश्चरे.
4) पारिप्रस्रवां A. वारि left out in B. पारप्रस्रवा Ca. पारप्रेसेवा Cb. धारप्रस्रवाः Ch. वारिप्रस्रवाः K. वारिप्रस्रावां W.
5) रो Ca. Cb.
6) णो Cb. Ch.
7) ता A. Ca. W. तां B. Cb. तान् Ch. K.
8) सर्वदृष्ट A. W. सत्व दृष्टि B. K. सर्वसत्व दृष्ट्व Ca. सत्व दृष्ट Cb. सत्वां दृष्ट्वा Ch.
9) तां A. B. Ca. Cb. W. तान् Ch. ताः K.
10) किया A. B. Ca. कियात् Cb. कितया W.
11) त्रातानुज्ञशमदेवके A. त्रातारु जगे B. Ca. Ch. K. त्रातारु जागे Cb. त्राताहु जग W.
12) से Ca. शि Cb. सि W. All दृश.
13) सर्व left out in Cb.
14) ति B.
15) ये च सुत्कात्तणा A. ये च सत्वा अक्षणा B. ये च सत्वात्तणा Cb. W. ये च सर्वात्तणा K. ये सत्वा अक्षणा Ch. Our reading conjectural.
16) तीर्यग्यम A. तिर्यग्यम B. Ca. Cb. स्तिर्यग्यम Ch. तिर्यकयम K. तिर्यग्गम W.
17) जरा A. B. Cb. K. W. जर Ca.
18) परिपोडिता K.

(1)अथ खल्वक्षयमतिर्हृष्टतुष्टमना इमा गाथा अभाषत ॥

शुभलोचन मैत्रलोचना प्रज्ञाज्ञानविशिष्टलोचना ।
कृपलोचन(3)(4) शुद्धलोचना(5) प्रेमणीया सुमुखा सुलोचना(6) ॥ २० ॥
अमलामलनिर्मलप्रभा(7) वितिमिरज्ञान दिवाकरप्रभा(8) ।
अपराकृतानलज्वलप्रभा(9) प्रतपन्तो जगती(10) विरोचसे(11) ॥ २१ ॥
कृपसद्गुणमैत्रगर्जिता(12)(13) शुभगुण मैत्रमना महाघना ।
क्लेशाग्नि शमेसि प्राणिनां(14) धर्मवर्ष अमृतं(15) प्रवर्षसि ॥ २२ ॥
कलहे च विवादविग्रहे(16) नरसंग्रामगतो महाभये ।
स्मरतो अवलोकितेश्वरं(17) प्रशमेया अरिसंघपापका(18)(19) ॥ २३ ॥

---

1) This paragraph is left out in Cb. Ch. Cp. English translation p. 415.
2) विशुद्ध Ch.
3) कृपा A.
4) कृपलोचन left out in Cb.
5) विशुद्ध Cb.
6) सु left out in A.
7) अमलमल A. W. अमलविमल Ch.
8) प्रभा A. W.
9) त अनि B. Cb. रात अनि Ca. All have °निलज्वल. The metre disturbed.
10) रौं K.
11) सि B. Ca. K. ते Cb.
12) संभूत B. Cb. K.
13) शील Ch.
14) ति Cb.
15) र्ष अ A. B. Cb. K. W. र्षम Ca. Ch. We read र्षं अ for the sake of metre.
16) यः Cb.
17) रो Cb.
18) प्रसमेसी Ca.
19) पासका A. पाशका W. पापका B. पापको Ca. पातकान् Cb. संपपका Ch. संघुपापका K.

मेघस्वर(1) दुन्दुभिस्वरो(2) जलधरगर्जित ब्रह्ममुस्वरः(3)(4) ।
स्वरमण्डलपारमिंगतः(5) स्मरणीयो(6) अवलोकितेश्वरः ॥ २४ ॥
स्मरथा स्मरथा माकाङ्क्षथा(7) शुद्धसत्त्वं अवलोकितेश्वरम्(8) ।
मरणे व्यसने उपद्रवे(9) त्राणु भोति शरणं(10) परायणम्(11) ॥ २५ ॥
सर्वगुणपारमिंगतः(12)(13) सर्वसत्त्वकृपमैत्रलोचनो(14) ।
गुणभूत(15) महागुणोदधी(16) वन्दनीयो(17) अवलोकितेश्वरः(18) ॥ २६ ॥

---

1) श्वर Ch.
2) श्वरा Ch.
3) मु left out in Ch.
4) स्वरो A. B. Ca. W. स्वरा Cb. स्वरः Ch.
5) स्म A. B. W.
6) यु Ca.
7) सा B. मा Ca. Ch. K. Is left out in A. Cb. W. The long vowel of मा destroys the metre.
8) त्वमव in all MSS.
9) द्रूपद्रूते A.
10) णं Ca. Ch. णो Cb.
11) ने Cb. णं Ch.
12) Ch. adds धर्म. Perhaps the true reading is सर्वधर्म, for गुण is metrically wrong.
13) सर्व left out in A.
14) नो A. B. K. W. ना Ca. Cb. नः Ch.
15) गुणाभूत A. W. गुणभूत B. Ca. गुणभूमि Cb. गुणभूतु K.
16) धि Cb.
17) ये Cb.
18) रो A. B. Ca. Cb. K. W. रः Ch.

(1)यो ऽसौ अनुकम्पको जगे बुद्ध (2)भेष्यति (3)अनागते ऽध्वनि।
सर्वदुःख(4)भय(5)शोकनाशकं (6)प्रणमामो अवलोकितेश्वरम्॥ २७॥
लोकेश्वरु (8)राजनायको भिनु धर्माकरु (9)लोकपूजितो (10)।
बहुकल्पशतांश्चरित्वा नायको (11)प्राप्त (12)बोधिं (13)विरजां अनुत्तराम्॥ २८॥
(15)स्थित (16)दक्षिणवामतस्तथा (17)वीजयन्त (18)अमिताभनायकम्।
(19)मायोपम ते समाधिना सर्वक्षेत्र जिनगन्ध (20)पूजिषु॥ २९॥

1) The remaining seven verses are left out in the Chinese version.
2) A. Cb. W. add सो.
3) तो Ca. सि Ch.
4) दुःख left out in Ca.
5) भव B. K. W.
6) मनो A. B. K. W. सको Ca. मनं Cb. शकः Ch.
7) मी B. Ca. K. Cb. W. मि A. Ch.
8) श्वरु K. श्वर the rest.
9) रुणा A. रो Ca. W. र Cb. Ch. स K. left out in B.
10) तो A. B. K. W. ता Ca. Cb.
11) शतां चरित्वा नायनाः A. शतां चरित्वान B. सत चरित्व नायका Ca. शतसहस्र चरित्व Cb. शतां अचित्तिया Ch. शतां चरित्व नायका K. शताश्चरित्व नायकाः W. The metre disturbed. Perhaps कल्पशत च°.
12) सो A. B. W. स Ca. Cb. Ch. K.
13) ज्ञा A. B. Cb. Ch. K. W. ज्ञां Ca.
14) रा A. B. Ca. Ch. K. W. रं Cb.
15) तो Cb.
16) तेस्त A. W. तो त B. Ca. Cb. K. तस्त Ch.
17) वीजंतु A. W. वीजंत Cb. °यन्तु K.
18) भु B. K. यु Ca. Ch.
19) This whole line is left out in Cb. We propose to read तं for ते.
20) जिन गत्वा K.

(1)दिशं पश्चिम (2)यत्र सुखाकरा लोकधातु विरजा सुखावती (4)।
यत्र एष (5)अमिताभनायकः संप्रति तिष्ठति (7)सत्त्वसारथिः॥ ३०॥
न च इस्त्रिण तत्र संभवो नापि च मैथुनधर्म सर्वशः।
उपपाडुक (8)ते जिनोरसाः (9)(10)पद्मगर्भेषु निषण्ण (11)निर्मलाः॥ ३१॥
सो चैव अमिताभ(12)नायकः पद्मगर्भे विरजे मनोरमे।
सिंहासनि (13)संनिषण्णको (14)शालराजो व (15)यथा (16)विराजते॥ ३२॥
सो ऽपि (17)तथा लोकनायको यस्य नास्ति त्रिभवे ऽस्मि (18)सादृशः।
यन्मे (19)पुण्य स्तविव संचितं (20)क्षिप्र भोम (21)यथ त्वं नरोत्तम इति॥ ३३॥

1) शः Cb.
2) मतः Ch.
3) रो Ca.
4) ते Ch.
5) सो हि Ch.
6) भु K.
7) साम्प्रतिंतिष्ठति K.
8) का A. W.
9) नौ Ch. K.
10) रसा A. B. Ca. K. W. स्था Cb.
11) Left out in Cb.
12) सौ चैव अमिभ A. सो च तथ लोम B. सो पि अमिताभु Ca. सो च तथ लोक Cb. K. सा चैव अमितायु Ch. सो चैव अमिताभ W. One short syllable too much; moreover चैव against the rule; metrically possible सो तथ अ°.
13) ने A. Ca. W. न B. Ch. नि Cb. सनि left out in K.
14) को in all MSS.
15) ज्ञं व A. ज्ञीव K. B. Ch. ज्ञ व Ca. Cb. ज्ञो व W.
16) यदा Ca.
17) सार तथ B. सो च तथ Cb. K. तमपीक्ष हि Ch.
18) स्मिं A. K. W.
19) यन्मया A. B. W. यत्सन Ca. पद्म Cb. यन्मे Ch.
20) संचित् A. संचित B. W.
21) भोम A. B. Ca. K. भोमि Ch. भोतु Cb. सोम W.

अथ खलु धरणिंधरो बोधिसत्त्वो महासत्त्व उत्थायासनादेकांसमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणाम्य[1] भगवन्तमेतदवोचत्। न ते भगवन्सत्त्वा अवरकेण कुशलमूलेन समन्वागता भविष्यन्ति ये ऽवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्येमं धर्मपर्यायं[2] परिवर्तं श्रोष्यन्त्यवलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य[3] विकुर्वानिर्देशं समन्तमुखपरिवर्तं नामावलोकितेश्वरस्य[4] बोधिसत्त्वस्य[5] विकुर्वणाप्रातिहार्यम्[6]॥

अस्मिन्खलु पुनः समन्तमुखपरिवर्ते[7] भगवता निर्देश्यमाने[8] तस्याः[9] पर्षदश्चतुरशीतीनां[10] प्राणिसहस्राणामसमसमायामनुत्तरायां सम्यक्संबोधौ चित्तान्युत्पन्नान्यभूवन्[11]॥

॥ इति श्रीसद्धर्मपुण्डरीके धर्मपर्याये समन्तमुखपरिवर्तो नामावलोकितेश्वरविकुर्वणानिर्देशश्चतुर्विंशतिमः[12][13][14]॥

---

1) All प्रणाम्य.

2) धर्मपर्याय in Ca. only.

3) From वि° till स्य (before वि) left out in Ca. विक्रीडित is read in A. B. Ca. K. W. विकुर्वा in Cb. and विकुर्वाणा in Ch.

4) परि° नाम left out in K.

5) स्य °स्य left out in A. W.

6) विकुर्वणा Ca. Cb. विकुर्वाणा Ch.

7) दिश्यमाने added in Cb.

8) निर्दश्यमानस्य A. निर्दिश्यमाने Ca. Cb. Ch. W.

9) तस्यां K.

10) ति B. K.

11) इति added in all but Ch.

12) आर्य (for इति श्री) K.

13) विकुर्वणा A. विकुर्वा B. Ca. विकुर्व Cb. W. विकुर्वित Ch.

14) पंचविंश Cb.

XXV.

अथ खलु भगवान्सर्वावन्तं बोधिसत्त्वगणमामन्त्रयामास[1]। भूतपूर्वं कुलपुत्रातीते ऽध्वन्यसंख्येयैः कल्पैरसंख्येयतरैर्यदासीत्तेन कालेन तेन समयेन जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञो[2][3] नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोक उदपादि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्प्रियदर्शने कल्पे वैरोचनरश्मिप्रतिमण्डितायां[4] लोकधातौ। तस्य खलु पुनः कुलपुत्रा जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्य[5] तथागतस्य प्रवचने शुभव्यूहो नाम राजाभूत्। तस्य खलु पुनः कुलपुत्रा राज्ञः शुभव्यूहस्य विमलदत्ता नाम भार्याभूत्। तस्य खलु पुनः कुलपुत्रा राज्ञः शुभव्यूहस्य द्वौ पुत्रावभूतामेको विमलगर्भो नाम द्वितीयो विमलनेत्रो नाम। तौ च द्वौ दारकावृद्धिमन्तौ चाभूतां प्रज्ञावन्तौ च पुण्यवन्तौ च ज्ञानवन्तौ च बोधिसत्त्वचर्यायां चाभियुक्तावभूताम्[11]। तत्रया दानपारमितायामभियुक्तावभूतां शीलपारमितायां क्षान्तिपारमितायां वीर्यपारमितायां ध्यानपारमितायां प्रज्ञापारमितायामुपायकौ-

---

1) This paragraph is left out in Cb. श्रवते स्म B. K.

2) राज left out in A.

3) मितो B. Cb. K.

4) ण्डिते B.

5) मितस्य in all MSS.

6) K. adds व.

7) व K.

8) Left out in Ca. Cb.

9) Left out in Ca. Cb.

10) Left out in Ca.

11) K. adds त or व.

12) B. adds अभियुक्तावभूवतां।

13) Cb. adds अभियुक्तौ B. adds अभियुक्तावभूवतां।

शत्यपारमितायां मैत्र्यां करुणायां मुदितायामुपेक्षायां यावत्सप्तत्रिंशत्सु बोधिपक्षिकेषु धर्मेषु[2]। सर्वत्र पारं गतावभूतां विमलस्य समाधेः पारं गतौ नक्षत्रराजादित्यस्य[4] समाधेः पारं गतौ विमलनिर्भासस्य समाधेः पारं गतौ विमलप्रभासस्य[5] समाधेः पारं गतावलंकार-प्रभस्य[6][7] समाधेः पारं गतौ महातेजोगर्भस्य समाधेः पारं गतावभूताम्। स च भगवांस्तेन कालेन तेन समयेनेमं सद्धर्मपुण्डरीकं धर्मपर्यायं देशयामास तेषां सत्त्वानामनुकम्पायै तस्य च राज्ञः प्रभव्यूकस्यानुकम्पायै[8]। अथ खलु कुलपुत्रा विमलगर्भो दारको विमलनेत्रश्च दारको येन स्वमाता[9] जनयित्री[10] तेनोपसंक्रामतामुपसंक्रम्य दशनखसमुद्गलिं प्रगृह्य जनयित्रीमेतदवोचताम्। एह्यम्ब गमिष्यावस्तस्य[13] भगवतो ज्ञलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्य[14] तथागतस्यार्हतः सम्यक्संबुद्धस्य सकाशं[15] तं भगवन्तं ज्ञलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञं[16] तथागतमर्हन्तं सम्यक्संबुद्धं दर्शनाय वन्दनाय पर्युपासनाय। तत्कस्य हेतोः। एषो ह्यम्ब स भगवाञ्ज्ञलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्तथागतो ऽर्हन्सम्यक्संबुद्धः सदेवकस्य लोकस्य पुरतः सद्ध-

1) मैत्र्यायां K. meant मैत्रायां.
2) Left out in A. W.
3) पारं गतां A. B. पारं गतावभूतां Ca. W. पारमितावभूतां Cb.
4) तारा (for राजा) Cb. K. W. that agrees with Kumārajīva's version.
5) भाष A. विमलाभस्वर Ca. Cb. °लाभाष W.
6) These three words are left out in B.
7) प्रभ left out in B. सूर K.
8) म्यायै Ca. Cb. K. म्यामुपादाय the rest.
9) स्वा Cb. माता left out in Ca. Cb.
10) ज्ञनेत्री A. K. Cb. W.
11) लो A. W. खावज्ञली B. इदज्ञलिं Cb.
12) एवं A. W.
13) म A. W. K. व B. Ca. मि Cb.
14) अभिज्ञ in Ca. only.
15) In Cb. added गत्वा.
16) मितं in all MSS.

र्मपुण्डरीकं नाम[1] धर्मपर्यायं विस्तरेण संप्रकाशयति[2]। तं श्रवणाय गमिष्यावः[3]। एवमुक्ते कुलपुत्रा विमलदत्ता राजभार्या विमलगर्भं दारकं विमलनेत्रं च दारकमेतदवोचत्। एष खलु[4] कुलपुत्रौ युवयोः पिता राजा प्रभव्यूको ब्राह्मणेष्वभिप्रसन्नस्तस्मान्न लप्स्यथ[5] तं तथागतं दर्शनायाभिगन्तुम्। अथ खलु कुलपुत्रा विमलगर्भो दारको विमलनेत्रश्च दारको दशनखसमुद्गलिं प्रगृह्य तां स्वमातरं[7] ज्ञनयित्रीमेतदवोचताम्[8]। मिथ्यादृष्टिकुले ऽस्मिन्नावां ज्ञातावावां[9] पुनर्धर्मराजपुत्राविति॥ अथ खलु कुलपुत्रा विमलदत्ता राजभार्या तौ द्वौ दारकावेतदवोचत्। साधु साधु कुलपुत्रौ युवां तस्य[10] स्वपितू राज्ञः प्रभव्यूकस्यानुकम्पायै किंचिदेव प्रातिहार्यं संदर्शयतम्। अप्येव नाम युवयोरत्तिके[12] प्रसादं कुर्यात्प्रसन्नचित्तश्चास्माकमनुज्ञानीयात्तस्य भगवतो ज्ञलधरगर्जितघोषमुस्वरनक्षत्रसंकुसुमिताभिज्ञस्य[15] तथागतस्यार्हतः सम्यक्संबुद्धमभिगन्तुम्॥

अथ खलु कुलपुत्रा विमलगर्भो दारको विमलनेत्रश्च दारकस्तस्यां वेलायां सप्ततालमात्रं[16] वैहायसमभ्युद्गम्य तस्य पितू राज्ञः प्रभव्यूकस्यानुकम्पायै बुद्धानुज्ञातानि[17] यम-

1) Left out in K.
2) Ca. Cb. K. add स्म.
3) MSS. मः.
4) Left out in A. K. W.
5) था A. Ca. W. थान् B. ते Cb. त K. It ought to be थस्.
6) Left out in Cb. K.
7) स्वां Ca. K. W.
8) ज्ञने A. K. W.
9) आवां left out in A.
10) युवाभ्यामस्य K.
11) सं in Ca. only.
12) प्रा A. Cb. W.
13) प्रसन्न left out in A.
14) चित्त left out in Ca. Cb. K.
15) अभिज्ञ in Ca. only.
16) तालं (leaving out मात्रं) Ca. Cb. K.
17) ना A. W.

कानि[1] प्रातिहार्याण्यकुरुताम्। तौ तत्रैवान्तरीक्षे[2] गतौ शय्यामकल्पयतां[3] तत्रैवान्तरीक्षे चङ्क्रमतस्तत्रैवान्तरीक्षे[4] राज्ञो व्यधुनीतां[5] तत्रैवान्तरीक्षे ऽधःकायाद्वारिधारां[6] प्रमुमोचतुर्ऊर्ध्व-[7] कायादग्निस्कन्धं प्रज्वालयतः स्मोर्ध्वकायाद्वारिधारां प्रमुमोचतुरधःकायादग्निस्कन्धं प्रज्वालयतः स्म[8]। तौ[9] तस्मिन्नेवाकाशे महान्तौ भूत्वा खुडुकौ भवतः खुडुकौ भूत्वा महान्तौ भवतः। तस्मिन्नेवान्तरीक्षे ऽन्तर्धायतः[10] पृथिव्यामुन्मज्जतः[11] पृथिव्यामुन्मज्जित्वाकाश उन्मज्जतः। इयद्भिः खलु पुनः कुलपुत्रा ऋद्धिप्रातिहार्यैस्ताभ्यां द्वाभ्यां दारिकाभ्यां स शुभव्यूहो राज्ञा स्वपिता विनीतः। अथ खलु कुलपुत्राः स राजा शुभव्यूहस्तयोर्दारिकयोस्तमृद्धिप्रातिहार्यं दृष्ट्वा[12] तस्यां वेलायां तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातो दशनखसमञ्जलिं[13] प्रगृह्य[14] तौ दारिकावेतदवोचत्। को युवयोः कुलपुत्रौ[15] शास्ता कस्य वा

1) Left out in Cb. यमलकानि K.

2) त्त B. K. W.

3) शय्यामवकल्पयतः Ca. शय्यां कल्पतम् K.

4) चंक्रम्यमेतयोतः A. चंक्रम्येतम् B. चंक्रमतः। K. चंक्रम्यतयो W. left out in Ca. Cb.

5) व्यधुनीता B. वियूनतः Ca. विधुनतः K.

6) रा K.

7) प्रमोचतुः A. W. प्रमुंचतुः B. प्रमुंचतः Ca. प्रमुमोचतः K.

8) From स्मो till प्रज्वालयतः left out in K.

9) Left out in all MSS., but added here conjecturally.

10) B. K. add च.

11) त्तधार्यतः A. अन्तर्हता B. ऽन्तर्धयतः Ca. ऽन्तर्धार्यतः K. अन्तर्धार्यतः W. Cp. Pāli *antaradhāyati.*

12) Left out in K.

13) A. W. add दृष्ट्व.

14) ली B. लीम् K.

15) त्रयोः K.

युवां शिष्याविति। अथ खलु कुलपुत्रास्तौ[1] द्वौ[2] दारिकौ तं राजानं शुभव्यूहमेतदवोचत्[3]। एष स[4] महाराज भगवाञ्जलधरगर्जितघोषमुस्वरनन्तनराजसंकुसुमिताभिज्ञस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तिष्ठति धियते यापयति रत्नमये बोधिवृक्षमूले धर्मासनोपविष्टः सदेवकस्य लोकस्य पुरतः[7] सद्धर्मपुण्डरीकं[8] नाम धर्मपर्यायं विस्तरेण संप्रकाशयति[9]। स आवयोर्भगवाञ्शास्ता[10] तस्यावां महाराज शिष्यौ। अथ खलु कुलपुत्राः स[11] राजा शुभव्यूहस्तौ दारिकावेतदवोचत्। पश्यामो वयं कुलपुत्रौ तं युवयोः शास्तारं। गमिष्यामो वयं तस्य भगवतः सकाशम्॥

अथ खलु कुलपुत्रास्तौ द्वौ दारिकौ[12] ततो ऽन्तरीक्षादवतीर्य येन स्वमाता[13] जनयित्री[14] तेनोपसंक्रामतामुपसंक्रम्य दशनखसमञ्जलिं प्रगृह्य स्वमातरं[13] जनयित्रीमेतदवोचताम्[15]। एष आवाभ्यामम्ब विनीतः स्वपितानुत्तरायां सम्यक्संबोधौ। कृतमावाभ्यां पितुः शास्तृकृत्यं। तदिदानीमुत्स्रष्टुमर्हस्यावां[16] तस्य भगवतः सकाशे प्रव्रजिष्याव इति॥

1) तौ left out in A. W.

2) द्वौ left out in Cb. K.

3) Rather चताम्.

4) Left out in B. Ca. Cb.

5) अभिज्ञ left out in all MSS.

6) सिंह added in A. W.

7) B. adds समारकस्य पुरतः सब्रह्मकस्य.

8) Left out in Ca. W.

9) Ca. Cb. K. add स्म.

10) वां द्का K.

11) Left out in K.

12) K. reads: पुत्रा स राजा तौ दारिकौ; A. W. leave द्वौ out also.

13) स्वा K.

14) ने W. left out in Cb.

15) ने A. W.

16) Left out in Ca. K.

17) त्मृष्टुंमर्कृश्च वाचावां A. त्स्रष्टुंमर्कृस्यवं B. त्स्रष्णांमकृमय्यावां Ca. त्मृष्टुंमर्कृस्यां Cb. त्मृष्टुंमकृस्यवाचावां W.

अथ खलु कुलपुत्रा विमलगर्भो दारको विमलनेत्रश्च दारकस्तस्यां वेलायां स्व[1]मातरं [2]ज्ञनयित्रीं गाथाभ्यामध्यभाषताम्॥

अनुज्ञानीह्यावयोरेव[3] प्रव्रज्यामनगारिकाम्।
आवां वै[4] प्रव्रजिष्यावो[5] दुर्लभो हि[6] तथागतः॥ १॥
औडुम्बरं[7] यथा पुष्पमतो[7] दुर्लभतरो जिनः।
उत्सृज्य प्रव्रजिष्यामो[8] दुर्लभा[9] क्षणसंपदा[10]॥ १॥

विमलदत्ता[11] राजभार्याह्॥

उत्सृजामि युवामद्य गच्छथा साधु[12] दारकौ।
वयं पि प्रव्रजिष्यामो दुर्लभो हि तथागत इति॥ ३॥

अथ खलु कुलपुत्रास्तौ द्वौ[13] दारकाविमे गाथे भाषित्वा[14] तौ[15] मातापितरावेतदवोच-

---

1) तां A. W. स्व B. Cb. स्वां Ca. K.

2) ज्ञने A. K. W.

3) उत्सृज्यस्व अस्वमस्माकं B. उत्सृज्यस्वाम्बमस्माकं K. Probably a more original reading; cp. Pāli *ossajjati*, against Skr. °सृजति.

4) वयं च B. वयं वै K.

5) मो Ca. K.

6) वै Ca. K.

7) ततो K.

8) मो B. Ca. Cb. K. वो A. W.

9) भा A. B. K. W. भाः Cb.

10) दः A. दा B. Ca. Cb. K. दाः W.

11) राजभार्या left out in B. Cb. K.

12) उत्सृज्याम्यद्य युष्माकं साधु गच्छत B. गच्छेथ K. उत्सृज्यामि° गच्छतां Ca. उत्सृज्याम्यहं युष्मान् साधु गच्छत Ch. गच्छेथा A. W.

13) Left out in A.

14) Left out in B.

15) K. adds स्व.

ताम्। साधम्ब तातित[1] वयं[2] सर्वे[3] सहिता भूत्वा गमिष्यामस्तस्य भगवतो ज्ञलधरगर्जित-घोषमुस्वरनन्दत्रराजसंकुसुमिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य सकाशमुपसंक्रमिष्यामस्तं भगवन्तं दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय[4]। तत्कस्य हेतोः। दुर्लभो ह्यम्ब तात बुद्धोत्पाद[5] उदुम्बरपुष्पसदृशो महार्णवयुगच्छिद्रकूर्मग्रीवाप्रवेशवत्[6]। दुर्लभप्रादुर्भावा अम्ब तात बुद्धा भगवन्तः। तस्मात्तर्ह्यम्ब तात परमपुण्योपस्तब्धा वयमीदृशे प्रवचन उपपन्नाः। तत्साधम्ब तातोत्सृज्[7]धमावां गमिष्यावस्तस्य भगवतो ज्ञलधरगर्जितघोषमुस्वरनन्दत्रराजसंकुसुमिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य सकाशे प्रव्रजिष्यावः। दुर्लभं ह्यम्ब तात तथागतानां दर्शनं। दुर्लभो ह्यद्य कालः। ईदृशो धर्मराजा। परमदुर्लभेदृशी क्षणसंपत्॥

तेन खलु पुनः कुलपुत्राः समयेन तस्य राज्ञः शुभव्यूहस्यात्तःपुराच्चतुरशीतिरन्तः-पुरिकासहस्राणयस्य सद्धर्मपुण्डरीकस्य धर्मपर्यायस्य भाजनभूतान्यभूवन्। विमलनेत्रश्च

---

1) एत Ca. रेष Cb. All यूयं for वयं.

2) सर्वे W. left out in Cb. सर्व the rest.

3) समग्रा K.

4) In Ca. K. only.

5) From बुद्ध till भावा अम्ब तात left out in B.

6) ग्रीवा Ca. Cb. K.

7) According to Kumārajīva's version, here is wanting a word such as काणा, or अन्ध or अन्धक in accordance with the Saṃyuktāgama-sūtra book 15.

8) व A.

9) ज्ञ Ca.

10) व Ca. K. म A. B. W.

11) अभिज्ञ in B. only.

12) ह्य in Ca. only. Either अद्य कालः or ईदृशो धर्मराजा an interpolation.

13) B. adds स्तेन कालेन.

14) पुरश्च Ca. पुरा च K.

15) भूत in B. Cb. K. only.

दारको ऽस्मिन्धर्मपर्याये चरितावी[1] विमलगर्भश्च दारको बक्कलपकोटीनयुतशतसकृत्राणि सर्वसत्त्वपापक्षकृने समाधौ चरितो ऽभूत्किमिति सर्वसत्त्वाः सर्वपापं क्षकेयुरिति[2]। सा च तयोर्दारकयोर्माता विमलदत्ता राजभार्या सर्वबुद्धसंगीतिं सर्वबुद्धधर्मगुह्यस्थानानि च संजानीते स्म[3]। अथ खलु कुलपुत्रा राजा प्रभव्यूकस्ताभ्यां द्वाभ्यां दारकाभ्यां तथागतशासने विनीतो ज्ञतारितश्च परिपाचितश्च सर्वस्वजनपरिवारः सा च विमलदत्ता राजभार्या सर्वस्वजनपरिवारा तौ च द्वौ दारकौ राज्ञः प्रभव्यूकस्य पुत्रौ द्वाचत्वारिंशद्भिः प्राणिसकृत्रैः सार्धं सान्तःपुरौ सामात्यौ सर्वे[5] सकिताः समग्रा येन भगवाञ्जलधरगर्जितघोषसुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तेनोपसंक्रामन्नुपसंक्रम्य तस्य भगवतः पादौ शिरसाभिवन्द्य तं भगवन्तं त्रिष्कृत्वः[8] प्रदक्षिणीकृत्यैकान्ते तस्थुः॥

अथ खलु कुलपुत्राः स भगवाञ्जलधरगर्जितघोषसुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्तथागतो ऽर्हन्सम्यक्संबुद्धो राजानं प्रभव्यूकं सपरिवारमुपसंक्रान्तं विदित्वा धार्म्या कथया संदर्शयति समादापयति समुत्तेजयति संप्रकर्षयति। अथ खलु कुलपुत्रा राजा प्रभव्यूकस्तेन भगवता धार्म्या कथया साधु च सुष्ठु च संदर्शितः समादापितः समुत्तेजितः संप्रकर्षितस्तस्यां वेलायां तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातः कनीयसो भ्रातुः पट्टं बद्ध्वा[10] राज्ये प्रतिष्ठाप्य सपुत्रस्वजनपरिवारः सा च विमलदत्ता राजभार्या सर्व-[11]

1) चरितावी वि Ca. K. चरित्री वि Cb. चरितवान्वि the rest.
2) क्षकेयु K.
3) Left out in K.
4) K. adds च.
5) K. adds च स, the others कि.
6) अभिज्ञ in Ca. only.
7) शिरोभि K.
8) सप्तकृत्वः A. B. W. सप्तकृत्व K. Cp. त्रिःखुत्तं, त्रिष्खुत, त्रिष्कृत्वा, Mahāvastu I, 212, 5, 13; 231, 1; 246, 5, 8; 236, 15. Pāli *tikkhattuṃ*.
9) अभिज्ञ in B. Ca. only.
10) MSS. बध्वा.
11) सर्व left out in B. Cb.

स्त्रीगणपरिवारा[1] तौ च द्वौ दारकौ सार्धं तैर्द्वाचत्वारिंशद्भिः[2] प्राणिसकृत्रैः सर्वे सकिताः समग्रास्तस्य भगवतो जलधरगर्जितघोषसुस्वरनक्षत्रसंकुसुमिताभिज्ञस्य[3] तथागतस्यार्हतः सम्यक्संबुद्धस्य प्रवचने श्रद्धयागारादनगारिकां प्रव्रजिताः। प्रव्रजित्वा[4] च[5] राजा प्रभव्यूकः सपरिवारश्चतुरशीतिवर्षसकृत्राणयभिपूक्तो विज्ञकार इमं सद्धर्मपुण्डरीकं धर्मपर्यायं चित्तयन्भावयन्पर्यवदापयन्[7]। अथ खलु कुलपुत्राः स[8] राजा प्रभव्यूकस्तेषां चतुरशीतीनां वर्षसकृत्राणामत्ययेन[9] सर्वगुणालंकारव्यूहं नाम समाधिं प्रतिलभते[10] स्म। सकृत्प्रतिलब्धाच्चास्य[11] समाधेः[12] तावदेव सप्ततालमात्रं[13] वैकायसमभ्युद्गच्छति स्म। अथ खलु कुलपुत्राः स[14] राजा प्रभव्यूको गगणतले[15] स्थितस्तं भगवन्तं जलधरगर्जितघोषसुस्वरनक्षत्रराजसंकुसुमिताभिज्ञं[16] तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। इमौ भगवन्मम पुत्रौ शास्तारौ भवतो[17] यदुताभ्यामृद्धिप्रातिहार्येण तस्मान्मकतो दृष्टिगताद्विनिवर्तितस्तथागतशासने[18]

1) परिवृता K.
2) तैश्चतुरशीतिभिः A. W.
3) अभिज्ञ in B. Ca. only.
4) प्रव्रजित्वा A. Ca. Cb. K. W. प्रव्रज्य B. In B. added स.
5) Left out in B.
6) A. W. add शत.
7) द् left out in B. Ca. K.
8) in Ca. only.
9) प्र for म in all but K.
10) ति K.
11) लम्भाच्च तस्य Cb. K. लाभसमा° W. left out in A.
12) Cb. K. add खलु.
13) मात्रं in B. only.
14) स in B. only.
15) ल Ca. K. W.
16) अभिज्ञ in B. Ca. only.
17) भगवतः। A. B. Ca. K. भगवतो Cb. Our reading conjectural.
18) कृता B. Cb. K.

च प्रतिष्ठापितः परिपाचितश्चावतारितश्च तथागतदर्शनाय च संचोदितः। कल्याणमित्रौ भगवन्मम[1] तौ द्वौ दारकौ पुत्रत्वेपेण मम गृहं उपपन्नौ[2] यदुत[3] पूर्वकुशलमूलस्मरणार्थम्[4]॥

एवमुक्ते भगवाञ्जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्तथागतो ऽर्हन्सम्यक्संबुद्धस्तं राजानं प्रभव्यूहमेतदवोचत। एवमेतन्महाराजैवमेतद्यथा[5] वदसि। अवरोपितकुशलमूलानि हि महाराज कुलपुत्राणां कुलदुहितॄणां च सर्वेषु भवगतिच्युत्युपपत्त्यायतनेषूपपन्नानां मुखानि[6] भवन्ति कल्याणमित्राणि यानि शास्तृकल्पेन प्रत्युपस्थितानि भवन्ति। यान्यनुत्तरायां सम्यक्संबोधौ शासकान्यवतारकाणि परिपाचकानि[7] भवन्ति[8]। उदारमेतन्महाराज स्थानं यदुत[9] कल्याणमित्रपरिग्रहस्तथागतदर्शनसमादापकः। पश्यसि त्वं महाराजैतौ द्वौ दारकौ। आह। पश्यामि भगवन्पश्यामि सुगत। भगवानाह। एतौ खलु पुनर्महाराज कुलपुत्रौ पञ्चषष्टीनां[10] गङ्गानदीवालिकासमानां[11] तथागतानामर्हतां सम्यक्संबुद्धानामन्तिके पूजां करिष्यतः[12] इमं च सद्धर्मपुण्डरीकं धर्मपर्यायं धारयिष्यतः[13] सत्त्वानामनुकम्पायै मिथ्यादृष्टीनां[14] च सत्त्वानां[14] सम्यग्दृष्टये वीर्यसंजननार्थम्॥

1) भवंत एतौ A.
2) गृहनुत्पन्नौ A. गृहमुत्पन्नौ W. गृहे उपपन्नौ Cb.
3) यदिदं Ca. Cb. K.
4) मूलमनुस्मर K.
5) एवमेतत् repeated in B. only.
6) ला A. ल B. Ca. Cb. K. W.
7) शासका A. शासनका K. सासना Cb.
8) चका Ca. K. चितानि the rest.
9) Left out in Ca. Cb. K.
10) यदिदं Ca. Cb. K.
11) षष्टि B.
12) लु Cb.
13) त A. K. तः B. W. त्ता Ca. त्ती Cb.
14) ष्यन्ति Cb. K.
15) Left out in B. Ca. Cb.

अथ खलु कुलपुत्राः[1] स राज्ञा प्रभव्यूहस्ततो गगणतलादवतीर्य दशनखमञ्जलिं प्रगृह्य[2] तं भगवन्तं जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञं[3] तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। तत्साधु भगवन्निर्दिशतु तथागतः कीदृशेन ज्ञानेन समन्वागतस्तथागतो ऽर्हन्सम्यक्संबुद्धो येन मूर्ध्न्युष्णीषो विभाति विमलनेत्रश्च भगवान्भ्रुवोर्मध्ये[4] चोर्णा विभाति शशिशङ्खपाण्डराभा[5] सा च[6] समसंहिता दन्तावली वदनान्तरे विराजति[7] बिम्बोष्ठश्च भगवांश्चारुनेत्रश्च सुगतः॥

अथ खलु कुलपुत्राः[8] स राज्ञा प्रभव्यूहः इयद्भिर्गुणैस्तं भगवन्तं जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञं[3] तथागतमर्हन्तं सम्यक्संबुद्धमभिष्टुत्य[9] चान्यैश्च गुणकोटीनयुतशतसहस्रैस्तं भगवन्तमभिष्टुत्य[10] तस्यां वेलायां[11] तं भगवन्तं जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञं[3] तथागतमर्हन्तं सम्यक्संबुद्धमेतदवोचत्। आश्चर्यं भगवन्यावन्महाधर्मिदं[12] तथागतशासनमर्चित्यगुणसमन्वागतश्च तथागतप्रवेदितो धर्मविनयो यावत्सुप्रज्ञप्ता च तथागतशिक्षा। अध्याशयेन[13] वयं भगवन्न भूयश्चित्तस्य[14] वशगा भविष्यामो न भूयो

1) In B. only.
2) प्रणम्य K.
3) अभिज्ञ in Ca. only.
4) भगवन्.K.
5) भाः A. W.
6) A. Ca. K. W. only add च.
7) ते Ca. Cb. K.
8) In B. only.
9) ला A. Cb. K. W.
10) ला A. W.
11) From भगवन्तमभि till तं left out in B.
12) Ca. K. add आश्चर्यं सुगत.
13) महात्म Cb. K.
14) K. adds ये.
15) स्य left out in K.

मिथ्यादृष्टेर्वशगा भविष्यामो न भूयः क्रोधस्य[1] वशगा भविष्यामो न भूयः पापकानां चित्तोत्पादानां वशगा भविष्यामः। एभिरहं भगवन्नियद्भिरकुशलैर्धर्मैः समन्वागतो नेच्छामि भगवतो ऽन्तिकम[4]मुपसंक्रमितुम्॥

स तस्य भगवतो जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्य[5] तथागतस्यार्हतः सम्यक्संबुद्धस्य पादौ शिरसाभिवन्द्यात्तरोत्तरगत एवास्थात्। अथ खलु[7] स[8] राजा शुभव्यूहः सा च विमलदत्ता राजभार्या शतसहस्रमूल्यं मुक्ताहारं भगवत उपर्यन्तरीक्षे प्रेप्सीत्[9]। समनन्तरक्षिप्तश्च स मुक्ताहारस्तस्य[11] भगवतो मूर्ध्नि मुक्ताहारः कूटागारः संस्थितो[13] ऽभूच्चतुरश्चतुःस्थूणः समभाग[14]ः सुविभक्तो दर्शनीयः। तस्मिंश्च कूटागारे पर्यङ्कः प्रादुर्भूतो ऽनेकद्रूप्यशतसहस्रसंस्तृतस्तस्मिंश्च पर्यङ्के तथागतविग्रहः पर्यङ्कबद्धः संदृश्यते स्म। अथ खलु राज्ञः शुभव्यूहस्यैतदभवत्। महानुभावमिदं बुद्धज्ञानमचिन्त्यगुणसमन्वा-

1) स्य in K. only.
2) यद्भिरकुश Ca. K. एतकैः पापकैरकुश O. यद्भिः कुशलमूलै° Cb.
3) In. O. added बभूव.
4) का A. B. K. W. क Ca. Cb. सान्तिके उप O.
5) अभिज्ञ in B. only.
6) अभिवंदित्वा A. W. वंदित्वा Ca. Cb.
7) In Ca. only.
8) In B. K. only स.
9) त्ते Cb. त्ते K. त्तो W. क्षिपतः O. left out in A. B. Ca.
10) निक्षि in Cb.
11) ततो K.
12) र A. B. Ca. रे W.
13) सं left out in Cb. K.
14) समो भागः A. W. समभागसः Cb. समः भागणः K. left out in B.
15) स्कृ Cb. K.
16) पर्यंकं बद्धः A. Cb. पर्यंकबद्धः W. पयङ्कबुद्धः K. °निषण्णः B. पर्यङ्कबद्धः O.

गतश्च तथागतो[1] यत्र हि नामायं तथागतविग्रहः कूटागारमध्यगतः संदृश्यते[2] प्रासादिको दर्शनीयः परमशुभवर्णपुष्करतया[3] समन्वावगतः॥

अथ खलु भगवाञ्जलधरगर्जितघोषमुस्वरनक्षत्रराजसंकुसुमिताभिज्ञस्तथागतश्चतस्रः[4] पर्षद आमन्त्रयते स्म। पश्यथ भिक्षवो यूयं[6] शुभव्यूहं राजानं गगणतलस्थं[7] सिंहनादं नदन्तम्। आह्वः। पश्यामो भगवन्[8]। भगवानाह[9]। एष खलु भिक्षवः शुभव्यूहो राजा मम शासने भिक्षुभावं कृत्वा शालेन्द्रराजो[11] नाम तथागतो ऽर्हन्सम्यक्संबुद्धो लोके भविष्यति विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां[12] च बुद्धो भगवान्विस्तीर्णवत्यां लोकधातावभ्युद्गतराजो[13] नाम स कल्पो भविष्यति। तस्य खलु[14] पुनर्भिक्षवः शालेन्द्रराजस्य तथागतस्यार्हतः[15] सम्यक्संबुद्धस्याप्रमेयो बोधिसत्त्वसंघो भविष्यत्यप्रमेयः[16] श्रावकसंघः। समा पाणितलज्ञाता[17] च वैडूर्यमयी सा विस्तीर्णवती लोकधातुर्भविष्यति। एवमचिन्त्यः स तथागतो ऽर्हन्सम्यक्संबुद्धो भविष्यति। स्यात्खलु

1) च तथागतो left out in Cb.
2) स्म added in all but K. O.
3) ल O.
4) अभिज्ञ in B. Ca. only.
5) धं Ca.
6) यूयं is put in before भिक्षवो in B. O.
7) स्थितं Cb. गगनतले स्थितं O.
8) भगवान् left out in A. Cb. W.
9) भगवन् left out in B. K. and भगवानाह in O.
10) एष भोः पुनर्भि O.
11) साले A. साले Ca. राजा in O.
12) देवमनुष्याणां O.
13) राजा O.
14) भोः O.
15) अर्हतः सम्यक्संबुद्धस्य omitted in O.
16) यश्चास्य O.
17) Left out in Ca. Cb. वैडूर्यमयो wanting in O.

पुनः कुलपुत्रा युष्माकं काङ्क्षा वा विमतिर्वा विचिकित्सा वा[1] अन्यः स तेन कालेन तेन समयेन शुभव्यूहो नाम राजाभूत्। न खलु[2] पुनः कुलपुत्रा युष्माभिरेवं द्रष्टव्यम्[3]। तत्कस्य हेतोः। अयमेव स पद्मश्रीर्बोधिसत्त्वो महासत्त्वस्तेन कालेन तेन समयेन शुभव्यूहो नाम राजाभूत्। स्यात्खलु पुनः कुलपुत्रा युष्माकं[4] काङ्क्षा वा विमतिर्वा विचिकित्सा वा[1] अन्या सा तेन कालेन तेन समयेन विमलदत्ता नाम राजभार्याभूत्। न खलु पुनः कुलपुत्रा युष्माभिरेवं द्रष्टव्यम्। तत्कस्य हेतोः। अयं[5] स वैरोचनरश्मिप्रतिमण्डितधन्नराजो नाम बोधिसत्त्वो महासत्त्वस्तेन कालेन तेन समयेन विमलदत्ता नाम राजभार्याभूत्तस्य राज्ञः शुभव्यूहस्यानुकम्पायै तेषां च सत्त्वानां राज्ञः शुभव्यूहस्य[6] भार्यात्वमभ्युपगता[7] अभूत्। स्यात्खलु पुनः कुलपुत्रा युष्माकं काङ्क्षा वा विमतिर्वा विचिकित्सा वा अन्या तौ[8] तेन कालेन तेन समयेन द्वौ द्वारकावभूताम्[9]। न खलु पुनः कुलपुत्रा युष्माभिरेवं द्रष्टव्यम् तत्कस्य हेतोः। इमौ तौ भैषज्यराजश्च भैषज्यसमुद्गतश्च तेन कालेन तेन समयेन तस्य राज्ञः शुभव्यूहस्य पुत्रावभूताम्[9]। एवमचिन्त्यगुणसमन्वागतो[10] कुलपुत्रा भैषज्यराजो[11] भैषज्यसमुद्गतश्च बोधिसत्त्वौ[12] महासत्त्वौ बकुबुद्धकोटीनयुतशतसहस्रावरोपितकुशलमूलावेता-

1) विचिकित्सा वा omitted in O.
2) भोः O.
3) पुनरेवं द्र O.
4) स्यात्ते भोः पुनः कुलपुत्रेवं का O.
5) Left out in B. Ca. K.
6) Left out in Cb.
7) भ्युद्गतो Cb.
8) तौ K.
9) A. K. W. अभूवताम्.
10) तौ Cb. only; तः in the other MSS.
11) Left out in Cb. ज्ञ K.
12) त्वा Cb. त्वो in the other MSS.

वुभावपि सत्पुरुषावचिन्त्यधर्मसमन्वागतौ[1]। ये चैतयोः सत्पुरुषयोर्नामधेयं धारयिष्यन्ति[2] ते सर्वे नमस्करणीया भविष्यन्ति सदेवकेन लोकेन[3]॥

अस्मिन्खलु पुनः पूर्वयोगपरिवर्ते भाष्यमाणे चतुरशीतीनां[4] प्राणिसहस्राणां विरजो विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धम्[5]॥

॥ इति श्रीसद्धर्मपुण्डरीके[6] धर्मपर्याये शुभव्यूहराजपूर्वयोगपरिवर्तो[7] नाम पञ्चविंशतिमः[8]॥

1) समुद्गतौ K.
2) धारयंति A.
3) न लोकेन left out in A. W. सदेवके लोके K.
4) A. W. add प्राणिशतानां.
5) A. W. add वि.
6) MSS. add इति.
7) आर्य (for इति श्री) K.
8) From इति till राज left out in B. Ca. Cb.
9) षट् (for पञ्च) Cb.

XXVI.

अथ खलु समन्तभद्रो बोधिसत्त्वो महासत्त्वः पूर्वस्यां दिशि गणनां समतिक्रान्तैर्बोधिसत्त्वैर्महासत्त्वैः सार्धं परिवृतः पुरस्कृतः प्रकम्पद्भिः[1] क्षेत्रैः प्रवर्षद्भिः पद्मैः प्रवाद्यमानैस्तूर्यकोटीनयुतशतसहस्रैर्महता[2] बोधिसत्त्वानुभावेन[3] महत्या बोधिसत्त्वविकुर्वया[4] महत्या बोधिसत्त्वर्द्ध्या महता[5] बोधिसत्त्वमाहात्म्येन महता[6] बोधिसत्त्वसमाकृतेन[7] महता बोधिसत्त्वतेजसा ज्राज्वल्यमानेन[8] महता बोधिसत्त्वयानेन महता बोधिसत्त्वप्रातिहार्येण महद्भिर्दिव्यैर्वनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यैः[9][10] परिवृतः पुरस्कृत एवमचिन्त्यैर्ऋद्धिप्रातिहार्यैः समन्तभद्रो बोधिसत्त्वो महासत्त्व इमां सहां लोकधातुं संप्राप्तः। स[11] येन गृध्रकूटः[12] पर्वतराजो येन च भगवांस्तेनोपसंक्रामदुपसंक्रम्य[13] भगवतः पादौ शिरसाभिवन्द्य[14]

1) A. adds य.
2) K. adds च.
3) त्वानुकंपेन B. त्वगणेन Cb.
4) K. adds न (for ण).
5) महत्या A. B. K. W.
6) महत्या Ca. K.
7) समन्वितेन A. Ca. Cb. K. W. समाकृतेन B.
8) From न till यानेन महता left out in Cb.
9) महता देव B. महत्या देव Ca. Cb. K. W. महद्भिर्देव A.
10) मनुष्यविक्रीडया । अनेकैर्देव °मनुष्यैः B. मनुष्यविकुर्वया Ca. K. महंति देव° ष्यैः Ca. महद्भिः। देव° K.
11) समयेन Ca. K. तेन समयेन Cb.
12) ट A. B. Cb. W.
13) पसंक्रामदु left out in K.
14) सा वन्दित्वा A. Ca. K. W. more original.

सप्तकृत्वः प्रदक्षिणीकृत्य भगवन्तमेतदवोचत् अहं भगवंस्तस्य भगवतो रत्नतेजोऽभ्युद्गतराजस्य[1] तथागतस्य बुद्धक्षेत्रादिहागत[2] इहे[3] भगवन्सहायां[4] लोकधातावयं सद्धर्मपुण्डरीको धर्मपर्यायो देशयत इति[5] तमहं श्रवणायागतो भगवतः शाक्यमुनेस्तथागतस्य सकाशममूनि च भगवन्नेतावन्ति बोधिसत्त्वशतसहस्राणीमं सद्धर्मपुण्डरीकं धर्मपर्यायं श्रवणायागतानि। तत्साधु भगवन्देशयतु तथागतो ऽर्हन्सम्यक्संबुद्ध इमं सद्धर्मपुण्डरीकं धर्मपर्यायमेषां[6] बोधिसत्त्वानां महासत्त्वानां विस्तरेण[7]। एवमुक्ते भगवान्समन्तभद्रं बोधिसत्त्वं महासत्त्वमेतदवोचत्। उद्धटितज्ञा[8] हि कुलपुत्रैते बोधिसत्त्वा महासत्त्वाः। अपि त्वयं सद्धर्मपुण्डरीको धर्मपर्यायो पडुतांसंभिन्नतथतां[9][10]। ते बोधिसत्त्वा आकूः। एवमेतद्भगवन्नेवमेतत्सुगत[11]। अथ खलु[12] या तस्यां पर्षदि भिक्षुभिक्षुण्युपासकोपासिकाश्च संनिपतितास्तासां सद्धर्मपुण्डरीके धर्मपर्याये प्रतिष्ठापनार्थं पुनरपि भगवान्समन्तभद्रं बोधिसत्त्वं महासत्त्वमेतदवोचत्। चतुर्भिः कुलपुत्र धर्मैः समन्वागतस्य मातृग्रामस्यायं सद्धर्मपुण्डरीको धर्मपर्यायो हस्तगतो भविष्यति। कतमैश्चतुर्भिः। पडुत[13] बुद्धैर्भगवद्भिरधिष्ठितो भविष्यत्यवरोपितकुशलमूलश्च भविष्यति नियतराशिव्यवस्थितश्च[14] भविष्यति सर्वसत्त्वपरित्राणार्थमनुत्तरा-

1) रत्नाप्रभाभ्यु W.
2) तः। Ca. K.
3) Ca. adds च.
4) सहे B.
5) Left out in K.
6) यायमेव A. Cb. W. यायं B. Ca. यायं। एषां K.
7) K. adds संप्रकाशयतु.
8) उद्ध K. उद्धा the other MSS.
9) सं left out in B. K.
10) तेति K. Read तः.
11) All but B. K. add इति.
12) ये A. W. या K. left out in B. Ca.
13) यदिदं K.
14) व्य left out in Ca. K.

यां[1] सम्यक्संबोधौ चित्तमुत्पादयिष्यति । एभिः[2] कुलपुत्र चतुर्भिर्धर्मैः समन्वागतस्य मातृग्रामस्यायं सद्धर्मपुण्डरीको धर्मपर्यायो हस्तगतो भविष्यति ॥

अथ खलु समन्तभद्रो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । अहं भगवन्पश्चिमे काले पश्चिमे समये पश्चिमायां पञ्चशत्यां वर्तमानायामेवंरूपाणां[3][4][5] सूत्रान्तधारकाणां भिक्षूणां रक्षां करिष्यामि स्वस्त्ययनं करिष्यामि दण्डपरिहारं करिष्यामि विषदूषणं करिष्यामि यथा न कश्चित्तेषां धर्मभाणकानामवतारप्रेक्ष्यवतारगवेष्यवतारं लप्स्यते न मारः[6] पापीयानवतारप्रेक्ष्यवतारगवेष्यवतारं[7] लप्स्यते न मारपुत्रा न मारकायिका देवपुत्रा[8] न मारकन्या न मारपार्षद्या यावन्न भूयो मारपर्युत्थितो[9] भविष्यति । न देवपुत्रा न यक्षा न प्रेता न भूतना न कृत्या न वेताडास्तस्य[10] धर्मभाणकस्यावतारप्रेक्षिणो[11] ऽवतारगवेषिणो ऽवतारं लप्स्यन्ते[12] । अहं भगवंस्तस्य धर्मभाणकस्य सततसमितं नित्यकालं रक्षां करिष्यामि । यदा[13][14] च स धर्मभाणको ऽस्मिन्धर्मपर्याये चित्तायोगमनुयुक्तश्चङ्क्रमाभिरूढो[15] भविष्यति तदाहं

1) याः K.
2) बोधेश्चित्तमुत्पादयिष्यति । एभिश्च K. उत्पादितुं भविष्यति the other MSS.
3) नी K.
4) वर्तमानायामेव B. °मेवं K.
5) रूपाणां in Ca. only.
6) रः A. Ca. W. रूः B. K.
7) गवेष्यवतारं in B. only.
8) देवता B.
9) र्युपस्थि A. Ca. र्युपस्ति W.
10) डास्वस्त्यस्तु तस्य A. डास्वस्त्यस्तुस्तस्य W.
11) कस्यान्तिकावतार K.
12) ते A. Ca. W. न्ते B. K.
13) In Ca. K. only.
14) In B. only.
15) नुप्राप्तः । K.

भगवंस्तस्य धर्मभाणकस्यान्तिके श्वेतषड्दन्तं गजराजानमभिरुह्य[1] तस्य धर्मभाणकस्य चङ्क्रमकुटीमुपसंक्रमिष्यामि[2][3] बोधिसत्त्वगणपरिवृतो ऽस्य धर्मपर्यायस्यारक्षायै[4] । यदा पुनस्तस्य धर्मभाणकस्यास्मिन्धर्मपर्याये चित्तायोगमनुयुक्तस्य सत इतो धर्मपर्यायादन्यतरः पदव्यञ्जनं परिभ्रष्टं[5] भविष्यति तदाहं तस्मिन्श्वेतषड्दन्ते गजराजे ऽभिरुह्य तस्य धर्मभाणकस्य संमुखमुपदर्शयित्वा[6][7] इमं धर्मपर्यायमविकलं प्रत्युच्चारयिष्यामि । स[8] च धर्मभाणको ममात्मभावं दृष्ट्वेमं[9] च धर्मपर्यायमविकलं ममान्तिकाच्छ्रुत्वा[10] तुष्ट उदग्र[11] आत्तमनाः[12] प्रमुदितः[13] प्रीतिसौमनस्यजातो[13] भूयस्या मात्रयास्मिन्धर्मपर्याये वीर्यमारप्स्यते[14][15] मम च सकृद्दर्शनेन समाधिं प्रतिलप्स्यते धारणयावर्तां च नाम धारणीं प्रतिलप्स्यते कोटीशतसहस्रावर्तां च नाम धारणीं प्रतिलप्स्यते[15] सर्वकृतकौशल्यावर्तां च नाम धारणीं प्रतिलप्स्यते[15] ॥

ये[16] च[17] भगवन्पश्चिमे काले पश्चिमे समये पश्चिमायां पञ्चशत्यां भिक्षवो वा भिक्षुण्यो[18]

1) राज in Ca. only.
2) माकूटी K. मकुश W.
3) B. reads णकस्य मुखमुपदर्शयिष्यामि.
4) यस्य संरक्षाये K.
5) ष्टुं W.
6) In A. W. only.
7) मुद्दर्शयित्वा A. मुपदर्सयिष्यामि B.
8) ते B. K.
9) का B. K.
10) Left out in K.
11) Left out in B. तुष्टा उदग्रा K. W.
12) नासः B.
13) ता B. ताः K.
14) मौर Ca. मार K. माल the rest.
15) न्ते B. K.
16) येन A. B. W. ये च Ca. ये K.
17) वा A. B.
18) ण्युपासकोपासिका वा एवं K.

वोपासका वोपासिका वैवं सूत्रान्तधारका एवं सूत्रान्तलेखका[1] एवं सूत्रान्तमार्गका[1] एवं सूत्रान्तवाचका[1] ये[2] पश्चिमे काले पश्चिमे समये पञ्चशत्यामस्मिन्[3]धर्मपर्याये त्रिसप्तकमेकविंशतिदिवसानि चङ्क्रमाभिरूढा[4][5] अभियुक्ता भविष्यन्ति[6] तेषामहं सर्वसत्त्वप्रियदर्शनमात्मभावं[7] संदर्शयिष्यामि। तमेव श्वेतं षड्दन्तं गजराजमभिरुह्य[8] बोधिसत्त्वगणपरिवृत एकविंशतिमे दिवसे तेषां धर्मभाणकानां चङ्क्रममागमिष्याम्यागत्य[9] च तान्धर्मभाणकान्परिसंहर्षयिष्यामि[10] समादापयिष्यामि[11] समुत्तेजयिष्यामि संप्रहर्षयिष्यामि। धारणीं चैषां दास्यामि[12] यथा ते धर्मभाणका न केनचिद्विषणीया[13] भविष्यन्ति न चैषां मनुष्या वामनुष्या वावतारं लप्स्यन्ते न च नार्यो[14] ऽपसंहरिष्यन्ति[15]। रक्षां चैषां करिष्यामि स्वस्त्ययनं करिष्यामि दण्डपरिहारं करिष्यामि[16] विषदूषणं करिष्यामि[17]। तेषां च वयं भगवन्धर्मभाणका-

1) Left out in B.

2) In B. K. only.

3) B. adds वर्तमानायाम्.

4) भि left out in K.

5) भिरूढा left out in A.

6) From तेषा° till धारणी चैषां left out in Cb.

7) Left out in K.

8) (पा)एडरं षड्दन्तं कुञ्जराजानम° O.

9) त्वा A. K. W.

10) संहरिष्या A. W. संदर्शयिष्या K. परि wanting in O.

11) Left out in Ca. W.

12) यदा Ca. च is added in B. Ca. Cb.

13) कस्य A. B. Ca. O.

14) From मनुष्या till नार्योप left out in B.

15) नारीभिः संक्रियते O.

16) Left out in Cb.

17) Left out in A. K. W.

नामिमानि धारणीपदानि[1] दास्यामि। तानि[2] भगवन्धारणीपदानि तद्यथा[3]। अदण्डे दण्डपति[4] दण्डावर्तनि दण्डकुशले दण्डसुधारि सुधारे सुधारपति[5] बुद्धपश्यने सर्वधारणि[6] आवर्तनि संवर्तनि संघपरीक्षिते संघनिर्घातनि[7][8] धर्मपरीक्षिते सर्वसत्त्वरुतकौशल्यानुगते सिंहविक्रीडिते[9] अनुवर्ते वर्तनि वर्तालि स्वाहा। इमानि तानि[10] भगवन्धारणीपदानि यस्य बोधिसत्त्वस्य महासत्त्वस्य श्रोत्रेन्द्रियस्यावभासमागमिष्यन्ति[11] वेदितव्यमेतत्समन्तभद्रस्य[12] बोधिसत्त्वस्य महासत्त्वस्याधिष्ठानमिति[13]॥

अयं च भगवन्सद्धर्मपुण्डरीको धर्मपर्यायो ऽस्मिञ्जम्बुद्वीपे प्रचरमाणो येषां बोधिसत्त्वानां महासत्त्वानां हस्तगतो भविष्यति तैर्भगवन्धर्मभाणकैरेवं वेदितव्यम्। समन्तभद्रस्य बोधिसत्त्वस्य महासत्त्वस्यानुभावेन यदस्माकमयं धर्मपर्यायो हस्तगतः समन्तभद्रस्य बोधिसत्त्वस्य महासत्त्वस्य तेजसा। समन्तभद्रस्य बोधिसत्त्वस्य महासत्त्वस्य चर्यायास्ते भग-

1) पदानि left out in A. भाणकानामारक्षानुगुप्त्या धारणिपदानि भाषिष्यामि। O.

2) तानीमानि B. K. तत्रेमानि O.

3) शृणुः A. म धर्मभाणकः शृणोति॥ तद्यथा O.

4) दण्डपतिवते दण्डावर्ते दण्डावर्तनि O.

5) दण्डसुधरे। सुधरे। सुधारपति। O.

6) सर्व only in O., then आवर्तने. Then follows in it सर्वभाष्यावर्तने। सुआवर्तने। संघपरीक्षणि। संघनिर्घातनि। सद्धर्मसुपरीक्षिते। असंगे। संगापगते। तृग्रधसंगतुल्यप्राप्ते। सर्वसंगसमतिक्रान्ते। सर्वधर्मसुपरीक्षिते। सर्वसत्व°. Cp. English transl. p. 435.

7) तने A. W. शने B. सनि Ca. सने K.

8) B. adds स.

9) From अनुवर्ते till स्वाहा in A. W. only.

10) Left out in K.

11) Sic O. स्यात्मभावस्याभासमागमिष्यन्ति; स्याभासमा° Ca. Cb.

12) एतत् left out in B. K.

13) स्य तद्धि Ca. स्येदमधि K. स्यैतद्धि O.

14) यदा K.

वन्सत्त्वा लाभिनो भविष्यन्ति[1] बुद्धबुद्धावरोपितकुशलमूलाश्च ते सत्त्वा भविष्यन्ति तथागतपाणिपरिमार्जितमूर्धानश्च[2] ते भगवन्सत्त्वा भविष्यन्ति। य इदं[3] सूत्रं लिखिष्यन्ति धारयिष्यन्ति मम तेभगवन्प्रियं[4] कृतं[5] भविष्यति। य[6] इदं सूत्रं लिखिष्यन्ति ये चास्यार्थमनुभोत्स्यन्ते लिखित्वा च ते भगवन्निदं सूत्रमितश्च्युत्वा[7] त्रयस्त्रिंशतां देवानां सभागतायोपपत्स्यन्ते सक्रोपपन्नानां चैषां चतुरशीतिरप्सरसां सहस्राण्युपसंक्रमिष्यन्ति[8]। ते ऽधिमात्रेण मुकुटेन देवपुत्रास्तासामप्सरसां मध्ये स्थास्यन्ति। ईदृशः कुलपुत्रा इमं धर्मपर्यायं लिखित्वा पुण्यस्कन्धः कः पुनर्वादो य एतमुद्देक्ष्यन्ति[9] स्वाध्यायिष्यन्ति चित्तयिष्यन्ति मनसिकरिष्यन्ति। तस्मात्तर्हि कुलपुत्राः सत्कृत्यायं सद्धर्मपुण्डरीको धर्मपर्यायो लिखितव्यः सर्वचेतः समन्वाहृत्य[11]। यश्चाविक्षिप्तेन[12] मनसिकारेण[13] लिखिष्यति तस्य बुद्धसहस्रं हस्तमुपनामयिष्यति मरणकाले चास्य बुद्धसहस्रं संमुखमुपदर्शनं करिष्यति[15]। न च दुर्गतिविनिपातगामी भविष्यति। इतश्च्युतश्च तुषितानां देवानां सभागतायोपपत्स्यते[16] यत्र स मैत्रेयो बोधि-

1) भवन्ति Cb.
2) मूर्धानश्च in all MSS.
3) इमं A. B. Cb. K. W. इदं Ca.
4) ते Ca. च तेन B. K. चैतेन the other MSS.
5) य Ca.
6) From य till लिखिष्यन्ति left out in Cb.
7) श्चयित्वा B. K. meant च्यवित्वा.
8) भा B. K. क्रा the rest. Cp. below. note 16.
9) तिं अप्स K.
10) य एतमुद्दे A. W. Cb. यैः पुनरुद्दे B. यं उद्दे K.
11) From सर्वे till त्य left out in B. सर्वे A. सर्व Ca. Cb. W. सर्व चेत °हृत्य K. °ह्यत्य A. Ca. Cb. W.
12) विक्षिपेण Cb.
13) मनसिक्रा A. K. W. मनस्का B. Ca. Cb.
14) हस्ते उप Cb.
15) सं in Ca. only.
16) सभागता A. B. Ca. K. W. सहताच्यता Cb. °तायो Prākṛtic for °तायामु.

त्त्वो महासत्त्वस्तिष्ठति द्वात्रिंशद्वरलक्षणो[1] बोधिसत्त्वगणपरिवृतो ऽप्सरःकोटीनयुतशतसहस्रपुरस्कृतो धर्मं देशयति[2]। तस्मात्तर्हि कुलपुत्राः[3] पण्डितेन कुलपुत्रेण वा कुलदुहित्रा वायं सद्धर्मपुण्डरीको धर्मपर्यायः सत्कृत्य लिखितव्यः सत्कृत्यो[4]द्दिष्टव्यः सत्कृत्य स्वाध्यापितव्यः सत्कृत्य मनसिकर्तव्यः। इमं कुलपुत्रा धर्मपर्यायं लिखित्वो[5]द्दिश्य स्वाध्यापित्वा[6] भावयित्वा मनसिकृत्वैवमप्रमेया गुणा भविष्यन्ति। तस्मात्तर्हि तेन[7] पण्डितेन[8] भगवन्कुलपुत्रेण[9] वा कुलदुहित्रा वायं सद्धर्मपुण्डरीको धर्मपर्यायो धारयितव्य एतावत्तस्तेषां[10] गुणानुशंसा भविष्यन्ति। तस्मात्तर्हि भगवन्नहमपि तावदिमं धर्मपर्यायमधिष्ठास्यामि[11] यथा भगवन्ममाधिष्ठानेनायं धर्मपर्यायो ऽस्मिञ्जम्बुद्वीपे प्रचारिष्यतीति[12]॥

अथ खलु तस्यां वेलायां[12] भगवाञ्शाक्यमुनिस्तथागतो ऽर्हन्सम्यक्संबुद्धः समन्तभद्राय बोधिसत्त्वाय महासत्त्वाय साधुकारमदात्। साधु साधु समन्तभद्र यत्र हि नाम त्वमेवं बहुजनहिताय[13] बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय प्रतिपन्नः एतमचित्यधर्मसमन्वागतो ऽसि महाकरुणासंगृहीतेनाध्याशयेनाचित्यसंगृहो-

1) द्वाचत्वारिंशत् वरलक्षणधर B. द्वात्रिंशल्लक्षणो Cb.
2) A. K. W. Cb. add स्म.
3) Left out in A. K. W.
4) Left out in B.
5) दिशित्वा A. Ca. Cb. K. W. दिश्य B.
6) स्वाध्याय्य B. Ca.
7) In Cb. only.
8) Left out in B. Cb.
9) Left out in B. Ca. Cb.
10) एतांस्तेषां K.
11) सद्धर्मपुंडरीको धर्मपर्यायो क्षसि Cb.
12) Left out in Cb.
13) From बहुजनसुखाय till सुखाय left out in Cb.
14) य A. K.
15) सम । गृ A. W. समागृ K.

तेन चित्तोत्पादेन यस्त्वं स्वयमेव तेषां धर्मभाणकानामधिष्ठानं करोषि। ये केचित्कुलपुत्राः समन्तभद्रस्य बोधिसत्त्वस्य महासत्त्वस्य नामधेयं धारयिष्यन्ति वेदितव्यं तैः शाक्यमुनिस्तथागतो दृष्ट इति। अयं[1] च सद्धर्मपुण्डरीको धर्मपर्यायस्तस्य भगवतः शाक्यमुनेरन्तिकाच्छ्रुतः[2] शाक्यमुनिश्च तथागतस्तैः पूजितः शाक्यमुनेश्च तथागतस्य धर्मं देशयतः साधुकारो ऽनुप्रदत्तः[3]। अनुमोदितश्चायं धर्मपर्यायो भविष्यति। शाक्यमुनिना च[4] तथागतेन तेषां मूर्ध्नि पाणिः[5] प्रतिष्ठापितो भविष्यति। भगवांश्च शाक्यमुनिस्तेषांशीर्षैरवच्छादितो भविष्यति। तथागतशासनपरिग्राहकाश्च ते समन्तभद्र कुलपुत्रा वा कुलदुहितरो वा वेदितव्याः। न च तेषां लोकायते रुचिर्भविष्यति न काव्यप्रसृताः सत्त्वास्तेषामभिरुचिता[6] भविष्यन्ति[7] न नृत्तका न मल्ला नर्त्तका न शौण्डिकौरभ्रिककौक्कुटिकसौकरिकस्त्रीपोषकाः[8] सत्त्वास्तेषामभिरुचिता भविष्यन्ति[9]। ईदृशांश्च[10] सूत्रान्ताञ्श्रुत्वा[11] लिखित्वा धारयित्वा[12] वाच-

1) Sic Cb. दत्ययं the rest.

2) B. adds इति.

3) कारमनु A. K. W. कारानु B. कारो ऽनु Cb.

4) Left out in A. K. W.

5) Left out in Cb.

6) भिरुच्यता A. भिरुचिता B. K. Ca. भिरुचिकुता W.

7) ति B. A.

8) न नृत्तका न मल्ला न ऋल्लका न सौण्डिकौरभ्रिक्कुक्कुटिकसौकरिकस्त्रीपोषकाः A.

न नृत्ता न मल्ला न सैनिकैरभिककौक्कुटिकसौ° B.

न नृत्तना न मल्ला न ऋल्लका न सौण्डिकौरभ्रिक्काक्कुटिकसौ°

°षकाः Ca. K.

न नृत्तका न मल्ला न ऋल्लका न सौ कौ क्काक्कुटिकौसौ°

°सकाः W.

